0046079A

Processed at
The Preservation & conservation
Laboratory of
The Asiatic Society of Bombay
Date Dec. 08.

Digitized with financial assistance from the
Government of Maharashtra
on 09 March, 2016

안-I

Nilkantha Dixit

1) Nilakantha Champu — 891.21
Nil/Cha

2) Heturamayan - Vithoba Anna - 891.21
Vit/Het.

3) kaleyakutuhalam nam prahasan - 891.22
Bha/kal

4) Shri Shivakavyasya . SK 891.21
pur/shr.

5) Sushlokalaghavam - Vithalpant - SK 891.2
Vit/Sus

6) Shri Ram charitmahakavyam - Yuvarajkavi —
SK 891.21
Yuv/Shr

7) Vedantakeshri - Sankaracharya -
181.482
San/Ved

8) Shivarajabhushanakavya - Bhushana —
891.431
Bhu/Shi

9) Componypratap nandanam — Bindumadhav —
SK 891.22
Bin/Com

10) Shri krishna Bhakti chandrika natakam - Anantdeo — 891.22
Ana/Shr

11) Anubhuti lesh - Vamanapandit —
SK 891.21
Vam/An

12) Shri Atha prabhuvansha kavyam -
SK 891.21

V
SK 891.21
Nil/Cha
46079



46079

॥ नीलकंठ चंपू ॥

॥ श्रीशं वंदे ॥

वंदे वांछितलाभाय कर्म किं तच्च कथ्यते ॥
किं दंपतिमिति ब्रूयामुताहो दंपती इति ॥ १ ॥
दृष्ट्वा कौस्तुभमप्सरोगणमपि प्रक्रांतवादा मिथो
गीर्वाणाः कति वा न संति भुवने भारा दिवः केवलं ॥
निष्क्रांते गरले द्रुते सुरगणे निश्चेष्टिते विष्टपे
माभैष्टेति गिरा विरासधुरि यो देवस्तमेव स्तुमः ॥ २ ॥
लीलालीढपुराणसूक्तिशकलावष्टंभसंभावना-
पर्यस्तश्रुतिसेतुभिः कतिपयैर्नीते कलौ सांद्रतां ॥
श्रीकंठोवततार यस्य वपुषा कल्क्यात्मनेवाच्युतः
श्रीमानप्पयदीक्षितः स जयति श्रीकंठविद्यागुरुः ॥३ ॥

यः संरंभः कृतिविरचने दुष्कवीनामभेद्यो
यच्चैकाग्र्यं तदुचितपदान्वेषणे चित्तवृत्तेः ॥
लभ्यं तच्चेदपि कवयतामंजसस्त्रीण्यहानि
स्यादेवं किं सरसकवितारा[1]ज्यदुर्भिक्षयोगः ॥ ४ ॥

अथवा किमिति स्मरामि दुष्कवीनधुना ।
सकलभुवनैकमंगलशंकरगुणवर्णनप्रवृत्तेन ॥
न स्मरणीयाः कुधियो लोकायतिका[2] इव व्रतस्थेन ॥ ५ ॥
कति कवयः कति कृतयः कति लुप्ताः कति चरंति कति शिथिलाः ॥
तदपि प्रवर्तयति मां शंकरपादाब्जसंकथालोभः ॥६ ॥

देवानामपि दैवतं गुरुमपि प्राचां गुरूणामिह
श्रीमंतं मदनांतकं कथमपि स्तोतुं कृतो निश्चयः ॥
तेन त्वां त्वरयामि भारतिबलात्कृष्टापि दुष्टे पथि
प्रौसेनोपहतापि जातु कुपिता मास्म प्रसादं त्यजः ॥ ७ ॥

---

१ दकोरोन्ने कलत्रे च छेदे दाने च दातरीति मेदिनी. दं कलत्रं बुधैः प्रोक्तमिति कोशः. २ इह. ३ कवनं कुर्वतां. ४ चार्वाकाः. ५ शास्त्रविरोधेन पक्षे स्पष्टं.

९२७१

नंतव्याः कवयः कतीह बहु मंतव्या रसज्ञाः कती-
त्येतावत्त्वलसः करोमि कवयो तृष्यंतु रुष्यंतु वा ॥
आवात्स्यायनतंत्रमाश्रुतिशिरःसित्कांतमुच्चावचा
विद्या यत्प्रभवा जयंति भुवि तां वंदे गिरां दैवतं ॥ ८ ॥

चौर्येण प्रणयेन वापहरतः पल्लीषु गव्यान्यपि
स्तूयंते चरितानि चित्कविकुलोद्गीतानि गाथाशतैः ॥
त्रैलोक्योद्भटकालकूटकवलीकारप्रकारं पुनः
स्तोतुं के प्रथमेपि नाम कवयो दूरेऽधिकारस्तु नः ॥ ९ ॥
अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु ॥
कलिवर्षेषु गतेषु ग्रथितः किल नीलकंठविजयोयं ॥ १० ॥

अस्ति किल समस्तसुरस्तोमवंदितचरणारविंदस्य भगवतो महेंद्रस्य स्थानं । आस्थानममृतांधसां आयतनमाश्चर्याणां आकरो रत्नानां अवधिर्वैषयिकानंदस्य किं परं अगोचरा गिरांममरावती नाम नगरी ।

तत्र च निरालंबने नभसि वर्तमानतया सर्वपथीनद्वारतया च नापेक्षितमूलशिलानिवेशनायासं अनाकांक्षितप्रतीहाररचनप्रयासं असंबाधितशृंगसंबाधं असंभावितपरिखामंडलं आचारइति केवलमभिनिर्वर्तितो न वा प्राकारः प्रासादःन पुनरस्ति वैजयंतिरिति । अभूमिः आरोहणावरोहणविधुरश्च किंच सर्वतोऽप्रतिहतचाराणां पौराणाममृतास्वादसुखितानां अभ्यवहार्येण किं प्रयोजनं । अपि च पुनः अभिलषितमणिकनकभूषणांबरसंदायिषु मंदारशाखिषु न किंचिदपि क्रेतव्यं विक्रेतव्यं वेति संज्ञामात्रशरण्याः पण्यवीथिकाः निरंतरशिवध्याननिर्धूतकल्मषाः निरतिशयतपोविशेषनिःशेषशोषिताः वीतरागभयक्रोधमत्सराः विविधविषयपराङ्मुखाः परमर्षयइति प्रथामुदागता भुवि पंडिताएव प्रणयिनो वारमृगीदृशां अश्वमेधयाजिनइति अग्निचितइति मासोपवासिनइति मांसवर्जिनइति राजसूययाजिनइति रणदुर्मदाइति अन्नदा वयमिति अभयप्रदा इति शंसद्भिरपदानानि संपतद्भिरितस्ततोपि अज्ञातमुखैः जातुचिदवनितलवासिभिर्जनैरपध्रियमाणेषु मंदिरेषु आक्रम्यमाणेषु विमानेषु आकृष्यमाणे च बलाद-

---

१ श्री कृष्णस्य. २ विस्तार्यते. ३ (४७३८) चतुःसहस्रसप्तशताष्टात्रिंशद्वर्षेषु गतेषु. ४ पाया इति प्रसिद्धं. ५ स्त्रीद्वार्द्वारं प्रतीहार इत्यमरः, ६ शिखराणि. ७ पारिखः, ८ कृतः. ९ भोज्येन. १० कर्मवृत्तानि.

प्सरोगणेन कश्चिदभिमन्यते ममेदमिति मंदिराणि विमानानि भूषणानि कलत्राणि वा नगरवासी जनः॥ किंचेदमपरमदेवतया न सुधाशनाः अलाभादेव न तृणाशनाः पदनाशनाएव परिशेषात्कामदुघा गावः पराक्रमिणो मतंगजा वात्तरंहसश्च वाजिनइति सकलपुरविलक्षणं लक्षणं।

अपि च।

मूल्यं तत्किल वेश्मना द्विजमुखे भक्त्यात्र यदीयते
वेश्यानां च पणः सएव सवने या दक्षिणा ऋत्विजां॥
पद्या सैव विशंकटा भवति या पद्यात्र तीर्थांभसां
द्वारं तत्र च तद्यदत्र करणद्वारं पिधेयं नृणां॥ ११॥

किंच।

अस्ति स्वादयितुं सुधास्ति वसितुं वासो नभश्चारिणां
धर्तुं संति च भूषणानि शतशो नत्वस्ति धीर्जीवितुं॥
ये नान्यानुपजीव्य सर्वविभवे कर्मैकलभ्ये पदे-
ष्यायस्यंति वृथैव सेवकइति स्वामीति दुर्मेधसः॥ १२॥

इदं च परमद्भुतमुत्प्रेक्षितं तस्यां। तत्किल विविधतपःप्रबंधनिस्तंद्रतया विस्मृतलोकतंत्रेषु चिरविधृतब्रह्मचर्यजीर्णतया कालमृत्युषु कंदर्पस्य ब्रह्मर्षिहतकेषु भूतलादागत्य प्रसक्तेषु क्रीडितुमप्सरोभिः पर्णशालां विशामइति प्रविशत्सु केलीगृहं विस्रंसय जटामिति वेणीमालंबमानेषु अपनय वल्कलमित्यपनेतुकामेषु कुचदुकूलानि न लोहितं कुर्यादिति निषेधत्सु नखक्षतानि हा कष्टमसंमतोयं पंथाः शिष्टानामित्यपिहितकर्णेषु चुंबनभेदप्रस्तावनायां नीवीतधारणव्यग्रेषु नीवीमोचनावसरे मंत्रजपमुखरेषु भणितावसरे आः स्मृतमद्य व्यतीपात इत्यंतरा गंतुकामेषु अनुयुंजानेषु पुनः पुनरार्तवदिनानि शपथपूर्वकमतिक्रामति निषेकलग्नमित्यसहमानेषु बाह्यरतव्यापारविलंबमवधीरयत्सु पुरुषायितमसंमन्यमानेषु बंधभेदान् विगायत्सु वीटिकोपसेवनमप्यनुचितोयं काल इति। आनंदमूर्छावसर एव यावत्सन्निपातं च सहशय्येति परिहरत्सु पर्यंकशायिकां। द्वितीयसुरतारंभ एव देहि कमंडलुमिति त्वरमाणेषु मंदाकिनीगमनाय। विहसंति विषीदंति विलज्जंते च रंभादिमेनकांताः देववारकांताः॥

प्रसजति महोत्सवे वा प्रचलति रथ्यासु तत्र शक्रे वा॥
निम्नानि पूरयंते पवनमये तालवृंतपवनेन॥ १३॥

किंबहुना।

दुःखानां क्षतिरित्यबोधहतिरित्यानंदविस्फूर्तिरि-

त्यंतर्वाणिविकल्पजालजटिलान्मोक्षादपि ज्यायसी ॥
यैवाविप्रतिपन्नसौख्यलहरीसंपातसंबाधिनी
तत्सौंदर्यविवेचने कवयतां मौनं क्षमं व्हीमताम् ॥ १४ ॥
आनीता वसुधातलात्सुकृतिनस्तस्यां हरेः किंकरै-
रुन्मीलन्मणिकिंकिणीकलकलस्वाने विमाने स्थिताः ॥
दृष्ट्वा व्योम निरास्पदं सचकितं व्याघूर्णमानेक्षणा
न स्थातुं न च वा ततोऽवतरितुं प्रागल्भ्यमाबिभ्रते ॥ १५ ॥

किंच ।

मंदानिलव्यतिकरच्युतपल्लवेषु
मंदारमूलवलीगृहमंडपेषु ॥
पुष्पाणि वेणिवलयेषु गलंति तस्यां
साद्यं वहंति सुरवासकसाज्जकानां ॥ १ ॥
गायंति चाटु कथयंति पदा स्पृशंति
पश्यंति गाढमपि तत्र परिष्वजंते ॥
कल्पद्रुमानपि समेत्य सुपर्वकांता
मुग्धाद्रुमैस्तदितरैश्चिरविप्रलब्धाः ॥ १७ ॥

अस्ति च तामधिवसन् वसंत इवर्तूनां वासुकिरिव फणाभृतां चंदनइव वृक्षाणां चंद्रमाइवर्क्षाणां राजा सुपर्वणां राजा त्रिविष्टपस्य राजा त्रयाणां जगतां राजा विध्वंडमंडलस्य कर्ता शताश्वमेधानां संहर्ता वृत्रासुरस्य रंभादिविविधरंभोरुसंसदहंप्रथमिकासंभुज्यमाननवयौवनश्रीः अपर्युषितयौवनोन्मेषसंभावनीयमदनमदारंभसीमायाः कौमारहरः शचीदेव्याः काव्यागमभरगौंधर्वरहस्यसर्वंकषमनीषामिषाविशेषानवद्यविद्याधरीलोकनखमुखमुखरितविपंचिकानिनादप्रपंचितोदारनिजभुजापदानसमाकर्णनसमुत्कर्णपुलकानिर्वर्णनजनितामर्षजल्पाकैर्निखिलदिक्पालवदनावलोकनसफलीकृतसहस्रलोचनः चतुर्मुखमुखवलयविहारिभारतीपरिगृहीतवैतालिकाधिकारः पक्षपातासहिष्णुतयेव परिहृतशैलेंद्रमंडलः चंद्रचूडचरणारविंदपरिचरणानंदसाम्राज्यधुरंधरः पुरंदरो नाम ।

इत्थे नीवीबंधे सति रहसि यत्पाणिवलना-
न्नवोढाः पाणिभ्यामपि पिहितसप्ताष्टनयनाः ॥

---

१ इंद्रस्य. २ संकेतस्थितानां स्त्रीणां. ३ तन्मूले. ४ ऋतुकृतयौवनेन केषांचिद्द्रुमाणां फलपुष्पोद्गमो भवति. ५ नाटकगायने. ६ परिपूर्णा. ७ किन्नरैः. ८ सप्ततंत्रीभिर्युक्ता. वीन इति लोके. ९ वाचालाः.

सहस्रस्याप्यक्ष्णां युगपदपिधानाक्षमतया
पुनस्ताभ्यामेव स्वमपि दधते लोचनयुगं ॥ १८ ॥

अपि च ।

लभ्यंते श्रुतिपाठशुष्कवदना विप्राः पदं वेधसो
वैकुंठे तुलसीवनानि सुलभान्यार्द्राणि शुष्काणि वा ॥
प्रेता भूतगणाश्च संति शतशः स्थाने भवानीपते-
रैलान्यप्सरसः सुधेति तु पदे यस्यैव लब्धुं क्षमं ॥ १९ ॥
विधातुं कर्माणि व्यवसितवती यत्पदफला-
न्यसूयांधा मध्ये श्रुतिरपि किमासीद्भगवती ॥
अनुष्ठेयं कर्म स्वयमनभिसंधाय फलमि-
त्ययं वंध्यः पंथा यदनुपदमेव प्रकटितः ॥ २० ॥

किंबहुना ।

लब्धुं तत्पदमूर्जितं शतमखो तस्यैव नालं भवेत्
द्रष्टुं तद्वयितां जनं दशशती तस्यैव नालं दृशां ॥
वक्तुं तत्पुरभोगभाग्यमखिलं तस्यैव नालं गुरु-
र्मंत्रेतो गतमद्भुतं कथयितुं नालं मयैवोक्तयः ॥ २१ ॥

स कदाचित् अस्वप्नोपि आचारइति बोधितः प्रातरमरवैतालिकैरालोक्य निर्मलं पौलोमीकपोलदर्पणं अभ्यर्च्य कामधेनुं आसाद्य विविधविद्याधरीविलासपिशुनकुसुमशयनीयलोभनीयलतामंदिरानिरंतरोपांतभुवं । अधःपरिवर्तमानविकर्तनबिंबनिगलदूर्ध्वमुखमयूखसंसर्गादुष्णीकृतामंतरंतः उपर्युपरि शीतलां भूतलासंस्पर्शेपि पुराणपुरुषचरणारविंदसंबंधादेव भुवनपावनीं अमरधुनीं निर्वर्तितनियमाभिषेचनः सिद्धचारणगंधर्वसेविते सैकते तस्याः दहराकाशपरिपूजितदिव्यलिंगाकृति प्रतिष्ठाप्य चिंतामणिमयं किमपि पारमेश्वरं लिंगं । अनुसंधाय तत्र नवलिखितशरच्चंद्रचंद्रिकासादरं भगवंतमुमाकांतमभिषिच्य दिव्यापगाजलैः अनुलिप्य रोहिणीरमणहरिणमदपंकानुषंगिणा हरिचंदनेन समभ्यर्च्य गांगेयविकचगांगेयपंकजैः आराध्य सुरभिधृतधारानुबंधिना दिव्यधूपेन निसर्गचलितरश्मिमालाकलापेन रत्नदीपेन च सांगाय सायुधाय सावरणाय साभरणाय च निवेद्य सद्यःसमाहृतनिष्पीडितेक्षुमंडलनिष्पंदनादपर्युषितानि अमृतानि प्रदक्षिणीकृत्य प्रणिपत्य प्रसाद्य पंचभिः प्रसूनांजलिभिः स्तुत्वा श्रुतिशिरोभिः कृत्वा विसर्जनं अथ स्मृत्वा चिरं तमात्मनि विलासवीथीविहार-

१ पुलिने. २ अमृतरूपाणि अन्नानि.

कौतूहलेन निर्गत्य बहिः इतस्ततो निरंतरालमिलदाशीर्वचोमुखरगीर्वाणमुनिसंघसंकुलं अतिकोमलांगुलिदलाघातशोधितमृदंगनादभोगिभिः अधरविनिवेशितापनीतवेणुभिः असकृदास्फालिताकृष्टवीणागुणाभिः आकुंचितऋजुकृतभ्रूलतं आविष्कृतलुप्तशिराबंधकंधरं अंतरेव कलमधुरमारब्धगीतिभिः द्विस्त्रिरास्फालिताकृष्टसव्यचरणमृदुरणितमंजीरमंजुलाभिः अप्सरोभिः आरप्स्यमाणतौर्यत्रिकं अत्युद्भटवेत्रिवेत्रलताघातविद्रावितवीथीभवदमरमंडलमभितोपि दृष्टिगोचरे सन्निधापितकरितुरगपर्यंकिकादिनानाविधवाहनग्रामनालोक्य सेनामुखं आलोकमात्रविदितैंगितैः आधोरणैः उपस्थापितं अर्णवनिमग्नमैनाकपक्षसंरक्षणाभ्यर्थनयागतं हिमवंतमिव उन्नतं अवदातं च कंचिदारुह्य मतंगजं अंगराज्यसौभाग्यदेवतयेव शरीरिण्या तांबूलकरंडकधारिण्या मेनकया मदनमदकदुष्णसौवर्गकामिनीकटाक्षसंसर्गनिवारणायेव मणिचामरोपवीजनकुशलारंभया रंभया च सविलासमध्यासितचरमभागः पुरोभागचलदलघुजंघालकरितुरगसंघजंघाजवद्रवदमरभटकोटिसंमर्दशिथिलहारमर्दनजनितमुक्तापरागसंबंधादिव धवलीकृतेन ससंभ्रमवलदंबरनिर्तबिनीलोकविकीर्यमाणमंदारकुसुमवृंदनिस्सरन्मकरंदधारानिरासायेव मुकुटमुकुटोपर्युपरि धार्यमाणेन सर्वतः प्रालंबमुक्तासरकदंबशालितया समंततो निहितकुपितविधुंतुदविकटदंतक्षतविवरक्षरदमृतधारासहस्रमंडितेन मंडलेनेव शशांकस्य महतातपत्रेण सफलयन्निमिषदृष्टिः सृष्टिसंभोजसंभवस्य गंधर्वकुलवाद्यमानबहुविधवाद्यनिनादकवलीकृतावकाशतयेव संकुलचलितसेनासंघसंकटोन्मुक्तसिंहनादधारापदे निर्जगाम तारापथे ।

मंजीरैर्नटनार्भटीमुखरितैः स्वर्वारवामभ्रुवां
मंद्रस्निग्धरवैश्च किन्नरकरव्यापारितैर्मर्दलैः ॥
श्लाघाश्लोकशतैश्च चारणगणप्रोद्गीयमानैस्तदा
नादब्रह्ममयीव तत्र रुरुचे नासीरसीमा हरेः ॥ २२ ॥

अपि च ।

अग्रे पश्चादुभयतइति त्यक्तलोकव्यवस्थे
दिष्ट्यौ तस्मिन्नपि परिणते सर्वतः संमुखीने ॥
सभ्रूभंगं नयनवलनं सस्मितं द्रष्टुकामा
भूयोप्यग्रे सुरपरिवृढास्तस्य पुंजीबभूवुः ॥ २३ ॥

गच्छन्नेव स नभसि भसितावगुंठितसर्वांगं संगलद्धूपरभागभासुराभिः अभिव्याप्य हृदयं अधिकतया बहिरपि विनिर्गमिष्यतः कोपानलस्य ज्वालाभिरिव पाटलाभिर्जटाभिः अभिभवंतमिव तडित्वंतमभिनवशारदांभोदं त्रिभुवनमु-

---

१ नूपुरैः २ आरंभः ३ मृदंगैः ४ सेनामुखं. ५ प्रारब्धेन. ६ परोत्कर्षः ७ तिरस्कुर्वंतं.

निलोकलक्ष्म्यांबोधिन्या शापमूलसंभवया कीर्त्येव परिकर्मितललाटमंडलं अनिप्रचंडनिजतपोनलज्वालाकलापपरिशोषमलिनितैः प्रतिशापाक्षैरिव पारिकांक्षिणां रुद्राक्षमणिभिः आवेष्टितं सोदरशशांकसंदेशहारिकाभिरिव तारकाभिः कर्णपुटाभ्यर्णलग्नाभिः स्फटिकाक्षगुटिकाभिः अभिशोषितं अगृहीतोत्तरासंगं अंगीकृतकौपीनमात्रपरिधानं आस्फोटयंतमनुपदमवरुंधंतमध्वनि मिलंति सिद्धवधूकुलानि त्रासयंतमिव संतर्जयंतमिव गायंतमिव नृत्यंतमिव हसंतमिव स्खलंतमिव हृदयारविंदकुहरविहरदुन्मत्तशेखरभावनानैरंतर्यादुन्मत्तमिव स्वयमपि अवाप्तसकलकामतया किंचिदपि अनादृत्य लोकतंत्रानुविधानं त्रिलोचनावतारमप्यत्रिलोचनावतारसहोदरं अनुसूयागर्भसंभवमप्यत्यंतकोपनं अतिकठिनतपोविशेषपरितोषितगौरीप्रसादसमासादितामपि कयापि विद्याधरकन्यया प्रार्थनमात्रादेव शापभीतया प्रणिपत्य समर्पितां कामपि कनकारविंदमयीं अम्लानमालिकां आनयंतं आपतंतमग्रतएव निरर्गलमभिमंत्र्य त्यक्तमिव पाशुपतं शरं अनतिलंघनीयतेजसं दुर्वाससं नाम तापसमद्राक्षीत्। जानन्नप्यनतिक्रमणीयतेजसं दुर्वाससं जानन्नपि निखिलजगदेवमपलपितुमन्यथयितुं च नैपुण्यं ब्राह्मणस्य जानन्नपि मुनिकुलन्यक्कारपरिणतां गतिं नहुषस्य शिष्योपि बृहस्पतेः शीलितमर्मापि धर्मशास्त्रेषु परिचर्यापरोपि निसर्गत एव ब्राह्मणानां आचतुराननादाचकीटपतंगेभ्यस्तुल्यवदेव प्रभवत्या भगवत्या भावितव्यतायाः विलासेन त्रिभुवनाधिपत्यमदांधीकृतलोचनः धीमानपि सहस्रलोचनो न तं प्रत्यवरुरोह नतरामुपचारगिरा नतमां च प्रणनाम अपि च न केवलं तमवज्ञे अपि तु पुनरसंभावितेनापि तेन वितीर्यमाणां आदाय सावज्ञं एकेन पाणिना मालिकां पश्यत एव महर्षेः अनुपनीय मुकुटतटीं अनाघ्राय चांततः स्कंधएव सिंधुरस्य निवेशयामास निवेशनमात्रा च सा निसर्गनिरवग्रहेण वैतंडेन शुंडयाकृष्य निर्पेषे[1]।

पश्यन्पदाग्रमृदितां महता गर्जन
मालां प्रसादपरिपाकमयीं मृदान्यः ॥
हस्तेन हस्तमभिहत्य स नित्यकोपः
कोपारुणं मुनिरधारयदक्षिकोणं ॥ २४ ॥
वीरभद्रइव कुद्धे वीरमाहेश्वरे मुनौ ॥
इतिकर्तव्यतामूढामिंद्रमैक्षंत देवताः ॥ २५ ॥

तदनु च।

यावत्सांत्वयितुं तमंतिकभवं धावंति मंदीभव-

---

१ पेषणम करोत्.

त्काकुव्याकुलगद्गदस्तुतिवचोगुंफा निर्लिंपाः स्वयं ॥
तावद्देवपतिं शशाप कपिलक्रूरभ्रमत्तारक-
भ्रूभंगव्यतिषंगदत्तभुवनातंको मुनिः शांकरः ॥ २६ ॥
यैवं त्रैलोक्यराज्यश्रीस्त्वदालंबेन वर्तते ॥
सैवाद्य त्वदमित्राणां वश्यमापद्यतामिति ॥ २८ ॥
आलंब्य दैन्यमसकृत्पदयोर्निपत्य
संप्रार्थितो मघवता वचनैस्ततोयं ॥
शापांतमाह कथयन्निव लोकरीत्या
गोविंद एव कुशलानि करिष्यतीति ॥ २८ ॥

तदनु यथागतं गते दुर्वाससि तावता वैभवेन विनिर्गतोपि अतर्कितोपनतत-दीयशापसमुत्सादितोत्साहः समग्रेण मंडलेन निर्जिहानो राकाशशांक इव राहुमुखे पतितः सुरपतिरभितः प्रसार्यमाणरोषाविषादमंदाक्षशबलकटाक्षसहस्रनियमितव्यापारं अमुखरमुरजं अनाहतपटहं अक्वणितवीणादिवादित्रं अवसन्नकिन्नरीगानं अप्रवृत्तरंभादिनृत्यसंरंभं अवसितवैतालिककोलाहलं अप्रसक्तवैत्रिहाहारवं अनाशंकितभटासिंहनादं अस्तंगतान्योन्यसंकथं असंभावितपीठमर्दकं अपलपितविदूषकालापं अश्वहेषितेपि सातंकसादिकुलं आंध्रविन्यासशब्देपि सापराधसौविदल्लजनं अपनीतमातंगघंटावलयं अबद्धमिव बधिरमिव मूकमिव मुग्धमिव प्रसुप्तमिव विकलमिव शून्यमिव विन्यस्तमिव चित्रफलके निखिलमपि विबुधबलं आकर्षन्निव केवलं आगत्य पुनर्नगरं आवेद्य वृत्तामिमं गुरवे वृत्तांतं अंतःपुरं प्रविश्य दुरंतचिंतानुबंधनिर्यंत्रितः शयनागारएव जजागार तां रजनीं ।

अथ तदानीमेव गूढनिहितचारनिवेदितातापसशापवृत्तांतसमाकर्णनलब्धांतरेण मंत्रिणा भार्गवेण समादिष्टा हृष्टाश्च चिरनिरीक्षितेन रंध्रलाभेन दर्शयिष्यंतो दृढपरिचितानि समरकौशलानि सफलयिष्यंतः साधितानि महास्त्राणि समुल्लिखंतो वैरनिर्यातनप्रकारान् अपनेष्यंतश्चिरनिरूढमपयशोमालिन्यं अभिनंदंतो दुर्वाससं आवेदयंतः परस्परमभ्यग्रहृष्टानि शुभनिमित्तानि विवृण्वंतो वीरवादान् विभजंतः प्रतिसैन्यानि सैनिकानां अवरुंधंतश्चारजनसंचारं असूचयंतस्तर्जन्या गंतव्यं पदमाप्तवर्गेषु केवलं आदिशंतश्च घंटापनयनमनेकेषां अंगदसंघट्टनमश्वोरसानां अनुच्छ्वसनं ध्वजानां अवादनं वादित्राणां अक्ष्वेलनं च योधानां आभिवंद्य पुरोधसं अनुमान्य योधमुख्यान् आमंत्र्य गुरूजनं अनुज्ञाप्य मौहूर्तिकान् भावयंतश्च प्राचीनान्महासुरान् पठंतश्च तेषामेव वेदापहरणवसुधानि म-

---

१ देवाः २ मंगलशकुनान् ३ कारिणां ४ प्रशस्तां अश्वा अश्वोरसानां अश्वश्रेष्ठाः अश्वाच्यायामुरस इति पाणिनीयसूत्रम्.

ज्जनानीव प्रचंडानि चरितमंगलानि प्रस्थाय दानवाः कतिचिदतिचिरोपरुद्ध-कंडूलनदोर्मंडलतया कालविपाकपचेलिमया शक्तिमत्तया च पर्यस्तुमिव भूधरा-नंगुलीविस्फोटेनोपरीक्षेप्तुमिव मुखमारुतेन सप्तसागरान् उन्मूलयितुमिव समूल-मेव पातालं उत्क्षेप्तुमिव दूरमंतरिक्षं क्षित्यासायितुमिव विध्यंडमंडलं निर्वापयितु-मिव चंद्रार्ककदीपिकां दग्धुमिव पाशिनमपि हंतुमिव दुर्दांतमंतकमपि सन्नर्य-त्या किंचिदप्यज्ञातकार्यविशेषतया महामात्रकरचलनमात्रपरिजातगंतव्यदि-शा गगनएव नित्यवासेन कदाप्यनागतां मंदाकिनीं संभावयितुमापतता पत्येव वा-हिनीनां महत्या सेनया साकमागत्य शाखानगरममरावत्याः युगपदाहन्यमानप-टहादिबहुविधवाद्यनिर्घोषपोषितकरिलोकबृंहितेपबृंहितभटकोटिसिंहनादकोलाह-लेन बोधयामासुरनाशंकितपरिभवातंकसुखशयितानमृताशनान् ।

क्रुध्यद्दानवयोधनिर्दयकरव्यामर्दभीमध्वन-
न्नानातोद्यनिनादकातरपरिक्रंदद्विगंतद्विपं ।
जातं प्रातरतर्कितागतमहातंकप्रसंगक्षण-
प्रक्षुभ्यत्पुनरुद्भटामरचमूनीरंध्रमैंद्रं पुरं ॥ २९ ॥

अपि च ।

संरुध्यंति द्विषंतो नगरमिति समायांति रुष्टाः पथीति
प्राकारांतःप्रविष्टा इति चलति रणो दारुणः संप्रतीति ।
जीवग्राहं गृहीतः सुरपतिरिति च स्वैरमज्ञातमूलाः
संधे संधे प्रजानां नवनवमभवन् भिन्नभिन्नप्रवादाः ॥ ३० ॥

तत्क्षणं च युगविगमसमयसंभिद्यमानसप्तार्णवनादशंकावहेन कोलाहलेन नागराणामवबुध्य द्विषामभिषेणनं अनतिलंघनीयतापसशापानुसंधानकुंठी-कृतोद्यमोपि कंठीरवइव करिबृंहितेन परिज्वलितमन्युः शतमन्युरुत्थाय शयनी-यात्प्रेक्षितसमरसंरंभया शचीदेव्या ससंभ्रमस्नेहसाध्वसोद्वेगमुपसृत्य स्त्रीस्वभावसु-लभेन कातर्येण मानद मा कुरु साहसमेवंविधं प्रेष्यंतां प्रेषणीया इति अभ्यर्थ्य-मानोपि तामवधूय परिजनवधूकरोदस्तविस्रंसमानसंध्यानपल्लवः संरंभशिथिलप-दक्रमं समागम्य चकितसमुद्वृद्धदौवारिकजनोद्घाट्यमानकपाटिकामूलपुंजीभव-दनुक्षणायातचारवृत्तांतसमावेदनसन्नह्यमानकुब्जवामनजननिरंतरोल्लिंदं अंतः-पुरद्वारं अनादृत्य किंकरकरावलंबनं अनालोक्य निहितामप्यग्रतो मणिपादुकां अनादिश्य सैनिकागमनं अनाकांक्ष्य वैनीतकानयनं अंघ्रिभ्यामेव परिक्रामन्

---

१ समुद्र एव स्वपत्नीं स्वर्गं गमनेतुकामः ॥ २ उदरीयं ३ इतिलोके ४ परंपराव हनं तद्वैनीतकमस्त्रियामित्यमरः

अनाकर्णयन्निवृत्तिविज्ञापनामध्वानि मिलितानां सैनिकानां आकुंचिताभ्यां भ्रूलताभ्यां आकंपितेन च मुखेन केवलमाकर्णयन्वचनानि चाराणां अतिसंभ्रमोपसृत्वरं अनिवर्त्य समरसंरंभे अग्रत एव चलंतं आत्मजं जयंतं अवरुध्य शपथशतैः अंतःपुररक्षणाय निवेशयन् आलयद्वारि निःसरन्नपि बहिस्ततोतित्वरितं आलयबाह्यकक्ष्यासमानीतामाबंधकक्ष्यामाद्यवीथीमुखोपनीतामादाय दंभोलिं अर्धपथोपनीतमवमुच्य वारवाणं अधिगोपुरदेशमानीयमानमारुह्य मातलिसनाथं रथं अतिलंघ्य संकुलचलदमरभटसंघसंघट्टदुर्गमं गोपुरद्वारं अतिक्रम्य निजमपि नासीरं अवगाहमानो दानवचमूं अलंघनीयवचनैः अहंप्रथमिकाप्रतिज्ञातविजयैः दिक्पतिभिः निरुध्यमानश्चंद्रोदयारंभसमुज्जृंभितः सागर इव वेलां अनियंत्रितः क्षणमुद्ग्रीविकाभिलक्ष्यमाणदुर्निग्रहसमराग्रहः शरीरेण केवलमवातिष्ठत सेनामुखे ।

भीमं भीमेन तस्याथ सैन्यं सैन्येन विद्विषां ॥
समगच्छत कल्पांते सागरेणेव सागरः ॥ ३१ ॥
यावज्यावलयावलीढशिखरक्रूरप्रकारध्वन-
ञ्चापव्याधृतपाणिभिः स्थपुटितं नासीरमासीद्भटैः ॥
तावद्देवपतिः क्व दानवपतिः क्वेति प्रवृत्तैः क्रुधा
सेनारक्षिभिरेव तत्र महते युद्धाय बंध्या मतिः ॥ ३२ ॥

तदनु सुनासीर एव स्वनासीरमुपेयुषि चिरभुक्तभर्तृपिंडानृण्यसंपादनावसरलाभसंभावितोत्साहतया तृणीकृत्य जीवितानि विमृतबलानीव विधूय समरभयं विकोशानीव शस्त्रमंडलानि विस्मृत्य भर्तृविमाननाः कादाचित्कीः पुत्रदारपरिच्छदानिव मनागप्यनवेक्ष्य जयश्रियमनुपतंतीमिवाभिमुखरूथिनीं होर्ष्यतः शरानलार्चिषि शरीराणि चेष्यंतः शरदिंदुसुंदराणि यशःकंदलानि महिषानिव मतंगजान् सारमेयानि सैंधवान् पांसुकणानिव पदातिगणान् मशकानिव महारथिकान्कुसुमहारानिव कुंततोमरमुद्गरप्रहारान् पटवासमुष्टिमिव बाणवृष्टिमपि मन्यमानाः हन्यमाना अपि हर्षाट्टहासमुखराः नखरायुधाइव हरिणार्भकेषु नागांतका इव राजिलेषु दंतावला इव कदलीवनेषु दावानला इव शाल्मलीगुल्मेषु निःशंकमवगाहमाना दानवेषु प्रहरंतः परश्वधैः निकृंततः कुंतैः निपातयंतः कृपाणिकाभिरभिघ्नंतः शतघ्नीभिः खंडयंतो भिंदिपालैरवकिरंतः शरजालैरपविध्यंतः शक्तिशूलैः क्षिप्यंतः क्षेपणिकाभिः अवबध्नंतः पाशैरभिमृद्नंतः परिघैराकर्षयंतो लांगलैराविध्यंतो मुसलैरपहरंतो जयध्वजानवभिंदंतो वारबाणा-

---

१ कक्ष्या बृहतिकायां स्यात्कांच्यां मध्येऽलंबधे[न] । हर्म्यादीमी प्रकोचेति मेदिनी २ कवचं ३ कृता ४ ऋणाभावः ५ परसैन्यानि ६ धुञ् कंपने ७ सर्पेषु ८ तृणं ९ तोफा इति लोके. १० बरच्छा.

न्विच्छिदंतो धनुर्गुणान्विध्वंसतः सारथीन्प्रवर्तयंतो रक्तवाहिनीः परितोषयंतः कटपूतनाः लिंपंतः शरीराणि रक्तधाराभिरावेष्टयंतः करेष्वंत्रमालिकाः परिक्रमंतो मुंडमंडलेषु परिस्खलंतः कबंधेष्वपश्यंतः पुत्रानपि रणे हतान् आतृप्यंतो यूथं यूथमपि निपात्य प्रतिभटान् अप्रतिभटाः विबुधघटाः साफल्येयनेषु-रक्षणांससहस्रममरपतेः आदिश्य च ततः शतमन्युः अंतरमग्रतः सेनामुख पार्श्वयोरस्य पवनपावकौ पृष्ठतः स्वस्य पुण्यजनेश्वर अंतिकएव धनदमाहव-शूरास्सभाजयितुमध्वानि शिबिरे चासेदुषमपांपतिमायुधक्षतानुभिषजयितुमश्विने-यो निशीथयोधिनीनां वैरेवरूथिनीनां निशैव माभूदिति संसतं वासरभावाय सहस्रभानुमप्यतः प्रकाशयितुं प्रतीक्षमाणोपि जयश्रियं परिशंकमानश्चतासि ता-पसशापसशापविपाकमाकास्मिकं किमप्यलीकनभोविभावसमिधिपत्यलक्षणां[*] ल-क्ष्मीमुद्दिश्य कलहायमानयोरसुरामरवाहिन्योरज्ञानविजृंभितोपलंभं महाट्टहास-मिव परमेष्ठिनो घनस्तनितमनभ्रएव दारुणमभृणात् प्रहितोपि सेनामुखे पवनः पदे पदे यदाबेधमावेदयितुमाववृते तदेव तस्य प्रतिकुलपवनलक्षणं दुर्निमित्तं प-रिणेमे अस्रंसत् च कराद्दश्यदंभोलिः तदप्यायुधविस्रंतनं अशनितनं चेति द्वि-धाबभूव दुःशकुनं ।

अत्रांतरे रणहतोभयसैन्ययोध-
निर्भिन्नमंडलतया तपनः समंतात् ॥
उद्दामदानवधनुर्गलदुत्प्रबंध-
नाराचदारिततया च शनैस्तिरोभूत् ॥२३॥
अतिप्रबंधादिषुजालवृष्टे-
रपक्रमाच्च द्युमणेरकांडे ॥
आसीत्तमिस्रा जयदा रिपूणां
पचेलिमा भाग्यपरंपरेव ॥२४॥

तत्क्षणं च पुनरनुक्षणोपचीयमानममरबलमुपक्षीयमाणमात्मबलं च निरी-क्षितुमप्यतितिक्षवः तरक्षवइव बुभुक्षिताः दंदशूकइव दंडघट्टिताः बलिभाशंबर-लंभनमुचिविरोचनमुखाः महासुराः सरभसमामुच्य वारबाणमाबध्य गोधांगुलि-त्राणमपि सन्नह्य निषंगमक्षयशरपूरितोत्संगमधिरुह्य शतांगमायोजितखरतुरग-माभुज्य निटिलेषु भृकुटीविभंगमासेव्य वीरपाणमालंब्य संसर्पैकवृत्तमनुज्ञाप्य परस्परमापूरयंतो दिङ्मुखानिं गुणध्वनिभिः अवभ्रंशयंतो गगनतलादुडून्यट्टहा-सैर्विसंज्ञयंतः अंगविस्फुरणेन वीक्षितुमागतानि सिद्धचारणमंडलानि विस्मापयंतः

---

१ नैऋतपांत २ वरुणं ३अनुभवः ४ आषायां हातमोचे । गोधातलनिहाकयोरिति मेदिनी ॥
* केशरी पोषक.

समरसंरंभेनैवं कर्मदिनमपि कलहानंदिनमुत्सारयंतः पादातमुरुवेगेन परिचूर्णयंतो रथान्परिघाभिघातैर्विद्रावयंतो हयान्करतालिकाभिर्विघूर्णयंतो मतंगजानंगुलियंत्रणेन संवर्तमारुतावर्तितसागरगर्तदुर्दशवत्कविवरोल्लसल्लेलिहाननिजरसनावलोकनजनितसाध्वसध्वस्तचेतनमासाद्य सेनामुखे निविष्टमंतकमपदस्य तदीयेयमकालदंडममोघमभिहत्य तेनैवतमादिनं जयमापेदिरे ।

कालदंडहतस्यास्य कंठे प्राणा जुघूर्णिरे ॥
अंतकं यद्धतं नेतुमंतकोन्यो न विद्यते ॥ ३९ ॥

पार्श्वे तस्य परे केचित् अतिचिरोपरोधसंवर्धितप्रतिघानलव्यतिकरविशेषभीषणज्वालाकलापदुरापमपि परिवृत्य जातवेदसं प्रशमय्य पुरुषहुंकारभयंकरैर्मुखमारुतैरस्य दुस्सहज्योतिरपकृष्य वाहनमेवमग्रचरणग्राहमपदस्य शक्तिमपि बलादस्य हस्ततलात् अरेरे लब्धोयमशनहरः क्रतुभुजां हव्यावाहो नाम निर्जरापसदः तदद्य निर्वापयतैनमुदकुंभैः निक्षिप्तैनमापूपिकानां वंशे महानसेषु मैवं नैवमुब्दोधयतैनमुच्चितैर्मुखानिलैः हस्ते कुरुतैनमद्यैव दग्धुममरावतीं परित्यजत रे बालिशा वाडयोयं शिखां प्रदर्शयतीति परिहसंतः परिक्षिपंतस्तर्जयंतः ताडयंतः ताडयंतश्च पलायामासुरभयाः ततः समेत्याहितमसुरभटाः तदत्याहितमालक्ष्य सख्युराशुशुक्षणेः क्षणेन सज्जीभूय भूयसा वेगेन सव्यापसव्यानि संचरन्मंडलानि चंडलाघवोत्क्षिप्ततरुकांडखंड तांडवोद्दंडमतिसं मितपांसुमांसलतृणपर्णसंघसंतर्कगृध्रभासवायसादिविहंगमततिविशंकटशंकरशिरोघटितविकटजटाजूटसंकटभ्रमदभ्रसरिज्जलनिर्झरझल्लझल्लाघोषभीषणझंकारमुखरितनभोविभागमालंब्य युगविगमोचितं रूपमापत्तन्नसुरबले विघूर्णयन्जीर्णपर्णमिव विदिक्षुदिक्षुचाश्वीयमचचूर्णयतथाथ चंडमारण्यतरुकांडमिवावकिरन्नुपलखंडानिवादादाच्चंडानपि वेतंडानंधीकुर्वत्पदातिज्ञातमवरुंधन्सेनापतिम्परावर्तयन्नस्त्रशस्त्राणि प्रभंजयन्नंजसैव जयध्वजान्परिस्खलयन्मऽसुरानपि संवर्तइव मारुतः समरसीमनि सर्वतोप्यक्रमेण पराचक्रमे यावदित्थमस्पंदत गंधवाहः तावदावर्तितलोचनो विरोचनः प्रकटितसमराडंबरः शंबरः सावष्टंभो जंभः समरमदोल्बणो बाणः संग्रामैकरुचिर्नमुचिरतिबली च बलिरालक्ष्य वत्काणि परस्परमीषदिव स्मयमानाः विस्मयमानाः पराक्रमे विबुधानामिदमूचिरे हंत कथममराअपि पराक्रमंत तेषु च दूत्योचितसंचारमंथरः श्वा मातरिश्वा ।

संरुंधते निभृतमंतरपि द्विजाय
मन्नं यमाहुरपि कीटसरीसृपाणां ॥

---

१ संन्यासिनं नारदं २ रुट् ३ अश्वसमूहं.

यो जायते शिथिलशूर्पपरिभ्रमैर-
प्योजायते कथमसावपि गंधवाहः ॥ ३६ ॥
अथवा नैतस्मिन्नैतावदभिनिवेष्टव्यमस्मा-
भिः । अनुकूल एव खल्वयमस्माकमाशुगानलज्वालाधुक्षणे । सर्वथापि ।
यश्चेष्टतेऽवकोशेषु ये चाप्येनं समाश्रिताः ॥
निरुधीमहि तान्सर्वाभीरंध्रे शरपंजरे ॥ ३७ ॥
इति कतिपये दैत्यावात्मानिबर्हणकौतुका-
द्धनुरगुणं यावज्यावल्लिभिर्न बबंधिरे ॥
प्रसभमभितस्तावत्सावज्ञदैत्यभटोद्भिता
दिशि दिशि जगत्प्राणप्राणच्छिदो न्यपतच्छराः ॥ ३८ ॥
वाय्वर्कशक्रवरुणानलदैवतान्य-
प्यस्त्राणि निर्जरवरैरभिमंत्रितानि ॥
ईशांबभूवुरसुरेषु न शासनानि
राज्यच्युतस्य नृपतेरिव नागरेषु ॥ ३९ ॥
तदनु दनुजभुजीवीक्षुष्टकोदंडदंडोपसंपातुक-
ज्वलदनलदुरापनाराचधारासमीरहताः ॥
युगविगमसमुच्चलच्चंडचंडीशभूषो-
रगप्रतिभयमुखवातजातां दशामुज्जगुर्निर्जराः ॥ ४० ॥

ततः प्रचंडे च प्रवहति ववमाने तूलवदुत्सार्यमाणेषु दूरत एव वारिधरेषु सागरानपि शोषयतस्तस्य सनीडमागंतुमनीहमानेषु च यादोगणेषु सावशेषतया भग्नचेताः प्रचेताः प्राकृतलोकसाधारणतटस्थइव बहिरवतस्थे । अपि च रिपुसमूहसमुत्सृज्यमानशरवर्षधर्षितेषु वर्मसु भिद्यमानेषु च मर्मसु कर्मदेवाः कस्मादयमस्माकमाकस्मिको बुद्धिविपर्ययः कस्मै वयमसुरैर्युध्यामहे कस्य हेतोर्बध्यामहे बुध्यामहे न हेतुमस्मिन्नायासे के देवाः के च नो दानवाः संभृत्य तपांसि दुश्चरणानि संप्राप्ता वयममरपदं केन शक्त्या नियहीतुं केन शक्त्याऽनुग्रहीतुमधिष्ठास्यति यः स्वर्गमतिथयस्तस्य वयं भवामइति कृतनिश्चयाः संमंत्र्य परस्परं संघशोऽपचक्रमुः समंततोपि स परमुखात् । अथ केचिदाहवमुखेषु तशरीराः दावनवीराः देवभावमापद्य दिवमारूढाः गूढाभिसंधयः ते किल सहृदयाइव कंचित्कालमहृदयाएव परिक्रम्य परिज्ञातममर्षणः सर्वतो निर्वापयामासुरतार्किता एव गीर्वाणबलमपतरतः कर्मदेवानभिद्रन्तो दैवदेवानापतंतः शरानाशीविषानिव दृष्टिविषान्सर्वतो विशृंखलानुर्वीवितवेलानिव कल्लोलान्महोदधेरप्रभवतः सेनापतीनप्रतिपत्तिमपि मूढं पश्यतः स्वामिनं पश्यतस्त्रातार-

१ समीपं.

मवज्ञादेवमुनिशापतेजसा प्रविश्य हृदयानि प्रक्षोभ्यमाणाः स्तब्धाइव विषादानिर्दग्धाइव शरानलैर्दिग्धाइव मोहनचूर्णैर्लुब्धाः परं जीवितेषु लब्धामपि जयश्रियं चिरादीषद्विवेकसुनियंत्रणेन क्षणिकदुर्मंत्रणेन नादयंतः पश्यंतोप्यचक्षुषः शृण्वंतोपि बधिराः जानंतोपि जडाः परिगृहीताइव दुर्यशसा परिष्वक्ताइव विपर्ययेण विस्मृत्य कुलशीलानि विसृज्य निःशेषमपत्रपामवरोप्य निषंगमावेशयंतः पृष्ठतोबुद्धिमवमुच्य जयायुधान्याददाना भिक्षाकपालानि पाणिभिरासर्गादा च महाप्रलयादध्वरहविर्भिरेव द्विजन्मनामविश्रांतपरिपुष्टास्ते एवं प्राप्ते समरे सायुधाश्च सवाहनाश्च सैकताइव सेतवः सर्वतोपि विजघटिरे विबुधभटाः ।

धावद्दैवतयोधयूथपदवीसंरोधकौतूहल-
क्रामद्डामरघोषवैरिपरिषन्नासीरसीमोद्भवैः ।
भेरीभांकरणैरमर्त्यनगरीसंवर्तमोहूर्तिकैः
संभ्राताः प्रतिपेदिरे युधि निवृत्ताशा दिगीशा दिशः ॥ ४१॥

वल्मीकेष्वहयो वसंति मुनयो घोराः समीराशनाः
कांतारेषु च कंदरेषु लवणे सिंधौ क्व मासस्थितिः ॥
आक्रांते भुवने परैस्तृणमपि स्रष्टुं न शक्यं मया
किं कर्तव्यमिति व्यलीयत जयाद्दैत्याशुगेष्वाशुगः ॥ ४२ ॥

अनंतरमित्थमतर्कितमनिमित्तमप्यवध्वंसमानमसुरबलमभीकमिव भुवि निपत्य गगनतलात्परिवहवदिव भिन्नमर्यादमर्णवस्रोतः शतशः परीक्षितमपि सौहार्दे सहस्रशो गृहीतजयमपि समरसंदें कदाप्यशिक्षितायुधग्रहणमिवाकर्णितसंग्रामसंकथमिव वायसयूथमिव वानरानीकमिव केरलसैन्यमिव ग्रामपालजालमिव करतालिकामात्रकातरमर्त्यबलमप्यालोकयक्षिभिर्दशभिः शतैर्वासवः स्वयमेवमालोचयामास अहो दुर्वाससो ब्राह्मण्यमहो निगमागमप्रामाण्यमहो पाशुपतेषुमाहात्म्यमहो दुर्निमित्तेषु याथार्थ्यमहो कर्मपरिणतेर्प्राबल्यमहो देहिषु श्रियश्चांचल्यमहो पुरुषकारस्य वैफल्यमहो परमेष्ठिनः कौशल्यमाहवो नाम कियानयमसुरा नाम कियंतइमे कीदृशाः पलायंते कीदृशाः पराक्रमंते किं बंधुभिः किं सचिवैः किं बलेन किं धनेन किमनेन दंभोलिना किमंतोपि मया कथं दृश्याः दाराः कथं दृश्याः पौराः किमिती निहितेन जीवितेन किं करिष्यति विपरीतो विधिरितोपि न चिकीर्षामि सौवर्गमाधिपत्यं न जिहीर्षामि दानावानामौद्धत्यं यावदीदृशोहं न कस्याचिदृशो गोचरं पतेयं तावदस्मिन्नेव समरे तनुं त्यजामि इति सन्नह्य पुरश्चलन् शचीपतिरशृणोदंतरिक्षगां वाणीं ।

अहो ते शक्र धीमाद्यमग्रे भव्यं किलान्यथा ॥

---

१ व्यत्ययः. २ पश्चाद्भवं.

अंतर्धेहि रणादस्मादंतर्धेहि च मद्गिरं ॥ ४३ ॥
इत्याकाशगिरा शक्रो मत्या च क्रूरया स्वया ॥
यावद्दोलायते तावदागत्याबोधयद्गुरुः ॥ ४४ ॥

हंत किमेतदमरपते धीमतोपि ते दुर्व्यवसितं विदितं न ते वेदितव्यमवशेषितं त्वां गुरूणामुपासनं किं न जानासि भवितव्यतां किं वाभिमन्यसे जयश्रियो नैयत्यं ननु श्रूयतएव हि पुराणेषु भवता यत्किल मालिसुमालिसंगरे महति वर्तमाने पराचीने पतंगपतौ भगवतापि परावृत्ते अंधकेन किलेदमधिष्ठितं त्रैलोक्यविध्यंडान्येव कियंति विजितानि तारकेन तदलमनुस्मर शापांतवचनमत्याश्रमस्य मुनेर्भवेयुरपि कदाचिदन्यथा भाषितानि नतु जातु माहेश्वराणां यत्पुरोदितं गोविंदएव कुशलानि करिष्यतीति महर्षिणा तदनुदितमग्रे भवितव्यमन्यथेत्यधुना परमेष्ठिना तदेहि कंचित्कालमंतर्हिताएव क्वचिदावसामः इत्यनुशिष्य शिष्यमंतर्चाय्य स्वयोगमायया तिरोदधे स्वयमपि देशिको देवतानां ।

विद्राणे वरुणे गते हुतवहे वैवस्वते मूर्छिते
सद्यो लोचनगोचरादपगते संक्रंदनस्यंदने ॥
संवर्तव्यतिषक्तसप्तजलधिस्रोतःप्रभूतध्वनि-
स्फारः कोपि बभूव दानवबले हर्षाट्टहासध्वनिः ॥ ४५ ॥

चकितपलायितसंवलितमूर्छितनिष्पतित-
क्षतविबुधावननिषेधिमहारथिकं ॥
विजहि जहीहि याहि निगृहाण गृहाण हरे-
त्युपचितनादमेदुरमवर्तत दैत्यबलं ॥ ४६ ॥

अपि च ।

आवर्त्यावर्तयंतो दिशि दिशि तुरगान्वारणान्वारयंतो
मुष्णंतो भूषणानि प्रसभमभिनिपत्यायुधान्याहरंतः ॥
घ्नंतः संतर्जयंतः पथि पथि विबुधान्मुक्तकेशान्दिगीशा-
नभ्येत्यामंत्रयंतः प्रजहसुरसुराः सर्वतो निर्विशंकं ॥ ४७ ॥

तदानीं च ।

शस्त्राशस्त्रिक्षतपतिसुतालोकशोकावलुप्त-
प्राणस्त्रैणव्रजमशरणध्वस्तलुप्तापणांतं ॥
धावद्देवप्रवरसमरोदंतयाथार्थ्यबोध-
भ्राम्यत्पौरं नगरमभवज्जर्जरं निर्जराणां ॥ ४८ ॥

ततो मुहुर्तादेव मूर्ताइव कोपानलविस्फुलिंगा मुनेर्वलीमुखा मखद्विषः पराक्रमेण महता परिक्रामंतः तिरोहिते मरुत्वति द्रागे वरुणमूर्धनि पतित इति

प्रमीतइति प्रविष्टोऽमरावतीमिति च तदा तात्त्विकैः प्रवादभेदैस्तत्त्वमनवबुध्यमानापि भवतु सर्वथैव वयं प्रविशेम तावदमरावतीं परिशोधयेम ततः प्रवृत्ति शचीपतेरपहरेम सुरकामिनीरवस्कंदयेम कोशमंदिरमधितिष्ठेम सुधर्मामाक्रमेम त्रैलोक्यमिति कृतनिश्चयाः कल्पद्रुमाः बलेः कामधेनुं बाणस्य हास्तिकं नमुचेराश्वीयं शंबरस्य चिंतामणिं जृंभस्य विलासिन्यौ विरोचनस्य वारुणं पदमस्य वायवीयं तस्य वैश्रवणीयमेतस्य वैश्वानरीयममुष्य प्रविष्टं प्रवेष्टुः प्रत्तं लब्धं प्रहर्तुरपहृतमालोकयितुरालोकितमुपायवक्तुरर्धमुत्तरसाधकस्य तदर्धं समरसमयप्रवृत्तयोस्तु साधारणं वस्तु परतस्तु यथारुचि परस्परं छेदेनेति समयबंधनेन पर्यवस्थाप्य पताकिनीमारुह्य मतंगजानत्युन्नतानालोकयंतो नगरोपशल्यानि प्रशंसंतः प्राकारदुर्गसामग्रीं परिहसंतो बुद्धिलाघवं प्रतिद्वंद्विनां निर्दया विपक्षजातीयेषु निर्विशंका दुर्गगुल्मेषु ग्राहयंतो वधूदर्शं घातयंतः पुरुषदर्शमाकर्णयंतः कर्णामृतान्याक्रंदितानि नगरसदां हसंतो दर्शं दर्शमशरणान्वध्यमानान्कुप्यंतो दयालुषु कुतूहलिनो दारुणेषु विसर्जयंतो नैर्ऋतीयान्जात्यभिमानेन विद्रावयंतः कर्मदेवानुपहासैरुन्मथयंतो गोपुरद्वारमुल्लंघयंतः प्राकारमपश्यंतः शरणागतानशृण्वंतो याचनाक्षराणि सुरर्षीणामाज्ञापयंतो जिह्वाछेदनममरवैतालिकानां चरणकृंतनं चाराणां चपेटघातं मौहूर्तिकानामंगुलिछेदनमक्षरलेखिनामास्यविदारणममात्यानामवदारयंतः प्रतिमादैवतानि अपमार्जयंतः सुरपराक्रममालिख्यसमर्पितमशरणहन्यमानरक्तधारावसिक्तमग्रचरणाकृष्यमाणकुलपालिकाजनमाहन्यमानमुखरवाद्यनादमेदुरमपहृतसर्वस्वदीनजनाक्रोशजयाशीर्वचोमुखरमभितोप्याकस्मिकपतदशनिनिर्घोषनिर्वर्तितलोहयंत्रनिनादमंगलमभितोपतदुल्कासहदीपमालापरिवृतमनुप्रविश्य नगरमभिवंद्य पुरोधसं भार्गवमाक्रांतहर्यक्षमेरुगुहासधर्मां सुधर्मामध्यासांचक्रिरे आसीनाः क्षणममरसभांतरे परिष्वज्यमानाः परस्परं प्रशस्यमाना वंदिमागधैरभिनंदमानाः कुलवृद्धैरनुगृह्यमाणाः भार्गवेण निर्गम्य ततो बहिरचिरपरिगृहीतविजयेंदिरापरिरंभसंभृतकुचकुंकुमक्षौदैरिव सेनारजोभिरभिरंजिताः निरंकुशचंक्रम्यमाणविशृंखलदैत्यसंघवाहाः बलोन्मुक्तहाहारवमालक्ष्य सर्वतो नगरमुल्लोलकोलाहलशमनशीलया वेलयेवातनीयस्याविरमतेति कयाचिदेवाज्ञया चिरलब्धसुस्थमिव पर्यवस्थाप्य क्षणादाघोषयामासुरास्कंदनोपरमजयकाहलीमादिष्टाश्चदिक्पालपेदप्वसुराः स्वयमनतिक्रामंतो धर्ममौशनसमनुल्लंघ्यमानाः बलिशासनमनुवर्तमाना हिरण्याक्षदार्शितां सरणिमवलुंपंतो वैदिकपंथानमप्रमत्ताः स्वं स्वमधिकारमनुपालयांचक्रिरे ।

---

१ तोफाइति लोके.

वेदद्विषश्चिरतरं निरयेषु मग्ना-
नुत्तार्य दैवतपदेषु निवेशयंतः।
रक्षोघ्नमंत्रकुशलाञ्छतशो महर्षी-
न्प्रत्यक्षिपन्नरकवेश्मसु दैत्यदूताः ॥ ४९ ॥
ब्रह्मर्षयोपि दनुजेंद्रसभां प्रविष्ट-
मंत्राक्षराणि मघवादिपदांकितानि ॥
ऊहेन दानवपदान्युपवेशयंतो
हर्षाय पेठुरसुरेंद्रपुरोहितानां ॥ ५० ॥

किंच ।

विद्वांसः प्रथमेभवन् विवसनाः सौत्रांतिकाः साधवो
मुख्या माध्यमिकास्त्रिलोकगुरवश्चार्वाकतंत्रे स्थिताः ॥
पाखंडा निगमागमव्यसनिनः कालः कलिः शाश्वतो
दैत्ये शासति देवराज्यमजनि त्रैलोक्यमित्थं तदा ॥ ५१ ॥

अपक्रांतश्च तदा शचीपतिरभिगम्य सर्वैः सुपर्वभिरासाद्य भुवनसुंदरं मंदरं शैलमनुज्ञया बृहस्पतेरंतर्हित एव कतिचिदतिवाहयामास वर्षगणान् ।

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकंठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबंधनिर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्याप्यादीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसंभवेन श्रीमन्नीलकंठदीक्षितेन विरचिते चंपूकाव्ये प्रथमोल्लासः ।

ततः शतमखादयो युधि विरोधिभिर्निर्जिताः
श्रियं पुनरभीप्सवः क्रतुभुजो भुजोपार्जितां ॥
विचित्रमणिसुंदरं विपुलकंदरं मंदरं
समेत्य तपसा नयन्निमिषवत्सहस्रं समाः ॥ १ ॥

तत्र च वसतां तपोधनानामध्वरहविर्भागमपहरत्सु दूतमुखेन दानवेषु अकाले वा यष्टुमयज्ञेन वा रहसि प्रदातुमर्थनयाप्यसंमन्यमानेषु शास्त्रैकशरणेषु तापसेषु तप्यमानाः क्षुधा विबुधाः हुत्वा हवींषि हुतवहे दत्तानि तेनैव पुनस्तान्युपभुंजानाः कालं महांतमतिवाहयांचक्रिरे अपरे पुनः केचिदतिवेलश्रद्धामात्रशरणानधिगम्य मूर्खानमुनैव शरीरेण दिवमारोपयामो भवतः संबाधवानत्रैवानीय शाययिष्यामः सुरसुंदरीरिति प्रलोभयंतः पशुपक्षिसुराकुंभपायसापूपप्रचुरानलभंत महोपहारानपि च पुनरवरूढान्कर्मक्षये दिवः कर्मदेवानावृत्य किं कुर्वंति दानवाः किंवास्मान्कथाप्रसंगेषु कथयंति किमिति वृत्तमेषामनुमतं पितामहेन

१ तर्केण.

किंवा न तदवतीर्णमद्यापि तस्य कर्णपथं किमाहुरसुरमौहूर्तिकाः कीदृशो भार्गवस्य वृत्तांतः कथमास्ते वैजयंतः कस्य वशे तन्नंदनोद्यानमुद्वांतश्चतुर्दंतइति श्रुतमुच्चैःश्रवसः प्रवृत्तिमेव नोपलभामहेत्यनुयुंजानाश्चकितमवलोक्य समंततः किंच ब्रह्मलोकगमनोचितान्ब्रह्मर्षीन्मुमूर्षतः परिवृत्य परिहरंतः प्रयाणक्लेशमपि वरदानैर्निवेदयंतः प्रसंगेण दृष्टामिमां दशां भगवति पितामहे विस्मरतो नास्मदभ्यर्थनामध्यात्मविचारव्यासंगेनेत्युद्बोधयंतः स्वयमस्वप्नतया स्वप्नदृशस्तपोधनान्परिपृच्छंतः पर्यवसानं मुनिशापस्य निंदंतः स्वानि जन्मानि निःश्वसंतो दीर्घमुष्णं च मुहुर्मुहुर्बलाहकानामिव चातका वाचस्पतेरागमनमाकांक्षंतश्चिरमवतस्थिरे ।

अत्रांतरे सुरगुरुर्दरितं सुराणा-
मल्पावशेषमवयन्प्रणिधानयोगात् ॥
अभ्येत्य निर्जरगणैरभिवंद्य भक्त्या
पर्यावृतः सदसि किंचिदिदं बभाषे ॥ २ ॥

दिष्ट्या कुशलिनो वश्चिरादद्राक्षं दिष्ट्या च तीर्णप्रायोयमापदर्णवः दिष्ट्या च दुर्लभमिदं तपोवनं भवद्भिरासादितं वाराणसीव भारते वर्षे दयितं गौरीदयितस्य परमिदमेवायतनमिलावृते वर्षे आरसातलादाच शांत्यतिकलाभुवनात्संति महांति स्थानानि सर्वागमविदितानि परःशतानि भवानीपतेः परंतु मंदर इव तस्य दृशोर्न किंचन सुंदरमन्यदायतनमन्यत्र पंचतपसोपि मुनेरावसथेषु शांभवेषु स्वैरचारी विशिष्यइति श्रुतमेव भवद्भिर्वृद्धमुखादमृतप्राप्तिहेतुश्चायमस्मादृशानामिव भवादृशामपि शैलराजः । किंबहुना ।

कालोत्यगादशुभहेतुरुपस्थितं वः
कल्याणमद्य न चिरादिति भासते नः ॥
उत्तिष्ठतोच्चलत यात तु धाम धातु-
रुच्छ्वासकाभिरधुना किमनार्थिकाभिः ॥ ३ ॥

इति प्रवृत्या भाविमहासंविधानलभ्ययापि भाग्यवशादधुनैव स्वतोलब्धया सुधयेव वाचा वाचस्पतेराप्यायितः सुरपतिरिदमाचचक्षे । अथैतत्पावनमजनि तपोवनमद्य नस्तपांसि परिपेचिरे प्रशेमुः नः कलुषानि पर्युपास्थिषत मंगलानि अपरथा कथं भवदीयानां पात्रीभवेम शासनाक्षराणां ।

चेतो यद्भवतश्चिरंतनवचःसंदर्भसंगस्थितेः
वस्तुन्यस्तमितप्रपंचमलिमन्यामज्जमामज्जति ।
तद्दुर्मोचतमो विमोहितमतिष्वस्मास्वकस्मादिदं
सक्तं यत्पशुषु द्विपात्स्वपि ततो धन्या वयं न्यायतः ॥ ४ ॥

किंबहुनाद्य भवत्संभावनासंपादितस्यानंदस्य परं पारमपश्यंतो वयमस्म-

दानंदादनेकशतगुणं भवदानंदमुपपादयंतीं भगवतीमपि श्रुतिं न विस्रंभामहे ।
आजानंतो हि राजानः कदाचिदतिक्रामंति परानाक्रम्यंते च तैरिव नेमिक्रमः
सार्वजनीनएव तदपि भवदीया जयंत्येव न जीयंत इत्येकांत्यमनुसंदधतो वयमी-
षदपत्रपामहे व्यथामहे च भवतः पुनरीषत्करोस्मदनुग्रहः संकल्पमात्रसाध-
नस्य यदा हि भवज्जातीयाएव भूमिचरान्दिवमारोपयितुं दिविचरान्भुवमव-
रोपयितुमास्त्रादयितुं सप्तसागरानाचायितुं सुराणां विफलयितुं महास्त्राणि विष्ट-
भयितुं विश्वंभरमपि प्रगल्भं ते तदा श्रुतिशतप्रतिपन्नयाथात्म्ये भवतो माहात्म्ये
दंडापूपिकान्यायेन घंटाघोषएव नः शरणं तदलं पल्लवितैर्वचोभिरनुगृहाण स्व-
यमस्मानास्ति यदि भक्तव्यसनानवलोकनसंकल्पः अथवा साजात्याभिमानाद्दुर्वास-
सएव वचनं सत्यापयितुमध्यवसायः तदेहि यत्र निनीषासि तत्र एष्यामहे येनानु-
कंपयिष्यसि तेनानुकंप्यामहे सर्वथा न्यस्तात्मानो वयं भवच्चरणे किंकरचरणे
कदाचिदस्ति जिज्ञासा कीदृशस्तदभिप्रायइति न यदि किंकरजनेपि मादृशि
तथेति मंतव्यमिति कृतव्यवसायस्य सुत्राम्णो वचसि चित्रीयमाणश्चित्रशिखं-
डिजः सममाखंडलादिभिः सत्यलोकमभिप्रतस्थे अमराश्च तमनुवर्तमानाः
वर्तमानानि पथि वैमानिकानां दैत्यदानवयातुधानाध्यासितानि सिद्धचारणविद्या-
धराद्यावसथानि विलंघ्य ततो विदूरादुत्सर्पत्किन्नरीगानचातुर्यमुपशांतगांधर्वतूर्यमी-
खर्यमसंभावितकर्मदेवसंमर्दमनाशंकनीयब्रह्मर्षिसंचारसंकथमतिनीचरक्षःपिशाच-
मदिरागंडूषदूषितं मंदाकिनीतरूखंडगूढचरदेवर्षिमंडलमाखंडलनगरोपशल्यमंतः-
करणशल्यमालोकयंतः पुरा हंसावतंसितैस्सर्वतोगामिभिरप्सरोजनतौर्यत्रिकैरलं-
कृतैर्विमानैरतिवाह्यमानतया गृह्यमाणतत्तत्प्रदेशसौंदर्यमगृह्यमाणद्राघिमाणमध्वान-
मधुना पद्भ्यामेवाक्रम्यमाणतया गृहीतविपरीतमतिक्रामंतः पदे पदे विश्राम्यंतः
पथि पथिकजनसाधारणमपि तत्तत्पथेष्वातिथ्यं गूढसंचारवशादलभमानाः दा-
नवसेनागतागतोचितान्कथंचिदतिलंघ्य कानापि कक्ष्याभेदान् दिवस्तपोभिरपि
दुरापं तपोलोकसमीपमापेदिरे । प्रविष्टमात्राश्च ते परिहृतरजस्तमोगंधानुबंधतया
परिणतसत्त्वैकसारेषु तत्रत्यवस्तुषु महीचराइव महेंद्रभोगेषु अदृष्टचरं विशेषमा-
लक्षयंतो विसिष्मियिरे अपिच पुनरात्मविज्ञाननिरस्तावरणतया निःसीमविकसद-
कृत्रिमज्योतिषामाधिपत्यमलक्षणाय केवलमनुत्तरं यैर्गैश्वर्यमनुभवतां तत्रभवतां
सनकसनंदनसनत्कुमारादिमहायोगिनां मूकेष्विव वाग्मिनां मुग्धेष्विव बुद्धिमता-
मंधेष्विव चक्षुष्मतामधनेष्विव महेश्वराणां कीटेष्विव सरीसृपाणां सरीसृपेष्विव
चतुष्पदां चतुष्पात्स्विव मानवानां मानवेष्विव महीभृतां महीभृत्स्विव मरुतां
मरुत्स्विव मरुत्वतो मरुत्वत्यपि पतंतीमवज्ञामुकुलितां दृशमवलोकयंतः शृण्व-
तश्च तेषामेवं हंत वराकः शतमन्युर्नामायं परितोष्य शतेनाश्वमेधैरपि भगवंत-

मिंदुशेखरं प्रार्थयामास दानवामिषं स्वराज्यं पश्यंतः कुबेरमिमं पशुपाशविमोचन पाशुपतव्रतेन समाराध्य परमेश्वरं सखासि ममेत्यनुगृहीतोपि यः पिशाचइव धनपालतां वव्रे । किंबहुना आत्मभूतोप्ययमष्टमूर्तेर्भगवतो वैश्वानरो विफलीकृत्य विवेकमुपास्य चिरतरं कालमुमारमणमप्यासाद्य हव्यवाहतामन्नहरोस्मि देवानामित्यभिमन्यते कृतकृत्यमात्मानं हंत चिरादिमान्देवपशूनद्राक्ष्म ।

किन्न निगृण्हंति मनः किन्न भजंते जनाः शिवं शरणं ॥
अभिसंधिभेदमात्रान्मोक्षापायेन बध्यंते ॥ ५ ॥

इत्यादीनि परिहासवचांसि शृण्वंतः पश्यंतस्तरतमभावमैश्वर्येषु परित्यजंतः स्वर्गादिराज्यदुर्मदमपत्रपाः नष्टदृष्टयः स्वयमाधिपत्यादस्मदीयादत्र भिक्षाटनं ज्याय इति मेनिरे ।

अथ सुरगुरुमागतं सशिष्यं स्वयमवधार्य धिया सनत्कुमारः ॥
अपगततमसो महाप्रभावानशिषदमुष्य सभाजनाय शिष्यान् ॥ ६ ॥

प्रस्थिताश्च ते सर्वे परस्परालापेष्वथर्वशिखाप्रवर्तकतामांगिरसाख्ययोगग्रहस्य प्रवर्तकतामृग्यजुषोद्घुष्टप्रभावतामप्यनुस्मृत्य प्रशंसंतो ब्रह्मपुत्रं भगवंतमांगिरसं प्रशंसंतश्च गूढचर्यारतं महर्षिं संवर्तशिवाचार्यं मरुतानुग्रहवाराणसीनिषेवणव्रताद्युपाख्याने प्रशंसंतश्च संवर्तानुजमांगिरसं सर्वतंत्रेषु प्रवचनपारदर्शनप्रबंधनिर्माणव्यवहारकौशलैः परिहरंतश्च लोकायतिकतंत्रतीर्थकरता प्रयुक्तममर्षमपि बाह्यतंत्रप्रवर्तकपरमेश्वरनिदर्शनेन समागम्य यथाविधि सन्नताश्च स्वगुराविव सहशिष्यैः सुराचार्यं सनत्कुमारसमीपमानिन्यिरे ।

सनत्कुमारेण समागमे गुरोर्निशम्य वृत्ता[1] विविधास्तदर्हणाः ॥
निशम्य वादेष्वथ चास्य चातुरीं विशिष्य तस्मिन्नमरा विनेमिरे ॥ ७ ॥

आंगिरसोपि प्रणम्य भक्त्या महत्या परमेष्ठिनमिव सनत्कुमारमावेद्य देवकार्यमनुज्ञाप्य च तेन पाकशासनमनुव्रज्य परिष्वज्य गाढमादिश्य च चतुर्मुखोपसर्पणेतिकर्तव्यतामनुगृह्य शिवेन चेतसा विसृष्टस्तेन विनयातिशयादादृष्टिपथादादधानः शिरस्यंजलीमास्थाय महांतं योगमावर्तयन्प्रणवमेव सहामरैराससाद महताऽवधानेन हैरण्यगर्भमायतनं गच्छतश्च पथि

वाग्देवीवदनारविंदगलितब्रह्मौघविद्याशत-
ग्रंथग्रंथिविभेदजातकुतुकब्रह्मर्षिदर्पस्तवैः ।
कर्णाभ्यर्णगतैर्निवृत्तनिखिलक्लेशा दिगीशस्तदा
निर्वव्रुर्न च वव्रुरव्रणमपि स्वर्गं पुनर्ग्राहितुं ॥ ८ ॥

---

१ प्रवत्ताः.

अपि च अद्राक्षुरतिदूरत एव ते निरस्तरजस्तपोऽपतिकरतया निर्मलसत्त्वप्रकाशराशिमिव निष्कलंकशशांकेष्टकासंघसंघाट्टितामिव निरिंधनज्वलदविंधनज्वालापरिवर्तिपिंडितदुग्धसागरोर्मिभिर्निर्मितमिव चिरनिपातघनीभूतशारदाशिरश्चंद्रचंद्रिकाविकीर्णनीहारसारसाधितमिव त्रैविक्रमचरणाक्रमाविद्धविध्यंडकपालनिर्गलद्दलकनंदानिपातधौतामिव विमलभास्वरप्रभावभासितनभोविभागमपास्तलंकानुषंगतयेव धूमादिमार्गचंक्रमणपंकिलचरणपशुजनानाक्रमणीयमशेषभुवनसर्गावशेषसारैरिव विलक्षणैः शब्दादिभिर्विषयैरुपस्कृतमनुश्रवमयैर्प्राकारैरभ्युदयिकोपासनामयैर्गोपुरैरात्मोपासनामयीभिः कक्षाभिः प्रणवमयेन चास्थानमंडपेन परिशोभितं निजनिजकार्यनिवेदनावसरप्रतीक्षिततत्तल्लोकाधिकारिकारितसंमर्दबहिर्द्वारवितर्दिकाभागमागंतुकगंधर्वकिन्नराप्सरःसमारब्धतौर्यपूरितप्रथमकक्ष्यमनभिसंधितस्कर्मयोगानिर्मलकर्मादिवृंदपरिक्रमितद्वितीयकक्ष्यमतिगहनन्यायसांख्ययोगादिदर्शनतत्त्वामर्शनव्यसनकार्शितकणादकपिलपतंजलिप्रमुखविद्वदुद्दामजल्पकथाघोषघोषिततृतीयकक्ष्यमतिविचित्रतरत्रयीशिखरोपपादितोपासनाभेदवासनासनाथमुनियूथदर्शिताश्चर्यतुर्यकक्ष्यमतिरहस्यवैश्वानरदहरादिविद्यापरिचयानवद्यमहर्षिदर्शितोपासनाप्रपंचंपञ्चमकक्ष्यमतिदूरविसृष्टदृष्टानुश्रविकविषयाभिषंगिरंसागंधपरमहंसावंतासितषष्ठकक्ष्यमतिचातुर्यपर्यवस्थापितानुश्रवतात्पर्यपर्यालोचनापनीतविपरीतान्वयशंकाकलंकनिरंकुशकुशलजनालंकृतसप्तमकक्ष्यंप्रसंख्यानपरासंख्यभृग्वंगिरोवासिष्ठाधिकारिकमुनिमंडलमंडितास्थानमंडपमपदांविपदामगोचरं वाचामनाशंसनीयमर्वाचांप्रमाणानामगम्यमाचारमात्रशरणैरसाध्यमध्वरैरलभ्यमर्थिकैरामितयागविपाकैर्दुरवगाहमाहवसाहसैरसंभावनीयं भवनं ।

स्वाध्यायाध्ययनादृतेन विधिना दृष्ट्वापि नालोकिताः
सभ्यैः प्रत्युत सर्वभोगविमुखैरुत्सारिता दूरतः ॥
नृत्यंतः सुरसुभ्रुवः परमधुस्तत्र व्यथां मानसी
मानंदैकपदेपि धामनि कलाकौशल्यवैफल्यतः ॥ ९ ॥
प्राकारगोपुरविहारवितर्दिकानां
मूलेषु यत्र हरिनीलशिलाविभंगाः ॥
सक्ताश्चिरादिव जयाति[illegible]-
संतानसंघटित[illegible] ॥ १० ॥

प्रविशंतश्च तमालयं ननु [illegible] पुरुहूतजन्मो दिक्पतेः कतितमः पुरंदरो नामायमिति पृच्छ[illegible] [illegible] निर्भरा बलवल्लल...रे अपि च ग-

१ तत्त्वचिंतन २ भारत [illegible] ३ [illegible]

च्छतामंतरेषामालक्ष्यगतिमतिमलीमसामधिगंतव्याधिगमनेन निर्वृताः सर्वतोपि महर्षयः कतिचिदतिचिरंकालमहो खलु वयमप्यमीषां सामीप्यसारूप्यसालोक्यसिद्धिमाशंसमानाः नानाविधानि तपांसि वृथा चकृमेति गर्हमाणाः स्वमात्मानं लज्जितानमरान्भूयोपि लज्जयांचक्रिरे ।

अथ भगवानांगिरसो देवर्षिभिः परिष्वज्यमानः पदे पदे नारदादिभिः प्रत्युद्गम्यमानः विद्वद्भिः पतंजलिप्रमुखैरभिवाद्यमानः सिद्धविद्याधरैरानीयमानः सबहुमानमाप्तभृत्यैः परमेष्ठिना परिवृतो देवैः परमाश्चर्यनिर्भरैः प्रकृतिगुणैरिव परस्परयोगवियोगपरिणमद्भेदैरुच्चावचैर्मणिभिरुपरंजितमुपर्यास्तीर्णहंसतूलिकातल्पकल्पितमहार्होपबर्हमहिंसानृशंस्यकोमलमावर्जितशमाभोगमंतःकरणमिव महायोगिनां तांबूलकरंकचामरतालवृंतकलाचिकाद्युपचारचतुरवरवर्णिनीजनन्यस्तवामहस्तवेष्टिततया व्याकोचाष्टदलात्मिकां व्यंजयदिव कलासनतां त्रिभंगिसमुन्नतमित्रवर्गतितामिव सर्वतोभद्रभद्रासनमाधीतिष्ठंतं समसमयसमुद्यदादित्यसहस्रभास्वरैरर्केंदुविद्युदनलरूपचतुस्तेजःसमुत्तंभनायेव चतुर्दिक्षु निर्जिहानैस्तेजोभिरवलुंपंतमिवदिव्यमपिचक्षुर्दिवौकसां संततव्यवहारसंसक्तचतुरागमाक्षरप्रक्षेणयिदंतचंद्रिकाविकासपरिहृतसंसारशार्वरैरायतापांगरिंगदभंगुरकरुणातरंगमालाभिराचार्याभिषेकमादधानैरिव योगिनामध्यात्मविद्यासु चतुर्भिरिवांतःपुरैर्दयितानां चतसृणामपि श्रुतीनामाननपंकजैरनुगृण्हंतमभितो महाशयान् मुकुटावलोकनालंबितहंसदशाजिंतेन मृणालवलयेनेव मृदुना शुचिना च सूत्रमयेनोपवीतेन सूचयंतमिव सूत्रात्मतामात्मनःशस्त्रास्त्रविद्याकूपारपारीणक्षत्रियवर्गसर्गनिर्वृततयेव शस्त्रग्रहपराङ्मुखेन प्रकृत्यादिपृथिव्यंतपंचविंशतितत्वपरिवर्तनमात्रमेव व्यापार इति प्रदर्शयतेव पाणिना दक्षिणेन परिवर्तयंतमक्षमालिकामहर्मुखेषु प्रथममपामेव स्रष्टव्यतामवधार्य धार्यमाणेनेव स्फटिकमयेन कमंडलुना परिष्कृतेतरकरपल्लवमसकृदधीताध्यापितनिखिलनिगमांतसिद्धांतपांथसनकसनंदनादिमहादैशिकोद्भासितदुर्भेदसंशयछेदसंवादजिज्ञासयामुहुर्मुहुरवलोकयंतमंतिकगतां वाग्देवताभाचार्यमाचार्याणामधिगंतव्यमधिगंतव्यानां परमानंदतुंदिलमपि प्रपन्नानुग्रहव्यसनिनं समष्टिं भूतग्रामस्य साधारणं पितरमखिललोकस्य विश्रांतिभूमिं विद्याफलानां विरामपदं वाग्विभूतीनां दूरं दूराशयानामदूरमात्मवेदिनामधिगम्य भगवंतं पितामहमत्यद्भुतसभासभानाथसंदर्शनजडीकृतो वाचस्पतिरपि भगवान् वाग्देवतावलोकनसंपन्नभयकंपसंभ्रमस्तंभितवाङ्मुखः क्षणमवांङ्मुखश्च तदीयदिव्यतेजःप्रतिहतदृष्टितया यावदास्ते स्तब्धमिव तावदनुग्रहमय्या दृशा जगन्निधेरागच्छ वत्सेत्यमृतासारगिरा च गिरां देव्या निर्व्याजमाप्यायितः समाधाय कथंचिदांतरं करणमनुस्मरन्प्रणवमावर्तयन् ब्रह्मसूक्तानि तत्तदागमोदितानि प्रागेव न

स्रोपि भक्तिभारेण प्रणम्य शतशः सहामरैः प्रसादादेवदेवस्य प्रारभत किंचि-
देवमभिधातुं ।

अगंतव्यं तर्कैरनधिगमनीयं क्रतुशते
रनासाद्यं दानैरनुपसरणीयं च तपसा ।
भवंतं पश्यंतः शुचमभिभवंतं प्रणमतां
कृतार्था जाताः स्मः पुनरपि कृतार्था पुनरपि ॥ ११ ॥

किंच ।

भूतग्राममिमं चतुर्विधमहो निर्माति यद्दीलया
यच्च व्याकुरुषे निरंतरमसौ सांगाश्चतस्रः श्रुतीः ॥
चातुर्यं कथमीदृगित्यपगता शंका समस्तापि न-
श्चातुर्यं भवतो भुजेष्वपि मुखेष्वद्य स्वयं पश्यतां ॥ १२ ॥

इति सच ततः साधु वत्स साधु

स्थाने खलु छंदोगा बृहती वाक् तस्याः पतिर्बृहस्पतिरिति नामते निराहुरिति प्रशस्य म्लानइव लक्ष्यते कुतः पाकशासन इति पृच्छति सानुकंपमोजतमभवे पुनरिदमभाषत ।

परिम्लाना दीनाश्चिरपरिहृतस्वस्वभवना-
श्चरंतः पादाभ्यामवनिवलये भिक्षव इव ॥
यदा ख्यातुं दुःखं तव सन्निधमेते परिगता-
स्तदद्य व्यस्मार्षुः पदमिदमुपेता विति(मिरं ॥ १३ ॥

अपि च ।

यत्प्रत्यस्तमितप्रपंचमखिलव्याहारपारंगतं
प्रत्यग्ज्योतिरनुत्तरं शमधनैरालोच्यमेतादृशैः ॥
तत्संप्रश्नकथासुधाभरितयोः सेक्तुं भवत्कर्णयो-
र्मिथ्याज्ञानविचेष्टितानि बलवज्जिह्मेति जिह्वैव नः ॥ १४ ॥

अथाप्यनुयोगाज्ञानिर्वर्तनाय किंचिदावेद्यते योसावग्रतो भवतः परिणामइव करुणायाः परिपाकइव शमदमोपरमाणामधितिष्ठति शमवतामग्रासनं दुर्वासाः सोयमेव सर्वासां निदानमस्मदापदां ।

अव्याजकोपनिधिना मुनिनाऽमुनैव
निर्वासिता सुरपते सुरलोकलक्ष्मीः ॥
आसाद्य दानवकुलानि दिवौकसो न-
श्चक्रे पदं कृपण(नवदुर्दशानां ॥ १५ ॥

अपि च । अथ यद्भवतैव कल्पितमध्वरहविर्भोजनममर्त्यानामपहते तस्मिन्-

सुरैरसंभविते च यथा कथंचिदाने द्विजन्मनां अशिक्षिते च भीमवदनसाधनस्य व्यसने भवत्प्रसादादवधूय सौवर्गराज्यसिताधिषामपहाय दिव्यभोगेषु कुतूहलमन्वयैव स्पृहयमाणाः निरंतरमानिमेषतया अभावर्जितमूर्छास्वापमप्यलभ्यमानाः सुलभमाना दिवौकसः सूक्ष्मतरं व्युदपद्यंत दुर्लभानामन्यार्थिनामर्थनाभंगमंदाक्षसंधुक्षितांतरज्वालाकलपतंभृतेषु मानवानां यदि यज्ञैर्वितमेतैस्तदायुषा कल्पितेन भवतैव यास्यिपती मांसलता साप्यन्यापायशोकेन आस्तामिदं ।

प्रेक्षावंतो दिशि दिशि नराः प्रेक्ष्यमाणा धरण्या-
मित्थंभूतान्सुरपरिवृढानिंद्रवैश्वानरादीन् ॥
तत्तत्साम्योदयफलपरामप्रमाणां पुराणीं
मत्वा वाचं विदधति शनैः कर्ममार्गेष्ववज्ञाम् ॥ १६ ॥

अथवा किमिदमावेदनीयमस्माभिः ।

अभिदधति ते मूर्धानं द्यामनुश्रवसूक्तयः
सुचिरमसुराश्चैनामित्थं तुदंति दुराशयाः ॥
निगमशिखराभ्यासव्यासंगतो यदि विस्मृतं
तदपि भवता तन्नो दौष्कर्मीमित्युपरम्यते ॥ १७ ॥
इमे वयमिदं तत्त्वमित्थं स्थानमियं दशा ॥
परं यदत्र कर्तव्यं प्रमाणं तत्र नो भवान् ॥ १८ ॥

इत्यावेद्य विरमन्नांगिरसे विनमत्सु च युगपदमर्त्येषु प्रसादयन्सर्वांनिदमाह पद्म" संभवः विदितवेदितव्यैर्भवद्भिरित्थं न प्रतिपत्तव्यं दुर्वासासि यतः परिणाम एव करुणायास्तत एव महेंद्रमनुजगृहे तनीयसा शापेन अपरथा कथमतिवाहनीयमिंद्रेण परः सहस्रैरपि वत्सरैर्निखिलजगन्मातुरंबिकायानिर्माल्यसमुल्लंघनप्रसूतमिदं दुरितं तदस्मिन्महत्यपराधे यावत्क्षपितमेतदेनस्तावदनुस्मरणमपि भवतामपराधो महानिति चकितैरस्माभिरेतावदुदासितं महदपीदं मंदरपरिसरावासेन परित्यक्तमेव स्वावासनं तदपि जगज्जननीचरणापराधसंसर्गादधुनापि शंकमानैरस्माभिरन्य एवोपायः समुल्लिखितो भवदनुग्रहे नारायणीप्रसादतिरस्कारजोयमपराधो नारायणीयप्रसादपुरस्कारेण समाधेयइति ॥

तथा हि ।

यदेतद्वामांगं धनजघनकेशस्तनभरं
कदाचित्तच्छंभोर्भवति कमनीयं वपुरतः ॥
जगन्मातर्येवं यदपचरितं [illegible]
जगन्माता देवः प्रभवति स एव क्षपयितुं ॥ १९ ॥

तदा गच्छत क्षीरसागरं तत्र दर्शयिष्यामो भगवंतमिति वदन्नासनादुत्थायांतर्धे भगवान असंभवः।

अथ कथमप्यमर्त्यपतयः परित्रस्य भयं
गुरुकरुणाविशेषपरिणामकृताभ्युदयाः ॥
अखिलजनुष्मदाशयगुहाशयमप्युदधौ
शयितमिमं समेतु मुदमुंजत शार्ङ्गधरं ॥ २० ॥

किंच।

पाथेयं यं गरुडध्वजस्य प्रस्थाय यांतो ददृशुर्दिगीशाः ॥
तमेव सद्यस्तदनुग्रहस्य भविष्यतोपि ध्वजमग्रहीषुः ॥ २१ ॥

अवतरंतश्च ते सत्यलोकादनेकसहस्रयोजनमपि पंथानमतिलंघितं गणयंतो गव्यूतिमात्रमिव गणयंतो गुणयंतो भावितानि चतुर्मुखस्य गुरुगाकृष्यमाणतयेव झटित्युपनिपत्य विशश्रमुः। अविश्रांतपरिश्रमदश्रमारुतसंपातविनीतपथिकक्ष्यथे जलदपथे अद्राक्षुरपि ते तत्र निद्राणयुगाणपुरुषनिद्रामंगमपराधमाशंक्य संत्रासयंतमिव विद्रुमकांडेवदंडैरनिवार्यमौखर्यसमुल्लासदुर्ललितानि कल्लोलमंडितानि निरिंधनज्वलदाविंधनज्वालालतबंधानिष्यंदमानामिव वीचिभिश्चिरपरिचितक्षीरमेघरसास्वादसुहितचातकपोतसावज्ञनिष्ठ्यूतचंचुपुटनिपतदितरमधुरैर्बलिभंणरीभिरुपशोभितं चिरपरिचितक्षीरमेघमभितोपि सद्यःसमास्वादित शुध्वदुग्धपूरपूरितगर्भनिर्भरविशदनीरदनिकरसंछन्नात्मतया संपन्नमिव बंधनेन चिरसंभृततया संभावितपयोविकारजिहीर्षुणा ततस्ततः क्षिप्ताभिरंबुजसंभवेन समूलाभिरौषधीभिरभिशोभितं गोविंदचरणसंदर्शनायातविबुधसंसद्विमानहंसावेविच्यमानं सर्वतः पतदापगासहस्रनीरकृताहारलब्धसमिंधनबलवदनिंधनानलं सायंप्रातिकोल्लासपल्लवितकल्लोलजालवेल्लितवेलागिरिशिखरसंचारलब्धदुग्धाभिषेकमुहूर्तविमलीकृतवन्यद्विपतया परिचिन्वंतमिव चिरादैरावतसर्गचातुरीक्षीरैकविधानतयापर्वकालावगाहनप्रसक्तपरमर्षिजनप्रस्तुताघमर्षणसूक्तगोचरक्षीरपदोहानूहविचारकोलाहलाभिभूतवीचिघोषतृतीयावतारश्वेततानुचिकीर्षया स्वयमपि श्वेतीभवद्भिरिव भगवतः प्राथमिकावतारजातीयैः क्षीराहारपरिणामानर्मलैर्मत्स्यकूर्मैः परिकर्मितं शार्ङ्गधरं द्रष्टुमागच्छेदपि जातु चंद्रशेखरइति संभावनया सज्जीकृतैः कैलासैरिव पयस्तरंगैः परिष्कृतैरंतर्गतैर्गिरिभिरुपशोभितं कालचक्रमिव कर्कटमीनमकरकरंबितं गंगातीर्थमिव गर्भस्थानि कमठराजितं पाणिनिसूत्रमिव परस्मैपदप्रातिपदिकं आत्मतत्त्वमिवानिर्वचनीयगुणप्रपंचं कैलासशिखरमिव शैवलक्षणलक्षितद्विजखंडमंडितं निदाघभास्करमिव नितांतमुत्तरंगत्वातिभीषणं स-

---

१ जगन्नायक: । २ पुंजीभूता: ॥

मष्टिमिव क्षीरसागरस्य समवायमिव नैर्मल्यस्य चंद्रकातादिनिर्मलवस्तुवर्गनिर्माण कौतुकिना विधिना विलाप्य निषिक्तमिव भुवि रजताचलं क्षौमावगुंठनमिव क्षमायाः पद्मनाभशयनागारपर्यंतकुट्टिममिव स्फटिकशिलाचितमनास्पदं कवि-गिरामाश्चर्यमाश्चर्याणामार्तिहरं चक्षुषोरानंदनमंतःकरणस्यदुरासदमनाराधित-नारायणचरणारविंदानां दुग्धोदं नाम रत्नाकरं ।

घोणे क्वापि पुरा पयः कियदपि स्तैन्येन दैन्येन वा
लब्धुं यो वहदीश्वरोपि जगतां जन्माधमं मानुषं ॥
तं विस्मापयितुं तरंगवलयैर्घोषानसंख्यान् सृजन्
नाभूद्भूतलसंभृतेन पयसैवावृत्य यो वर्तते ॥ २२ ॥

स्वाद्या यत्र सुधैव यस्य जठरे साक्षात्स धन्वंतरिः
शेते यत्र समस्तरोगशमनो नाम्नैव देवोऽच्युतः ॥
नास्मिन्दुग्धनिधावपि स्थिरयते नैव स्थिरामासि का-
मंतर्लीनहलाहलोष्मचकितो नाथः स्वयं पाथसां ॥ २३ ॥

अपश्यन्नपि मध्यतस्तस्य किंचिदंतर्निमग्नपुराणभूदारदंष्ट्रादंडक्षोभितपयः पूरसमुद्धूतपुंजीकृतमिव फेनमंडलं एकतः प्रतिपर्वनिर्मुच्यमानपंकजनाभशयनो-रगनिर्मोकराशिमिव कालपरिपाकलब्धमृद्भावनिर्मलं नीविबंधमिव वसुंधरादुकूलस्य कल्पांतरीयमंदरावेष्टनक्लेशजनितया मूर्छया पतितस्य वासुकेर्जयतो वलयितमिव भोगमंडलमप्रतिरूपमंतरीयं ।

स्थानं विश्वसृजोपि तन्निरय इत्याचक्षते यद्विदो
यद्गत्वा गमनीयमुत्तरमितः कुत्रापि न श्रूयते ॥
आयास्यापि हि साधयंति मुनयो यत्रारुरुक्षां परं
तं दृष्ट्वापि पदं हरेः सुरगणास्तस्तंभिरे गाहितुं ॥ २४ ॥

अपि च ।

दध्युर्यावदुपायं ते गंतुं यत्र दिवौकसः ॥
तावभिदध्युरायांतं तत्र देवं पितामहं ॥ २५ ॥

पश्यन्नथ तत्र पाकशासनममरान्प्रासादांशमारोहकुतूहलिनः पंगूनिव भग्न-मनोरथान्प्रसादविमलया दृष्ट्याऽनुगृह्य सहागच्छत मयेति संदिशन्नग्रतश्चचाल कमलासनः ।

गच्छन्नेव ततः सतन्न गलितत्रस्ताधिकारैश्चिरा-
दैकांत्यं परमं गतेर्भगवति श्रीवल्लभे दुर्लभं ॥

प्राचीनैः कमलासनैरुपगतैर्भक्त्या महत्या नमन्
सस्नेहं सदयं सखेदमपि च प्रत्येकमादिश्यता ॥ २६ ॥

कथयद्यापि न वत्स परिणतोसि ।

वच्छभोसि सरस्वत्या वहसे च श्रुतीर्मुखे ॥
जगत्पितृमहश्चासि कस्तवाप्यनुशास्तिता ॥ २७ ॥

तच्चिंतय तावत्स्वयमेव ।

आयुर्येषाममीषां परममभिमतं किंचिदूनो मुहूर्तः
का संपद्वा विपद्वा प्रभवति भवितुं तत्र तेषां क्षणार्द्धे ॥
तच्चत्का क्षुद्रजंतून् दिवि चरत इमाश्चिंतयन्नात्मनीयं
वत्स त्वं प्रार्थयेथा न किमपि परमं ब्रह्म लक्ष्मीसहाय्यं ॥२८

इति बोधितो विधिरिदमाचचक्षे । जानामि भगवंतो जानामि ।

कर्तींद्राः कति लोकेशाः कति विश्वसृजोथवा ॥
श्वासे श्वासे प्रजायंते प्रलीयंते च शार्ङ्गिणः ॥ २९ ॥

तथापि नियुक्तेन क्वचिन्मया तदनुगुणं चेष्टितव्यमिति व्यवस्यन्नागतोस्मि । दर्शितं भगवंतमधिगम्य भवद्भिरेवाक्षरैर्व्याहरेयमिति प्रश्रितवादिनि पद्मसंभवे । प्रसन्नाः पारिषदा हस्तग्राहमाकर्षंतस्तमंतिक एव दर्शयामासुरांतरं रहस्यमुपनिषदां ।

यस्त्वं चिंतयसे नान्यं सर्वारंभेषु सर्वदा ॥
सत्वं चिंतयसे नान्यं विष्वक्सेनमिमं हरेः ॥ ३० ॥

इमं च पश्य वैनतेयं भगवतो वैनतेयं । व्यस्य किल पुरा कल्पे सुधाकुंभहरणसंरंभसंभ्रमोद्भूतपक्षमारुतविक्षेपसमुन्मीलिततया परितो विक्रीर्यमाणेषु नंदनोद्यानपादपेषु प्रयत्नेन महता पारिजातमेकमाहृतवतो भगवतोपि नंदाक्षमिव लक्ष्यते इति संशृणुमहे ।

अपि च ।

छंदे यथा यथा शौरेः संग्रामेषु जिगीषतः ।
तथा तथा प्रवृत्तोयं छंदोमय इतीर्यते ॥ ३१ ॥

अपि च ।

पादांगुष्ठनखाग्रलग्नविगलन्महाकूर्मद्विपांघ्रिद्वय-
न्यासाटोपविनम्र[illegible]विधृतन्यग्रोधशाखागताः ॥
येनोर्ध्वं पतता [illegible]मुनयो नीताः पुरा मेनिरे
संसिद्धं सशरीरमूर्ध्वगमनं सद्यस्तपोभिर्दृढैः ॥ ३२ ॥

अस्य किलोपवीतमित्यायामतः साम्यमवधारयंतः पुरा निर्जरा मैर्वीपदे मेरुधन्वनो वासुकिमादिशन्निति वदंत्येतिहासिकाः ।

पश्य ज्ञानक्रियेच्छामयमणिमुकुटाबद्धमध्यात्मविद्या-
भास्वद्रत्नप्रदीपप्रकरपरिहृतध्वांतमंतः समंतात् ॥
गाढं विद्याकपाटं प्रबलशमदमद्वारपालाभिगुप्तं ॥
भक्तिद्वारं मुरारेरिदमिहशरणागारमोंकाररूपं ॥ ३३ ॥

इति प्रबोधितो विधिरीदृशतादृशतानवच्छिन्नवैभवमचक्षुर्ग्राह्यमनुश्रवैकश्रवणीयमधिगंतुमिव भगवतो रूपमासाद्य चक्षुश्रवस्तनुमाक्षीभिः सहस्राभ्यामनुभवंतमिव परमात्मानमाशयमागमानामातिवेलश्वासनिश्वासपरंपरासंपादितभोगोपचयायचयतया संततमुपपादयंतमिव विलक्षणामूर्ध्वाधोदोलाविहारनिवृत्तिमाचार्यं योगविदामादिदेशिकं पदतंत्रस्य संप्रदायप्रवर्तकं शरीरमर्मणां भोगविमुखेषु हृदयेषु शमधनानां निरंतरावासनिर्वेदादिव गोगिनं कमपि भुवनतलाकल्पमास्तीर्य तल्पमधिशयानमतिशयानम्र मौलिभिर्महायोगिभिः प्रणामावसरप्रकीर्यमाणेषु कुसुमोपहारेषु सौकुमार्यातिशयसंसक्तेः कतिपयैरिव कल्पतरुप्रसूनैश्चिरनिर्गतसिद्धसिंधुसीकरशेषैरिव ततस्ततो लग्नैर्नखरैर्निरर्गलपवर्गदानसंसूचय नियंत्रितेन ध्वजेन संसारकांतारसंचारणखिन्नशरीरिणां छायाप्रदानाय समावर्जितेनैव छत्रेण परिष्कृताभ्यां पादतलाभ्यामलंकुर्वाणमंकतलमादिजनन्योर्लक्ष्मीधरण्योः काटितटाबद्धकनकांकुशतर्भातरंगपरिष्वंगपिंगीकृतवसुमतीकमलाविवेचनाचतुरत्तत्त्वरिचारिकोपचारविपर्यासपरिहासविनोदिनमाविर्भविष्यदसंख्यहिरण्यगर्भांकुरमयमणिशलाकांचितकार्णिकेन प्रतिसर्गावर्तमानप्रकृत्याधिवरण्यंततत्वाकिंजल्कपुंजेन प्रपितामहेन भुवनानां पांडुरेण सरोरुहेण मंडितनाभिमंडलं निर्मलचिन्मये वपुषि नित्यानुबिंबितेन मृगमदतिलकेनेव वक्षस्थितायाः श्रियः श्रीवत्सेन हृदयादुद्भूते चंद्रमसि स्पर्धया स्वयमपि हृदयाविर्भवता बालसूर्येणेव कौस्तुभेन च भूषयंतमप्राकृतानि भूषणान्यपराणि दिग्दंतिशुंडादंडैरिव विचित्रकनकांगदकंकणाद्यलंकृतैश्चतुर्भिर्भुजैः सूचयंतमिव चतुर्व्यूहतामहर्मुखविकसदाम्रपल्लवोल्लासीनि दंतच्छदे विप्रकीर्णतथा संध्यारागसंमूर्छितचंद्रिकोद्गारानुकारिणा मंदस्मितेन कलिकलुषजलाशयप्रसादनकतकरेणुभिः कैवल्यलक्ष्मीस्वयंवरदामभिरिव कलितनानावर्णविन्यासपेशलैः परिवहत्करुणासारसंपातशीतलशीतलैः कटाक्षैरभ्यनुगृण्हंतमनन्यशरणान्महामुनीन्कार्णवेष्टनिकमुखारविंदकामनीयकावलोकविस्मयमानकमलावतीर्णचंचनासक्तताम्बूलरागसंपद्विडंबिना पद्मरागतिलकेन परिष्कृतकपोलस्थलप्रमतिनिर्मलफणामंडलोदरप्रतिबिंबितैरहिराजफणामणिगणैरिव किरीटरत्नैरंजितमहीपर्वहमतिनयभारभंगुरैरनन्यार्पितदृष्टिसभिराकृतिमद्भिरायुधैः पं-

भिरभितोपि यथोचितमासेव्यमानमनुपमेयं प्राकृतैर्भावैरप्रमेयमनुत्तरपदारोहण-पंगुभिरर्वाचीनैः प्रमाणैरक्षोभ्यविज्ञानसागरमक्षयं महानंदशेवधिमतिदुर्लभमश्रुतानु-श्रवैरमीमांसितोपनिषदाशयैरनध्यासितानिदिध्यासनपथैरक्षालितकर्माशयरनुल्लंघि-ताविद्याकपर्वपंचकैरनायासलभ्यमतिदृढावलंबितगुरुचरणैरपायोपायवृत्तिपराङ्मु-खैरप्रकंप्यविश्वाससंपदवष्टंभराशिभिरात्मार्पणतत्ववेदिभिर्महाभागैरसाधारणधाङ्-गुण्यमखिललोकशरण्यमालक्ष्य सर्वप्रमाणपरायणं भगवंतं नारायणमसकृत्प्रणि-पतन्नसकृदुत्थाय बध्नन् शिरस्यंजलिमसकृदावर्तयन्प्रणवमसकृदनुस्मरन्परतत्व-मश्रुपूर्णैर्लोचनैरविरलपुलकांकितैरंगकैरानंदगद्गदैश्च वचोभिरित्थमस्तावीत् ।

क्षंतारं सकलागसां जडधियां यंतारमंतस्तमो-
हंतारं जगतामनुत्तरपराहंतांकितोरस्थलं ॥
उद्यत्कौस्तुभशोभमुत्पलवनीसच्छायमच्छायत-
स्निग्धापांगतरंगमीक्षिषि परं ब्रह्माच्युतं शाश्वतं ॥ ३४ ॥
किं तर्कैरतिवक्रैः किं फलमतिबृंहणैर्विविधैः ॥
अन्वीक्षिषि श्रुतीनामाशयमहिराजभोगशय्यायां ॥ ३५ ॥

अहो धन्योस्मि धन्योस्मि ।

एकं जगद्विभूति त्रिधामनिहितं चतुर्व्यूहं ॥
पंचायुधं प्रपद्ये षड्गुणसंपन्नमशरणः शरणं ॥ ३६ ॥

इति । अवांतरे वाचस्पतिं पुरस्कृत्य वासवमुखा बहिर्मुखाः प्रविकीर्य पुष्पांजलीन्प्रणिपत्य दूरतः शतक्रतुं समुत्थाप्य शिरसि संघट्टितांजलयो विस्मय-स्तिमिताः स्तंभवदासांचक्रिरे ।

तुष्टूषतोस्य बहुधा सुरदेशिकस्य
दिव्याद्भुतानि चरितानि परस्य धाम्नः ॥
स्तब्धा सती श्वशुरदर्शनसाध्वसेन
वाणी न वक्त्रकुहराद्बहिरानिरासीत् ॥ ३७ ॥

ततः प्रसादविमलपद्मनाभकटाक्षपरिक्षेपाविर्दितेंगितया पादमूलनिविष्टया तस्य भगवत्या पद्महस्तया निसर्गमधुरैरपि निर्भरवात्सल्यसुधासारमधुरतरैरक्षरै-र्वत्स चिरादागतोसि कुशलेन वर्तते का इमाः प्रजाः कांदिशीका इव लक्ष्यत इत्यनुज्ञ्यमानो विधिरंतरानंदतुंदिलः प्रणम्य शतशः परां देवतामिदमाबभाषे ।

जय जय जगदंब जांबूनदांभोजकोशप्रभे
जय जय कमलक्षवक्षस्थलीनर्महर्म्यप्रिये ॥
जय जय करुणाकटाक्षप्रतीक्षस्त्रिलोकेश्वरे
जय जय जनिमार्गलग्नाणुवर्गापवर्गप्रदे ॥ ३८ ॥

वत्सेति प्रवहत्सुधारसपरिष्वक्तं यदा मंत्रितं
दृष्टं यच्च दयातरंगशिशिरोत्संगैरपांगैस्त्वया ॥
तस्मादस्म्यधुना विशिष्य कुशली धन्याश्च देवा इमे
विज्ञाप्यंतु कथं हरौ किमथवा तस्यादिरादिश्यतां ॥ ३९ ॥

इति यावत्प्रार्थयते कमलां कमलासनस्तावद्गोविंद एव स्वयमित्थमनुजगृहे ।

स्रष्टासि तात जगतोस्य चराचरोसि
संधारयस्यथ मुखैश्चतुरोपि वेदान् ॥
तेनासि लोकदयितो दयितो ममापि
तद् ब्रूहि किं सफलयामि मनोरथं ते ॥ ४० ॥
कसृजं विश्वसृजः कतिचित्स्रक्ष्यामि कति सृजाम्यधुना ॥
भवति परभक्तिशालिनि भवतीव न मे क्वचित्करुणा ॥ ४१ ॥

इति मधुरां गिरमिंदिरापतेः पिबन्नष्टभिः कर्णैः पितामहस्तादात्विकमहाहर्षसंभ्रमादुपरतवक्त्रव्यः कथंचिदिदमाचचक्षे ।

स्वप्नोन्मादावपि हि सृजतो नाथ वस्तूनि मिथ्या
संधार्यंते ननु च मनुजैरप्यमी वेदवादाः ॥
पापः श्रेयः किमहमियताप्रापमेवानयातु
स्वामिन् दृष्ट्या तव शिशिरया मंगलं मंगलानां ॥ ४२ ॥

आपि च ।

मनोरथानामपि यो मनोरथः
सुदुर्लभानामपि यत्सुदुर्लभं ॥
तदेव लब्धं तव पादपंकजं
कदर्थनान्येव कदर्थनान्यतः ॥ ४३ ॥

आपि च ।

के देवाः के दनुजाः किं जगदेवेदमंततः कोऽहं ॥
परिहृत्य विमोहमिमं पालय दासोस्मि दासोस्मि ॥ ४४ ॥

इति कटाक्षपातेन कमलायाः परिग्रहेण च भगवतः प्रतिबुध्य तत्त्वमुदासीने पद्मसंभवे प्रपंचपांचालिकानटनसूत्रधारः परमपुरुषः सर्वपथीनया महामायया तमाच्छादयन् कर्तव्यमस्योपादिदेश सत्यमेवं भवानाह कदर्थनान्येव कदर्थनानीति अलमवेद्यग्रतः स्थितिरस्माकमवहितो गृहाणेदमादिश्य च सर्वानमरान् ।

संधानं कुरुतासुरैः प्रथमतो मंथानमुर्वीधरं
कृत्वा मंदरमर्णवे क्षिपत तैरेव सर्वैस्ततः ॥

बध्वा वासुकिनाथ मंथत ततः संपत्स्यते या सुधा
तामास्वाद्य गमिष्यथाप्यमरतां यूयं न वः शत्रवः ॥ ४५ ॥

परंतु भावितो तव दुष्परिहरः प्रत्यूहः परिहरिष्यते च स प्रसादादेवदेवस्य तदद्यप्रभृति विशिष्यावलंबध्वमविकारमणं शरणमिति ।

जानाम्यहमुमाकांतं जानासि त्वं च मद्गिरा ॥
जानंति किमिमे मूढास्तत्सम्यगनुशिष्यतां ॥ ४६ ॥
इति परमुपदेशं देशिको देशिकानां
निरुपधि करुणाब्धिर्निर्जरेभ्यो वितीर्य ॥
स्वयमपि हृदि गाढं चिंतयन्निंदुचूडं
मिषति कमलपीठे पद्मनाभस्तिरोभूत् ॥ ४७ ॥

अथ यथोपदेशमिंदिरापतेरादिश्यादेष्टव्यमंतर्हिते पितामहे पूर्णमनोरथा दिवौकसः पुरहराराधनकौतूहलेन पुनरासेदुरुपत्यकां परमानंदमंथरां मंदराद्रेः ।

इति श्रीमद्भ० श्रीमन्नीलकंठदीक्षितेन विरचिते चंपूकाव्ये द्वितीयोच्छ्वासः ।

उपासीना नानाविधिभिरुषहारैश्च विधिभिः
शरण्यं लोकानां शशधरकलोत्तंसममराः ॥
मृषा संधित्संतः प्रकृतिकुटिलैर्दानवगणै-
र्विरिंचस्यादेशादवृणुत गुरुं दूत्यविधया ॥ १ ॥

परायणं नः परमं भवान्यतो
गुरुः पुरोधाः सचिवश्च दैवतं ॥
अतो वयं तावदनन्यसाधना
वृणीमहे त्वामवमेपि कर्मणि ॥ २ ॥

इति प्रार्थितो देवैरिदमुवाच वाचस्पतिः ।
नैतावदभिधातव्यं न हि किंचिदवमं नाम कर्मास्ति राजोपजीविनां ।

तत्तस्य कीर्तिदं कर्म तदलभ्यं तदीप्सितं ॥
राजानः पुरुषो यत्र राजकीयं नियुंजते ॥ ३ ॥

परंतु किंचिदत्र विवेक्तव्यं । तथाहि

अनालोच्य निजां शक्तिमदृष्ट्वा कार्यसाधनं ॥
औत्सुक्यादेव गाहंते मंदा मज्जंति चातले ॥ ४ ॥

संधिर्नाम ऋजूपायः साधुष्वेवायमापद्यते न पृथग्जनेषु दूरे पुनर्दुरहंकारे दूषितेषु दानवेषु किंच दूतवाङ्मुखकौशलसाधनीयोयमर्थः कथं नाम दूतदर्शन-

मप्यसहमानेषु घटते श्रूयतएव हि वैश्रवणेन प्रहितो दूतः सद्य एव समापितः सद-
सि लंकापतेरपि च प्रवृत्ताः समरकर्मणि भग्नोद्यमाः सर्वतोपि संधित्संतो दूर-
दर्शिनो लब्धुं कथंचिदपि लिप्सितं नतु लब्धमपि नाशयितुं पश्यत ।

स्थानाच्चावयितुं क्षणात्पुनरपि स्थानेभिषेक्तुंच वा
शक्ताः केलिकथांतरेष्वपि भवंत्यर्धोद्गता यद्गिरः ॥
तेऽमी सर्वसुनिर्वृतादनुभवः संधाय किं धावता
भिक्षार्थं परितोधुना मघवता संपादयंत्वीप्सितं ॥ ५ ॥
गौरश्वः करिणः स्त्रियो मणिगणाः शस्त्राणि वस्त्राणि वा
यानि प्राभृतयेम तान्यपहृतान्याक्रम्य तैरेव नः ॥
तद्रिक्तेन करेण रिक्ततरया वाचापि चाहं कथं
शक्तः स्यादनुजेश्वरान्वशयितुं संद्रष्टुमप्यंततः ॥ ६ ॥

इति युक्तियुक्तमुपपाद्य विरमति देवगुरौ । विहस्तेषु च समस्तेषु दैवतेषु कृत-
मुखः स्वयं शतमखः किंचिदिदमाचचक्षे । भगवन्नेवमेवैतद्यदभिहितं भवता किंतु ।

निःसंख्यस्फुरदुत्तरोत्तरचमत्कारासु धारासु ते
वाचामक्षरमक्षरं त्रिजगतीवाग्गर्वसर्वंकषं ॥
श्रोतुं लालयितुं पुनः प्रतिसमाधातुं च वा किंचिद-
प्यर्वाचः कइमे वयं यदि परं देवः स वाचांनिधिः ॥ ७ ॥

परं त्वेकमिदमेवमनुस्मरामि । आदिष्टं यदध्यक्षमेव नः समस्तानां
संधानं कुरुतासुरैरिति शार्ङ्गधन्विना परमेष्ठिने यदपि च तेन तुभ्यं ।

शिष्टं यदत्र दुष्टं वा न विवेक्तुं क्षमामहे ॥
स जानीते स जानीते त्वं जानीषे तदंततः ॥ ८ ॥

इति ।

अनितरशरणत्वमात्मनस्तद्
दृढमुपपादयताथ देवभर्त्रा ॥
प्रतिहतवचनो गुरुः सुराणां
प्रकटयितुं धियमात्मनः प्रतस्थे ॥ ९ ॥

स गच्छन्नेव पथि सर्वं करणीयमवधारयामास ।

अयं कालो बुद्धेरयमवसरश्चाटुवचसा-
मियं वेला युक्ता दिशि दिशि यशः संघटयितुं ॥
असावत्यर्घो नः सुकृतमुपचेतुं महदिति
व्यवस्यन् प्राप प्रागसुरगुरुमाखंडलघुनः ॥ १० ॥

ततश्च तमतर्कितोपनतविनयमभिगम्य सहाशिषिरभ्यर्च्य विधिवदर्घ्यादिभिः

सपर्याभिरासयन् महति मणिविष्टरे भार्गवः स्वयमासीनः तदनुज्ञया सविनयमिदमाचचक्षे। अद्य मे सफलं जीवितं अद्य हुतं विधिवदग्निषु अद्य दत्तमतिथिष्वभ्यागतेषु अद्याधीतमागमेषु सरहस्येषु अद्याराधिता गुरवः अद्य फलितो गृहस्थाश्रमः किं बहुना अद्यायमन्वयः प्रतिष्ठितो भृगोः यदनुष्ठितं मनोरैरनवाप्यं तपोभिरपि आशासनीयं गृहमेधितामासादितमनायासेन मया। स्वयमागमनं भवतोऽधुना इत्युदाहरति भार्गवे पुनरिदमुवाच बृहस्पतिः।

पुत्रावुभौ प्रथमजौ भृगुरांगिराश्च
ख्यातौ कुले शमवतो ननु पद्मयोनेः॥
तद्भार्गवस्य कुलमांगिरसः प्रपन्न-
श्चित्रीयते किमिह सोदरसंप्रयोगे॥ ११॥

अपि च।

निष्ठामाश्रमधर्मपालनविधौ नित्याभियोगं त्रिवे
शक्तिं कर्तुमकर्तुमन्यथयितुं तंत्रेषु राज्ञामपि॥
श्रावं श्रावमनुक्षणोचिततया प्रीत्याहमस्म्यागतो
यत्सत्यं भवदीक्षणाय हृदये तत्रावयोः साक्षिणी॥ १२॥

इत्यभिदधानो गुरुरलमतिवात्सल्यादतिलालनेनेत्यभिधाय विसृज्य सामाजिकान् विविक्ते पृष्टः कविना समागमनकारणमुदाजहारेदमुपपत्तिगर्भया गिरा। आवेदनीयं किमखिलवेदिषु भवादृशेषु। तथाहि।

जानीषे जगदेव तावदखिलं स्वप्नेंद्रजालोपमं
जानीषे ह्यधिकारदुर्विलसितं संसारमप्यावयोः॥
जानीषे भगवत्परिग्रहपरीणामं सुपर्वस्वपि
व्यापर्तव्यमितोस्ति यत्तदपि ते नापेक्षते मद्गिरं॥ १३॥

अपि च।

येनादिश्यत वेधसा जनिमता मद्रोहतो जीवनं
तेनैव त्वयि दुर्धियां दनुभवामादिष्टमाचार्यकं॥
अस्मिन्किं करणीयमर्थगहने मीमांसकैर्मादृशैः
शक्तस्त्वं त्वनुवर्तितुं तदपि खल्वाकाशवद्वर्तितुं॥ १४॥

तत्कथंचिदेकीकृत्य देवासुरान् एकांतशीलाभ्यामावाभ्यामासितव्यमिति वक्तुकामोहमागतोस्मीत्यभिहितो गुरुणा यथार्थमेव तदालोचयन् कविरिदमाबभाषे। भगवन्नेवमेतत्।

जानाम्येव यदाह पद्मनिलयो यच्चाह विश्वंभरो
यच्चास्ते हृदि ते यथा किल तदप्यग्रे विवर्तिष्यते॥

कस्त्वं संघटनेसि को विघटनेस्म्याकृष्य विश्वात्मना
योक्ष्यंते न चिरेण चेह तृणवद्यातेन देवासुराः ॥ १५ ॥

तदस्तु यथा तथा वा संमुखीकरिष्यामि दानवान् संभाषयिष्यामि च भवंतं ततो ययामनोरथमभिधीयतामित्युपच्छंद्य समानीय बलेः सभां सभाजयन् विविधैरुपचारैः संलापयामास वासवगुरुं भगवन् दिष्ट्यासि दृष्टश्चिराय किमागमनकारणं किं कुशली मे भ्राता पुरंदरः सकिं करोति किमावसति नामापि तस्य न संशृणुमस्तदाप्रभृति इत्यनुयुंजाने बली सोत्प्रासमाददे गिरमांगिरसः।

देयं यस्य सदेवमर्त्यभुजगं विश्वंडमेवाखिलं
पात्रं यस्य जगद्विधिः स भगवान् देवः सरोजेक्षणः ॥
शिष्यो भूतए, रसौ कुलगुरुर्यस्योशना भार्गवः
कीर्तिर्दानवरा, सा भगवतः कासां न पारे गिरां ॥ १ ॥

तदभिगम्यापि सुदूरमालोकितव्यः पुण्यश्लोको द्रुतमित्यागतोस्मि भ्रातुरपि ते वृत्तांतमावेदयामि ।

यस्यैवं भूर्भुवस्वर्भुवनपरिवृढो वर्तसे पूर्वजस्त्वं
दुर्दांतध्वांतभानुः स भवति भगवानेव यस्यानुजन्मा ॥
संप्राप्तो यः शरण्यं त्रिभिरपि करणैर्देवदेवं त्रिनेत्रं
प्रष्टव्यं तस्य कस्मिन्कुशलमकुशलं तस्य जिष्णोः कुतः स्यात् ॥ १७ ॥

स यदैव संगरंगमारूढो योद्धुकामोवतस्थे तदैव तमशरीरिण्या गिरा निवर्तयन्नाहवात् निर्मार्ष्टुं मुनिशापमालिन्यमभ्युदयेन च नियोक्तुमधिकेन परमे तपसि परमेश्वरो नियुयुजे ।

यः शक्यो न दृशापि गोचरयितुं सत्त्वैस्तमोगंधिभि-
र्यत्र ब्रह्म सनातनं गिरिजया स्वैरं परिक्रीडते ॥
अध्यारुह्य तमेव मंदरमनुध्यायन्य आस्ते शिवं
कस्तं ईक्षयति कः प्रवेक्ष्यति कथं देवोपि वा दानवः ॥ १८ ॥
प्रल्हादः प्रथमो गुरुर्भगवतस्तंत्रेषु लक्ष्मीपते-
र्व्यातेने च विरोचनं कमलभूरध्यात्मविद्यानिधिं ॥
बाणः पारिषदाग्रणीः पशुपतेस्त्वं तु प्रवेकः सतां
सिद्धानामपि योगिनामशृणुवं नैवं कुलं निर्मलं ॥ १९ ॥

तदत्र महाकुलप्रसूतस्य भवतो महदनुशिष्टस्य किमावेदनीयमन्यैः स्वयमेव महाभागः स्वरूपं पर्यालोचयतु कार्यस्य ।

ददति च वरं दत्त्वा सद्यस्तदन्वपयांति च
द्रुहिणहरगोविंदा दैत्येष्विति स्फुटमेव वः ॥

न च नियमितो देवानेवानुकंपितुमीश ते
यदसुरवरान्मध्ये मध्ये समुद्रमयंति च ॥ २० ॥
अथ ब्रह्मेशविष्णूनामपि शुद्धचिदात्मनां ॥
आचूडादानखाग्रेभो मन्ये मायामयं वपुः ॥ २१ ॥
तदप्रदाय परेभ्योवकाशमन्योन्यसमवेतेषु युष्मासु ।
यन्नैश्चित्यं यदौद्धत्यं यद्बलं या सुखासिका ॥
यद्यशो यः प्रतापश्च सर्वं तदनुचिंत्यतां ॥ २२ ॥

आस्तामिदमवश्यं हि विगृह्णन्तु युष्मासु । भवितव्यप्रकाशेन मया वा भार्गवेण वा । तथाच ।

निर्वर्त्यमाना यत्नेन निर्जरैरसुरैश्च वा ॥
काः क्रियाः फलवत्यः स्युरावयोरप्रकाशयोः ॥ २३ ॥

आखंडलस्य तु मतिरन्यादृशी ।

स्थीयतामग्रजैः स्वर्गे जीयतामनुजेन वा ॥
सर्वथा भ्रातृभाग्येन संवृत्ते नः प्रयोजनं ॥ २४ ॥

इति । अहं तु भवतः सर्वज्ञादविशंकमवादिषं न खल्वात्मसचिवोक्तमित्येवादरणीयं । परसचिवोक्तमिति परिहरणीयं । धीमतां हि धीरेव सचिवः शासिता-इत्यभिधाय विरमति गुरौ । आलोकितो बलिना भार्गवः सामाजिकान्नुमोदयन्निदमाचचक्षे ।

सकलाशयमर्मज्ञाः समयज्ञाः संधिविग्रहयोः ॥
पारीणा नीतिपथे भवंत एव प्रमाणमर्थेषु ॥ २५
यद्यप्यद्य गतश्रियः सुमनसो यद्यप्यसौ तद्गुरु-
र्यद्यप्यास्ति फलं न किंचिदपि नः संधाय साध्यं सुरैः ॥
पर्यालोच्य तथापि किंचिदुदधिं निर्मथ्य लब्ध्वा सुधां
पास्यामो वयमित्यसौ रहसि मां यत्प्राह दिव्यो मुनिः ॥ २६

इति तच्छ्रुण्वंत एव दानवाः संमोहिता मायया वैष्णव्या सद्य एव संमेनिरे । आहुश्च ।

संधास्यामः शमधनगिरा निर्व्यलीकं सुरैः प्राक्
क्षोभिष्यामो जलधिममृतं तत्र लभ्यामहे च ॥
पास्यामश्चाप्यथ तदुभये यद्यमी साधवः स्यु-
र्नैवं चेत्किं विहितमियता बाहवः क्रागमन्नः ॥ २७ ॥

इति ततः साधु साध्वित्यनुमोद्यमानाः सचिवेन प्रस्थाप्य वाचस्पतिं प्रथमतः संधास्यंतः प्रतस्थिरे दानवाः सद्यएव मंदरं पूर्णमनोरथश्च गुरुः पुनरुपाव-

र्तमानः संददर्श मंदरमेत्य संततशिवध्याननिर्धूतकल्मषान् शिवार्चनव्रतिनः शिवार्पितप्राणान् शिवनामकीर्तितपवित्रितमुखान् शिवकथापरायणान् शिवाहंभावभावितान् शिवाद्वैतवादकोविदान् भस्मदिग्धतनूरुहान् भासितानेपुंड्रमंडितपंचाष्टादिस्थानमनोहरान् प्रालंबिजटावलयावलंबितशकुनकुलनादशकुनावेदितसान्निहितशांभवप्रसादान् शुद्धाध्ववर्तिनो विज्ञानिकपालानिव सुनासीरमुखान्।

आख्याय निखिलवृत्तमाशयं च विरोधिनां ॥
आदितेयान्स दैतेयैः संधातुं समनीनहत् ॥ २८ ॥

ततो महता बलेन महता सन्नाहेन महता चावधानेन संधातुमागताः सर्वेपि दानवाः प्रकृतिकुटिला अपि परिणततपोविशेषपरिक्षीणकल्मषतया दुर्दर्शान् मध्यान्हभास्करानिव दुरासदान् युगांतपावकानिव विस्रंभणीयान् विश्वसृजमिव पुनः पुनर्दर्शनीयान् पुर्णसुधाकरानिव संलक्ष्य गीर्वाणान् संत्यज्य दुर्विशंकितानि प्रतिषिध्यानुयात्रिकान् परित्यज्य शस्त्राणि निर्मलेन मनसा निरंतरं परिरेभिरे संक्रंदनोपि यथान्यायं समागम्य दानवैरभिवाद्य पुरोधसं भार्गवमनुमतो वाचस्पतिना किरन्निव सुधारसं किंचिदिदमाचचक्षे।

साफल्यं तपसामिदं सुमहता साफल्यमक्ष्णामिदं
साफल्यं पितुराशिषामिदमिदं साफल्यमस्यायुषः ॥
श्रीमत्काश्यपपादतातचरणस्थानोदितैर्भ्रातृभि-
र्ज्यायोभिर्यदहं विरोचनमुखैर्वात्सल्यपात्रीकृतः ॥ २९ ॥

अपि च।

आराध्या ननु यूयमेव गुरवस्त्रैलोक्यराज्यार्पणा-
दाराध्या गुरुभार्गवप्रभृतयो ब्रह्मर्षयः शक्तितः ॥
किं कर्तव्यमितोपि केवलमहं शांतोस्मि शांतोस्मि च
प्राप्तुं तत्परमामृतं यदि भवद्भ्यो यतिष्ये सुखं ॥ ३० ॥

इति वदंतं भ्रातरमिंद्रमाहुरसुरेश्वराः। मैवमाखंडल मैवं।

त्वमसि शतक्रतुस्त्वमसि नीतिपथे कुशल-
स्त्वमसि कृपास्पदं भगवतः प्रमथाधिपतेः ॥
अपि खलु बालकेन भवता भवता मघवन्
निखिलमनाकुलं कुलमिदं प्रतितिष्ठति नः ॥ ३१ ॥

व्यापृते च त्वयि तपसि राज्यमिदं व्याकुलीभवेदिति संलक्ष्यतेस्माभिरनियुक्तैरपि साध्वसमेवानुचिंत्य भवतः।

एकेन विधृतं राज्यमियंतो भवता वयं ॥

निर्वहंतोद्य जानीमो नैपुण्यं वत्स तावकं ॥ ३२ ॥
अमृतं यदि भोक्तव्यं अनुमन्यामहेतरां ॥
संविजित्यैव तद्भोज्यं न निर्भज्येति नो मतिः ॥ ३३ ॥

तदाख्यातु भवानेवमथनोपायमादिष्ट नारायणेनेत्यनुयुंजानेषु दानवेषु यथाश्रुतमाख्याय पुरंदरः तमेव मंदरमुत्पाट्य सागरे निपातयितुमुत्साहयामास बलिं ततः कियदेतदुत्पाटनं नाम गिरेः विधमामो मुखमारुतेन विक्षिपामोगुलिस्फोटेन समुत्धरामो वामहस्तेन संक्रामयामः सायकेनैकेन इति बलोत्सेकादुच्चावचं गर्जत्सु दानवेषु बलिरिदमवादीत् हंत कथमर्भकाइव यूयमकृतज्ञाइव निरंकुशं प्रतिजानीध्वे ।

विंशत्यापि भुजैः पुरा गिरिवरं विक्षोभयन्छूलिनः
पादांगुष्ठनखाग्रयंत्रणदलद्दोः संधिभेदश्चिरं ॥
क्रोशक्रोशमवाप वार्षिकनिशामंडूकवद्यः श्रमं
युष्माभिः श्रुतिगोचरं न गमितः शंके स लंकेश्वरः ॥ ३४ ॥
अपि द्रष्टुमशक्यो यः सिद्धैरपि महर्षिभिः ॥
विना शंभोः प्रसादेन कथमुत्पाटयेम तं ॥ ३५ ॥

तदद्य वयं सर्वे प्रपद्य भगवंतमुमाकांतं प्रसाद्य वाङ्मनःकायैः प्रार्थयेमहि प्रार्थनीयमिति । ततः साधु साध्वित्यभिनंद्यमाना भार्गवांगिरसाभ्यामन्योन्यकृतसंविदो देवासुराः प्रतिपद्य मंदरं शैलं प्रणिधाय मनांसि वर्तमानाः कठोरे तपसि वाग्भिरस्तुवन्नित्थमंबिकारमणं ।

युगविगमोन्मिषद्विषमलोचनकोणपत-
द्धुतवहविस्फुलिंगहुतसर्वजगद्धविषे ॥
अचलधनुर्धराय हरिणांकशिखामणये
विजयजयैकहेतुविशिखाय नमो भवते ॥ ३६ ॥
शिवं ध्यायस्यंतः सकलजगतां यच्छसि शिवं
शिवोसि त्वं नाम्ना ननु शिवतरश्वासि विदितः ॥
शिवार्थी जंतुस्तच्छिवमखिलभावेन भगवन्
भवंतं हित्वान्यं शरणयतु कं न्यायशरणः ॥ ३७ ॥

वदिदानीम् ।

मंदिरं क्षालयंतस्ते मंदरं दुग्धसागरे ॥
अमृतं लब्धुमिच्छामस्तद्भवाननुमन्यतां ॥ ३८ ॥

इति ततस्तथा कुरुतेति घनस्तनितगंभीरया गिरा गगनसंभवया संतोषिताः

संतोऽसुराः सुराश्च समनह्यन् ।

विनिघ्नंतः पादैरथ विचलयंतः करतलै-
रुदस्यंतो दंडैरुपरि च किरंतस्तमिषुभिः ॥
निषेदुः श्रांतास्ते यदपि च विषेदुर्दनुभुवो
निमित्तं दुष्टं तन्निखिलमुशना तेषु जगृहे ॥ ३९ ॥

अथ प्रतीक्ष्यमाणश्चरलग्नमाचार्यो दिवौकसां संवर्तोचितं रूपमालंब्य सर्वतो वाहीति संदिदेश गंधवहं ।

अथ दिवसावसानइव पद्मभुवः पवनः
स्वयमकृतक्षणादिव विदिक्षु च दिक्षु चरन् ॥
अलघुविघूर्णितार्णवसमुक्षितकुक्षितल-
क्षितिवलयार्द्रताशिथिलमूलमहार्यकुलं ॥ ४० ॥
स्तोकस्तोकप्रचलदनिलग्रासदुर्भिक्षखेदैः
कालं कालं कथमपि चिरं यापयां चक्रिरे ये ॥
आकंठं ते पपुरिममविच्छिन्नधारं समीरं
प्राप्ताः शंभोरुपकरणतां पन्नगस्तं नगाग्रे ॥ ४१ ॥

अथ तमदृष्टचरं वेगमनलसारथेरभिनंदतइव मंदरस्यालक्ष्यत मनागिव शिरःकंपः ।

चकंपे हंतायं गिरिरनुचकंपे पुरहरो
जहीतेदं क्लैब्यं जहित च वृथावस्थितमिदं ॥
इति स्वेन स्वेन व्यवसिताधियः काश्यपसुताः
समेता गर्जंतः सपदि चलयामासुरचलं ॥ ४२ ॥

तदिदानीं च ।

निष्पतद्रुममुत्पतत्खगमद्भुतस्खलदश्मभू-
झर्झरस्रुतनिर्झरांबुझलझ्झलारंबुभैरवं ॥
गर्भगव्हरनिर्भरभ्रमदुद्भटानिलपूरित-
क्रंददंतरकंदरं किल मंदरं ददृशुर्जनाः ॥ ४३ ॥

गर्जंतश्च ते तदनु पर्जन्याइव गणयंतश्च करगतमिव कार्यमशेषं पूर्वतो दिक्पतीन् दक्षिणतो देवानपरान् पश्चिमतो बाणं सहस्रबाहुमुत्तरतो महासुरानितरानपि विभज्य विनियुंजानाः खाते परितः परिखावलयमिव मूलगर्ते कराचलान् निदधानाः परित्यजंतः प्रहरणानि परिहरंतोंगुलीयकानि बध्नंतः कटितटेषूत्तरीयाणि समारोपयंतः कंकणान्यंगदस्थानमुपवीतयंतो नीवीतलंबीनि हारमं-

१ सज्जा बभूवुः

ङलानि उद्बोधयंतः परस्परमसकृदपि संमं निदधत करांचलात् समुत्तंभयत समं विस्तंभयंत समुच्छ्वसत समं निश्वसत समं कुरुत बलानि अपरथा विशीर्येयुः शिलराणि विनमेदयमेव मंदरः क्वापि चलेदपि ततो भद्रपीठं चंद्रापीडस्य समुद्विजेत दुहिता शैलराजस्य क्षुभ्येयुः प्रमथाः कुप्येदपि शैलादिश्चतुरंतया न गतश्च भगवानंविकारमणः चतुरतरमस्माभिर्विहनीयः इति वादयत्सु वादित्राणि गंधर्वेषु गायंतीषु गणशः किन्नरीषु नृत्यंतीषु निर्जरवारकांतासु श्लाघमानेषु चारणेषु प्रयुंजानेष्वाशिषः परमर्षिषु वर्षत्सु दिव्यबलाहकेषु पुष्पवर्षाणि हरहरहरहरेतितारध्वनिभिरापूरयंतो विध्यंडमंडलमुन्नमयामासुरुर्वीधरं मंदरं ।

आपातालनिमग्नमूर्तीनि बलान्मूले समुन्मूलिते
शैलस्यास्य भुजंगराजनगरप्रासादशृंगायते ॥
खेलंत्यः शतशः फणींद्रसुदृशः स्वच्छंदमात्रास्पदे
कृच्छ्राद्भिः प्रतिलेभिरे दिविचरैरक्लेशमप्रार्थितं ॥ ४४ ॥

अपि च ।

अभ्यर्णस्थलभाजि तत्र शिखराण्यामूलमुन्मीलिते
तत्क्षोभक्षुभिते च कांचनगिरौ किंचित्समाकुंचिते ॥
विभ्रश्यद्बृहभित्तिविश्लथपुरद्वारं विशीर्णभ्रुट
त्सौधोत्सेधविटंकसंघमजाने स्थानं सुराणां तदा ॥ ४५ ॥

समुद्धृत्य तमारसातलप्रविष्टमपि सद्यः समारोपितं कलममिव लीलया प्रस्थिता दुग्धार्णवं प्रति देवासुराः अशिथिलशिखरमप्रकंपितनितंबमखंडितगंडोपलमनुश्चितनिर्झरप्रवाहमस्फुटितपर्यंतरमभंजिततरुपुंजमनुत्खातलतावितानमस्पंदमृगवृंदमनुद्भ्रांतशकुंतमव्यापन्नभोगसल्लकिन्नरीगानमस्तब्धसिद्धचारणकोलाहलमविश्रांतगंधर्ववादित्रमनुपरुद्धतपोधनध्यानमानंदयंतो भगवंतमुमाकांतमवहंत मंदरं स च नीयमानः सर्वैरपि सुरासुरैरखिलभुवनाधारस्य पशुपतेरप्याधारतावलेपादिव पादैराचक्राम शिरांसि पर्वतानां परितः पतदच्छनिर्झरापदेशेन प्रस्रक्षमिव विचकार दिङ्मुखेषु यशांसि निर्मलानि आकाशएव नीयमाने तस्मिन्नधस्तनीषु दिव्यभूमिषु तासुतासु तपस्यंतस्तपोधनाः कातिचिदतिचकितः प्रायुंजत परमाशिषः परिपेठुः स्वस्त्ययनानि अजपन्नभयंकरमावर्तयंत मृत्युंजयमनुदध्युश्च दुद्धरणमविकारमणमाशंसिरेच बलातिबलाभ्यामश्रमं दिविचराणां महाप्रकाशमणिगणाकीर्णस्य चलतः पथि संचरणादागत्य पार्श्वतलमध्वप्रतिरोधादनैव निलीयमानः पतिरपि त्विषां प्रदीपइव दिवाप्रवर्तितो भग्नतेजा ददृशे । अपिच पुनरक्लेशलेशमानापत्यासहकाम्यायनीरुचिरान्प्रदेशान्पश्यंती विविधानि वस्तूनि परिपृच्छंती प्रणयिनमभीक्ष्णं प्रसन्नेन चेतसा स्थापयिष्यतोपि गिरिमनुजगृहे

देवासुराननुजगृहे उपेंद्रगृहे क्षीरसमुद्रे ।

उड्डीय स्वयमुत्पतन् गिरिरसौ वाचैव नेतुं क्षमो
भग्नस्कंधशिरोधरैर्दिविचरैरित्थं यदश्लाघते ॥
एतत्पर्वतपक्षतिक्षतिकृतो मुर्खस्य दौष्कर्म्यमि-
त्यायस्ताः पथि पर्यभाषित [?] ते सर्वे सुपर्वेश्वरं ॥ ४६ ॥

अपि च ।

भग्नो यस्य दशाननः प्रचलने किंचित्सवृत्तः पुरा
शक्यं तस्य गिरेः कथं नयनमित्यस्तावि षुः साधवः ॥
अन्ये चक्षमिरे न तद्भवति का श्लाघात्र शाखामृगै-
रानीताश्च निपातिताश्च जलधौ शैलाः समूलाइति ॥ ४७ ॥

इत्यमतिभारभंगुराः सुरासुराः यावदासेदुरंतिकं दुग्धनिधेस्तावदुद्वेगः श्वेतद्वीपसदामुज्जृंभत पश्यत पश्यत पर्यते नीयमानं महागिरिं पातयिष्यते च नूनमत्रायमर्णवे परिप्लावयिष्यते च सनिःशेषमंतरीयं यदद्यैव सज्जीभवत समुत्तिष्टत सर्वतोपि वेलामुच्छ्रयध्वं इति हंत केनेदमुत्प्रेक्षितं बकबंधकौशलं किंचिदपि चोच्छ्वसिति सा किंकरणीयमुच्छ्रितयापि वेलया तदारोक्ष्यामो वयमद्य वैकुंठमर्कमंडलं वा धाम त्रिधाम्नइति अनुचितमेतदालोचितमयुक्तं हि सेक्कानपहाय भगवंतमन्यत्र गंतुमिति किमुच्यते भगवंतमपहायेति किं न विचारितं भगवानेव मंदरपातृदर्शनकौतूहलव्याजेन प्रस्थातुकामो वर्तत इति कतिवारानेष पपात मंदरः कतिवाराभोदजृंभत सागरः कस्यापि ब्रह्मणः कल्पेन जानीमो विप्रवासमहो खल्वमीभिराधुनिकै र्बाध्यामहे भागवतैरिति भवतु भवतु कथयंतो दृढमितोपि कवलिताः सरिद्भिः सागरैश्च महत्स्वायतनेषु महीगतेषु शार्ङ्गपाणेः कति न भवद्विधाः परमभागवताः तदास्यतामिहैव भवद्भिराधुनिकास्तु वयमज्ञातपारावाराः गोपायंतः क्वचिदात्मन गोविंदमेव निरंतरमसंदधीमहि इतिच विप्रविदितान्महाबादान् पश्यतामसकृदुल्लम्योल्लम्य परिप्लच्छतामागच्छतो वैमानिकान् परिभ्रमतामभितोपि कोलाहलेन महतापारिषदानामग्रणीः कुपितो विष्वक्सेनो बहिर्निर्गत्य परितोपि चक्षुः प्रसारयन् आनीयमानम भ्यर्णतएव मंदरमवधारयन् अनुपदमेव तस्य सिंधौ निपातनमपि विज्ञापयामास विनयेन विदितवेदितव्यमपि स्वधर्मइति विश्वंभरं ।

व्यस्तकौस्तुभभवद्भुतवैजयंति विस्रंसमानकनकांबरलोभनीयं ॥
सद्यः फणींद्रशयनादुदतिष्ठदीशः कैलासशैलशिकरादिव कालमेघः ॥४८॥

अपि च ।

दिव्यैः पंचभिरायुधैः सविनयैरावद्धसेवाक्रम-

स्तत्कालोपनतैस्तपोधनगणैर्धन्यैर्वृतः कैरपि ॥
अभ्यर्णे वसतस्तदा खगपतेरालंब्य हस्तं शनै
र्विष्वक्सेननिवेद्यमान सरणिर्विश्वंभरो निर्ययौ ॥ ४९ ॥

अथ तमतर्कितोपनिष्क्रांतमरविंदनाभमवसरज्ञो विधिरर्धपथे समेत्य सह महर्षिभिः विविक्तसेवावसरलाभविस्मयानंदमंथरं पश्यंतमचलनिपातकौतुकं परिवार्य केवलमवतस्थे ।

नवकुवलयदामश्यामलस्निग्धमुग्धं
नलिननयनमाद्यं तत्त्वमावेदयंतः ॥
परिजहुरमरौघाश्चेतसा कार्यभारं
परिजहुरुभये ते पाणिभिः शैलभारं ॥ ५० ॥

ततश्च ।

सुरासुरकरोदरस्खलितशैलमूलस्थल-
स्थितोपलतलाहतिक्षुभितसिंधुसंधूत्थितः ॥
भ्रमत्तिमितिमिंगिलभ्रमितवालकोलाहलैः
समं निखिलमंबरं परिववार तारस्वनः ॥ ५१ ॥
सबलदचलसमुद्रवल्लोलकल्लोलकोलाहल
व्यतिकरबधिरभ्रमत्कूर्मनक्रद्विपक्रंदितैः ॥
स्फुटितकमलजांडभांडप्रचंडस्वनोत्प्रेक्षण-
क्षुभितविबुधमुक्तहाहारवैश्चाहसीदच्युतः ॥ ५२ ॥

अपि च ।

निर्मग्नमंदरमणिद्युतिसंप्रदिग्धानिष्पेतुरंबरतले पयसः कणा ये ॥
लग्नाश्चिरायकुलिचामलकाभ्रमात्रास्तारा स्तएव परिणेमुरिति प्रतीमः ॥५३॥

पथि गिरिवरादस्माद्वारावसत्सुरासुर-
प्रतिपदकृतस्कंधव्यत्याससंभ्रमकंपितात् ॥
मणिभिरभितो यस्यां यस्यां भुविस्खलितं क्वचि-
त्समजनि खनिः सा सा नाम स्थलेषु जलेषु च ॥ ५४ ॥

अपि च

विदूरादंबरतलादापततोस्य महता वेगेन प्रकीर्यमाणे पर्यंगते परिपीयमाने च दरीमुखैरेव परिसरगते च पयसि शून्यमिव निरवशेषमर्णवमन्यमाना नभश्चराः निर्मग्नजुरुभये भये उन्मथितेषु च तन्मूलघटनादर्णवजंतुषु ततः परिभ्रष्टाः करिणएव जलकरिणः किरातएव जलमानुषाः निर्झरचराः शफराएव तिमयश्च तिमिंगिलाश्च संपेदिरे ।

अपि च ।

पुनरवगाहमाने रसातलं गिरौ अभ्यर्णगतं दुग्धमादायादाय सुखमभिषिंचंतः पारमेश्वरं लिंगमभ्यनंदन्नंदिमुखा गणाः । ऊर्ध्वमाद्युलोकादुत्पतता च दुग्धपूरेण परिप्लाविता सिद्धनदी बभूव दुग्धनदी । संसिक्ताश्च पयसा मधुरेण सर्वतो नंदनोद्यानपादपाः । सदाहि सुधामधुराणि स्रवंते फलानि ।

मज्जन्मंदरशैलकंदरपुटव्याघूर्णदर्णोभर-
स्वैरोज्जागरघोषभीषणपयः कल्लोलिनीवल्लभाः ॥
खेदस्तंभितकिंपचानविबुधप्रारब्धभूरिस्तवा-
गोविंदस्य कुतूहलं विदधिरे ते केचिदेके क्षणाः ॥ ९५ ॥

मज्जति मज्जति शैले पतति च पततीह कुलमिदंद्युसदां ॥
शरणं शरणमतस्त्वं शार्ङ्गधरेति प्रचुक्रुशे विबुधैः ॥ ९६ ॥

ततश्चकितसुरासुरस्तोमसंस्तूयमानो भगवानरविंदलोचनः प्रसादविमलपावनैः परिवहत्करुणासारसांद्रितैः कटाक्षैरनुगृह्य कल्पतरुपल्लवोल्लासिना केवल्यलक्ष्मी निवासमंदिरेण करारविंदेन तानाश्वासयामास ।

तत्क्षणं च ।

भूभारभंगुरभुजगपुंगवभोगवलयपरिवृंहणादिव कुलिशकर्कशेन शाणनिकृष्टवज्रफलकस्निग्धेन सर्वतोऽप्यशेषभुवनात्मनाप्ययुतयोजनमात्रविस्तारशालिना चर्मणेन पाराशर्यसंक्षेपपरिमितैरनुश्रवैरेव चतुर्भिश्चरणैः संकोचविकासशीलया मायैव कंधरया समस्तागमस्तोममस्तकेनैव मस्तकेन च परमाद्भुतेन समुद्वहन् अवनिगर्भात् चापमुक्तइव सायकः समप्रेण रंहसा समुत्पपात महान्कमठः ।

प्रत्युद्यत्कमठकलोरपश्चिमांगव्यासंगप्रशिथिलमूलसन्निवेशः ॥
डाक्षिप्ता प्रतनुरिवोपलो बलिष्टैरद्रिर्द्रागुदपतदर्णवाद्विदूरे ॥ ९७ ॥

उद्घातसागरपयोभररिक्तगर्भ-
पर्यंककंदरगलत्पवनो गिरींद्रः ॥
मग्नोत्थितः सलिलतो महता श्रमेण ॥
निःसीम निःश्वसितास्निग्धइवाबभासे ॥ ९८ ॥

आलक्ष्य तदाश्चर्यमानंदमंथरेषु वृंदारकेषु कृतार्था वयममुनानुग्रहेण किमतः परं करवामेति विज्ञापयत्सु विनयेन गरुडध्वजं समानयत वासुकिमित्यनु शशास समीपगतश्चतुरानन: ततस्तथेति परिगृह्य शासनं तस्य निर्जिहानाः वाहिनेयाः समानग्रामा यूयमेव समानयत वासुकिं सांत्वमेनेति प्रार्थयामासुरसुरवरान् ।

प्रागेव पातालजुषां प्रवृत्तिर्जिज्ञासवो दारकुमारकाणां ॥
ते मंदरोद्धारविलाघ्वनैव सद्योवतेनुर्दनुजाः प्रहृष्टाः ॥ ९९ ॥

प्रविशंश्च ते ददृशुरतर्कितोत्धृतमंदरमूल कंदरोद्वांत मूर्छितपन्नगाश्वासनपरिभ्रांतबंधुजननिरंतरं अर्णवनिमज्जदचलराजसंमर्दनिर्दलदतलवितलादिलोक निष्पेषघोषभीषिताश्च सदास्तविहस्तजानपदजनाकीर्ण मतितूर्णसमुद्गच्छदादिकच्छपनिष्ठुरपृष्टसंघट्टन् स्फुटितशैलशिलाभंगसमुच्चलदभंगुरस्फुलिंगपरिष्वंगदह्यमाननगरग्रामपल्ली निवेशननिरंतरोत्पातधारानिरीक्षणसाध्वसेन पतिष्यति नाम भूतलं चलिष्यति नाम सुमेरुः स्फुटिष्यति नाम विध्यंडमंडलं प्रवेक्ष्यति नाम सागराः परित्यक्ष्यति नामशेषो भुवनभारमित्यसंभावितमूलमनुक्षणमुच्चलंतीभिः किंवदंतीभिः समाकुलमभितो रसातलं समागम्यते वासुकिं सभाजिता यथोचितं समावेद्य सागरनिर्मथनसंरंभमनुपदमेव कथांते कथयामासुः शनैरिव भवितव्यंभवता मंदरवेष्टनदामानि अनुमोदमानो वचनममीषामाहस्मेदमुरगपतिः ॥ अहो चिराय श्लथोयमभ्युदयो भ्रातृजनस्य यत्किल समागम्यदैते वैरादितेयाः साधयंति मनीषितं । तत्र स्वयमयुक्तैरपि कावेये र्भ्रातृभिः साहाय्यकर्माचरितव्यं इति न्याय एव चोदयति मां अत्र किमावेदनेन भवतां परंतु ।

मूले वालधिमग्रतः सुरगिरेर्मौलिं च मे बध्नता-
कल्पे प्राचि पिनाकिनाभगवता कृष्टोस्मियल्लीलया ॥
तत्कालश्लथसंधिबंधपरिवृत्तास्थीनि मर्माणिता-
न्यद्यापि स्मितजृंभितक्षवथुषुस्वाछंद्यमुछंद्यते ॥ ६० ॥

अपि च ।

यस्तल्पेष्वपि कोमलेषु शयितुं शक्नोमि नाश्मत्स्विव-
त्यक्त्वा कुंडलतां स्वपन्नपि च यो नागंतुमद्योत्सहे ॥
पाषाणद्रुमगुल्मकंटकदरीकूटप्रपातोद्भटं
सोहं वेष्टयितुं क्षमः किमचलं गात्रैर्जराजर्जरैः ॥ ६१ ॥

तदद्य किंचिदनुगृह्य नयंतु भवंतस्तक्षककर्कोटकशंखचूडगुलिकैरावतपद्ममुखान्महात्मनस्तरुणा न्फणाधरान् अंततो नयत जितश्रमं वा शेषमित्यभिदधानो वासुकिः पुनरित्थमभिदधेदानवैः ।

क्षुद्रैः किं करणीयमेभिरुरगैः क्षीणायुषामंतकै-
र्या शेषं नयतेति वागजनिते सैवास्तु सत्याधुना ॥
भूभारेद्युपयुक्तएष विदितः सर्वैस्ततोन्यः पुन-
स्त्वं शेषो भवसीति निश्चितधियस्त्वामेव याचामहे ॥ ६२ ॥
अपिश्लक्ष्णीकुर्मो मणिवदचलं पाणिकषणै
रपित्वांओढाः स्मः सुखशयितमादुग्धजलधेः ॥
सुखं चाकर्षामस्तदुपरि यथा दुष्यति भवान्

प्रसादायच्छस्व प्रचलशनकैः प्राप्नुहि यशः ॥ ६३ ॥

किंबहुना ।

प्रतिवेशिका वयं भवतः परिचितत्वदयाश्च चिरनिवासेन ततस्त्वमेतदवधार्यताम् ।

महद्भिर्मथ्नीमः खजमजगरैर्मंदरचरै-
र्महद्भिर्वा पाशैर्भ्रमयितुमलंस्म स्तमचलं ॥
कराग्रैर्मथ्नीमो जलधिमथवा किं क्षरति नो
यशस्तुद्रातुं ते पुनरपि वदामः पुनरपि ॥ ६४ ॥

इति प्रार्थितो दानवैरत्तरो भुजगपतिरपि प्रस्थातुकामो वलयमेकमुत्सृजन् यावदुत्तस्थौ । तावदर्णवमथनक्षोभशंकितपतनामवनीं धारयितुमवस्थापितः स्वयंभुवा वज्रस्तंभइव स ददृशे । ततः प्रतिष्ठध्वमित्यनुज्ञायदानवान्प्रसारयन्मंदरो-द्धाररंभाभिमुखमनुद्रुतस्तक्षकादिरनुमतो भूभारवहननिश्चलेन भगवता शेषेण शनैः शनैः शिथिलीचकार भोगवलयान् ।

अथ तेन विलाध्वना विशंतं ॥ पवनं पार्थिवगंधसारसांद्रं ॥
प्रथमे पथि विश्रमे फणींद्राः पपुराकंठमयाचितोपपन्नं ॥ ६५

ततः प्रपातइव परिच्छतनिम्नोन्नते तस्मिन् विलद्वारे महता यत्नेन मंदमंदमुपसर्पंतो दशयोजनमधः पतंतः शतयोजनमारुरुक्षंतः पुनरनवेक्षमाणा निम्नोन्नतानि फूत्कुर्वतो भूयसा यावत्श्राम्यन्निलाशनाः तावत्करावलंबनप्रदानापदेशेन पारिघतोमरगदाप्रासादिभिः प्रहरणैः प्रकल्पयंतइव सोपानानि परिकर्षंतः शनैरिव प्रापयामासुरवनितलं फणधरानसुरेश्वराः ।

आपातालात्फणधरपतेराचमूलात्सुमेरो-
रभ्राक्षुस्ते स्तिमितपतितं भोगमायासयोगात् ॥
मंथानाद्रेरवनिवलयादुद्धृतस्यातिवेगा-
दंतर्लग्नं तृटितघटितं मूलमेकं भुवीवा ॥ ६६ ॥

अथ कथंचिदाश्वस्तमाहिपुंगवमालक्षयंतो दानवाः नगनगरग्रामनदनदीनदीशसंतानदंतुरेण भौमेन यथा परिक्रमणमावेद्य मांद्यहेतुमाख्याद्य तदनुज्ञामाफणामंडलादाचवाचमूलादुद्धृत्य करांचलैर्युगपदुपवेशयंतः स्कंधेषु तमपरान्पुनर्महोरगानंगुलीभिरंगुलीयकानिव पादैर्नूपुराणीव पाणिभिः कंकणानीव कटिभिः कटिसूत्राणीव वक्षसा हारवलयानीव वहंतो लीलया तारापथेनपथादुग्धोदमभिप्रतस्थिरे ।

दूरादलक्ष्यत सुरैर्दनुजांसलम्राद्राधीयसी भुजगपुंगवभोगरेखा ॥
तिर्यत्प्रवाहमुपयातवतीह दिष्ट्या मंदाकिनी निपतिता शिखरे हिमाद्रेः ६७
पायं पायं पवनमभितः स्थौल्यमापद्यमानं
वाहं वाहं फणधरपतिं विह्वलस्कंधबंधाः ॥

प्रत्युद्यातैः सुरपरिवृढैर्भारविश्रांतहेतोः
सार्धं दैत्या भुवि निदधिरे सन्निधौ शार्ङ्गपाणेः ॥ ६८ ॥
अथ शिथिलांसमांसलितखेदविनोदकृते ।
परिकलितांगभंगमभितोपि वपुर्धुवतां ॥
करचरणोदरांगुलिभुजांतरकंधरतो
भुवि भुजगा निपेतुरतरे विबुधद्विषां ॥६९॥
खर्वोन्नतासुरस्कंधसंधारणकृतां व्यथां ॥
वीजितो विबुधैर्देवैर्विजहौ वासुकिः शनैः ॥७०॥

परिश्राम्यतश्च वासुकेरतिवेलश्वासनिश्वासपरंपरापरिणमदपचयोपचया परिणतशरकांडपांडुराच भोगयष्टिरभिपूरयितुं दुग्धसागरमापतिता विदूरादुच्छृंखलतरंगमालासमाकुला स्तब्धेव सिद्धनदी सुरासुरैरालुलोके ।

क्षितिधरपरिपातक्षुभ्यदंभोधिगर्भ-
प्रचलदमृताबिंदुस्पंदसांद्रैः समीरैः ॥
फणिपतिरपनीतस्वेदखेदो ददर्श
त्रिजगदनभिवेद्यं देवमाद्यं मुकुंदं ॥ ७१ ॥

प्रणिपतन्नथ वासुकिः फणामणिप्रकाशधारानीराजनैराराधयामास चरणारविंदमरविंदनाभस्य । आह चेदं भगवन्नाशिक्षितोस्मि शेषइव व्याकरणे अनभियुक्तोस्मि पद्मइव पंचरात्रे अकृतश्रमोस्मि कंबलाश्ववराविव गांधर्वे केवलमहं भगवतो मेरुधन्वनः सायकसंधानावसरसंपन्नं भवतश्चरणारविंदभाग्यं परिशीलयन्नांतरेण करणेन परिपालयन् भवच्छासनमाकांक्षयन् भवतो नियोगानुग्रहमासे भवदधीनइति तदनु च ।

किं मंत्रैः किं तंत्रैः किं व्याकरणेन किं पुराणेन ॥
चरणांबुजे निमग्ना धिषणा यदि पद्मनाभस्य ॥ ७२ ॥

इति स्तुयमानमब्जादिभिरिंदिरारमणो वासुकिमिदमवादीत् । वासुके न वक्तव्यमिदं त्वया परिजातैव हि भक्तिमियतीमपि मया प्रतिष्ठापितोसि प्रथमभुवनाधिपत्ये तदानीं माहेश्वरधनुरनुरुध्य संपादितं सर्वं यशो माहेश्वरं गिरिमिमं प्रदक्षिणीकृत्य परिवर्धयेत्यादिशामि ।

तेजसाप्याययिष्यामि दिव्येन त्वामसंशयं ॥
कामं वेष्टय मंथाद्रिं कर्षंतुत्वां सुरासुराः ॥७३॥

इति दत्तवरो वासुकिरिंदिरारमणेन परितोषयन्सुरासुरान् पश्यत्सु वैमानिकेषु समुत्क्षुत्य वेगेन सद्यःकृतविद्रुमकांडवत् संवेष्टयामास भोगेन मंदरगिरेराभोगं ।

प्रणमंतः स्तुवंतश्च भगवंतं जनार्दनं ॥
ववल्गुश्च जगर्जुश्च वासवाद्या सुरासुराः ॥७४॥

इति श्रीनीलकंठदीक्षितविरचिते चंपुकाव्ये तृतीयोच्छ्वासः

संवेष्टयन्नथ समंदरमंबुराशौ
सार्धद्वयेन वलयेन भुजंगराजः ॥
पार्श्वद्वयेपि शतयोजनमुच्छिशेष
पुच्छं मुखं च मथनाय सुरासुराणां ॥ १॥

ततः पूर्वजैः पूर्वकायः फणिपतेरवरजैरवरकायश्च परिग्राह्यइति न्यायमाचक्षाणेषु दानवेषु कटाक्षेण कमलाक्षस्य शासनेन च स्वयंभुवः समुत्साहिताः परिकल्प्य शिरोभागमासुरं परिजगृहुर्वालभागमदितिसुताः अनंतरमंतर्भ्रमदचलराजमूलशिलासंघसंघर्षकंडूयननिद्राणकमठराजनिश्वासपरंपरापरिहृतपवनाशनलोकदुर्भिक्षमभितः प्रकीर्णदुग्धकल्लोलनिपातपूरितशुद्धजलार्णवमामूलपरिभ्रमदमृतसागरैकावर्तपरिभ्रमिततिमिंगिलोद्गीर्णतत्कालनिगीर्णाजीर्णशफरीतर्णकाकीर्णमत्युच्चशिखरिशिखरानिष्पतदच्छनिर्झरस्रोतोनिपातपरिधौतचक्रवालशिलाचक्रमतिरभससमुद्धतधातुरागसमुद्भाविताकांडसंध्यासंसूचितहालाहलोपप्लवमुत्प्लवमानदुग्धशीकरास्वादसुखितभुजगराजभोगप्रसारणवेगवतत्सुरासुरस्तोमपर्यवस्थापनव्यग्रपद्मसंभवमुभयपार्श्वसंघटितशिलासंघसंघर्षणसुखनिर्मुच्यमानचिरपरिणामनिर्मलवासुकिनिर्मोकशकलपरिधानसंजिघृक्षानुधावत्प्रमथयूथीननादमेदुरमत्यायासपरिश्रांतजरदुरगराजसमुद्वांतपरुषविषानलज्वालाकलापदुरापलालाप्रवर्तितहालाहलबीजावापमावसथपरिभ्रमसमुद्विग्नकात्यायनीपरिरंभसंभ्रमानीतचंद्रशेखरतयाप्रतिक्षणमुपर्युपर्युपचीयमानमहातपःसंभारमारसातलपरिभ्रमदणर्वावतर्गतर्सदृश्यमानफणिलोकवृत्तांतया प्रशांतगृहोदंतविचारसुस्थपरिजनोरगपरिचरणसंभृतानंददंदशूकेश्वरमद्भुतमवलोकयतामद्भुततममद्यापि शृण्वतामपर्याप्तमुपन्यसितुं वाचस्पतेरपि अशक्यं काव्यशतेनापि वर्णयितुं काव्यस्य सर्वतो निवृत्तैरपि महर्षिभिः समुत्सृज्य समाधिमालक्ष्यमाणमपक्ष्मपरिक्षेपमनुल्लिखितार्थलाभसमुल्लासेन किंचिदप्यगणितशरीरक्लेशमायस्याद्भिरपि सुरासुरैरालोकमानः सागरमथनसंरंभमानंदगोविंदः ।

निर्मथश्लथसंधिबंधनिखिलोदेशक्षरन्निर्झरः
शैलोदृश्यत सिद्धचारणमरुद्गंधर्वविद्याधरैः ॥
अश्रांतभ्रमणश्रमेण जलधेःपीतं प्रभूतं पयः-
स्रोतोभिः पुनरुद्वमन्निव मुखश्रोत्राक्षिनासादिभिः ॥ २ ॥

अपि च ।

निःश्वसति भोगिभर्तरि निर्दग्धमहासुरैर्विषज्वालैः ॥
उच्छ्वसितममरवगैरुत्प्रेक्षितकार्यलाघवैरंतः ॥ ३ ॥

मथ्नतामप्येवं महतोत्साहेन तेषामपांगयन्नशनैः शक्तिं समाप्याययन् वासुकिमंबरचरानपिस्वतेजसा त्रिविक्रमः स्वयमपि मथितुमुपचक्रमे ।

स्वेनैव भ्रमयति माधवे भुजाभ्यां
बभ्राम भ्रमरकवत्सशैलराजः ॥
किं चित्रं भ्रमति महर्षिसिद्धसंघे
मद्धारे क्वचन महान् भ्रमोजनीति ॥ ४ ॥

अत्रांतरे च समंततः प्रकीर्यमाणमंदरशिखरकाननप्रसूनपरागपरिचयादिव धूसराणि ददृशे दिङ्मुखानि । परिस्फुटितानिष्ठबूताः फणामणयइव वासुकेः प्रतिसूर्या जज्ञंभिरे परितोप्यासन्नमकांडविप्लवं जगतामवेक्षितुमक्षमेण दयानिधिना महेश्वरेण दृशो निर्मीलनादिव प्रचकाशे पद्मबंधुः । इंदुश्च नाकाशे । सपर्वतवनद्वीपवसुमतीकंपसंपन्नचलनसुमेरुशिरस्थसुरराजनगरप्रासाददीपिकाइव परिपेतुरभितोपि तारकाः ।

उद्यन्निर्घातघोषप्रतिभयमुदयध्वूमकेतूपकेतु
कंदद्दिक्पालगंधाद्विपमुदधिपतत्तुंगशैलाग्रशृंगं ॥
उड्डीनश्येनकंकप्रकरमुपचितध्वांतमुद्भ्रांतवांतं
प्राप्तंमृत्योरकस्मादिववदनबिलंविश्वमासीत्तदानीं ॥ ५ ॥

तदनु निर्गमिष्यतः कालकूटस्योष्मणा क्वथितादुदधेरुत्पतंतः पयःकणा यत्र निषेतुः तत्र तत्र पर्वता व्यदीर्यंत पादपाः प्रजज्वलुःपशुपक्षिणो विनेशुः प्रागेव सागरचराणि तु यादांसि ।

निःसंख्यस्फुरितस्फुलिंगजटिलोत्संगज्वलत्पावक-
ज्वालाभंगविटंकसंकलितधूमस्तोमभीमस्ततः ॥
क्रुध्यत्कालविवृत्तवक्त्रकुहरान्मुक्ताट्टहासोद्भट-
स्फाट्कारध्वनिभीषणः प्रववृते कोप्यद्भुतो मारुतः ॥ ६ ॥
सन्निर्जेहानएव यज्जगर्ज तर्जयन् दिशो
बभर्ज यच्च दुर्जयोष्मजर्जरं पुनर्जगत् ॥
ततः प्रभूतभूतघातजातपातकावली-
विलोपनाभिलाषुकः किमाससाद सागरं ॥ ७ ॥

ततस्तदालीढाः सप्तापिसिंधवः सप्ताज्यबिंदवइव जज्वलुरेकयैव ज्वालया। ततः सरोष्मतापितएव भस्मावशेषतामभजंत जंतवः क्षुद्राखिभुवने। प्रदीपशिखविन्मस्तेन प्रसूनेनैव धनुरस्य सुधानिधिनेव सुतरां परिमम्ले । आक्षिप्तो

मस्य मरुतो रंहसा पतगपतिरेव किं पपात किमुत्पपात किमुत हतः किंनिरद-
ह्यत किंमुमूर्च्छ किं जीवीतं जहाविति नज्ञायते । उद्दांतविषानलासमामिव प्रा-
णैरुरगपतेरपि तनुर्बध्निकेव सलिलक्लिन्ना वस्त्रभस्त्रिकेव रिक्तोदरा निःसारत-
या क्षणादलंबत नितंबतः शैलपतेः परिमृष्टाश्च तेन मायाविनोपि महासुराः ।
सुकृतशालिनोपि सुपर्वाणः महात्म्यनिधयोपि महर्षयः चिरजीविता बलेन परं
चिन्मात्रशेषिताः प्रक्षीणया गिरा परिभ्रमता च लोचनेन प्राकृताइव पर्यचे-
ष्टत धरणीतले ।

उष्माणावहहद्विभावसुरुभौ सांसिंध्विकागंतुकौ
पस्पंदे क्वथितं शरीरमभितः पाथोमयं पाशिनः ॥
सर्वांगीणदृगंतकंदलदतिस्फाराश्रुधाराशतैः
सेकंसेकमनुक्षणं तु मघवा गात्रं दधौ जीवितं ॥ ८ ॥

हताःस्मोवयमस्मिन्कर्मणि प्रवर्तिता भगवता इति परिभाषमाणेषु सुरासुरेषु
तप्यमानस्ततोपित्रपयैव पद्मसंभवः विश्वंभरमवादीत् भगवन् किमेतदिति मन्यसे ।

न संवर्तः प्राप्तो न च वहति संवर्तपवनः
शतेनाब्दैः शोषं नयति स परंतु त्रिभुवनं॥
न च व्यापद्यंते तदुपरिचरंतस्तनुभृतः
क एष ब्रह्मांडं कवलयति निःशेषयति च ॥ ९ ॥

अपि च ।

नासावग्निर्न हि खलु भवत्यग्निरग्नेः प्रणाशे
नापि क्ष्वेलो न हि गरलतो हानिराशीविषाणां ॥
नेदं स्पृष्टं सकृदपि मया नोपदिष्टं त्वया वा
किं व्याहारैर्मम च किमपि क्षुभ्यतीवांतरात्मा ॥ १० ॥

इत्यभिदधान एवंविधावशंकितोपनतरसातलांतकसंघटितसमाधिक्षोभकोप-
दुर्दर्शकालरुद्रसमुन्निद्रितभालनेत्रसमुत्थितइव महाप्रलयपावकः । प्रतिसर्गनिर्ग-
लदनर्गलशेषविषनिःश्वासधूमसमाश्लेषजनितविषमषीपिंडइव मथनसंक्षोभचलि-
तवाडवानलसंवलितःसुंदरतरमंदरगिरिकंदरशयस्वायंभुवशांभवलिंगचलनसंभावितः
प्रत्यवायइव परमदारुणः कल्पानलदग्धजगदंडपिंडीकरणप्रसक्तकालचंडी
करक्षालनोदकमिव क्षीरोदमाकल्पयन् प्रथमनिःसृतपवनपरिस्पंदमात्रनिःशेषि-
तेषु भुवनेषु दग्धव्यानुपलंभसंभवादिव क्षुधाप्रसारितरसनासहस्रभीषणेनज्वाल-
कलापेन लेलीहानइव वैरिंच्यमप्रपंचमवसादितभुवनकोलाहलो हालाहलो निर्गत्य
वारणइववारणमभिदुद्रावरमारमणं । तत्क्षणं च परुषविषानलज्वालापरिप्लोषप्र-
तीकारमंत्राक्षरांगारदूषितानीव वदनानि चतुर्वदनस्य दधिरे दंततालुरसनाधरे

मालिन्यं ।

म्लायंत्या वैजयंत्यामथ कनकपटे धूसरे धूमजालै-
श्चक्रे निर्ज्वालचक्रे सपदि परिणतस्फोटशंके च शंखे ॥
उत्संवर्तं समस्तादपि परिकलयन्नुद्भटं कालकूटं
कालात्मा पद्मनाभो मनसि विनिदधे कालसंघर्षयोगं ॥ ११ ॥
सिंचंतीं परमामृतानि दिशि दिश्यप्राकृतैरंशुभिः
खेलंतीममृतार्णवे मणिमयीमारुह्य नौकां नवां ॥
स्निग्धापांगतरंगशिक्षितभवद्भेदां मुकुंदश्चरा-
दस्मार्षीदमृतेश्वरीं भगवतीमंबामहं भावतः ॥ १२ ॥
तामित्थं स्मरतश्चिरं मधुभिदस्तारां सुधामालिनीं
धूतद्वैतकलंकशंकरकलापुंभावरूपात्मनः ॥
पाषाणव्यतिभेदजर्जरजरच्छैवालवत्तत्क्षणा-
दारात्किंचिदुपासरत्परिगतो हालाहलः सर्वतः ॥ १३ ॥

अथ स्वस्थो यथापुरमंबुजेक्षणस्तवितापि संरंभेण तनुमात्रे त्राणपर्यवसन्नेन निराशो हालाहलनिग्रहे निश्चिन्वन्नितरसाध्यसाधनधीरंघर्षयंतकांतकस्य भागइति निर्धारयन्नंतरेण परदेवताप्रसादमलभ्यतां शिवसाक्षात्कारस्य चिंतयन्नपि चिच्छक्तिविभूतिरूपतामात्मनः परमेण समाधिना समाराध्य नारायणीमित्थमस्तावीत् ।

यज्जन्मस्थेमभंगव्रतमिह जगतां यच्च सर्वांतरत्वं
यत्स्वातंत्र्यं च मोक्षे श्रुतिषु निगदितं विश्वसाम्राज्यचिन्हं ॥
तद्यस्याः साहचर्यात्परिणमति परब्रह्मणि श्रीमहेशे ।
तामात्मन्यात्मविद्यामहमिति कलयन्सर्वतो निर्वृतोस्मि ॥ १४ ॥
यल्लक्ष्मीदयितोस्मि यद्दनुभुवां शास्तास्मि यत्कर्मिणां
कर्मस्वभ्युदयप्रदोस्मि यदपि ध्येयोस्मि वा योगिनां ॥
तन्मातस्त्रिपुरे महेश्वरि महामाये जगद्रूपिणि
त्वत्सौभाग्यमहाविभूतिकणिकालेशस्य लेशायते ॥ १५ ॥

अपि च ।

अतीतत्रैगुण्यामशरणशरण्यां भगवतीं
महंतामालंबे दृढतरमहंतां पशुपतेः ॥
तदाद्यं तत्त्वानामजरमपरिच्छेद्यममरं
पराभूतद्वैतं परमपदमाविर्भवतु मे ॥ १६ ॥
इति स्तुतिभिरभ्यभिष्ट्यायतो निश्चलां शिवां ॥

अस्पंदेष्वस्य गात्रेषु पस्पंदे दक्षिणो भुजः ॥ १७ ॥
अवतीर्णाचास्य कर्णसरणिमशरीरिणी वाणी ।
साधु वत्स जगन्नाथ साधु विष्णो जगन्मय ॥
पश्य त्वमात्मनात्मानं परमं ज्योतिरीश्वरामिति ॥ १८ ॥
अथ यावत्समाधिं तं श्लथयामास माधवः ॥
तावदाविर्बभूवास्य पुरः पुरहरं महः ॥ १९ ॥

तत्र च । पवित्रतरनदनदीनदीशादितीर्थस्वरूपतासंभावितक्लेदनैयत्यानुवृत्त्येव अर्धोन्मीलितविकसितललाटलोचनधूमरेखासंस्तवेनेव कवलितजाह्नवीकोपपरिपूर्णगर्भतयेव च परिणतपाटलिम्नि जटावलये प्रतिष्ठिततया संध्यारागसंवलितेनेव सकलशिवज्ञानाधिगमारंभसूचनायेव द्वितीयाचंद्रतामुपजग्मुषा परमज्ञानरूपतयेव परिहृतकमलानुषंगेण कपर्दबंधनारंगदष्ट्रांकुरेण कुटिलनिर्मलेन चंद्रखंडेन मंडितं जगान्निष्कामहेतुतयेव निष्कामजनोपासनीयेन पद्मविवरसमुच्चरदार्चिस्फुलिंगपरिष्वंगमात्रदेव निःशेषाभवाति जगति निरीक्षतव्यासंभवादिव नित्यनिमीलितेन भासितत्रिपुंड्रहारमालिकापदरागतरलेनेव ललाटलोचनेन परिहरंतमांतरं तमो भक्तिमतां कुंडलितकुंडलिफणापाणिमयूखराजिनीराजितेन निसर्गसुंदरेण गंडमंडलेन श्रुत्युल्लंघनभयादिव कर्णांतपर्यवसितेन निरंतरकरुणासारवाहिना लोचनयुगेन त्रिपुरविजययशोविशदेनेव परापराशेषविद्यात्मना प्रवहतो वचनामृतस्य निष्यंदेनेव मंदस्मितेन च मनांसि नियमंतं महायोगिनां कदासौ पूर्येत कदाचेममारोहेयमिति कुतूहलादुद्ग्रीवयंतमिव चूडाचंद्रमससमुदंचिताग्रपादतया किंचिदन्यतो जिगमिषंतमिव प्रकृतिचापलेन वेदमयंमृगमपरपादनियंत्रणेन नियच्छंतमात्मन्येव निभृतमतिकठिनाज्ञानपाषाणसमुट्टंकनायेव गृहीतटंकमितरकरेण निरूपद्भवापवर्गसत्रदीक्षिते जयसभयकरे करे निःसारभोगवदान्येन किं मयेति ह्रियेवावाङ्मुखेन वरांकितेन करारविंदेन परिपूरयंतमभिमतान्यभिसंधिमतां नीरूपदिगंबराच्छादननिर्वेदादिव बहुरूपेण तारक्षवेण चर्मणाभिसंवीतमतिनिर्मलेपि वपुषि जपाकुसुमापार्श्वस्फटिकोपलन्यायेन मंजीरफणिफणामणिप्रभापुंजपिंजरचरणारविंदमतिपचेलिमभाग्ययोगनिर्मलैरंतःकरणैरिव चरणलेखैः समाधिषु योगिनां पंचभिरक्षरैः शिवसूत्रस्य पर्यवसितैरिव सव्यापसव्ययोः पादयोरतिसुंदरैः नखरैर्वतंसयंतमादिभारतीचिकुरबंधमध्यासीनमंधः कृतांतः करणवासनाष्टकमास्तीर्णात्मलयमहातल्पकल्पितमखिलतत्वपथोत्तीर्णमानंदमयं महाहंमासनमन्वास्यमानमखिललोकमातृकया संविदानंदघनीभावसंपन्नविग्रहया कादंबिन्येव करुणारससंपूर्णयात्मविद्यया सादरमालिंगयंत्या समानरूपगुणसौंदर्यवत्या भगवत्या

सर्वमंगलया सुखविश्रांतमिव शरन्मेघमंडलं सुधासारघटितमिव कर्पूरपरागसंचयमतिकोमलमिव स्फटिकाचलमादृतघनीभावमिव चंद्रिकासारमावर्त्य पिंडितमिव परमामृतमासेचनकमासेचनकानामाश्चर्यमाश्चर्याणां मंगलं मंगलानामादिममादिमतामवधिमवसीदतामाकरं विद्यानामालयं दयासौलभ्ययोरचिंतनीयप्रभावमपि चिंतनीयमाखिललोकस्य चिरंतनानुसंधानसाधितमद्वैतब्रह्मस्वरूपमव्याविष्कृतपंचब्रह्मस्वरूपमतिदूरसर्वाचां प्रमाणानामदूरविप्रकर्षगोचरमादिगिरां साक्षाच्चकार दाक्षायणीरमणं।

शाणोल्लीढशरन्मृगांकशकलस्तोमाभिरामं महः-
स्तत्पश्यन्निभृतं विनिद्रकमलद्राघीयसा चक्षुषा ॥
साहस्रांबुजपूजनव्रतसमाधित्सुः पुरा साहसं
चक्रे यद्विरिशे स्वयं तदुचितं मेनेऽधुना माधवः ॥२०॥

अपि च।

वैराजशार्करखंतरवामदेव्य-
कालेयराजनमहाव्रतरौहिणाद्यैः ॥
तं सामभिर्बहुभिर्ऋग्यजुषेण चोच्चैः
शौरिस्तुवन्पुरहरं शतशोऽव्यनंसीत् ॥२१॥

तदनु च।

भव्यैरष्टभिरांतरैः परिचरन्पुष्पैराहिंसादिभिः
कोटीरे परभक्तिभारनमिते कुर्वन्प्रणामांजलिं ॥
वाग्भिर्गद्गदनिर्गताभिरखिलंत्रर्ग्यंतसैद्धांतिक-
स्तोतः सारमयीभिरस्तुत स तज्ज्योतिः परं ज्योतिषां ॥२२॥
सान्निध्यमात्रजो यस्य स्पंदो बिंदोरिदं जगत् ॥
अद्वंद्वमपरिस्पंदि तद्वंद्वं नौमि शांभवं ॥ २३ ॥
ओमित्युमेति युवयोराभिधानमेकं
सृष्ट्यादि सृष्ट्यवधितागुणमात्राभिन्नं ॥
एकं च तावदभिधेयमपीह रूपं
वेणी जटेति कचसंहतिभेदभिन्नं ॥ २४ ॥
यदघोर घोरतररूपमघोरसंज्ञ
मावार्तितभ्रुकुटिभीषणमाननं ते ॥
तद्दक्षिणं पशुपतेः परमं पदं मे
सांसारिकार्तिहरणं शरणं प्रपद्ये ॥ २५॥

इति स्तुवंतमिंदिरारमणमिंदुशेखरः परिरभ्यबाहुभ्यामिदमाचचक्षे। भग-

वन्कमललोचन भवद्दर्शनेन परमामस्मि निर्वृतिं प्राप्तः आत्मनोपि किमधिकं प्रेमपदं। तथाहि !

शिवा घोरा चेति श्रुतिषु विदिते ये मम तनू
तयोराद्या मूर्तिः परमरमणीया त्वमसि मे ॥
त्वमस्यर्धं देहे त्वमसि वदनं दक्षिणमिति
त्वयि प्रीये यावत्तव भवति तावच्च विदितं ॥ २६ ॥

किमिच्छसि किं करणीयमित्यभिदधत्युमावल्लभेनेदमभिदधे। किमन्यदादेष्टव्यं-इदं किल विशृंखलदुर्यशइव संभावितस्य सद्यः समाक्रांतविध्यंडमंडलं दुर्विदग्धस्य पांडित्यमिव तृणीकृतब्रह्मादिदैवतं नीचगतमैश्वर्यमिव निमिषार्धमपि क्षंतुमक्षमं बालिशराजोपसेवनसंपादितजीवनमिव प्रतिक्षणं चित्रीयमाणं पाशुपताद्यवेहेलनमिव भस्मीकृतजगत्त्रयं क्षीणायुषामामयोल्बणामिव विफलीभवत्प्रतीकारप्रकारं पाखंडमुखमिव परिहरणीयं दर्शनपथात् प्रसारकसौहार्दमिव परिणामदारुणं विषयनिषेवणमिव व्यामोहकारणं भवत्पादवैमुख्यजदुरितमिव प्रपदनैकभेषजमव्यपदेश्यमनिर्धार्यमदूरविप्रकर्षेणतु शक्यमिव विषमिति व्यपदेष्टुमतर्कितोपनतमतीतभवप्रारब्धमिव समाक्रम्य जगत्त्रयं सन्निपात्य देवासुरान्प्रक्षोभ्य कमलासनं परिवृत्य मामपि प्रवृत्तं शनैर्भूषणांबरादिषु भगवत्याः सुधामालिन्याश्चरणस्मरणप्रभावादपसृत्येव किंचिदधरोत्तरयति विश्वमिदं ।

अक्षोभ्यं भिषजां शतैरविषयः शस्त्रस्य वास्त्रस्य वा
दुःसाध्यं गणिमंत्रयंत्रशरणैर्दुर्निग्रहं योगिभिः ॥
व्यामुह्यत्कमलासनं विनिपतद्देवर्षिसिद्धासुरं
निर्व्यापारितविष्टपं च किमिदं किन्नाम न ज्ञायते ॥२७॥
यदादिष्टं पाल्यं जगदिति जगन्नाथ भवता
तदेतत्पर्यंतं तव करुणया साधितमिदं ॥
दुरूहे दुःसाध्ये महति पुनरस्मिन्प्रविलये
ममेदं कार्यं यत्तव चरणयोस्तत्त्वकथनं ॥२८॥

इति निर्विण्णइव निवेदयति गरुडध्वजे । प्रहसन्पार्वतीरमणः पश्य तावदिति ब्रुवन्प्रसारयन्दक्षिणबाहुमनुसस्मार हलाहलं ।

सर्वांतंकविशंकशंकरजटालंकारचंद्रांकुर-
ज्योत्स्नानिर्भरपूरितत्रिजगतीगर्भाविधूतो बहिः ॥
सक्ष्वेडः क्वचन न्यलीयत महाशुंडालशुंडाहति-
क्षुभ्यत्क्षुद्रसरस्तरंगनिकरव्याकीर्णशैवालवत् ॥२९॥
अजनि शनैर्विशदं जगदपसर्पति कालकूटसंतमसे ॥

तात्पर्यमिव कवीनां तार्किककोलाहलोपरमे ॥ ३० ॥

ततश्च सान्निध्यतएव भगवतश्चंद्रचूडस्य पल्लवितान्यरण्यानि पर्यपूर्यंत सागराः प्रावर्तंत सरितः पस्पंदिरे मरुतः प्रचकाशिरे ज्योतींषि प्रसेदुर्दिशः प्रशेमुरुत्पाताः प्रादुरभूवन्मंगलान्यचेतयंत जंतवः यथापुरमुदबुध्यत वासुकिरुत्तस्थुर्देवासुराः शनैरुपलभ्य संज्ञां सरोजसंभवोपि संददर्श चंद्रशेखरं ।

पर्यासेंदुशतद्युतिं परिचितं सत्याशुकश्यामया
साकूतस्मितकंदराधरपुटं शार्दूलचर्मांबरं ॥
सावज्ञाग्रकरप्रसारणमहासंरंभसंभावना-
संदृष्यत्कमलेक्षणं च तमसौ पश्यन्नतृप्तिं ययौ ॥ ३१ ॥

ततः प्रतिलब्धचेतना ब्रह्मादयः पक्षिणइव सुप्तात्थिताः प्रातरुच्चावचैः कोलाहलैरुद्यंतमिव सहस्रकिरणमुपतिष्ठंते यावदुमारमणं तावदस्य भवस्य भवसागरनिमग्नभक्तजनोद्धारदर्शितानुरागइव परिणामकर्कशपाशुपतग्रंथिविश्लथनायाससंतारुण्यइव पार्वतीकुचकुंभकुंकुमालेपपरिचयात्पाटलइव तामरसोदरसोदरत्विषि पाणितले पल्लवइव मधुव्रतः पद्मरागकरंडइव कस्तूरिकाजांबवमात्रपरिणामजातसंकोचमपि दुराधर्षमूष्मणादुर्दर्शमतिदारुणेन तेजसा च समालक्ष्यत तरलमिव साध्वसेन तद्गरलं ।

आश्चर्यस्तिमितत्रिविष्टपमतिप्रेमाहिताद्याहित-
प्रक्षुभ्यद्गिरिजागृहीतपुनरुद्भूताग्रहस्तांबुजं ॥
मद्यं मद्यमिति प्रतिस्वमसकृत्क्ष्वेडार्पणप्रार्थना-
सन्नद्धद्रुणदर्शितस्मितलवं शंभोः स्थितं पातु नः ॥ ३२ ॥

ततः प्रकृतिस्थे जगति प्रतिबुद्धेषु सुरासुरेषु परिष्टुवति पद्मविष्टरे पद्मनाभे च । निषेद्धुमनुवर्तितुमप्यपारीणतया निश्चलार्पितदृष्टिषु नंदिमुखेषु पारिषदेष्वंतरेव मंगलमाशासानया सर्वमंगलया समालिंगितो दृढं हालाहलो नाम विषराजोयमाचम्यतेऽस्माभिर्मा बिभीत विज्वरा भवत इति प्रबोध्य पश्यतो जनान्माधवइव नवनीतमुमाधवो गरलमुपयुयुजे । यस्य शिष्यवर्गे वाडवानलो भुजिष्यवर्गे भुजगाविषाणि वनीपवर्गे वज्रानिष्पेषो गणनीयएव न गगनमणिः तादृशि कालकूटे तावतीमपि दारुणतामुपसंगृह्य जंबूफलइव जीर्णामलकइव खर्जूरापिंडइव खदिरसारखंडइव विशति निःशंकमानतं विषमलोचनस्य । जठरस्थजगत्प्लोषमाशंकमाना दयामयी भगवती दाक्षायणी पल्लवकोमलेन पाणिना परामर्शं कंठपदं ।

निर्मर्यादभवज्वरज्वलनसीदज्जविज्ञावितुन ।
संस्पृष्टं करपल्लवेन जगतां मातुः सुधास्पंदिना ॥

सद्यः शीतलितं भवत्परिणतज्योत्स्नामृतस्यंदवत्
तस्तंभे गरलं गले भगवतश्चंद्रार्धचूडामणेः ॥ ३३ ॥
यच्छैलेषु यदंबुराशिषु यदुद्विज्जेषु यज्जंतुषु
क्वापि क्वापि हृतस्य तस्य सहसा लेपात्मना शेषितं ॥
तत्सौराष्ट्रिकदारदादिभिधया विख्यातमद्याप्यहो
कीटायापि न मन्यते खगपतिं धन्वंतरिं चाश्विनौ ॥ ३४ ॥
अंतर्निगीर्णमपि तेन तदाविरासीत्
कालोन्मिषत्कुवलयच्छविकंठमूले ॥
आयस्य गुप्तमपि खल्वनृतं कदापि
सद्यः स्फुटीभवति साधुषु निर्मलेषु ॥ ३५ ॥

अथ भगवंतमनायासकवलीकृतकालकूटमाविष्कृतमंदस्मितसुंदरमाश्वस्तया भवान्या मुहुर्मुहुराश्लिष्य परिचुंबंत्या परामृश्यमानकंधरापदमानंदतुंदिलतया किमप्यज्ञातकरणीयैरालिंगद्भिरितरेतरमास्फोटयद्भिरपहसतद्भिरन्यानमरान् गणैरसकृदुपसंगृह्यमाणचरणारविंदमालक्ष्य चंद्रशेखरमानंदनिर्भराः गोविंदाविधिपुरंदरादयो देवा बलिविरोचनादयो दानवाश्च ब्रह्मर्षयश्च सनकादयो यथामति स्तोतुमारेभिरे ।

दिष्ट्या विषेण भग्नाः स्मो दिष्ट्या पीतमिदं त्वया ॥
दिष्ट्या च नीलकंठं त्वां गृण्हंती साधिता श्रुतिः ॥ ३६ ॥
पाषाणास्तितपीतरक्तहरितान्वैडूर्यरत्नादिका-
न्कंठे वक्षसि मूर्ध्नि वा निदधतां का नाम तेन स्तुतिः॥
एतद्भूषण मेतदेव जगतां दुःसाधमुज्जीवितं
कंठे यद्भगवन्नियच्छासिसुखं काकोलमुच्छृंखलं ॥३७॥
अद्याहं परिपालकोस्मि जगतामद्यैव धातात्मभू-
रद्येमे हरिदीश्वरा भुजबलै रद्योद्भटा दानवाः ॥
अद्येते चिरजीविनो मुनिवरास्तंत्रैश्च मंत्रैरपि
स्वामिन्नाकलयामहे तव यदा कंठं घनश्यामलं ॥३८॥

कैलासशिखरभूषण तंत्राद्यगोचर चंद्रार्धशेखर शापायुधकुलाध्यक्ष कोपारुणकटाक्ष सस्मितापांग भस्मितानंग ऊरीकृतविभूतिदिव्यांगराग गौरीपरिगृहीतसव्यांगभाग अंगानुषंगपावितनवास्थिलेश गंगातरंगभासितजटाप्रदेश शैलादिकृतनिषेवण वंदनाभिरताखंडल स्यंदनायितभूमंडल अक्रीतदासतापसकदंब चक्रीकृतार्कशीतकरबिंब आदृतपुराणवेतंड स्वीकृतसुमेरुकोदंडखर्वीकृतासुरमदानुपूर्वीविकास दर्वीकरेश्वरगृहीतमौर्वीविलास वीणामुनींद्रख्या-

पितगरिमपरिपोष बाणाधिकारस्थापितपरमपुरुष अनिलाशनाविहितनेपथ्य कमलासनकलितसारथ्य विश्वाधिकत्वपदालंब आश्वायिताद्यवचोगुंफ कुंदस्मयहरकांतिकांतिप्रकर मंदस्मितलवशांतत्रिपुर नादबिंदुकलाभिर्ज्ञापितभूरिभद्र स्वेदबिंदुलवाविर्भावितवीरभद्र त्रस्तरक्षापरतंत्र ध्वस्तदक्षाध्वरतंत्र कोरिटनिहित विविधवेधःकपाल चपेटाघातशिथिलभास्वत्कपोल जृंभितविक्रमोद्दंड स्तंभितचक्रिदोर्दंड ब्रह्मस्तवोपचितमहाहर्ष जिह्मस्वभावजनदुर्धर्ष वसुंधराधरसुतोपलालन जलंधरासुरशिरोनिपातन कोपाहतपतितांतक व्यापादितसमदांधक वरसंहननजटासंभृतपरभार गौरनरसिंहभियमनालंबितशरभावतार प्रपन्नभयमोचन विभिन्नभगलोचन प्रपंचदहनकारक विरिंचवदनहारक संचारपूतमंदर पंचायुधातिसुंदर अपनीतदक्षानन अभिनीतभिक्षाटन धारितमेरुकाननकुसुममालिकालंकार दारितदारुकावनकुलपालिकाहंकार समावर्जितभक्तमानसानुसार परावर्जितदृप्ततापसाभिचारवैय्यासिकोक्तिगोचर वैयाघ्रकृत्तिभासुर गतपारिकर्मगणस्पृह कृतकरिचर्मपरिग्रह ध्यानशमितपातकप्रसंग विध्यादिविबुधपूजितस्वलिंग शांतमानसानुरोध क्षांतापसापराध फालानलवलनभीषण हालाहलगरलभूषण अरुणांशुकंदलमणिसुंदरफणिकुंडल चरणाग्रयंत्रितदशकंधरभुजमंडल आनंदतांडवनटनानुबंध गोविंदपूजितचरणारविंद विनयानतामृताशनसहस्राहितप्रमोद तनयाभिलाषिमाधवतपस्याकृतप्रसाद दिव्यास्त्रदानतोषितभृगुसूनुनम्य सव्यार्धभागभावितहरिरूपरम्य वंदितागतश्रुतिसार नंदिपालितप्रतीहार बुद्धनानार्यरहस्यशतमन्युमुख्यामरभक्तिगोचर दुग्धपानार्थतपस्यदुपमन्युविश्राणितदुग्धसागर अधिकसंचारितदुष्टपीडाचरण हरिविरिंचापरिजुष्टचूडाचरण अंचद्धर्मवृषाधर पंचब्रह्ममयाकार वेदाश्ववरोपहितसाम्य श्वेताश्वततरोपनिषद्गम्य चापल्यरहितरम्यस्वभाव कैवल्यवचनगम्यप्रभाव अथर्वमखाशिराज्यप्रताप अथर्वशिखानुवाद्यस्वरूप अगर्वनरस्तुतिमुदित अथर्वशिरःश्रुतिविदित नादांतविभावनीय वेदांतविबोधनीय प्रणतार्तिहर प्रणवार्थसार मुग्धलावण्याधार शुद्धचैतान्याकार आशीविषधारक काशीपुरनायक त्वदंघ्रिजकृतविलास चिदंबरकृतनिवास आकर्णचलितापांग गोकर्णरचितासंग घोरासुरपुरधूमकेतुस्मित वाराकरगतरामसेतुस्थित रक्षणलीलाविलास दक्षिणकैलासनिवास आताम्रलोलनयन एकाम्रमूलभवन आभीरवधूसेवन श्रीशैलशिखरपावन अद्राक्षमधुरवाग्गुंफ रुद्राक्षरुचिरदोस्तंभ कालकंठरुचिघटितलावण्य नीलकंठकविनिहितकारुण्य सेवापरतंत्रपालक शैवागमतंत्रकारक सर्गस्थितिसंहृतिकार्यत्रयस्थेय भर्गश्रुतियंत्रितगायत्र्यानुध्याय अध्यासितवरनिकुंजगृहहिमार्य अध्यापितविरिंचिमुखशिवाचार्य अचिंतानंदविहार सच्चिदानंदशरीर विजयीभव विजयीभव ।

भुंजीथा न हलाहलं यदि महादेव त्वमेवं विधं ।
भुंजीरन् किमिमे सुराश्चरुपुरोडाशादिहव्यं मखे ॥
आसीथा न यदि स्वयं पितृवने भूतानि संमोहयन्
नासीदन्किमिमे जनाः सुकृतिनो हर्म्येषु सौधेषु च ॥ ३९ ॥
त्वत्प्रसूतास्त्वया गुप्तास्त्वया व्यापारिता वयं ॥
त्वां विदंतो विदंतो वा त्वामेव प्रीणयामहे ॥ ४० ॥

इति स्तुवतो देवान्पुरशासनः पुनरित्थमनुशशास ।

पुत्रा यूयं भुवनविदिता ब्रह्मनारायणेशाः
दासा देवाः शतमखमुखा दानवेशास्ततोपि ॥
कस्यानस्य व्यसनमहरं कालकूटं निगृण्हं
लज्जे भूयः स्तुतिषु भवतां व्यापृतः स्वे कुटुंबे ॥ ४१ ॥

तदलमतिक्रामति कालो मथनस्य वत्सा देवासुराः वत्स भोश्चतुरानन शृणुतावहिताः परमिममुपदेशं ।

अमुं यं वीक्षध्वे पुरुषमरविंदेक्षेणमसौ
सवित्री सर्वेषामपि च भवतां यत्प्रियतमा ॥
ममाज्ञामस्याज्ञां मम भजनमेतस्य भजनं
विजानंतो यूयं विनमत तयास्मिन्मयि यथा ॥ ४२ ॥

भगवन्नरविंदलोचन जानामि भवतो मयि प्रीतिमन्यादृशीं काममग्रे सहैवास्वहे कालस्त्वयमेषामस्येति सुधाप्रदानस्य । तदद्य वियोगेन मे नार्हसि वै क्लव्यमधिगंतुं ।

भवानिति भवानीति पश्य भेदः कियानयं ॥
विग्रहं प्राप्तयोरेकं विश्लेषः कइवावयोः ॥ ४३ ॥

इति प्रसादयन्निंदुशेखरः प्रदक्षिणीकृत्य सहस्रशः पादावाधाय मूर्ध्नि परिरभ्य निर्भरं बाहुभ्यां विसृष्टः कथंचिदपि विश्वंभरेण पश्यत्सु देवासुरेषु पार्वतीसहितस्तिरोदधे । तदनु च ।

स्तुवंतो दिव्याभिः स्तुतिभिरभिसंगम्य शतशः
स्पृशंतः कोटीरैश्चरणकमलैः कैटभभिदः ॥
स्मरंतः श्रीकंठं सममसुरवीरैर्दिविचराः
प्रहृष्यंतः सिंधुं प्रमथितुमुपाक्रंसत पुनः ॥ ४४ ॥

॥ इतिश्रीनीलकंठचंपूकाव्ये चतुर्थोयमाश्वासः ॥

आलोड्यमानः पुनरेकतानै-रामज्जमब्धिः सुरदैत्यसंघैः ॥
प्रादुष्करिष्यन्परमामृतं त- प्रासीददाशानइवक्रमणे ॥ १ ॥

ततश्च । ततः क्षोभ्यमानात्सजातीयमंदरसंघर्षमसहमानतया समुत्थितइव मैनाकभूधरः परिगलत्कलुषमदजलासारपरिग्रहीर्षया निर्वासितइव भुवि नैर्मल्यैकमस्थितैरांतरैर्जंतुभिः सलिलएव संततवप्रक्रियाशीलनेन संसक्तैः दुग्धसागरसरोजनालैरिव वज्रवलयैरावेष्टतचतुर्दंतः सततभूभारविश्रांतदिगंतदंतावलराजिदृष्टिपथं निलीय विष्टिग्रहणशंकया विनिर्गतः स्वयमेव बाहिरिव केनापि पथा विस्मयनीयशरीरो महानैरावतो नाम मतंगजः प्रादुरभूत् ।

अपि च ।

परिचलितदुग्धवेलापरिचयाविमलस्य मंदरस्य गिरेः ॥
अभ्यर्णमुपसरन्नयमर्भकइव तस्य संददृशे ॥ २ ॥
आजिघ्रन्निव पुष्करेण जलधेरर्धं पिबन् शीकरै-
रासिंचन्नभितस्तनूमिव सुरान्स्रोतोभिराप्लावयन् ॥
वप्राघातमिवाचरन् शिथिलयन्मंथानमेवाचलं ।
हर्षायाजनि पश्यतां दिविषदामैरावणो वारणः ॥ ३ ।

स च बहिर्निःसरन् शिक्षिताधोरणनियंत्रणतया मनागप्यगणयन्देवासुरानमृतोपयोगसुहिततया किमप्यनालोक्यन्नुपनीयमानानिक्षुलतोपहारानुपह्रियमाणानि कदलीकांडानि संह्रियमाणानि पिप्पलपल्लवानि च सर्वतः परामर्शयादांसि । तमित्थमतर्कितोपनिष्क्रांतमालक्षयंतः पुनरपि यावदाविलयांबभूवुरर्णवं देवासुराः । तावदुद्वेलहेषाहलहलोन्मेषयोषितकोलाहलः चटुलखुरपुटाविद्धदुग्धसागरशीकरासारदुर्दिनदुर्दर्शदिङ्मंडलः संततसलिलनिमज्जनोन्मज्जनक्लेशसहनाक्षमतया सैंधवइव कुमुदबांधवस्यंदनसंदानितः कोपि समुन्मुच्य बंधनमुच्चलितो बहिरुच्चैःश्रवा नाम यथार्थनामा समुन्ममज्ज सज्जीकृतो वाजी ।

आप्योपि रंहसा गच्छन्नाप्यो मारुतेन यः ॥
सैंधवः सैंधवाद्भर्तुस्तार स पांडुरः ॥ ४ ॥

स च किंचिदुदंचिताग्रपादतया मुहुर्मुहुराघ्रित्सन्निव शिरसि पदमनलसारथेरपहसन्निव हेषारवैरवनितलमात्रसंचारशिक्षिता इत्यारदजवनायुजान्सलिलमात्रसंचारशीलिनो मत्स्यमंडूककर्कटाइवेति वाजिनो वरुणस्य तैलयंत्रनियंत्रिता बलीवर्दाइव संततभ्रमणमात्रगर्विताइति सैंधवानंभोजबांधवस्य मारुतजयादेवसनांसि विजितानि । अपि च वाडवानामाजन्मसिद्धो मनोजयः कस्त्वं यत्नइति कथयितुकामइव चलत्प्रोथतया बालधिक्षेपनिर्धूतमेघमंडलतया वाहनं प्राचीनमभिभवंतमिवाखंडलस्य पश्यन्नुच्चैःश्रवसमनिमिषेण चक्षुषा पद्मनाभः स्वयमंगीकृतहयग्रीवतनुरव्यापनमात्रनिर्वृतः सर्वतोपि विस्मयनीये तदीये गतिचातुर्ये सासूयइव बभूव ।

यावद्यावत्सागरं ते ममंथु स्तावत्तावत्सोर्पयन्नेकमेकं ॥
भूयो भूयः क्षोभमेवाप देवै र्दृष्टास्वादास्तत्र किं ते दयंते ॥ ५ ॥

ततश्च ।

साध्वी गौस्सुरभिर्नाम सागरादुदभूत्स्वयं ॥
गोप्रसूता हि गावो स्यामसाधुश्वेति जानती ॥ ६ ॥
स्नातुं वान्छति शंकरोपि पयसा स्तन्येन यस्याः स्वयं ॥
तोयं पावनमुत्तमं त्रिजगतां यद्घ्राघनिष्यंदजं ॥
यद्रूपां समुपासते शमधना वाचं पुराणीं परां
सा दिव्या सुरभी करोति सुरभिर्वाचं कवीनामपि ॥ ७ ॥
प्रथमसमुद्भूतामखिलकामदुहामनघां
सुरभिमभिप्रपद्य सुरसिध्दमहर्षिगणे ॥
स्तुवाते धृतक्षमाइव वदान्यशिखामणय :
स्वयमुदयांबभूवुरथ पंचमहानख : ॥ ८ ॥

अमीषां च पुनरखिलभुवनाद्भुतानां किसलयान्येव कनकांशुकानि जीर्णपर्णान्येव चीनांबराणि मुकुलाएव मुक्ताफलानि निर्यासा वैडूर्याणि फलपाकाएव पद्मरागाः परागाएव पटवासाः मधुकराएव महेंद्रोपलाः प्ररोहाएव हारलताः प्रसवासवाएव परिणामाः सुधारसस्य इत्याचक्षते ।

किं कर्म दुष्कृतामिदं तरूजन्महेतु :
किंवा महत्सुकृतमीदृशकीर्तिमूलं ॥
किंवा तृतीयमिदमीदृशमन्यदेवं
आद्यापि शाम्यति न वादकथा मुनीनां ॥९॥

अवस्थाप्य च तानानुपूर्व्येण परिल्हतजरारोगपरिश्रामासु पंचेंद्रियसमुज्जीवितेषु छायासु तेषां आयासमवधूय पुनरपि ते ममंथुरमृतार्णवं ।

अभ्युद्यतौमथ ततः किल निष्कलंका-
मानंदकंदलमयीममृतांशुरेखां ॥
उत्तंसपुष्पकलिकेयमुमापतेरि-
त्यालोचयन्नुपपदे मनसा मुकुंदः॥१०॥

ततश्चैतितएव सन्निहितो नंदी । शिवइव सभाजितो देवासुरैस्समर्पितां मधुसूदनेन शशांकरेखामाददानः सादरमिदमवादीत् ।

किमिव दयितं शंभोः केन प्रसीदति देवइ-
त्यविरतसमासक्तं चित्तं तवैव हरे हरे ॥
तदिह भगवन्माहाभाग्यं तव प्रणुमः कथं

त्वमसि शरणं शैवानां नस्त्वमेव महागुरुः ॥११॥
जानीषे ननु नाम केशव जगन्नाथस्य नाथस्य नः
प्रीतिं पारमिकीमनन्यसुलभां पुष्पेषु नीलांबले ॥
अस्मिन्नुत्पलबंधुरित्यतितनुभूतेपि भूतेशितुः
प्रीतिं चिंतयतावतामुपचितामिदौ ततोवाधिकां ॥१२॥

तदहमेव साधन्ननेन भगवतः कपर्दपदमाराधयामि हस्तेन ते परमात्मानमग्रे भुजे च विश्वषामग्रपूजनमेतदुचितमाचितं । ततइतो यथाभिमतमिमानि वस्तुन्युपयुज्यतामित्यभिज्ञाय तिरोभवति शिलादनंदने संचुक्षोभ पुनरपि सारस्वतो गर्भः । ततश्च ।

नैर्मल्यादुपसंभृताः फणधरस्त्रैणानुबंधाः शतं
स्वस्थानक्षुभितोद्गतामृतरसस्यंदोपसंदानतः ॥
प्राप्तप्राणसमागमाइव ततः प्रादुर्बभूव स्त्रियो
नासीराग्रपताकिका रतिपतेर्नाना जयांकाइव ॥ १३ ॥

ततश्च विद्रुमलताइव वीचिभिराचिताः तडितइव तत्तत्समयोपनम्रपयोधरोत्संगपरिभ्रष्टाः कौस्तुभरत्नपांचालिकाइव कौतूहलाय निर्मिताः केनापि पंचशरराज्यलक्ष्मीविभूतिरिव परिगृहीतविग्रहाः तुल्यवयोरूपविभ्रमाः तुल्यांबरभूषणाः हंसीरिव मानसादंभोदविगमे समुत्तरंतीर्बहिरालक्ष्य सर्वेपि सुरासुराः विरम्य सागरमथनवृथाक्लेशादुत्तरमप्यमृतमुपेक्ष्य सन्निहिताधरामृतएव दृष्टिमादधिरे। तापसा अपि तद्दर्शनक्षुभिता मंत्रजपादुपारम्य भणितभेदानधिजिगांसांचक्रिरे। पंचास्त्रविद्यामेव परमर्षयोपि बहुमेनिरे । किं बहुना । श्रुतिन्यायविदोपि हि सूक्ष्मदर्शिनः तासामालोकनमग्निष्टोमस्य द्वारोपसर्पणं द्वादशाहस्य गाननिषेवणं गवामयनस्य नाट्यावलोकनं नक्षत्रसत्रस्य वाङ्मिश्रणं वाजपेयस्य परिष्वंगं पौंडरीकस्य वदनास्वादनं वाजिमेधस्य दंतक्षतं दाक्षयणयज्ञस्य नखलेखनं नानाविधानां संस्थानां कुचमर्दनं कुंडपायिनामयनस्य शयनावमर्शनं राजसूयस्य विपरीतरतं विश्वसृजामयनस्य चरणताडनं चांद्रायणस्य परिभाषणं च पराकसांतपनयोः फलमाचक्षते ।

सौहार्दं परमेयुषामपि तदा सन्नह्यतां विग्रहे
तासामेव कृते शनैः सुमनसां दैत्येश्वराणामपि ॥
सद्यः क्षालयितुं विवादमनतिप्रौढं सरोजेक्षणः
संगृण्हन्तु भयानिमानभिदधे तथ्यं च पथ्यं वचः ॥ १४ ॥

हंत भो देवासुराः किमिदमजानतामिव भवतामपि वैमत्यं तुल्ये परिश्रमे तुल्ये चाभिजने तुल्येनैव वो भाविनं फलेनापि । तदिमाः समुद्रसंभवाः

अप्सरसो नाम तरुण्यः साधारणा भवंतु भवतां ।

गजमेकमश्वमेकं गामेकां पंच च द्रुमान्दत्वा ॥
संभावयत विनाशितसर्वस्वं वासवं यदि प्रीतिः ॥ १५ ॥

इत्यभिहितमात्रएव सादरमादाय शासनं शिरसि किं प्रतिब्रूमो भवच्छासने किंतु स्वामिने किमप्यनुपयुज्य न युक्तमस्माभिरियदासेवितुं तदग्रे यदुत्पत्स्यते तद्भवाननुमन्यतामिति प्रार्थ्यमानो सुरासुरैरंतरेव कृतस्मितः किंचिदन्वमन्यत रमारमणः ।

अथ पुनरपि यावदाविलं ते
व्यदधुरुदधिं विबुधाश्च दानवाश्चा ॥
सममखिलजनुष्मतां मनोभिः
समजनिता वदनाविला त्रिलोकी ॥ १६ ॥
अभ्यग्रावतरिष्यदर्णवसुताहस्ताग्रसंभावना-
संहृष्यत्कनकारविंदकलिकांसौरभ्यसारस्पृशः ॥
मंदं मंदममंदंचदनकिरः पस्पंदिरे मारुताः
कालोभिद्रकदंबडंबरप्रभूद्येनांगमंगं हरेः ॥ १७ ॥

ततश्च समसमयसमुन्मिषत्कनकारविंदकाननश्रीरिव नयनानंदसंदायिनी समभागयोजितशरदिंदुकंदलबालारुणप्रविलापनचाकचक्यलक्ष्मीरिवचमत्कारिणी सागरावर्तविवरसमुत्थितफणासहस्रमणिभेव फणिराजस्य कांचनकांतिधारिणी समुच्छ्रिता दुग्धकल्लोलेषु संध्येव चंद्रातपे सफलीचकार कमलाक्षतां कमलाक्षस्य तत्र च तालवृंतचामरतांबूलकरंककनकालुकादिप्रकरपाणयो भावानुभावदेवताइव परिणताः शरीरबंधेन शृंगारस्यरंभादिरमणीयकमात्रनिर्वर्णननिर्वृता निधयंत्यो नयनानि नाकसदां प्रादुर्बभुवुरग्रतः परिवारशक्तयः कमलालयायाः । तदनु च परमानंदघनीभावपरिणाममयी मातृकवर्णसंपन्नमुकुटादिचरणांतसर्वांगसुंदरीपतिदेवताधर्मनियंत्रणेन पतिमुखलक्ष्यैकपातिनीभिरपि कटाक्षवृत्तिभिःपरिसरनिष्यंदमात्रपरितोषिजगत्त्रयीजातजायमानजनिष्यमाणरूपापि जातरूपैकमयी लक्ष्यमाणा धर्ममयी धार्मिकेषु विज्ञानमयी विप्रेषु पराक्रममयी बाहुजेषु संपन्मयी राजसु साहसमयी शरारुषु कारुण्यमयी भक्तेषु कामकलामयीपरिणे तरि विजयपताकिका मकरध्वजस्य जीविका जनार्दनस्य माता चराचरणां महिषी नारायणस्य समालक्ष्यत सौभाग्यदेवता ।

विरहासहेव सततं विहितस्थितिराननेंदुना सविधे ॥
कुवलयवती विरेजे कुटिला कचसंहतिस्तस्याः ॥ १८ ॥

कपोलौ निर्मातुं किल शकलमेकं हिमरुचे-
र्यदादायात्याक्षीदसममिदमस्येति हि विधिः ॥
तदाशीदाश्चर्यं परममखिलानां दिविषदां ।
तदुत्तंसीभूतं पुरमथितुरद्यापि मुकुटे ॥ १९ ॥

अपि च । कमलासनपदप्रदस्य कमलोपमां मीनकेतनजनकस्य मीनसादृश्यमपि कथयितुमपत्रपंते कवयोपि तन्नयनस्य करगतकमलाघ्राणसंसक्तं तत्रत्यं मौक्तिकमेव तस्या नासामणिः परिणेमे ।

कस्यां श्रुतावधिगता मणिकर्णिकेति । मूढात्मनां प्रलपतां मुखमुद्वणाय ॥
आसीदशेषजननताभवतापहंत्री । मातुः श्रुतावधिगता मणिकर्णिकेति ॥ २० ॥

पद्महस्तायास्तस्याः पाणिकमलयोर्विवेकाय कल्पितानि चिन्हत एव कंकणानि प्रचकाशिरे । आजन्मसरलमस्या हृदयमावृण्वतोरनवशेषमेव स्तुचकुंभयोः कोपारुणाः कटाक्षाइव पुंडरीकाक्षस्य कुंकुमपत्रभंगा ददृशिरे ।

वक्राक्षिपाणिचरणासनधारणानि । पद्मानि यानि षडिमानि हरिप्रियायाः ॥
उद्बुद्धमेकमपि तेषु किल व्यनक्ति । संसारमोहरजनीमणुमात्रशेषां ॥ २१ ॥
पद्मे निवेश्य परिगृह्य च पद्ममेव । या पद्मरागमखिलं स्वमुदाजहार ॥
तस्याः श्रियः समुचितानि हि तन्मयानि । ताटंककंकणमुखानि विभूषणानि ॥ २२ ॥

विहारोप्येतस्या विकसति सरोजे चरणयोः ।
प्रसूते लौहित्यं यदि चरतु सा कुत्र सुमुखी ॥
इति ध्यायं ध्यायं मृदुनि नवनीतादपि निजे ।
हृषीकेशो मेने हृदयभवने वा समुचितं ॥ २३ ॥

ततस्तदिंगितवेदिनी मंगलदेवता परिवृत्ता विभूतिभिः पश्यत्सु देवासुरेषु सहस्रादित्यवर्चसा सह कौस्तुभेन सागरादुत्तरंती पद्मेन सह चिंतामणिमपि पाणिना धारयंती भुजाद्भुजांतरं संक्रम्य भूभुजां भुजांतरमेव भूवल्लभस्य समारुरोह ।

दिव्या दुंदुभयो विनेदुरभितः स्निग्धं जगुः किन्नरा ।
जानंतः परदेवतां जयजयेत्यस्ताविषुस्तापसाः ॥
अम्लानैर्ववृषुः सुराभिरसवप्रसंघाश्च ता-
मारूढा हृदयं हरेरपि सुरैरज्ञातमंतःपुरं ॥ २४ ॥
चंद्रं चंद्रिकयेव चंडकिरणं दीप्त्येव शक्त्या तया ।
नित्याश्लिष्टमनन्ययापि मिलितं देवं तदानीमिव ॥
दृशं दर्शमनिर्वृतां दशशतीमक्ष्णां किरन्पादयो-
रस्तावीत्कमलालयामभिमुखीकर्तुं पुनर्वासवः ॥ २५ ॥

भगवति जगज्जनानि भक्तवत्सले परमः पुमानपि भवत्या विना नीहारइव

भास्करो निदाघांतइव चंद्रमाः नानंदयामास नयनानि मादृशानां । अधुना तु ।

यात्वेषा तुलसीति वक्षसि हरेर्या कापि वन्यौषधि-
र्यश्चासौ तिलकालको बहुमतः श्रीवत्स इत्याख्यया ॥
हंतासीत्तदपि द्वयं शमवतामालंबनं ध्यायतां
चारूणामपि चारु चारुचरणन्यासेन पद्माक्षि ते ॥ २६ ॥

अपि च । मामेव भवतीमियंतं कालमासेदुषीमरातिभवनानि मणिप्रभामिव-महोरगफणागतामालक्ष्य चकितोस्मि तामेव सर्वलोकशरण्यस्य भगवतः सरसिजेक्षणस्य वक्षोगतामालक्षयन्सर्वतो निर्वृतोस्मि ।

अज्ञानादतिलालनादपि च ते मातर्मया माधवता ।
निर्माल्ये परदैवतस्य चरितं यत्किंचिदुच्छृंखलं ॥
तत्क्षंतव्यमनन्यवेदिनि चिरापन्ने प्रपन्ने मयी-
त्याख्यातं मघवंतमादिजननी दृष्ट्वा दयामास सा ॥ २७ ॥

पुनरेवंवादिनि मघवति पतंतीं पश्यंती प्रसादविमलां दृशं प्राणवल्लभस्य चित्तानुरूपमेव तस्य चिंतामणिना तमाल्हादयामास । इत्थमियत्यपि चलति संविधाने प्रव्यक्ते च पशोरपि पक्षपाते मघवति परमेश्वरस्य मदांधाः प्रकृत्यैव मायया च विशिष्य मोहिताः महासुराः किमेतैरतिक्षुद्रैः किंचित्तु वयमनुवर्तमानाः क्षमामपहरिष्यामः सुधामित्यंतर्निहितेन छद्मना पद्मनाभमनुरुध्यावतस्थिरे । अथ मथनाविषण्णदेवासुरस्तोमजीवातुभिः श्रमशिथिलितबंधवातंधयप्राणनाडिधर्मैः शिशिरितहृदयदयासारतुंगैरपांगैः श्रियः पुनरपि जलराशिमक्षोभयन्देवरक्षोभटाः । ततो निरंतरसंतत्यमानमंथनिर्बंधनिर्विण्णइव सर्वस्वहरणसमुत्पन्नवैराग्यइव तरलांतःकरणइव वरूणालयः त्रिजगदगदंकारबिरुदांकितेन दिव्यौषधिपरिवृतेन करकमलगृहीतकनककुंभसंभृतामृतगंधमंथरगंधवहस्यंदमानत्रिनियंत्रितजरामरणक्लेशपाशेन जगदनुजिघृक्षया गृहीतेन जनार्दनस्यैव मूर्तिभेदेन भगवता धन्वंतरिणा सममाविर्भूय भूयसा भक्तिभारेण पुरुषोत्तमं प्रणिपत्य परिष्टुवन्नादाय तस्य करादमृतकलशमग्रे निवेदयन्निदमाचचक्षे ।

त्वमसि परमं ब्रह्म त्वं नाथ सर्वजनांतर-
स्तव किमवशे रम्यं वस्तु स्थलेषु जलेषु वा ॥
तव किमुपदातव्यं लक्ष्मीपतेः कृपणैर्जनै-
स्तदपि दयसे स्वामिन्नस्मासु तत्त्वनिवेदनात् ॥ २८ ॥

अपि च ।

ग्रामश्वं करिणं मणिं हिमकरं कन्यास्तरूनद्रुता-

नन्नं चामृतमंततस्त्रिजगतीजीवातुमेतां सुतां ॥
प्राणाचार्यममुंच ते चरणयोः प्राणैः समं संन्यसन् ।
स्वामिन्कामपि ते प्रसादकणिकां याचे दया चेन्मयि ॥ २९ ॥

वदति मधुरमित्थं वल्लभे बाहिनीनां जनयितरि रमाया जातहर्षो मुकुंदः ॥
सकरुणमनुगृण्हन्सानुरागैरपांगैरकिरदमृतवर्षैरेनमार्द्रैर्वचोभिः ॥ ३० ॥

तदनु यथागतं गते सरस्वति सरस्वतीरमणशतमन्युमुखा बर्हिर्मुखाः प्रतीक्षमाणा मे निदेशं परमेश्वरस्य परिवार्य केवलमवतस्थिरे । दानवास्तु मध्ये निधातव्यममृतकलशं मधुसूदनस्य पुरोनिहितमन्यथा शंकमानाः गणयंतः पक्षपातान्गारुढध्वजस्य चिंतयंतश्चिंतामणिप्रदानं वैषम्यकारणमालोच्य परस्परमासीदंतइव सांत्वनाय सामाजिकानां परिवृत्य कलशं परिगृण्हंतः प्रहरणानि मेलयंतः स्वबांधवानवतारयामासुरादितः कामपि विवादकथां भगवंतौ चक्रायुधौ कथमत्र मंतव्यं विभावेन । अथवा न पृच्छामो युवां ।

आमंत्रिताः स्मो न वयं युवाभ्यामभ्यर्थिताः स्मो न च सांत्ववादैः ॥
अस्माभिरादौ समयं बबंधुरामत्य ये तान्वयमालपामः ॥ ३१ ॥

ननु च भो भ्रातरः सुपर्वाणः शृणुत यूयमपि जानीध्वे समयमाचार्येणैव वः कृतमस्मासु ।

क्व मंदरो महागिरिः क्व सागरो दुरुत्तरः ।
क्व वा स वासुकिः फणी फणींद्रमंडलाग्रणीः ॥
भवंतएव साधयंतु भावयंतु चामृतं ।
पिबंतु चातिथीनिमान्त्सुरान्विधाय वा न वा ॥ ३२ ॥

किं बहुना ।

शक्ता भवेम यदि किं वरयेम युष्मांस्तत्साधका मथनकर्मणि यूयमेव ॥
शक्त्या यतेमहि वयं च परंतु तस्मिन्यत्नानुरूपमितरानपि भावयध्वं ॥३३॥

इति तदिह भवंतएव विदांकुर्वंतु ।

कति भग्ना गिरिवहने कति पतिता वासुकेः समानयने ॥
कति दग्धा भुजगविषैः कति भागानिह पिबेमेति ॥ ३४ ॥

इति वदत्सु दानवेषु वाचस्पतिरिदमवदत् ।

यद्वह्नेषु भवत्सु पूर्वमनिलेनैवाद्रिराकंपितो ।
यच्चापल्यकलत्रदर्शनकृते यूयं गता भूतलं ॥
यद्वा भोगिपतेः फणाग्रवहनं युष्माभिरेवार्जितं ।
सर्वं वेद सएष एव भवतामाचार्यपादः कविः ॥ ३५ ॥

इत्युत्तरोत्तरयुक्तिवादिनि वाचस्पतौ प्रतिवदति च यथाशक्ति भार्गवे

परिणमति शनैः कलहे प्रहरणादानभीषणेषु दानवेषु परिकरमाबध्नत्सु निर्जरेषु चिंतयन्मनसा चिरमाराध्य परां शक्तिमासाद्य तदीयमेव मोहनरूपमतिसंधाय दानवाननुगृह्णीयाममरानिति कृतनिश्चयः सद्यएव तिरोदधे सह कमलासनेन कमललोचनः । ततश्च ।

दोर्भिर्दुर्भरशैलनिर्भरपरीवर्तावसीदद्बलै-
र्गात्रैरुद्भटकालकूटगरलज्वालावलीढोज्झितैः ॥
उत्तालैः श्वसितैरुपर्युपरिच प्राणैः प्रतिष्ठासुभिः ।
स्पर्धामात्रबलोत्तरा युयुधिरे देवैः समं दानवाः ॥ ३६ ॥
भग्नरथा भग्नाश्वा भग्नबला भग्नशस्त्रास्त्राः ॥
निर्विद्य भुवि निषेदुः सममुभये सर्वतो भग्नाः ॥ ३७ ॥

परिश्रांताश्च ते परितोऽपि चक्षुर्व्यापारयांचक्रिरे । अद्राक्षुश्च ते किंचिदपर्यायसमुन्मिषच्चंपकबकुलचंदनतिलकमल्लिकासहकारमाधवीकरवीरवासंतिकाकुसुमपरिमलाद्वोरिमारुतानुसारिमधुकरीगानकलकलोन्मिश्रकलकंठकंठनादमदुरं दुरंतविरहोदंतदूयमानमानिनीजनावाजितपल्लवशयनसमुल्लासितलताकुंजमंजुलं वंजुलविटपसंचरदलिकलभभारपराकर्णिपरागपिंजरासारसरणिसालिलपूरपूरितालबालपादपच्छायसुखनिषण्णकिन्नरीसंल्लापसमाकर्णनोल्लासितकर्णिकारकलिकानिकायरमणीयमनातिक्रमणीयशंबरशासनशासनविटिकायमानपल्लवभंगधारणनिरंतकसारिकांसधर्किकरीभूतयुवलोकलोचनानंदनं नंदनमिव भुवि निवेशितमखिलगुणाभिराममारामं । तत्र च ।

मंदस्यंदरसालसालशिखरक्रीडत्पिकश्रेणिका-
कंठोदंचितपंचमध्वनिचमत्कारप्रकारस्पृशः ॥
कंदर्पाह्वखिलकिन्नरवधूकंठोन्मिषत्काकली-
काकुव्याकुलिता गिरो दिविषदां जीवातवो जज्ञिरे ॥३९॥

उपवने च तस्मिन्नुपांतनिरूढकदलीगर्भकंदलितहिमवालुकापरागवालुकापरागजनितजडिमहिमकुल्यानिपातशीतलितालवालसुखशायितकोकिककानिनादमनोरमे हरिमणिहरितपरिसरधरणिनिपतदविरलबकुलमुकुलपरिमलपरिमिलदलिकुलगुरूपचितमरुदपहृतकुसुमजरजोराशिनिर्मले मूले बकुलस्य निटिलतटनिर्माणकौतुकाभिनिविष्टनरिजसंभवापास्तशशांकशकलानुकारिकेतकीपत्रविचित्रवेणीपदांनभोनभस्य रजन्योः केशपक्षयोर्नवनवोन्मिषद्विवादपरिहारकसीमाविभागविशिखयेव सीमंतरेखया पद्मरागसिंदूरपाटलीकृतया संघटयंतीमिव सांध्यरागसंपदं किंकरीकृतभुवनमंडलेन किंचिद्घाटितेन भ्रूभंगेन परिहरंतीमिव प्रामादिकं भंगमनंगवीरस्य अनासोवितमधुरैरेवामृतैरनालिप्तशीतलैरिव कर्पूरैरवतंसोत्पल-

मिव हस्तग्राहं ग्रहीतुमनुधावद्भिरनुक्षणं कर्णपथमाक्रामद्भिरिव शनैर्मुखमंडलं संनीवनैर्मदस्य संप्रदायगुरुभिः शृंगारस्य विलासभवनैर्विभ्राणां तारुण्यचंद्रिकोद्भासितैस्तरंगैरिव लावण्यसागरस्य कटाक्षैरेव जगदखिलं कंदर्पनिदेशवशमापादयतीं ताटंकमरीचिवीचिभिः तडित्पुंजमिव युगपदुद्वितीमदिमरसाभिवर्षणाय निरंतरपीरवहदाननसौंदर्यनिष्यंदेनेव नासामणिना प्रतिबिंबेनेव तस्य पाटलाधरपर्यस्तेन मंदस्मितेन मदयंतीमिव मनांसि महायोगिनामपि नवनवोपचीयमाननखपंचस्तनभारापरिणाहवशात्परिश्रथयंतीमिवासकृदपि वेणीलताकंचुकस्य कंदुकाघातजनितारुण्यकरपल्लवाभ्यर्णपरिभ्रमद्भ्रमरिकानुकारिणा कटाक्षवलयेन परिश्रमयंतीमंतःकरणान्यपि पश्यतां कलमधुरगानामृतद्रवीभूतपर्यंतमणिकुट्टिमपतनसंभावितामार्द्रतां परिहर्तुं कंचुकस्य चलंतीमितस्ततोपि चरणतलरणितमंजीरजशिंजानुविद्धेन कांचीकलकलेन घोषयंतीमिव वीरघोषणां कंदर्पस्य विद्युतमिव विश्रमितुमागतां सालभंजिकामिव संचारशालिनीं रत्नशलाकिकामिव लब्धजीविकां शारदचंद्रिकामिव संपन्नविग्रहां सौंदर्यलक्ष्मीमिव सांद्रीभूतां साम्राज्यदेवतामिव तारुण्यस्य संप्रदायविद्यामिव मदनागमस्य कामप्यदृष्टचरीं कन्यकामुपलेभिरे ।

सायोन्मिषत्कुवलयोदरसोदराणि सा यत्र यत्र विचकार विलोचनानि ॥
आविर्बभूवुरवशादिव तत्र तत्र सज्जीकृतैक्षवशरा सभुना मनोज्ञाः ॥४०॥

कटाक्षैः कंदर्पज्वरजनितमोहांधतमस-
प्रलापव्यापन्नत्रिजगदगदंकारबिरुदैः ॥
प्रगल्भैश्चालापैः परिमृदितकर्पूरशिशिरै-
र्द्रवीभूतं जज्ञे सलिलमिव विश्वं मृगदृशः ॥ ४१ ॥
दिशि दिशि विकिरंती दीर्घदीर्घानपांगान्
करसरसिजघातैः कंदुकं तर्जयंती ॥
तडिदिव जलदेभ्यो विच्युता सासुरीणां
सविधमवजगाहे शांबरीं शंबरारेः ॥४२॥
भ्रामं भ्रामं करकिसलयं कंदुके पातयंती
स्रस्तं स्रस्तं कुचकलशयोरर्पयंत्युत्तरीयं ।
उद्गायंती किमपि किमपि स्वैरमुत्कूलरागं
चित्रन्यस्तं कुलमकृत सा दारुणं दानवानां ॥४३॥
स्वच्छंदप्रचलत्सुधार्णवसुधाकल्लोलवल्लोलया ।
संदृष्टाः शुभया दृशा सुमनसो धन्या जनन्या तया ॥
पंचब्रह्मविनिर्मितासनपरब्रह्मांकपर्यंकिनीं ।

पंचाम्नायशिरोगतां बुबुधिरे तां ते परां देवतां ॥४४॥

अपश्यंत च परिसरएव चरंतीं प्राणशक्तिमिव पंचशरस्य भाग्यदैवतामिव शृंगारस्य बालिकामुपेक्षितुं सुधाकलशमुदासितुं च तस्यामपारयंतः क्षणमनुबभूवुः संशयांदोलनं यावदसुराः।

तावद्धावत्कंदुकग्राहमोहव्याजात्प्राप्ता मध्यमेषां द्वयेषां ॥

सिंचंतीं व्याजहारामृतौघैः शस्त्राशस्त्रि क्लेशितान्यंगकानि ॥४५॥

के यूयमधिकारिकाइव गौरवंहंतविषण्णाइव संरंभमात्रशेषाइव च लक्ष्यध्वे किं कारणं विस्रब्धविहारिणीनां बालिकानां। विहारवनोपकंठमसृग्वसामांसकर्दमैरभिपूरयथेति। आकर्ण्य च तां गिरंमतिभूमिं मनोरथानामभ्यर्हितामृतादपि दानवा इदमूचिरे।

निर्वासिता निजपदास्त्रिदिवौकसोमी प्राप्ता वयं भुजबलेन पदं मघोनः ॥

सर्वेष्यमी सुमुखि दानवदैत्यसंघाः सत्यं वदेम यदि संप्रति किंकराः स्मः॥४६॥

किंबहुना।

त्वं नो राज्यं त्वं बलं त्वं धनानि। त्वं नः प्राणास्त्वं भवस्यांतरात्मा ॥

त्वद्दासाः स्मस्त्वत्कटाक्षप्रतीक्षास्त्वं यद्ब्रूयास्तत्प्रमाणं परं नः ॥ ४७ ॥

इति निःशेषनिवेदितात्मसु दानवेषु किं करिष्यति किं वक्ष्यतीति दिक्पालेषु स्मितसुंदरमिदमाह महामाया। हंत कथमभिज्ञाततत्वा अपि भवंतः पौरोगवाइव पाकशेषेषु कलशामृते कलहायंते। तदलमुपाविशत यूयमुभयेपि वीथीभूय प्रदास्याम्यहमेव भवतामिदं कलशामृतं। तत्र च प्रथममिमानन्यार्थिनः पद्मभ्रष्टानग्रभिक्षया परिविष्य पात्रेणैव भवत्सुप्रतिष्ठइति। ततश्च साधु साध्वित्युपलाप्यंतस्तदीयं वचनं द्वेधा पंक्तीभूय देवासुराः प्रथममेव संतर्पिता वागमृतैः प्रतीक्षांचक्रिरे कलशामृतं। ततश्च सा सन्निहितसखीकरन्यस्तकंदुका ससंभ्रमोपनतचेटीजनामृष्टमुखमंडला प्रत्यग्रकर्पूरपरागपरिधौतकरपल्लवा भ्रूभंगचोदितभुजिष्याजनोपहृतममृतकलशमादाय भुवनत्राणबद्धकंकणेन सव्येन पाणिना दर्वीकराशिरोरत्ननिर्मितां दर्वीमनुगृह्णंती दक्षिणेन करेण नीवीपदनिगूहितोत्तरासंगपल्लवा वेणीदृढग्रथितविस्रंसमानकुसुमदाममनोरमा निस्तरंगमिव सागरं निस्तनितमिव संवर्तमेघमंडलं निखिलमपि देवताबलं नियमयंती कटाक्षेणैव यदा काश्चिदत्र करं प्रसारयति काश्चिदुपमंत्रयते रहसि काश्चिदुच्चैः प्रलपति काश्चित्त्वरते काश्चिद्वा प्रतिब्रूते तदा तिरोभवेयमिति प्रतिज्ञयैव परित्रासयंती संमुखीभूय देवपंक्तौ सन्ननाह परदेवता।

प्रत्यासन्नसखीवितीर्णमुकुलद्वीटीतलग्राहिणा

सव्येनादधती करेण मृदुना दर्वीं मणीनिर्मितां ॥
कुर्वाणा करपल्लवे तदितरे कुंभं सुधापूरितं
चिद्रूपा परमा कला पुरभिदश्चित्ते ममाप्यस्तु सा ॥ ४८ ॥
आनम्य किंचिदवमुच्य पिधानपात्रमादाय रत्नकलशादमृतं समग्रं ॥
दर्व्या मणीखचितया ददती सुरेषु दिव्या कला भुवि चचार तडिल्लतेव॥ ४९॥
मात्रार्पितं गरलमप्यमृतं शिशूनामित्यामनंति यदिदं विशदं तदासीत् ॥
दर्वीकरत्वमपि सा दधती यदित्थं दिव्यं ददावमृतमेव शिशुष्वमीषु ॥ ५० ॥
चरंत्याः स्वच्छंदं चरणतलमंजीररणितैः
कलास्निग्धामंद्रैर्घनजघनकांचीकलकलैः ॥
कदाचित्तद्दृयंत्या वलितमुखमस्याः परिजनं ।
कटाक्षैरप्यासीत्सुखितमखिलं दानवकुलं ॥ ५१ ॥

ददाना च देवेषु दयारसमिव सुधारसं दैतेयावुभौ राहुकेतू नाम देवपंक्त्युपवेशिनौ भुजगवपुषौ पीतामृतावेव चंद्रार्कसूचितौ दर्वीकांडेन दारयामास कंठपदे ।

अंतर्निगीर्णममृतं प्रथमं हि येन तस्यासुरस्य तदाशिष्यत भोगमात्रं ॥
यस्यामृतं वदनएव घृतं स राहुरद्यापि पर्यवसितः फणमात्रशेषः ॥५२॥
यद्दृष्टं चंद्रसूर्याभ्यां तद्दृष्टं निजया दृशा ॥
क्षंतुं शशाक तेनैषां मंतुं न खलयोस्तयोः ॥ ५३ ॥

अनुगृत्वेत्थममरानामृष्टोदरं सुधाकलशमंतर्निहितदर्वीखणखणत्कारमौखर्यपूरितमग्रे निधाय दानवानामपेक्षमाणेव क्षणं विश्राममासांचक्रे । तदनु सुधापानलब्धबलाः सुपर्वाणः परिगलितशंकातंकाः प्रत्यक्षमेव तां प्रस्तोतुमारेभिरे ।

वंदामहे कमलनाभमनंतमाद्यं वंदामहे भुवनमोहनशक्तिमीशीं ॥
वंदामहे तदुभयाद्वयवादमूलंमानीलकंठमवतंसितचंद्रलेखं ॥ ५४ ॥
निरातंक स्वामिन् निरवधिदयाधार भगवन्
प्रपन्नानुग्राहिन् परमपुरुष त्वत्करुणया ॥
जिताः क्षुद्रा दैत्या जितमखिलमेतत्त्रिभुवनं ।
कृतं कर्तव्यं नः किमिव करणीयं पुनरितः ॥ ५५ ॥
आनीलकेशमरविंददलायताक्षमाविष्कृतास्मितमपारकृपानिधानं ॥
कूलंकषस्तनतटार्पितकुंकुमांकं शार्ङ्गिन्निदं शरणयेम तवाद्यरूपं ॥ ५६ ॥
उल्लंघ्य निर्मौल्यमुदासितं यद्जानतानेन पदे भवत्याः ॥
तत्स्वामिनि स्वामिनि मासवे नः क्षंतव्यमित्येव निवेदयामः ॥ ५७ ॥

इति स्तूयमानैव सा सुपर्वाभिरिदं किमापतितमियं का तरुणीति शंकाकलंकितैरालोक्य त्वरितं रिक्तममृतभाजनमाविष्कृतमहारोषपरुषैरसुरैः सन्नद्धानैर्युद्धाय सद्यएव शंखचक्रगदाखड्गसरसीरुहलांछितमसुरलोकभयंकरमाबभार रूपं नारायणी। भो भो महेंद्रप्रमुखा देवाः मशकानिवैतानुत्सार्य दानवान्मंदरं यथापुरं प्रतिष्ठाप्य विसृज्य वासुकिं विरूपाक्षमभिप्रसाद्य लब्धानुज्ञाः सुखं पालयत स्वाराज्यमित्यनुगृह्य देवानंतर्दधे सह चतुर्मुखेन शार्ङ्गधरः।

तिरोभूते सद्यस्त्रिभुवनगुरौ स्वामिनि हरौ ।
विषीदंतो दैत्या विबुधगुरुमानम्य शतशः ॥
अयाचंत स्थातुं निभृतमभयं भोगिभुवने ।
तथेति स्वीचक्रुस्तदपि विबुधादेशिकगिरा ॥५८॥

अथ पुनरंतर्निगूढमत्सरानप्यभिनीतमहाविनयानपनीतविषानिव महोरगानसुरान्विसृज्य सुधारसास्वादसुखिततया कंदुकमिव मंदरं करतलेन धारयंतः प्रशंसंतो वासुकिं भवत्प्रसादेन वयममरा अभूमेति परिरभ्य निर्भरं प्रस्थाप्य रसातलमुपनिवेशयंतो यथापुरं मंदरमुपतस्थिरे चंद्रशेखरं ।

क्षमेथाः श्रीकंठ प्रचलनमिदं मंदरगिरेः ।
क्षमेथाः काकोलं कवलयितुमाशासनमपि ॥
क्षमेथा यत्पूजास्वपचरितमासीदहरहः
प्रपन्नास्त्वामेकं शरणमशरण्या वयममी ॥५९॥
अक्ष्णोः पुष्पवतोरेकमर्पयन्नीश ते पदे ॥
चक्षुणी पुंडरीकाभे चतुरोलभताच्युत ॥६०॥
देवानामपि दुर्लभं पदमिदं लब्धं मयोपायतो ।
द्वित्रैर्बिल्वदलैः प्रतार्य शिवमित्येवं जनो मन्यते ॥
मद्भक्तांघ्रिरजःस्पृशोपि सुलभं क्षुद्रं पदं वेधसो ।
दत्त्वा सेवकएव वंचितइति स्वामिन्भवान्मन्यते ॥६१॥

इति स्तुवंतोपि विबुधाः सुप्रसन्नाः स्मो युष्मासु परिपालयत यथापुरंस्वाराज्यमिति प्रसन्नगंभीरामाकर्ण्य पारमेश्वरीं गिरमाकाशसभवां परमानंदनिर्भरैः प्राक्प्रस्थापितेन गुरूणा सज्जीकृतां परित्यक्तामसुरैः प्रसाधितां विश्वकर्मणा परितोप्यभिनवामिव सर्वसौभाग्यवतीममरावतीमासाद्य प्रणम्य वाचस्पतिं प्रसाद्य यथोचितं महर्षिगणान्परिरभ्य परस्परं प्रतिष्ठाप्य सिंहासने शतक्रतुमादिष्टानि तेन स्वानि स्वानि स्थानानि यथापुरममराः परिपालयांचक्रिरे ।

अर्चंतस्तरुणेंदुचूडमसकृत्संकीर्तयंतो हरिं
ध्यायंतस्त्रिजगद्विमोहजननीं शक्तिं परां शाभवीं ॥

आज्ञां मूर्धनि बिभ्रतः सुरगुरोरानंदयंतो मुनीन्
स्वच्छंदं त्रिदिवौकसो बुभुजिरे स्वाराज्यमव्याहतं ॥६२॥
वाचं व्याकुरुते चिरंतनगिरं मीमांसते चोभयीं
पांथः काव्यपथेषु पादकमले सक्तः पुरारेरिति ॥
मामेतत्कथयिष्यतीति रचितं काव्यं मया तत्पुन-
श्चावक्ष्यन्निव वा न वा तदुपरि न्यस्तः समस्तो भरः ॥६३॥
श्रीमद्विधुविबुधसरित्सान्निध्यात्स्फारशब्दरदः॥
अर्धांगीकृतदुर्गः स्वभक्तचेतोपि शीतयति शंभुः॥६४॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदप्पयदीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसंभवेन श्रीमन्नीलकंठदीक्षितेन विरचिते चंपूकाव्ये पंचमाश्वासः।

ROYAL LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

V
SK 891.21
Vit / Het

[काव्येतिहा-संग्रह.]

५

हेतुरामायण.

हें पुस्तक

काव्येतिहास-संग्रह-कर्ते

यांनीं

प्रकाशित केलें.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SO

इ० स० १८८२.

हेतुरामायणम्

॥ श्रीगणेशाय नमः ॥

पूर्णकामं गुणग्रामं विश्रामं कामविद्विषः ॥
कामाभिरामं श्रीरामं मेघश्यामं नमाम्यहं ॥ १ ॥

रामायणतात्पर्यं व्यंजयन्नत्यादरान्नमस्यति ।

नमोस्तु तस्मै जगदेकहेतवे नमोस्तु तस्मै भवसिंधुसेतवे ॥
नमोस्तु तस्मै कपिकांतकेतवे नमोस्तु तस्मै दशकंठजेतवे ॥ २ ॥

तत्र तावद्भगवतो नारदस्य लोकानुजिघृक्षायां हेतुमाह ।

स्यात्संशयानो मम संगमे जनो मद्ब्रह्मपुत्रत्वकलिप्रियत्वतः ॥
तत्तं विधायामृतभागिनं स्वयं तदुत्तरीतुं विममर्श नारदः ॥ ३ ॥

तस्य सत्यलोकगमने हेतुमाह ।

सत्यप्रतिष्ठां न विना कदाचित्संकल्पसिद्धिः प्रभवेदमुष्य ॥
तन्नारदः शारदचंद्रगौरः ससार सत्यं भवपारदृश्वा ॥ ४ ॥

तत्र ब्रह्मणो मूर्तवेदोपास्यत्वे हेतुमाह ।

श्रुत्यष्टकं तिष्ठति जागरूकं । नित्यं समाश्रित्य च यत्र मूर्तिम् ॥
चतुर्कमासामुपतिष्ठते स्म । तन्मूर्तिधारीति न तत्र चित्रम् ॥ ५ ॥

भृग्वादिमुनिसेव्यत्वे हेतुमाह ।

तपस्विनो जनास्तत्र चतुःश्रुतिपरिष्कृताः ॥
युक्तं न्यगच्छन्तः सत्यनिष्ठं तमुपतस्थिरे ॥ ६ ॥

सरस्वतीसाहाय्यकेनावस्थितौ हेतुमाह ।

वागानुकूल्याच्चतुरानिनत्वं समग्रलोकोत्तरवर्तिता च ॥
हैरण्यगर्भस्य न कोपि वादो निदर्शयन्नेवमभूत्स्वयंभूः ॥ ७ ॥

अक्षमालाद्युपादाने हेतुमाह ।

श्रुत्यंतदर्शी करगाक्षमालो हंसाश्रयो भागवतैकनिष्ठः ॥
न ब्रह्मभावे क्वचिदस्य वादो निदर्शयन्नेवमभूत्स्वयंभूः ॥ ८ ॥

नारदस्य नमस्यायां हेतुमाह ।

---

१ शिवस्य २ संशेतेऽसौ संशयानः ३ ब्रह्मपुत्रः प्रदीपन इत्यमरात् । विषं पक्षे प्रसिद्धम् ४ कलहः कलिर्विभीतके शूरे विवादेत्यमुणे युधीति हैमः । भल्लातको धनुरोवा निघंटौ ५ मोक्षः अमृतंच ६ ददर्शेइति दृशो ७ सत्यलोके ८ मूर्तीनां चतुष्टयं ९ सत्ये सत्यलोके निष्ठा स्थितिर्यस्य १० सर्वविद्यानिष्णातत्वं ११ उपनिषद्वाक्यान् १२ इंद्रियमाला जपमाला १३ परमहंसः पक्षे हंसः १४ भागवतशास्त्रे भागवतधर्मेच १५ ब्रह्मत्वे.

सिंहासनस्थमालोक्य कमलासनमप्यसौ ॥
ननाम नारदोप्यत्र कुमारस्तन्न चित्रकृत् ॥ ९ ॥

ब्रह्मणएव स्वमनीषितवेदने हेतुमाह ।

हरिर्यदंतः कुहरे निरंतरं जागर्ति गोत्राधिपतेः स्वयंभुवः ॥
तस्यैष आरात्कलिवृत्तमुत्तरं सविस्तरं तद्विववार नारदः ॥ १० ॥

कलिप्रसंगेन लोकदौस्थ्ये हेतुमाह ।

उन्मत्तकलिसंचारादसुरक्षणतत्पराः ॥
नरास्त्यक्तसदाचारा भविष्यंति दुराशयाः ॥ ११ ॥

उपायं प्रार्थयंते ।

स्वामिन्भवेऽस्मिन्गहने मलीमसैः कलिप्रदुष्टात्मभिरद्य सत्पदं ॥
सद्यः प्रपद्येत यतः कृपावशात्प्रशाधि मामीश लघूत्तमायनम् ॥१२॥

सहेतुकं भगवान्ब्रह्मोत्तरमाह ।

पृष्टं त्वया वत्स लघूत्तमायनं तदेव तन्नान्यदिति प्रतीयते ॥
तच्चेत्प्रकाश्येत नृणां यदृच्छया तदस्तमीयात्कलिविभ्रमोखिलः ॥१३॥

पुनरपि श्रीरामायणस्य कलिभंजकत्वे हेतुमाह ।

श्रीरामचंद्रस्य मुनेश्चरित्रं पवित्रमास्ते शतकोटिसख्यं ॥
तस्मिन्कलिः पापमहीभृदेषोऽप्यवस्थितिं स्वां कथमंग कुर्यात् ॥१४॥

भगवतोर्गिरिजागिरीशयोरप्यानंदकृत्त्वे हेतुमुपन्यस्यन्ग्रंथपारंपर्यप्रवृत्तिमाह ।

बलवत्कलिशृंगभंगकारि शतकोटिप्रमितं हरेश्चरित्रम् ॥
गिरिशो गिरिजां वृषप्रियो नः कथयामास समग्रमग्रगण्यः ॥१५॥

तत्सारभूतस्याध्यात्मरामायणस्य सकलशास्त्रमूर्धन्यत्वे हेतुमाह ।

जीवेशैक्यविधायिनो हि महतो वाक्यस्य वेदादिषु
ग्रंथेष्वस्ति महार्घतास्य च पुनः सामर्घ्यमालक्ष्यते ॥
यस्मिन्वाचकवाच्यतो त्द्युभयथाप्यध्यात्मरामायणम्
तच्छ्रीशंकरभाषितं न किमहो वर्वर्तु सर्वोपरि ॥ १६ ॥

अध्यात्मरामायणेति वाचकस्य महावाक्यत्वे हेतुमाह ।

जीवोऽध्यात्ममिति स्फुटं हि भगवद्गीतासु रामं परं-
ब्रह्मैवेति हि तापनीयउदितं स्थानंहि नामायनम् ॥

---

१६ मृगभेदश्च १७ ऋषिविशेषः पुत्रश्च १८ पापिष्ठैः १९ अनुशाधि २० रामायणम् २१ वज्रं संख्याच २२ प्रभुत्वमुत्कर्षश्च । शृंगं प्रभुत्वे शिखरे चिन्हे क्रीडांबुयंत्रके । विषाणोत्कर्षयोरिति मेदिनी २३ धर्मः वृषभश्च २४ महामौल्यता २५ वैपुल्यं २६ नाम २७ अर्थः २८ तापनीयनामकं अथर्वणवेदीयोपनिषत्.

तज्जीवस्य विशुद्धिमागतवतो ब्रह्मात्मभावस्थितिं
ब्रूते स्पष्टतयेह वाचकमपीत्यध्यात्मरामायणम् ॥ १७ ॥

वाच्यतात्पर्यार्थस्य महावाक्यात्मत्वं दर्शयति ।

रामांतरं यद्रामस्य जातमासुरयोगतः ।
तन्नष्टं देवसंभूतिसाह्याद्वाद्यमिदं मतम् ॥ १८ ॥

अध्यात्मरामायणे द्वयी सारभूता । तत्र रामहृदयपरिशीलनेन मुक्तले हेतुमाह ।

सद्यन्मुक्तावस्यंतस्थितः स इति मन्महे ॥
नांतरीयकभावेन यो रामहृदये स्थितः ॥ १९ ॥

अथ श्रीरामगीतापरिशीलनात्साक्षाच्छीरामरूपत्वे हेतुमाह ।

निगमामृतसिंधुमंथनाद्रघुनाथोद्धृतगीतकौस्तुभम् ॥
स्वगले विदधीत यः पुमान्विबुधेंद्रो विभुरेव स स्मृतः ॥ २० ॥
श्रद्धाभक्तियुतः सन्योगी तस्यास्य चिंतको भविता ॥
यच्चिंतको हि योगी स एव राघव इतीह को न वदेत् ॥२१॥

भगवती हैमवती किं संदिहाना गिरिशमेव पृष्टवती स च भगवांस्तत्समाधये रामायणमेव किमित्यकथयदित्यत्र हेतूनाह ।

जडोः संसाराब्धिं कथमहमियं दुस्तरतरं
तरिष्यामीत्येवं तरलिततया शैलसुतया ॥
गिरीशः पृष्टः सन्नच कथदुदात्तामथ कथा-
महल्या श्रीहेतोः प्रविरचितसेतोर्भगवतः ॥ २२ ॥

भगवत्यात्मनि परमाज्ञत्वावलंबनं लोकसंग्रहार्थमेवेति दर्शयन् श्रीशंकरेण तस्या एतत्कृतः श्रावितमेवेत्यत्र हेतुमाह ।

दैवीं हैमवतीं स्वरूपरुचकप्रद्योतिदिङ्मंडलां
श्रीरामप्रभुनामसन्मणिगणग्रैवेयराजद्वलाम् ॥
प्राणस्पंदनिरोधमौक्तिकलसन्नासामसावीश्वरः
श्रीरामायणमौक्तिकैरलमलं श्रुत्योश्चकारादरात् ॥ २३ ॥

एतस्य श्रीविष्णुपदीरूपत्वे हेतुमाह ।

मूर्ध्नाऽश्लाघि भवेन या भगवता या नाकवास्याहृता
रम्या मारुतसंभवद्द्रुममहाभंगप्रसंगेन या ॥

---

२९ ब्रह्मतादात्म्येन ३० ग्रंथार्थस्य ३१ रामा स्त्री. ३२ रामचंद्रस्य ब्रह्मवस्तुनः ३३ आसुरसंपत् ३४वानराः दैवीसंपत् ३५ पर्वतात्संभूता अतएव जडा ३६ ३७ जलं काननं च.

या संदर्शितसैगरोत्तमपथा या धूतमृत्युव्यथा
सा श्रीरामकथा यथा त्रिपथगा वर्वर्ति सर्वोपरि ॥ २४ ॥

सत्यलोकगमने हेतुमाह ।

श्रुत्यंतगेन सुतरामनुकूलवाचा पद्मोद्भवेन सुधिया चतुराननेन ।
किं स्याद्भगवतो नु निशम्य सर्वं वृत्तं प्रसादइति गंतुमियेष सत्यं ॥ २५ ॥

भुवो रक्षोविवृद्धेरेव भार इत्यत्र हेतुमाह ।

नूनं पुण्यैर्जना अमीह बिभृयुः स्वस्मिन्महागौरवं
चेद्वाराय मम स्युरेव महते सर्वे सहाया अपि ॥
इत्थं दर्शयितुं जनान्वसुमती भारेण सर्वोत्तमं-
मन्यानामसृगाशिनामियमभून्मध्ये जलं मज्जती ॥२६॥

भुवो गोरूपधारणे हेतुमाह ।

पौलस्त्यादिसमस्तराक्षसमहाभारात्पराजीयते
तद्रंतव्य इतः प्रजापतिरिति ध्यात्वाथ पूर्णं गवि ॥
ज्ञात्वास्य प्रणयं विधाय वसुधा तद्रूपमेतुं व्यधा-
द्बुद्धिं सिद्धसुधाशनैः सुचहुधा त्रस्तैः समस्तैः समं ॥२७॥

ब्रह्मणोऽग्रे प्राप्तमात्राया रोदने हेतुमाह ।

नेते जीवनमस्त वर्ततइति ग्रस्तं महापत्तिभिः
प्राज्यं जर्जरितं प्रतिप्रभवतो लोकप्रवादस्य सः ॥
रूपं निर्दिदृशीतीव येन विदिता स्यादाधुनिक्याश्मन-
श्चर्यस्यश्रुविलोचना क्षितिरभूद्वत्साग्रतो ब्रह्मणः ॥२८॥

आत्मनो व्यसननाशशैथिल्ये हेतुं संभावयति ।

सर्वज्ञ सर्वसुरसंघसमार्चितांघ्रे सर्वं करामलकवत् भगवानवैति ॥
नास्ते च मय्यसननाशविचारलेशस्तत्किं कुर्वस्त्विति धिया समुपेक्ष्यतेऽहं॥२९॥

तच्छैथिल्यमसांप्रतमित्यत्र हेतुमाह ।

नित्यं सुधान्नं मधुरं ततोप्यतिप्रदीयते यत्तु हविः सवादिषु ॥
यत्तश्च मय्यस्ति सवैंद्रियोगता तद्वः सुधायां वसुधास्तु संमता ॥३०॥

तदानीं ब्रह्मणो भगवत्स्मरणं साभिप्रायमित्याह ।

सांद्रांभोधरशामसुंदररुचं चंद्राभिरामाननं

---

३८ भवसमुद्रस्य दर्शितपथाः सगरपुत्राः ३९ एतादृशेन मध्यस्थेनविना सर्वं वृत्तमनुनिशम्य [illegible] प्रसादः स्यात्किं नस्यादिति विचार्य सत्यलोकं गंतुमियेष ४० पुण्यकारिणो जनाः [illegible] कृत्सिता या वसतु सा कुशब्देन पृथ्वी वाच्या ४२ यज्ञाद्रि-योगता सुधायाः आदौ वकारयोगेन वसुधा भवति.

चंचच्चंदनचारुचर्चिततनुं क्षीरार्णवस्थायिनं ॥
रिंगद्भृंगतरंगसंगिचरणं श्रीपुंडरीकेक्षणं
व्यध्यायत्सर्महौगदं तदवनेस्तापस्य संशांतये ॥३१॥

क्षीरसिंधुं प्रति जिगमिषायां हेतुमाह ।

यं याम कोयं भुवि दीनरक्षी प्रत्येकदृश्योयं विधिना विमृश्य ॥
सर्वैः समं क्षीरनदीविभुः श्रीकांताधिवासो ननु संन्यधायि ॥३२॥

सत्यलोकान्निर्गमने हेतुमाह ।

नैतद्विचित्रं कुसुमागमोद्भुतं करोति सामान्यजनेषु विक्रियाम्॥
यत्सत्यसंकल्पमपि प्रजापतिं सत्यात्सहत्यात्सहसा व्यचालयत् ॥३३॥

क्षीरसिंधोर्भगवत्स्थानत्वे हेतुमाह ।

वसति समर्यादतया वसुर्वैभवोपि मधुरतरः ॥
भगवन्निवासपात्रो भवेज्जनः कोपि दुग्धसिंधुरिव ॥३४॥

ब्रह्मा हरिं स्तुत्वा स्वव्यसनमाह ।

रुध्वा पादसरोरुहं भगवतश्चेतः सरीजांतरे
ध्वत्वा पाणिपुटं सुटंकितमतिर्देवः सरोजासनः ॥
गोविंदं विनतारविंदतरणिं तुष्टाव हृष्टात्मना
कष्टानि व्यपनेतुमस्य जगतः सृष्टानि दुष्टात्मभिः ॥ ३५ ॥

तस्मै नमोस्तु परिरक्षितवारणाय । निष्कारणाय भवभीतिनिवारणाय ॥
सच्चारणाय जगदंकुरकारणाय । नारायणाय निजभक्तपरायणाय ॥३६॥

निर्द्वंद्वाय पुरंदरादिदिविषद्वृंदाभिवंद्यांघ्रये
निस्पंदाय चिदात्मने परिहरोत्कंदर्पाय मंदात्मनाम् ॥
बंदारुव्रजबंधनं दलयते मंदारिनिंदाकृते
गोविंदाय नमोस्तु मंदरभृते स्वानंदकंदाय नः ॥ ३७ ॥

विंदद्दुग्धरविंदसुंदरदृशं मंदस्मितं नंदकं[१६]
विंदंतं दरकंधरं दरधरं कंदर्पसंदर्पदं ॥
उंदच्चंदनगंधबंधुरभुजं कुंदाग्रनिंदद्रदम्
वंदे नंदसुनंदवंदितपदं तं देववृंदेश्वरम् ॥ ३८ ॥

पतो भुवो भारापनयनावश्यकत्वे हेतुमाह ।

आर्ये गोविंद [१७]गोत्रेयं गीर्वाणगणवंदित ॥

---

४३ महती गदा यस्य तं महच्चतदगदमौषधं च ४४ रोगरूपाय ४५ दानविषय कल्पवृक्षस्य निंदा कुर्वते ४६ नंदकः कौस्तुभो मणिः कौस्तुभं धारयंतं ४७ कंदर्पस्य संदर्पं खंडयतीति ४८ पृथ्वी ।

क्रव्यादव्याघ्रसंघातमाक्रांतास्ति संप्रति ॥ ३९ ॥
श्रितपरमसितं पयः समुद्रे कृतनिलयं किल हंसभावितं नः ॥
प्रभवतु भवतः पदप्रवालं झटिति सुदुःसहतापजालशांत्यै ॥ ४० ॥
स्वस्मिन्विरुद्धमिव यत्प्रभवेद्धि कृत्यमस्मत्कृते तदपि संविदधाति देवः ॥
यन्निष्कलंकगुणशंखभृदप्यशंकं शंखं[५१] विपुंखमवधीरवधीरयंतम् ॥ ४१ ॥
अत्यंतं व्यथते हि पामरजनोऽप्यल्पादपि क्लेशतः
पत्न्यास्तत्पुरुषोत्तमः कथमसौ सोढा प्रियामज्जनम् ॥
भूदारत्वमिति[५२] प्रदर्श्य भगवांस्तां मज्जतीं सर्वथा
स्वेनैवोद्धृतवान्स संप्रति कथं शेषेधि शेषेऽव्यथम् ॥४२॥
हा गोत्रावनिमज्जनं[५३] समुदितं कस्याप्यभीष्टं भवेद् ।
ब्रूमः कंप्रति संप्रति प्रतिगतं तद्वासवायेति चेत् ॥
गोत्रोच्छेदकुतूहली स बलभित्तन्नाथ गोत्रोद्धृतिः
कार्या कच्छपमूर्तिनेव[५४] भवता स्वेनैव नैवापरैः ॥४३॥
निरामयश्चिराय स्यात्प्रल्हादो जगतीतले ॥
इति कृत्वाद्भुतं रूपं विध्मातो[५५] दानवाधमः ॥४४॥
जानीमहे भगवतः क्षितिरूपमेतत्
वस्तु श्रियः प्रियतमं कथमन्यथाहि ॥
नीचैस्त्वमात्मनि विभाव्य बलेरयाच-
दल्पीयसीमपि भवान्भुवमेव भूमन् ॥४५॥
भार्गवस्य[५६] भवतो ननु राजद्वेष[५७] एतदिति शास्त्रविरुद्धम् ॥
त्वं तथापि किल राजकुलाय द्रुह्यसि स्म कुशलाय भुवोस्याः ॥४६॥
एवं स्तुवत्सु सत्सु ।
मंचे शेषमये प्रपंचरचनाबीजं शयानं श्रिया
स्वांके पादतलं निधाय मृदुलं संवाहयंत्या सह ॥
प्रेम्णा नर्मकथावितानरसिकं सर्वज्ञमप्यात्मनः
कार्यत्वेन खगाधिपो विधिवचो नेतुं चकांक्ष क्षणात् ॥४
गरुत्मतएव तत्प्रापणे हेतुमाह ।
विबुधवचांसि यथावच्छनैः शनैः साधुपक्षपातित्वं ॥

---

४९ हंसः सूर्यः परमहंसश्च ५० वृक्षपल्लवं वैद्यप्रवालंच ५१ शंखासुरं ५२ भूः दाराः यस्य सः भूदारः तस्य भावः भूदारत्वम् ५३ गोत्रं नाम्नि कुले नगे इति विश्वः कुलपरंपरागतभूमिश्च ५४ कूर्ममूर्तिना ५५ नाशितः ५६ परशुरामस्य शुक्रस्य च ५७ चंद्रः राजानश्च

अन्वर्थयन्निव स्वं सोन्ववदन्खिदशसार्वभौमाग्रे ॥ ४८ ॥

भगवतः सद्यः कारुण्योदये हेतुमाह ।

अगण्यकारुण्यसुधांबुराशेस्तदात्वएवोच्चलदंबुभावे ॥
गौः सर्वशस्ता विसृजन्बभूव युक्तं निमित्तं द्विजराजएषः ॥ ४९ ॥
विद्युच्छीश्लिष्टतनुर्यातुदवार्दितसुपर्वनिर्वृतये ॥
भुजगशनसमुद्बुद्धो जीवैनदाताथ कश्चनाविरभूत् ॥ ५० ॥

भगवत्तेजसा सर्वचक्षुःप्रमोषे हेतुमाह ।

निष्पीतनिःशेषतमः पुरस्फोर परमं महः ॥
यत्र खद्योतइत्याख्या रवेः कीटार्यतावहा ॥ ५१ ॥

परमस्य धाम्नो ब्रह्मणएव दर्शने हेतुमाह ।

हंसैर्यस्य सदैव संगतिरथ श्रुत्यंतदर्श्यंजसै-
तद्युत्पत्तिविचारचंचुरमतिः सद्योगविन्यस्तधीः ॥
रूढःसप्तमभूमिकामिति सतु ब्रह्मैव साक्षात्परं-
धामापश्यदिदं सहस्रनयनप्राभ्र्या न चान्ये सुराः ॥ ५२ ॥
एषोब्धिर्निजकायकांतिकलनात्तांपिच्छगुच्छच्छवि
स्वच्छो गच्छति तुच्छवद्यदि पुनर्मत्सन्निधेर्न्यर्छेनं ॥
स्यात्कुत्सेयमितीव मत्सरवशाच्छीवत्सवक्षारद-
ज्योत्स्नाभिर्नतवत्सलोस्य शितितामुत्सादयन्नब्रवीत् ॥ ५३ ॥

कौशल्यमस्ति किल भग्नबलोधिराजः स्फारं प्रवर्तयति वः सुमनोधिकारं ॥
ज्ञातोपि कच्चिदयि सारविचारमग्नः स स्वस्थितौ भवति संप्रति संप्रतीतः ॥५४॥

भगवतो वचोवैचित्र्यासर्वज्ञतां विवृण्वन्ब्राह ब्रह्मा ।

सर्वज्ञानां श्रीमदंघ्र्यंबुजाना मप्यग्रेऽहं सेवकत्वाद्ब्रवीमि ॥
भक्तै र्भानोस्तत्पदार्चानुरक्तै-र्नो नीराज्यं किंनु दीपावलीभिः ॥ ५५ ॥
कंठे त्रिसूत्रनिक्षेपो यदा श्रीचरणैः कृतः ॥
समर्पिता तदैवासीत्करे कुशलतापि मे ॥ ५६ ॥

परं रावणस्यास्मत्परिभवे हेतुमाह ।

स्वामिन्निशाचरवरो मल्लब्धवरसंभृतः ॥
अवरान्मन्यते सर्वान्छचीवरवरान्सुरान् ॥ ५७ ॥
दुर्धर्षदुर्दममदांधमहासुरेंद्रैः । संरक्षितं यदनिशं सनिषंगचापैः ॥
लंकाव्हयं त्रिशिखराग्रगतं यथार्थं । सत्तापदं जयति राक्षसवैभवस्य ॥५८॥

---

१ किरणाः वाचश्च । २ देवाः । ३ प्राणः उदकंच । ४ कलंकः । ५ क्षिती धवलमेचकात्रित्यमरः । ६ युष्माकंचरणैः । उत्तमानांतुस्वरूपं तु पादशब्देन मण्यते।

सद्यः प्रयच्छति सुदुस्सहतापजालं। धैर्यं विलुंपति च लिंपति कालिमानं॥
प्राणातिसंकटकरं विकटं सुराणां। लंकेति नाम नगरं न गरायते किं॥१९॥
उन्नद्धोर्मिपरंपराब्धिपरिखा सालैर्विशालैर्युता।
नानादुर्गमसंक्रमैः परिचिता दुर्भेद्यतंत्रावृता॥
सा लंकाभिदधाति नूनमखिलान्दृष्ट्वा विपर्यस्तया।
यो मां पश्यति कालमेव स पुनर्निःसंशयं पश्यति॥ १० ॥
महोक्षवदलं बलात्समवरुद्धगोमंडलः।
सदाचरणकर्शकः सुपथदूषकः शूकवत्॥
करीव मदघूर्णितो महिषवद्वरिद्वेषणः।
स शास्ति मनुजाशनो दनुजराजधानीमिमाम्॥ ११ ॥
शस्त्रावेक्षणिकाप्रसंगवशतः क्रव्यादराट् कौतुका-।
चंचच्चापलतः समुद्यतगदः शूलोद्यतः स्याद्यदि॥
प्रोदंचत्तरवारिरप्ययमये तावत्सुराणां गणः।
सर्वांगे त्वदि मूर्ध्नि किंच नयनेष्वेवेदृशो दृश्यते॥ १२ ॥

रावणस्य दिग्विजयमाह। तत्र इंद्रं जित्वा तस्य मालाकारत्वे हेतुमाह।

दृष्ट्वा नंदनकृत्तबंधनमिमं संक्रंदनं बंदिभिः॥
सद्यः कारितवंदनं स्वसविधं विदंतमस्तांबुनः।
पूरैर्दृष्टसुदौर्मनस्य विभवं दृष्ट्वैव लब्धार्जव-॥
स्तस्मै किं सुमनोधिकारमसुरोदाद्भूतपूर्वायितम्॥ १३ ॥

ऐरावतस्य ऐरावणेति समाख्यायां हेतुमुत्प्रेक्षते।

यावद्देवगजोभ्ययुक्त रदनैर्युद्धेऽस्य वक्षःशिलाम्॥
भेत्तुं तावदनेन दंतमुसलग्राहं पराक्पातितः॥
निर्भग्नास्थिचयो भयज्वरवशादैरावणैरावणै-
त्येवं प्रालपदित्ययं किमु हरे तन्नामधेयो भवत्॥ १४ ॥
हंसव्यंसकमंदसुंदरगतिव्याकोपिरक्षिव्रजा-
वाच्यालापशतद्रुतद्रुतिवशोत्सिक्तोदकुंभोदकैः॥
निश्चोतन्नयनांबुपूरसाचिवैरामूर्द्धपादं स्वयम्
क्लिन्ना यस्य हि नंदनात्ततरुनुंदंति रंभादयः॥ १५ ॥
मंदानां मदिरामदांधमनसां मध्ये सभं रक्षसा-
मादिष्टं यशसः प्रबंधनिवहं गायन्दशास्यस्य यः॥
विस्यानेंगविधूननेन युगपत्श्लाघार्थकोलाहलै-
र्हा हा त्रस्तमनाः स्वनामकलनामेवात्मनाभ्यस्यति॥ १६ ॥

गीतेतु पूर्वचिरवासनयेंद्रपदो हूहू: क्वचित्कुपितयातुतिरस्कृतोभूत् ॥
आहूतमात्र उपवीणयितुं स भूयो हू हू करोति विषमज्वरजर्जरांगः ॥६७॥

हुताशनस्य पाचक्ये हेतुमाह ।

हुताशनोयं दहनीयमेवं मुख्यार्थसंपत् घटते न नित्यम् ॥
प्रदर्शकस्तत्र स गौणवृत्ते- र्गौण्यैव वृत्या स सदा स्थितोस्ति ॥ ६८ ॥

यमस्य प्रातिहार्ये हेतुमाह ।

सिद्धं युद्धकृते समुद्धतबलं क्रुद्धं विरुद्धायितम्
विद्धं दिक्षु निरुद्धपद्धतिमसौ बद्धं विधाय स्वयं ॥
कालं दंडधरं न्ययुक्त निलये तुल्याधिकारेप्ययं
पूर्वं प्राणहरो मनोद्दधुनेत्येवं विधास्ते भिदा ॥ ६९ ॥

लंकेशनाशकरणे वरुणप्रयुक्ताः पाशा अमुष्य महसा सहसाप्तनाशाः ॥
तेनैकधैव नहि केवलमेष जज्ञे पाशोत्र किंतु रणसीम्न्यसुपंचकेपि ॥ ७० ॥

येनात्तगंधं क्रियते समस्तं महाबलानां बलजीवनं यः ॥
हुंकारमात्रेण सआत्तगंधो युद्धोन्मुखो गंधवहो व्यधायि ॥ ७१ ॥

ज्यायांसं निजबांधवं द्रविणतः श्रेयांसमार्यापतेः ॥
प्रेयांसं तमुगुह्य केशमपि यः शप्याय नो मन्यते ॥
मध्वा स्वादपरस्तदीयविकसत्संपन्महावीरुधः
सारं भृंगइवाधितिष्ठति महामोदास्पदं पुष्पकं ॥ ७२ ॥

पूज्यत्वं प्रतिबंधकं हरजये तस्माद्यथासौ भृशं
तुष्योत्किंच मयापि तस्य गरिमा स्यादात्तगंधीकृतः ॥
तत्कुर्यामिति कौतुकादुदहरत् कैलासशैलं यथा
श्लिक्षद्भर्तुरुमाभयाद्बलमलं दुर्वारमानिन्यपि ॥ ७३ ॥

निःशूरं भुवनत्रयं रचयितुं बद्धस्पृहे रावणे
स्वस्मिन्कोशकृता बहूरुपकृतीरर्कोऽ निशं मन्यते ॥
भास्वच्चंडकरादिनामकथने संप्रस्तुते नो चिरे
सूरे नाम्नि शकारमन्यदपि यत्खद्योतमित्यूचिरे ॥ ७४ ॥

जातः सन्कुटिलत्वमेव भजते संसेवते वारुणी-
मन्यस्त्रीरसिकः सनाकविबुधद्विट् किंच रात्रिंचरः ॥
इत्थं नाम समानशीलकतयाऽस्माकंतु तस्यैकलः
शीतांशुः सुरतश्रमस्य शमनो च्छर्माणि निर्मीत्ययं ॥ ७५ ॥

तस्यानुयायिवर्गोपि जायते विप्रभोजनः
तत्प्रभाभिर्न को नाम जायते विप्रभोजनः ॥ ७६ ॥

रावणस्य रणे सर्वे वयं विशरणं गताः ॥
तदद्य नाथ भवतश्चरणं शरणं गताः ॥ ७७ ॥
निःशेषत्वेन निर्हृत्य जाड्यं निर्जरसां श्रियः
दातुमुत्तेजनं ब्राह्मीमुत्ससर्ज जनार्दनः ॥ ७८ ॥
अद्यैव प्रतिपद्य मद्यरसिकोऽवद्यः स सद्यो मया ॥
वध्यो विद्यत एष उद्यतमदोऽविद्यावृतो बुध्यताम् ॥
ते सर्वे शबरास्त्वमुष्य खलु निर्जीवा नरेणैव त- ॥
त्तत्रावास्य दशाननस्य मलिनस्यास्य व्युदस्याम्यसून् ॥ ७९ ॥
ब्रह्माधमस्यास्य वधेन सद्यः ॥ कृतेन हि ब्रह्मवरो विनश्येत् ॥
कालानुरोधेन ततोस्य सर्पि ॥ ष्कुंभास्रुवात्सिध्यतु वध्यभावः ॥ ८० ॥

मया प्रादुर्भविष्यते युष्माभिश्च वानरैःसाहायकार्थं भूयतामित्यत्र हेतुमाह ।

स्वस्त्रांशतश्चंडपराक्रमोद्धुराः सुरा धरायां प्रभवंतु वानराः ॥
तदात्तसर्वाक्षरसंपदर्थतः स्याल्लोकविद्रावण एष रावणः ॥ ८१ ॥
महा प्रसादइत्येवं विरिंचो वचनं हरेः ॥
अंतर्दधौ निजप्रादुर्भावाच्च स परःपुमान् ॥ ८२ ॥

अथ ब्रह्मा देवानाह ।

रजनिचराभावोर्थात्सिध्यति सद्यो विबुध्यतां विबुधाः ॥
न रजनिचरो धरण्यामेष भविष्यति हि पूरुषविशेषः ॥ ८३ ॥
राक्षसान्समुपलक्ष्यवादिभि र्यद्भवद्भिरनरैःप्रभूयते ॥
भाव्यमेव खलु तर्हि वानरै र्भूतलेऽत्र न चिरं विरच्यताम् ॥ ८४ ॥
अथ ते प्रसन्नवदना अभवन्निति कीर्तनं तु पुनरुक्तमिव ॥
यदमी निवेदयितुमात्मदशा-मभवन्पुरैव हि न दीनमुखाः ॥ ८५ ॥

ब्रह्मणः सत्यलोकगमने हेतुमाह ।

कुसंगमाहात्म्यवशात्कदाचित् । सत्याद्बहिर्भावमुपेयिवान्यः ॥
सत्यस्थितिस्तस्य पुनर्नचेत्स्या । त्कृतं मुरारेः किमनुग्रहेण ॥ ८६ ॥
नासत्यो विविदे च मैंदमनलो नीलं नलं विश्वकृ-
त्पर्जन्यः शरभं रविस्तु सुगलं देवेश्वरो वालिनम् ॥
तारं गीष्पतिरांजनेयमनिलः पाशी सुषेणाभिधं ।
पौलस्त्यः किल गंधमादनमिति प्राजीजनन्नंदनान् ॥ ८७ ॥

स्वस्यास्तुसंपदमपि प्रविहाय विष्णोः ।
सेवां विधातुममलामफलां कलाभिः ॥
येऽमी वसंति विबुधा गिरिकाननेषु ।

धन्या हि ते हरयएव कुतो न मान्याः ॥ ८८ ॥
अथ विगलदभिध्या भूतलेत्यंतमेध्या
विजयिभिरनिरोध्या व्याधिसंतत्यबाध्या ॥
असुकृ[१]तिभिरसाध्या पुण्यसंपद्विवृध्या-
दाखिलगुणसमृध्या राजते पूरयोध्या ॥ ८९ ॥
बहुकुतुकविधात्री श्रीशसायुज्यदात्री
सकलविबुधमान्या दीनरक्षावदान्या ॥
धरणिवलयभूषा पुण्यपीयूषमू[२]षा
रिपुमहिषभवानी राजधानी रघूणाम् ॥ ९० ॥
शक्या न योद्धुं प्रतिपक्षभूपैरेषेति तर्कैः किमु तर्कयामि ॥
यस्या अयोध्येत्यभिधानमेव समर्थयत्यर्थमिमं समर्थं ॥ ९१ ॥
वसी[३]यैसीयं नगरी तु कार्हिचित् क्वचिद्विहीनाभिनवैर्महोत्सवैः ॥
एवं गिरां नावसरोपि वैरिणां वक्तुं यतो जातसदा[४]जरक्षणा ॥ ९२ ॥
सकलसुरचितसुधर्मा जयोन्न[५]ता या च वैजयंत्याढ्या ॥
अध्युषितचित्रसेना शतक्रतुवरामरावतीव बभौ ॥ ९३ ॥
येयं मुक्तिपुरीषु सप्तसु सतामग्रेसरी संमता
युक्तं युक्तमिदं न चेत्कथयत क्वान्यत्र पुर्यामहो ॥
अभ्यर्च्यांगजपाणिपीडनविधौ तैस्तैरलब्धोदयै
र्निर्याति स्म महोत्सवैर्ननु तनुत्यागाय सर्वे जनाः ॥ ९४ ॥
आयात्यनुत्त[६]मांतास्थितवसुहरणोद्यतो रचितपुंखः ॥
यामेकधैव मा[७]र्गणगणो नणुगुणेन कर्णपथगामी ॥ ९५ ॥
सौरैः करैर्दशशतैरनुगृह्यमाणा या कोशला कमलिनीव विराजमाना ॥
श्रीस्तत्र वस्तुमभि वांछति सर्वदेति किं कर्कशैर्विविधतर्कशतैर्ब्रवीमि ॥९६॥
सारव[७]ती राजपुरी कास्ति भुवीत्थं विचिंत्यमाने तु ॥

---

१ पुण्यं न कृतं[भिः]. । २ मूस इति प्राकृतभाषायां रूपातं । ३ अतिशयेन वसुमती इति वसीयसी । ४ जातं सदा अजकर्तृकं रक्षणं यस्यां सा । पक्षे जाताः सदा अजरा क्षणाः उत्साहाः यस्यांसा । क्षण उत्सवउत्सवेयमरः । ५ देवसभा । पक्षे सुधर्मश्च । ६ इंद्र पुत्रो जयः । ७ पताकाः । इंद्रकन्याश्च । ८ ज्येष्ठपुत्रविवाहोत्साहापेक्षयाधिके हृत्साहैर्यत्र देहत्यागार्थं निर्याति स्म । अयोध्यावासिनः सर्वेपि रामेणसाकं वैकुंठमगमन्निति रामायणे । ९ नास्ति उत्तमं यस्मादित्युत्तममतएवांतस्थितं मंजूषादिकेस्थितं यद्वसु द्रव्यं तत्हरणोद्यतः पक्षे उत्तमाः ये अंतस्थाः तन्मध्यस्थितो यो व कारः स नास्तिय स्मिन्निति यद्वसुपदमर्थादसुपदं तस्य हरणे उद्यतः । १० मार्गणो बाणयाचकाविति कोशः ॥ ११ श्रेष्ठा राजपुरी पक्षे सरव्वा इदं सारवं तत्र या अजपुरी ।

गंगातीरशिवपुरीत्यादिरिमामंतरेण न स्फुरति ॥ ९७ ॥
यच्छिल्परचनां स्मर्तुं मनसापि न शक्यते ॥
एतदेव तु वैचित्र्यं मनुनिर्मितवस्तुनः ॥ ९८ ॥

॥ इत्ययोध्यावर्णनम् ॥

दृष्टा दुर्मतिदारिणी प्रणमतां पापच्छटाहारिणी
स्पृष्टा जाड्यनिवारिणी मृजिकृतां पुण्यौघविस्तारिणी ॥
स्नानान्मुक्तिवितारिणीह शरयूः पीता भवोत्सारिणी ॥
साकेतांतविहारिणी विजयते नृणां मनोहारिणी ॥ ९९ ॥
या बहुलवाहिनीभिः[1] परिश्रिता समकरप्रचारा च ॥
जलैस्तारणाय दधती तरणिकुलकोसला विडंबयती ॥ १०० ॥
सुरभीकृतसर्वांगी फुल्लकल्हारमालया ॥
चलद्भ्रमरका स्फारस्फुरन्मीनविलोचना ॥ १०१ ॥
सांद्रस्थासकसंपन्ना निनदत्कलहंसका ॥
पवित्रपत्रभंगाढ्या भास्वत्तिलकभूषिता ॥ १०२ ॥
मंदं चलंती गंभीरबहुनीरसाकुला ॥
वरारोहोच्छलद्वेणिरुल्लसत्कंकणोर्मिका ॥ १०३ ॥
समर्यादतया नित्यमनुकूलप्रवर्तिनी ॥
समर्पयति या साधुकांतेव सुरतोत्सवम् ॥ १०४ ॥

॥ कालापकम् ॥

ऋत्विग्भ्यः क्रतुदक्षिणां प्रददतः सर्वार्थजातं मुदा
संजाताः परमार्तिकास्पदमहो ते ते न के राघवाः ॥
तद्भीता इव कोशरक्षणकरा अस्पर्शना लुब्धवत्
यूपा हंत निखातकांचनमया यस्यास्तटे रेजिरे ॥ १०५ ॥
स्प्रष्टुं न शक्ताः खलु यत्समंतात् पंकाः इदं किं प्रतिपादयामः ॥
पंकव्यथानिस्तरणे जनाना-मुपाविशन्यां प्रति तिर्थराजाः ॥ १०६ ॥
सरिद्वराया बहुतीर्थयोगात् बभूव यस्याविरजा स्थितिः सा ॥
सदैव किं नैव सशैवलक्ष्मा चित्रं तु चक्रे जनलिंगभंगम् ॥ १०७ ॥

---

१ नदीसेनाच । २ मकराः करश्च । ३ डलयोः सावर्ण्याज्जडतारणाय ।
४ स्थासकः पुंसि चार्चिक्ये जलदेरपि बुद्बुदेऽपि मेदिनी । ५ शृंगाररसः । ६ कूलं । पक्षे पूर्वभागः । ७ मृत्पात्रास्पदं । पक्षे पीडास्पदं ८ पंकः पातकं । पक्षे कर्दमः । ९ तीर्थराजाः घाट इति प्राकृतेरुत्पातं १० रजःशून्या । ११ शैवचिन्हसहिता । शैवालं तस्य क्ष्मा पृथ्वी १२ लिंगं प्रसिद्धं शैवचिन्हं । पक्षे लिंगदेहः ।

॥ इति सरयूवर्णनम् ॥

पुर्यां तत्र वसन् रवेः कुलभुवां नाथो महासंपदां
पाथोधिर्धृतसत्पथो विगलितानर्थः समर्थो मिथः ॥
विद्वद्गीतकथो विशेषविदथस्त्रैलोक्यजाग्रत्प्रथः
पृथ्वीं निर्जितमन्मथो दशरथोऽरक्षीदनुत्थव्यथः ॥ १०८ ॥
भूत्याढ्यो द्विजराजभृच्छुचिवपुर्यो राजराजाश्रयो ॥
विध्वस्तातनुशत्रुदुर्विलसितस्त्राता वृषस्यानिशम्
आर्यातिप्रियतास्पदं प्रियमहासेनो हि सन्मंडनः
सोयं पंक्तिरथो महेश्वर इति स्यात्कस्य न प्रत्ययः ॥ १०९ ॥
रचितमहेशादरहर्यर्चितमथ साधुपथमभिनिविष्टम् ॥
दशरथराजं सुजनः को न वदेदेष चक्रवर्तीति ॥ ११० ॥
उत्थानं कंटकानां निजयुवतिजनप्रेमभावावलोका-
दार्तिः कोदंडदंडे त्रिपुरहरकरे दृश्यते नाम शूलम् ॥
कौटिल्यं कुंतलेषु द्विरसनवचनं पन्नगे नेतरत्रे-
त्येवं यस्मिन्प्रशासत्यखिलगुणनिधौ प्रत्ययोभूज्जनानां ॥ १११ ॥
यस्मिन्प्रशासति नरप्रवरेऽपरागो धर्मपथः प्रतिदिनं परिषिच्यमानः ॥
अस्ताचलो यतिमनोबुजकोरकोभून्नस्त्रीजनः स्वरमणे न च पुंजनोपि ॥११२॥
बिभ्रत्स्वमंडलमसौ वसुधाच्छायमपि नवसुधाच्छायम् ॥
राजा चमत्कुरुतइति सनीत्यनीत्यपि तदेषकिमभार्षीत् ॥ ११३ ॥
सन्मंत्रिभिस्तस्य विचारलक्ष-दक्षैर्विसृष्टोभयपक्षकक्षैः ॥
अक्षप्रचारो नयशोभितः सन्यशोभितः संजनयांबभूव ॥ ११४ ॥
तदुक्तमेव हि बभूव विमुक्तधन्वा स्तोकोपि तस्य सक्रूपस्य नृपस्य पत्री[12] ॥
पातुं स्म कांक्षति महाहितकंधरोत्थं कीलालमेव न पुनर्बहुवाहिनीनाम्[13] ॥११५॥
येनावृष्टिरथातिवृष्टिरिति ये ईती[14] समुत्सारिते ।
दूरं तत्र रिपुव्रजस्य वदनैराद्यादतेवाभवत् ॥
अन्यात्वस्य वधूजनस्य नयनैर्युक्तं हि निर्वासिता ।
नौदार्याभिजसंनिधौ निदधते निर्वासकद्वेषिणः ॥ ११६ ॥
पुंस्कुंजरस्य चरतो निरंकुशतयानिशम् ॥

---

१ भूतिर्भस्मपक्षे ऐश्वर्य । २ चंद्रः ब्राह्मणश्च । ३ मदनः । ४ धर्मः । वृषभश्च । ५ पार्वती । ६ षडाननः कार्तिकेयः । ७ रचितशिवादरश्चासौ हरिपूजनश्च तं । पक्षे रचितः महती ईशा तस्या दंडः तस्या आदरो यै । ८ सन्मार्गस्थितमुभयत्र समानम् । ९ आर्तिः पीडा धनुष्कोऽोरित्यमरः । १० परागरहितः । पक्षे रजःशून्यः सिच्यमानत्वात् । ११ राजमार्गः । १२ बाणःचातकपक्षीच. १३ नदी सेनाच. १४ अनावृष्टिः । मुखैः शुष्कता गृहीतेत्यर्थ

पुष्कराढ्यः करो दानोदकार्द्रो मुक्तमेव तत् ॥ ११७ ॥
कंकणोपहिततास्य कराब्जे । नैव केवलविभूषण हेतोः ॥
किंतु याचकमनोरथवीथी । पूरणार्थमपि संततमासीत् ॥११८॥
यस्य प्रवर्तमाने सुविमलतरवारिधारया दाने ॥
प्रत्यर्थिनोर्थिनश्च प्रपेदिरे नियतमेव नियुतधनम् ॥ ११९ ॥
भूभर्तुस्तस्य कीर्तिः सपदि कुवलये दिव्यलक्ष्मीं विधत्ते
जीवं जीवस्यमोदं नयति जनयति स्मावदातान्दिगंतान् ॥
चक्राणां द्वंद्वगानां वितरति विपुलं तापमेतत्तु युक्तं
संक्रांते चंद्रिकैव प्रभवति भुवने शूरतीव्रप्रतापे ॥ १२० ॥
हेलोत्सारितदुर्जयासुरकुलो त्दृष्टात्मना जिष्णुना ।
प्रत्युद्गम्य मुदा प्रणम्य शनकैरारोप्य चैरावते ॥
व्याकीर्य प्रसवैस्तवैरभिनवैः संस्तूयमानो नद- ।
न्नानावाद्यपुरःसरं सुरपुरीं यो वीरवर्योविशत् ॥ १२१ ॥
वाचाले वंदिजाले सपदि कृतनतेऽभ्युत्थिते देवयूथे
रंभानृत्यैः सनाथे सुरसदसि करग्राहमारोपितस्य॥
पीठाग्र्यस्य प्रणादैधृतकरममुना कल्पितार्धासनस्य
द्योनाथस्यांगदं च प्रमुदितमनसोन्योन्यमन्वर्थमासीत् ॥ १२२ ॥

इति दशरथवर्णनम् ॥

विकलत्रस्य तस्यासीत्कलत्रत्रयमुत्तमम् ॥
पवित्रं सच्चरित्रं तच्छक्तित्रयमिवापरं ॥ १२३ ॥
सा कौसल्या त्रिदशतटिनी सा सुमित्रा सरस्व-
त्यन्या धन्या शमनभगिनी नंदिनी केकयस्य ॥
एतास्तिस्रो दशरथमहाभागरूपं प्रयागं ॥
त्वागम्यासन्ननरसभवं संगता एकभावम् ॥ १२४ ॥
अन्यासु प्रथमा विभक्तिरभवत्स्वौर्जस्विनी सा त्रयी
कैवल्याश्रयदायिनी प्रथमिका व्यक्तिस्तु या तत्र सा
किं स्वित्स्यान्नसुरूपिणीति नृपतेः सा धर्मपत्नीपरं ॥
कैकेय्येव सुरूपिणीतिवदतो वंदेति वृद्धान्कवीन् ॥ १२५ ॥

---

१ चकोरः । २ शूरः वीरःभुवनं लोकः । पक्षे सूर्यस्य तीव्रतापे भुवने जले संक्रांते प्रतिबिंबितेसति चंद्रिकैव भवति । ३ इंद्रस्य । ४ अंगदं बाहुभूषणं । अंगं द्याति पीळयतीति एकासनास्थित्या परास्परांगपीडक मासीत । ५ विकलं त्रायतेइति विकलत्रः तस्य । ६ प्रभावोत्साहमंत्रजाःशक्तयः । ७ सुओजस् प्रथमाविभक्तेः प्रत्ययः ।

॥ इति कौसल्यादिमहिषीवर्णनम् ॥

कौशल्यावस्थितिर्यस्य देशेषु निखिलेष्वपि ॥
सा तस्य देहे गेहे च जागर्तीति न विस्मयः ॥ १२६ ॥
वसुमतः सदनुग्रहभूमिकाभुवनमध्यविरोचितमूर्तयः ॥
वदतु कोनु कविर्ननु कोशला नहि भवंति समृद्धतरश्रियः ॥ १२७ ॥
दशरथप्रकृतिः परमेत्ययं विजयते भुवनत्रयडिंडिमः ॥
स्मरतु तस्य तु कः सचिवोत्करं पुरजनं च विनिंदनभाजनम् ॥१२८॥

॥ इति देशामात्यपौरवर्णनम् ॥

राजंस्त्वं शतकोटिदानरसिको जिष्णुः सुधर्मास्थितः
सृष्टुत्वो विबुधैरितीव मनुषे स्वात्मानमिंद्रोपमं ॥
पूर्णत्वं तु कथंतरामुपमितेरेकं विना नंदन-
क्रीडाकौतुकमित्यगाभिगदितुं कर्णोपकंठं जरा ॥ १२९ ॥
एकांते स कदाचिदच्छमुकुरे स्वं रूपमालोकयन्
पालित्यं प्रसमीक्ष्य राजरमणो यत्किंचिदेवोत्थितम् ॥
सद्योभूद्विमनायमान इव यद्वर्णांतरीयं पुनः
खेदाय व्यपदेशनं न मनसः स्यात्कस्य शस्यात्मनः ॥ १३० ॥
चेतसा दूयमानेन चिंतयामास पार्थिवः
अपोतो न तरिष्यामि तं पितृणामृणार्णवम् ॥ १३१ ॥
नापुत्रस्य तु सद्गतिः श्रुतिरिति स्पष्टं ब्रवीमि स्वयं
तस्माद्दुर्गतिरेव हंत नियतं तत्त्वादृशस्यास्य मे ॥
त्रातुं दुर्गतितः परं स भगवानेको वसिष्ठः प्रभु-
र्निश्चित्यैवमुपाससादतमरं धातारमेवापरम् ॥ १३२ ॥
त्रिधा कृता येन करेक्षमाला परंतु यो नित्यमनक्षमालः ॥
तथाहि विद्वान्सपरिग्रहोपि परिगृह्यास्पृष्ट इति स्मरंति ॥ १३३ ॥
पादांबुजाग्रे प्रणिपत्य दंडवद्बध्वांजलिं वाचमुवाच पार्थिवः ॥
बुभुक्षवे मत्प्रभिदं न रोचते सर्वं विनैकामिह पाकसंपदम् ॥ १३४॥
स्वामिन्संप्रति शल्यचित्रकुशलाः प्रायः कवींद्रा मम
प्रस्तावे गुणवर्णनस्य सुमनःसंघस्तु तत्त्वादिना ॥

---

१ शतकोटिः स्वरुः शंभो र्वज्रोलिरशनिर्द्वयोः । दाने खंडने । २ जरसा शुक्लता । ३ पोतः शिशौ वह्नित्रे च गृहस्थाने च वाससीति मेदिनी । ४ रुद्राक्षमाला । पक्षे इंद्रियमाला । ५ दानं ।

सादृश्यं गणतः सुराधिपतिना संकीर्तयंतो मिथो
गोत्रोच्छेदकरोप्यसाविति पुनर्वक्ष्यंत्युपांशुस्वरैः १३५ ॥
अत्र संसारगहने पृथुकेन सुखं भवेत् ॥
उत्तरं प्रश्न एवांय स्यादिति प्रतिभाति मे ॥ १३६ ॥
श्रुत्वैतद्राजवाक्यं प्रहसितवदनो वाचमूचे वसिष्ठो
राजन्छक्रादिभिस्त्वं परमहितनयोसीति सर्वैर्महद्भिः ॥
यन्नित्यं गीयमानो भवसि सतु कथंकारमास्से विषादी
नार्याद्या हीनसत्वा व्यसनपरवशाश्चेद्विषादीभवंति ॥ १३७ ॥
अजसूनोस्तव विभो सर्वोप्यर्थः परार्पितः ॥
बहुशाल्युदयस्तेन तत्कुतो विमना इव ॥ १३८ ॥
हरिरस्य सुतप्रवरो भूयादिति चेतसा स हयमेधं ॥
दध्यौ यत्स प्रचरति हरिसुतराजप्रदानेन ॥ १३९ ॥

आह च।

भगवंतमजं चतुर्भुजं हरिमेधेन हरिं प्रसादय ॥
चतुरो वितरिष्यति प्रभुः स पुमर्थानिव दिव्यनंदनान् ॥ १४० ॥

ऋष्यशृंगानयने हेतुमाह।

अंगजफलानिष्पत्तोर्विभांडकस्यांगजो भवेद्धेतुः ।
अस्माकमृत्विजां तत्प्रधानभावं दधातु सतु शृंगी ॥ १४१ ॥

स कास्तीति चेत् ।

स्वर्गोपमेष्वंगराजन्नंगदेशेषु संगतः ॥
ऋष्यशृंगो जीवइव प्रवर्तयति मंगलं ॥ १४२ ॥

तत्र कस्माद्वससीति चेत् ।

कदाचिदंगस्य मनोरमस्य भोः स्थितिः सदा सरिवर्ता तु नाभवत् ॥
तदातिथित्वं सहसा समाययौ प्राणातिकृछ्रं बहुधान्यवर्जनात् ॥ १४३॥

तदा तत्र तद्गमने हेतुमाह।

---

१ गोत्रं नाम्नि कुले नगे इति विश्वः । २ विषमत्तीति विषादी । ३ दशरथस्य । पक्षे अजः सूनुर्यस्य । परमात्मनः । ४ परेभ्योर्पितः परार्पितः । तवार्थस्य परार्थत्वात् । पक्षे ६ न्यपदार्थप्रधानत्वाद्बहुव्रीहिसमासस्य । ५ बहुशाल्युदयः । पक्षे बहुशाली विशेषणं उदयस्य । ६ अश्वः कंडितसोमवल्योश्च प्रदानेन प्रचरति । पक्षे हरिरूपो यः सुतश्रेष्ठः तस्य प्रदानेन हयमेधेन हरिः पुत्रो भवतीति भावः । ७ अंगो देशविशेषः तत्र पक्षे गजः पुत्रः । ८ उत्तमा सारवती । पक्षे बलवती ।

जललग्नस्य[1] मृगमुखगतस्य योगेन वर्षणमवश्यम् ॥
स्यादेवेत्यंगपतेर्मंत्रिवरा ऋष्यशृंगमभिदध्युः ॥ १४४ ॥

तस्याननं वेश्याभिरेवेत्यत्र हेतुमाह ।

निर्गते निजतपोवनदूरात्तद्दुरावति दुरासदकोपे ॥
आत्तशृंग इति हि प्रभविष्यत्त्यप्सरःपरवशः स कुमारः ॥ १४५ ॥

तद्वशीकरणे हेतुमाह ।

विभांडके तापसखंडमंडले विनिर्गते स्वात्मतपोवनाद्बहिः ॥
प्रलोभ्यते स्मास्य मुनेः कुमारको रंभादिभिर्भूपतिनेति सांप्रतम् ॥ १४६
स्त्रीभिः प्रलोभितो हृद्यपिंडकस्पर्शनादिभिः ॥
ततोंगं रोचयांचक्रे स विभांडकडिंभकः ॥ १४७ ॥

तस्यागच्छतएव वर्षे हेतुमाह ।

उंदांचक्रेंगमखिलमागच्छन्नेव मौन्यसौ ॥
अप्सरोभिः समेतस्य शृंगिणस्तन्न चित्रकृत् ॥ १४८ ॥
पुरा शांतालंकृतै कैवासीद्राजपदस्थितिः ॥
तादृश्यनेन व्यरचि सद्यो जनपदस्थितिः ॥ १४९ ॥
सख्युस्ततस्ते नृपते सुसंमतां शांतां सुतां स्वीयतेयाररीकृताम् ॥
तस्मै प्रदायांगजनाधिपोऽतुलं निर्वर्तयाभास विवाहमंगलम् ॥ १५० ॥
शांतार्पणादंगभृतोत्यवश्यं स्यात्स्वस्य शांतावगमोपि सद्यः ॥
तत्तादृशस्यास्य तव प्रजेशाऽक्लेशात्प्रजेशाधिगमो न नश्यात् ॥१५१॥
विभांडको किंचन चक्रवर्ती प्रचंडकोपोपि सुतप्रलोभात् ॥
नृपस्य पुत्र्या स्नुषया नितांतं स शांतया शांततमो बभूव ॥ १५२ ॥

त्वदर्थनां सोनुमन्येतैवेत्यत्र हेतुमाह ॥

नूनं घनरसग्राही स विभांडकडिंभकः ॥
सत्पात्रस्य तव भृशं वद किं न वशंवदः ॥ १५३ ॥

---

१ मृगनक्षत्रप्रारंभे जललग्नस्य योगे सति वृष्टिरवश्यं भवतीति ज्योतिर्मतं । पक्षे विभांडकस्य रेतः नदीजले पतितं तन्मृग्या भक्षितं तत्सकाशात् शृंगी उत्पन्नो भूदिति हेतोर्मृगीसुतइति तन्नाम प्रसिद्धम् इति पौराणिकी गाथानुसंधेया । कुकुट्यादीनामंडादिषु पुंभावः तेन मृगइति सिद्धम् । २ दानं संघर्षश्च । ३ आर्द्रमकरोत् । ४ शांतं सुखं । पक्षे शांतानाम्नी कन्या। ५ अंगभृतः देहिनः पक्षे अंगनृपतेश्च । ६ अन्यस्य सुखदानात्स्वस्य सुखंभवत्येव । ७ तवापि प्रजेशत्वात्प्रजेशप्राप्तिर्न नश्यात् प्रजा भवत्वित्यर्थः ॥ ८ विभांडकनाम्नो ऋषेः । पक्षे भांडशून्यस्य ।

मधुरालापशीलस्य गुणिनस्ते महीपतेः ॥
न मृगीशावकस्तावत्तावकः स स्वभावतः ॥ १९४ ॥
विभूतिभूषितस्यास्य द्विजराजोपलालिनः ॥
महेश्वरस्य ते शृंगी यात्रामात्रं प्रतीक्षते ॥ १९५ ॥
आनीय तं मुनिवरं नगरं नरेंद्रोऽस्यांघ्रौ निपत्य विनिवेदयति स्म कामं ॥
सोप्यब्रवीदयि सुयज्ञपदप्रसादात्स्यादेव ते नरपते पृथुकार्यसिद्धिः ॥१९६॥
कर्ता त्वमत्र नृपते हरिमेधैएव यच्चाप्यदार्शि करणं हरिमेधै एव ।
न स्यात्फलं किमु ततो हरिमेध एवेत्येवं नृपो निगदितोष्यगमत्प्रमोदं॥१९७॥
यज्ञार्थं मुक्तस्तुरगो न केनापि राजपुत्रेण नि-
बद्धः परं सत्कृत एवायात इत्यत्र हेतुमाह ।
आलंब्येत मखप्रधानहरिणा स्वैरं कुँचारो यदि
व्याहन्येत कुशासनेन स पुनः केनापि नैवेदृशम् ॥
तादृक्षोपि सदैव मुक्तइह न व्याघातभाक्प्रत्युता-
नेकावर्तमहादरास्पदतया सर्वत्र वर्वर्यते ॥ १९८ ॥
त्रिविधास्पदा बहुविधार्थकोविदा अमुधावदा परमुदारबुद्धयः॥
वसुधागता उपगता न केवलं विबुधा मुदा किल सुधाशना अपि ॥१९९॥
वसुमतीयामिति श्रुतिगोचरं चिरमभूत्परमत्र कृतादरैः ॥
नरवरैरुपदाद्रविणोत्करैर्व्यरचि दग्विषयो विषयागतैः ॥ २०० ॥
सद्वस्तुजातं तत्सर्वं विना प्रधनमागतम् ॥
युक्तं विप्रधनत्वेन कल्प्यते स्म महीभृता ॥ २०१ ॥
संतर्पितं जीवजातमन्नपानसमृद्धिभिः ॥
अस्यैव वाजिमेधस्य वाजिमेधत्वमूचिरे ॥ २०२ ॥
तत्रत्या किलपाकसंपदमला मेध्या चतुर्धा किल ॥
श्लाघ्या दूरगसौरभातिरुचिरा शेषातितोषावहा ॥
एतस्य क्षितिनायकस्य निलयेप्येतादृशी भाविनी-
त्येवं तत्र समागताखिलजनान्संसूचयामास सा ॥ २०३ ॥
स्वां जीमूत उदारतां विशदयन्भूम्ना वसून्यर्पयन् ॥
हस्तं स्वीयशतह्रदापचयनात्सद्योपकर्षन्यशः ॥

---

१ वसिष्टस्य । २ हरिविषयिणी मेधा यस्य त्वं कर्ता । ३ विष्णुः । ४ अश्वेन विष्णुनाच पृथ्वीसंचारः कुत्सितताचारश्च । ५ पृथ्वीशास्त्केन राज्ञा पक्षे कुत्सितज्ञानेनच । ६ व्याहन्येत ईदृशं तस्या व्याहन्यमानो न स्याद् । ७ अनेकवारं यो महानादरः । पक्षे अनेकावर्तो यो महान्दरः शैलः ।

स्वात्मन्येव दधत्कृतार्थ इव स ह्रीणोधुना भूपतेः ॥
कीर्त्या संततधारदानकृतया लोकान्सितीकुर्वतः ॥ १६४ ॥
राजा समीक्ष्य स यथाविधि सप्ततंतु
सिद्धिं विभांडकसुतप्रभृतिप्रसादात् ॥
तोषं जगाम मृशमात्मन एकतंतु-
सिद्धेश्चिरंतनपराधिमपास्य दूरम् ॥ १६५ ॥
यन्महादक्षिणाः सर्वे स्वाम्यृत्विक्प्रेक्षकादयः ॥
तन्नासन्स कथं यज्ञो भविष्यन्नीचदक्षिणः ॥ १६६ ॥
ऋत्विग्भ्यः स दिशः प्रादादिति वाल्मीकिनोदितम् ॥
दक्षिणा स्वस्य मन्येहं दिक्प्रदर्शनमेव तत् ॥ १६७ ॥
पुत्रीयेष्टि निरूप्पुमुनिजननिवहा ऋष्यशृंगादयस्ते
जाते तस्यां नितांतज्वलितहुतवहे तत्प्रधानप्रचारे ॥
आविर्भावं न रोगात्स्मितमधुरमुखस्तप्तजांबूनदाभः
प्राजापत्यो गृहीत्वा मृतमिव परमं पायसं स्वर्णपात्रे॥ १६८ ॥
शालायां तत्र संक्रांते प्रखरेप्यस्य तेजसि ॥
जडीभवन्जनो जज्ञे चित्रार्पित इवाद्भुतम् ॥ १६९॥

अपि च ।

पायसं परममेतदिदानीमर्पय प्रियकलत्रजनाय ॥
क्षीरसागरभुवो भुवनेशो भूपते प्रभवितांगभवस्ते ॥ १७० ॥
न केवलं धराधिराडपूर्वपायसं गतो
बभूव किंतु राक्षसाधिपोपि रावणाह्वयः ॥
अथर्त्विजां च रक्षसां गणोऽतनुर्विशंकटां
भजेय दक्षिणामिति स्फुटं मनस्यमन्यत ॥ १७१ ॥

प्रदाय पायसं दिव्यं राज्ञे सोंतर्दधे पुमान् ॥
महता कुलसंतानसंशयेन महीक्षितः ॥ १७२ ॥
खेनौत्कंठयेन चादावुदयमुपगतान्मौनिनोः सन्निदेशा-
दूयस्तारुण्यभाजः कलुषितधिषणः संभ्रमात्कोसलेंद्रः ॥
स्वावैस्थित्याद्यनामार्णतइव परमासत्तिभाजेर्धशस्त-
त्कौसल्यायै व्यतार्षीद्विरमृतसमं किंच कैकेयिकायै ॥ १७३ ॥

---

१ दक्षिणारूपं यत्स्वं द्रव्यं तस्य । दिक्दानं तु दिक्प्रदर्शनमेव । तदपेक्षयाप्यधिकं दत्तवानिति भावः । २ स्वशब्दः कोसलेंद्रपरः आद्यं यन्नामाक्षरं को के इत्याकारकं तस्मात् कौ के द्वयोर्वर्णयोः को इत्यक्षरं यथा सन्निहितं तथा ।

स्वयं जातप्रमादोहि सुमित्रागमनेन यः ॥
तरलो नैव जायेत विरलस्तादृशो जनः ॥ १७४ ॥
एषा गच्छति पायसार्धमिति संवीक्ष्यैव तद्वद्यः स्वयं
हारावस्थित एष नायक इदं तारल्यमेतस्य तु ॥
यायार्थ्येन विलोक्य हार्दकलिले देव्यौ सुमित्रामथ
स्वस्वांशार्धसमर्पणेन सदृशीं ते चक्रतुः प्रेयसीम् ॥ १७५ ॥
सौमित्र्यसंपत्तिरमुष्य यद्वद्विताय जायेत तथा न चान्यत् ॥
पत्युः प्रमादेपि यतः सुमित्रा बन्ह्यर्थसिद्धिं लभते स्म सद्यः ॥ १७६ ॥
तिस्रस्ता अनलान्परीत्य विमलान्नत्वा गुरून्नृत्विजो
विप्रान्वृद्धजनान्नृपं च सदृशीस्तेभ्यः प्रपद्याशिषः ॥
स्वस्वांशं समभुंजतोत्सवभराद्दूराद्विहारात्पुरा
कुर्वत्यस्तदरुंधतीप्रभृतिभिः साकं विडाकौतुकम् ॥ १७७ ॥
राजा लब्धमनोरथो दशरथः सर्वैः समं संभ्रमा-
त्साकेतं समुपाययौ सुरपुरीसंकाश्यलंकारितम् ॥
स श्रीमान्सनकादिभिः सुकृतिभिः संसेव्यपादांबुजः
स्वांशैः सार्द्धममुष्य मुख्यमहिषीगर्भाशयांश्चाच्युतः ॥ १७८ ॥
तां श्रीमद्राजयात्रां द्विजवरविपुलस्कंधविभ्राजमानां
नानावैमानिकाढ्यां मुदितजनरवां सज्जनोघैः सनाथाम् ॥
पश्यंतः पौरवर्गाः प्रमुदितमनसो भासितांगाः प्रसगा-
दुत्तुंगा अंतरंगाहितदितिसुतोजज्जैत्रयात्रा बभूवुः ॥ १७९ ॥
आसीन्नभः शद्धगुणं विचक्षणैः प्रायेण विज्ञातमिहानुशासनात् ॥
यात्रा नदद्वाद्यविशेषगर्जनैरापामरं सप्रति तज्जनैरपि ॥ १८० ॥
अश्वाध्यैः पुर आश्वलायनगणास्तत्पृष्ठतोध्वर्यवो
धावद्वाजियुते प्रसर्पकगणैः साकं शतांगे स्थिताः ॥
ब्रह्माणः खगवाहनस्थितिभृतः सामोद्भवैः सामगा
उद्यद्रूपसमृध्दयः क्षितिभृतस्तस्याग्रतो रेजिरे ॥ १८१ ॥
पुंस्कुंजरः स्वनगरं वरमंत्रिवर्गैः पुंस्कुंजरासनगतो भृशगीतकीर्तिः ॥
छत्रेश्चरैश्चमरैरविशत्क्षणेन सौवर्णपुष्पनिकरैः परिकीर्यमाणः ॥ १८२ ॥
महिषीजनोपि समनुव्रजन्नमुं नरकुंजरं द्विगुणसंभ्रमं वहन् ॥
शुशुभे तदेतदुचितं प्रतीयते महसा परेण यदधिष्ठितः ॥ १८३ ॥
नाथोस्माकं समजनि पुनर्दैवविप्रप्रसादा-

---

१ तरलो हारमध्यग इत्यमरः ।

इदं भद्रं तदधिकरणान्यान्नशोभान्यमूनि ॥
पापः कश्चिन्मलिनतरया दूषयेद्दंत दृष्ट्ये-
त्येवं किं ताः पुरयुवतयस्तेनिरे तत्र नेत्रम् ॥ १८४ ॥
नैवैतादृक्नृपालस्त्रिभुवनजठरे भाग्यशाली गुणाढ्यो
भूयांसः संति येन्ये धरणिपतितया वर्तमानाः समंतात् ।
ते सर्वेस्योपरिष्टाच्छुचितमयशसो भ्रामयित्वा विसृज्या ॥
इत्येवं पौरकन्याः किमिव समकिरंस्तास्तदासंख्यलाजान् ॥ १८५ ॥
न क्षत्रभावं दधतेखिलानि राज्ञः पुरः क्षत्रकुलान्यमुष्य ॥
इतीव ता दर्शयितुं कुमार्यो लाजान्किरंति स्म समंततोस्य ॥ १८६ ॥
राजयात्रोत्सवालोकात् त्द्यो घतरसार्णवः ॥
उद्वेलन्दर्शनपथैः प्राक्षवत्पौरवासिनाम् ॥ १८७ ॥
रत्नस्तंभवितानतोरणपटीरत्नप्रदीपोज्वलं
मृद्वया तूलिकयाऽस्तृतं परिलसन्मंचप्रपंचांचितं ॥
नानाचित्रविचित्रितं विचिकिलैः पुष्पैः सुगंधाविलै-
राकीर्णं रचयांबभूवुरुदयध्दूपं सभामंडपं ॥ १८८ ॥
मुन्योवैः पौरसंघैः क्षितिपततिभिर्विन्यवर्यैस्तथान्यैः
संबाधे बंदिवृंदोद्घुषितजयरवे नर्तकीनर्तनाढ्ये ॥
आरुक्षद्राजसिंहासनमथमिह पुस्कुंजरादेव सद्यः
प्रारंभस्तत्प्रभावं पृथुलयितुमसौ तावदीशस्य मेद्य ॥ १८९ ॥
मुनिजनाः परिपूर्णतपोधनाः सकरुणास्तरुणार्कसमौजसः ॥
करगृहीतपदा अपि संपदः प्रतिविधाय पदानि मुदा ययुः ॥१९०॥
अशनैर्वसनैः प्रसाधनैर्वचनैः सद्रचनैरवंचनैः ।
पृथ्वीपतयोतिसत्कृता ददितास्ते मुदिता नता गताः ॥ १९१ ॥
प्रीत्यै काम्यसमर्पणादपि हरिः प्रीतः करोत्येव त-
त्कामं नाम चतुर्गुणं तदभवत्वत्रैव दृग्गोचरम् ।
तद्भक्तोपि स एष तादृगिति तत्प्रीत्यै तु यैरर्पितं
वित्तं तत्तु चतुर्गुणत्वमदधादेतत्पुनः सांप्रतम् ॥ १९२ ॥
पुरावरोधस्थितिरप्यसौ जनो धुनातु सोयं वर उद्भयस्थितः ।
यत्तं त्रिसंध्यं त्रिबुधा ववंदिरे सोयं प्रभोर्मे महिमा विराजते ॥१९३॥
आसां पुरा या हरिमध्यता स्थिता सा केवलं तत्तनुयष्टिकांतिदा ।
वंशस्य सैषा महतोधुनेदृशी बर्वर्ति सोयं महिमा मम प्रभोः ॥१९४॥
सकलत्रजनो विराजमानः परमां सत्वमयीं तनूं दधानः ॥

स्तवनीयगुणो न यस्य सस्यात्स तु सृष्टौ कतमोस्तु पामजन्मा ॥ १९५ ॥
वीरश्रीवनिताप्रमुक्तकुसुमस्रंकंधेरष्वाशिशु-
प्रख्यातोभ्दटविक्रमेषु पुरुषव्याघ्रेषु यस्याभिदा ॥
नाप्यासीदृशकंठशक्त्यपमुदं सत्वं तदत्यूर्जितं
शुद्धांते क्षितिनायकस्य ववृधे कालस्य चित्रा गतिः ॥ १९६ ॥
गर्भिणीनां तासां तनुपांडिम्नि हेतुमाह ।
सत्वप्रधानस्य वधूजनस्य सुवर्णवर्णापि शरीरयष्टिः ॥
शनैरगात्केतककांतिमन्यद्वस्तूर्जितं ह्यात्मसमं तनोति ॥ १९७ ॥
प्रादुर्भावमुपेत्य शारदशशिज्योस्नोच्छलच्छोचिषा ॥
ब्रह्मांडं सकलं निजेन यशसा पांडूकरिष्यंति ये ।
चांपेयप्रतिमप्रभास्तनुलताराज्ञीजनानां तु किं
नास्थास्यन्गजदंतकोमलरुचस्तास्तद्वसत्याश्रयाः ॥ १९८ ॥
तदुदरवृद्धौ हेतुमाह ।
अवाङ्मनसगोचरः पुरुष उत्तमः स्वात्मना
बुभूषेति हरिर्जगन्नयनगोचरः सांप्रतम् ॥
इतीव ववृधे भृशं शुभदृशः कृशो मध्यम-
स्तथाहि जन उत्तमश्चरति यत्तदेवेतरः ॥ १९९ ॥
अन्यस्य क्षयदित्सया चरति वै कामार्जितं वैभवं
तत्सत्वोपचितं तु पुष्टिजनकं स्वस्येतरस्याप्यहो ॥
यन्मध्यं सुदृशः कृशं भृशतरं पृष्ठे नितंबस्तने
पुष्टं सत्त्वयमुत्तमं तदधुनान्यस्यापि पुष्टिं व्यधात् ॥ २०० ॥
उदरवलिलोपे हेतुमाह ।
श्रीशे बलीशे संप्राप्ते नैवेतरबलिस्थितिः ॥
इति दर्शयितुं मध्यबलिभिर्लुलुपे शनैः ॥ २०१ ॥
अलंकारहाने हेतुमाह ।
देव्यः संप्रति वस्तुना त्रिभुवनालंकारभूतात्मनाऽ
भूवन्भूषितमूर्तयोत्र महिमोद्रेको मदीयः कियान् ॥
इत्यासीदिव भूषणं बत ततो दूरात्तथा दूषणं
किं श्मश्रूणि च किं तपः किमजिनं चेत्यादिकं भूभृतः ॥ २०२ ॥
मुक्ताभरणधारणे हेतुमाह ।
दिव्यालंकाराणामाविरभूत्तत्र नन्वलंकारः ॥
माभुत्तु सुवर्णस्यात्रावसरोर्हतु त किं समुक्तानां ॥ २०३ ॥

स्यात्प्रस्रवो बहुतरः सुतवत्सलत्वात्
क्षीराणि नाथ वदनाद्गलितान्यमांति ॥
आदित्सवः समधिगम्य पुरैव युक्ता
मुक्ताः पुनः किमभितस्तनमध्यनिष्ठन् ॥ २०४ ॥
तासां गर्भिणीनां स्तनवदनकालिम्नि हेतुमाह ।
क्षीरांभोधिनिवासिने भगवते तस्मै सुतृप्तात्मने
रोचिष्येयमहं कथं यदि न तत्प्रीतिर्वृथा जीवनं ॥
इत्थं स्वात्मनि चिंतयन्नतितरां प्रेमास्य भावि स्थिरं
कृष्णास्येषु समीक्ष्य पक्ष्मलदृशः कृष्णाननः किं स्तनः ॥ २०५ ॥
कठिनात्मेति कथमहं प्रीत्यै स्यां भगवतो विमृश्यैतत् ।
देव्यास्तनो विमुक्ताहारः सन्कृष्णवदन इव मन्ये ॥ २०६ ॥
अपाटवे परिचितेऽप्यंगकै राजयोषितां
आश्चर्यं नाभवत्तत्र लावण्यलवसंक्षयः ॥ २०७ ॥
तत्पुंसवनस्योत्तमत्वे हेतुमाह ।
अविधिहीनतयातिधनव्ययान्मनुजसत्तमकर्तृतयापि च ॥
वरकलत्रजनस्य न केवलं परमपुंसवनं फलतोऽभूत् ॥२०८॥
सीमंतसंस्कारे सीमंतव्यूहने हेतुमाह ।
मालिन्यं यदुपागतं चिरमपुत्रत्वाभिधं योषिता-
मासीन्मूर्ध्नि सवर्णकुंतलततेराश्वासनात्स्थायुकं ॥
तन्निर्भिद्य दृढं निबध्य च समुत्पाट्यैव निर्वासय-
न्सीमंतं धृतसूत्रसायकशलो व्यूहांचकारेव सः ॥२०९॥
हरितवस्त्रपरिधाने हेतुमाह ।
युक्तं ता हरितानि तानि वसनान्येवेह संसेविरे
नानावर्णविशेषचारुगुणिनामासात्तिरासीत्पुरा ॥
ब्रह्मेंद्रादिविमृग्यपादरजसः श्रीनायकेतास्थितं
तन्वाने हरितत्वदर्शिशुकतुल्यस्यैव संलग्नता ॥२१०॥
दोहलानभ्यर्थने हेतुमाह ।
भूयो भूयोपि भर्त्रा स्वयमपि विदुषी प्रार्थिताचष्टनेष्टं
सत्या नैषोपराधः कमपि न यदियं स्वेष्टमर्थं ददर्श ॥
हेयोपादेयभावोऽस्तमयत इह यद्ध्यानमात्रेण नृणा-
मेतेनाधिष्ठिता तु त्रिभुवनगुरुणा या महामोदमग्ना ॥२११॥
कांतेंग प्रियभाषिणि प्रियतमे संप्रत्ययं संगतः ।

कालो भाग्यवशात्तदीयकुतुकं चेन्नैव संपादितम् ॥
साफल्यं किमु संपदां किमु धनुष्कांडस्य किं बाहयोः ।
किं प्रेम्णो मम निर्मलस्य तदिहार्हस्येव वक्तुं प्रियं ॥२१२॥
उपलालितैवमसकृत्कौसल्या सा शनैरुवाच वचः ॥
पुण्यजनेभ्यो हि पराभूतिर्देयेति लालसो कृसति ॥२१३॥
यस्मिन्पौरपुरंध्रयोतिमधुराण्यन्नानि भुक्त्वा समं ।
रंभास्तंभविभासि मंडलगृहे भद्रासने मंगलं ॥
सानंदा रचयंति नूत्नवसनालंकारदानादिना
राजा दोहलभोजनोत्सवविधिं संपादयमास तम् ॥ २१४ ॥
आसामेव न केवलमभ्यगमत्सन्निधिं प्रसवसमयः ॥
किंतु तरूणामपि दशरथतपसोप्यपि च यायजूकानाम् ॥२१५॥
शुद्धांतस्थितयोथ कर्मकुशलाः सत्कारतोपारतो
यज्ञत्यंतरहस्यवादमसकृत्तुष्टा मिथश्चक्रिरे ॥
आसीत्तत्र तु चेतसोपि वचसो रथ्यामतीनां मुदं
तन्वंत्यास्तददूरभावि भगवत्साक्षात्कृतेर्ज्ञापकं ॥ २१६ ॥
चैत्रे मासि शुभे वसंतसमये रम्ये नवम्यां तिथौ
नक्षत्रे दितिदेवते रविदिने लग्ने पुनः कर्कटे ॥
मेषं पूषणि संगते रविशशिक्ष्मानंदनेज्यासुरा-
चार्येषूच्चगतेषु पंचसु परं ब्रह्माभवद्गोचरं ॥ २१७ ॥
त्रेतायामवतारे हेतुमाह ।
लुप्ता मखास्तदधुना निजयज्ञभुक्तमाविष्करोतु भगवानिति देववृंदैः ॥
संप्रार्थितः प्रथयितुं प्रभुराचकांक्ष त्रेतामिदं तदतियुक्तमिति प्रतीमः ॥२१८॥
सूर्यवंशेऽवतरणे हेतुमाह।
भास्वानेष जडस्वरूपमपि मां चंद्रात्मना योऽव्यधात्
तत्तस्मै प्रतिदेयमेवमनिशं युक्तोप्यशक्तः स्वयम् ॥
लग्नो भिक्षुकशेखरः पुनरयं रामस्य पृष्ठं ततो
ब्रह्मण्यः स चकार भास्करकुलं सर्वं प्रकाशोज्वलं ॥ २१९ ॥
सशेषशंखचक्रत्वे दशरथगृहे दशममासि चाविर्भावे हेतुमाह ।
स्तुमः किमु दशाननं दशशतावृतं यत्कृते
दधद्दशशतारकं दशशतोत्तमांगं समम् ॥
प्रभुर्दशरथालये दशशतांशुवंशोत्तमे
स्वयं दशममास्ययं त्रिदशनायकोवातरत् ॥ २२० ॥

वसंतेऽवतरणे हेतुमाह ।

अंतःशीतलता यदास्य तपतः स्यात्सोखिलात्मा तदा
प्रादुर्भावमुपैष्यतीति जगदुर्यद्वामदेवादयः ॥
तत्सत्यत्वनिदर्शनाय विततं तं संतपंतं स्मर-
न्नंतः शीतमयं वसंतसमयं स प्रादुरास स्वयम् ॥ २२१ ॥

प्रसंगाद्वसंतस्य पुष्पसमाख्यायां हेतुमाह ।

युष्मत्कामलता द्रुतं सफलिता स्यादित्यहो श्रीपति-
र्यत्पूर्वं वदति स्म पुष्पसमयस्तस्या अयं संगतः ॥
इत्थं योगिजनोभ्यधत्त कमलाकांतावतारास्पदं
कालं तेन तदादि पुष्पसमयो नाम्ना वसंतोऽभवत् ॥ २२२ ॥
यस्मादद्यतनं दिनं शुभतमं तत्पुष्पवर्षार्थिनां
श्रीमज्जन्मनि नस्तदेष समयः पुष्पग्रहायार्हति ॥
एवं हायनमूलसंसदि सुरान्सर्वान्विरिंच्योऽभ्यधा-
देतेनापि तदादि पुष्पसमयो नाम्ना वसंतोऽभवत् ॥ २२३ ॥

सुरभिसमाख्यायां हेतुमाह ।

अग्रे यश्च समेष्यति ध्रुवमृतुर्यत्रावतारो हरेः
कालः किं स न तर्हि वित्तसुरभिर्नः कामनाः सर्वशः ॥
सद्यः पूरयितुं समेति महता हर्षेण देवर्षयो
भाषंतेति तदादि नाम सुरभिः सद्भिर्वसंतः कृतः ॥ २२४ ॥

वसंतस्य सर्वप्रियत्वे हेतुमाह ।

कंदर्पप्रियबांधवो मधुमुखो बध्दादरो यो जले
नित्यं पुष्पवतीषु वह्निषु कृतावासो निदानं रुजाम् ॥
ईदृक् सन्नपि यद्वसंतसमयः सर्वर्तुपूज्यः प्रियो
नृणां संप्रति सोवतारमहिमा श्रीरामचंद्रप्रभोः ॥ २२५ ॥

अत्र तरूणां नवपत्रोद्गमे हेतुमाह ।

सौरभ्येण जगत्पतिः पदरजःपातेन वांछत्यसा-
वस्मान्पावयितुं पलाशिपटलीभंगप्रसंगादतः ॥
आमोदाय विभोः पुरातनपलाशित्वं त्यजंतः शुभाः
स्यादित्येष निजान्कुजानृतुपतिः पत्राणि किं प्राहिणोत् ॥ २२६ ॥

कोकिलकलध्वनौ हेतुमाह ।

स्वामिन्लुप्तद्विजेंद्रांधतमसकलुषा सांप्रतं लोकचर्ये-
त्येवं संजातमात्रं रघुकुलतिलकं श्रावयेत्को नु मर्त्यः ।

भ्रातस्त्वं तावदेतत्कथय यदसिरे सर्वदारामनिष्ठः
कालेनैवं पिकाग्र्यः प्राहित इव कुहूशब्दभंग्या सुसूचत्॥२२७॥
रवेः कुले वेक्ष्यति तारकेशो यास्यंति देवाः पितरश्च तृप्तिम् ॥
इत्थं समस्तान्कथयांचकार पुंस्कोकिलः किंनु कुहूविरावैः ॥ २२८ ॥

चैत्रमासेऽवतारे हेतुमाह ।

मन्वाद्या धर्मशास्त्रप्रवचनपटवश्चैत्रिके मासे
ज्योतिष्टोमादि सर्वं विदधति विविधं कर्म नैकं विवाहं ॥
किं तेनासौ विषण्णस्तपति भृशमिति श्रीपतिः किं विवाह-
मन्यस्तस्यानुनीत्यै सकरुणहृदयस्तत्र मास्याविरासीत् ॥ २२९ ॥

नवम्यामवतारे हेतुमाह ।

ज्ञानं त्वात्मनि यद्भवेत्प्रजनयेत्साक्षात्कृतिं तद्धरेः
शास्त्रीयं न तथेत्ययं विशदयन्भक्तौ नवम्यां विभुः ॥
आविर्भावमगाद्यतश्च नवमी भक्तिर्गरीयस्यहो
यस्यामात्मनिवेदनं तु कृतिभिः प्रत्यक्षतः प्रेक्ष्यते ॥ २३० ॥
संभूत्या स्वनिवेशनमध्यगरिक्तातिथिर्मया नूनं ॥
संभावयितव्य इति प्रथयन्नाविर्बभूव स नवम्यां ॥ २३१ ॥

पुनर्वसुनक्षत्रे ऽवतरणे हेतुमाह ।

चातुर्वर्ण्यं समस्तं दशवदनहृतस्वस्वसर्वस्वमासी-
त्तं हर्तुं देवोऽवतरति दयया संप्रति क्षत्रवंशे ॥
नाशंक्यं तत्र भूयेऽधिगतवसु तदेवैकमन्यं न चैवं
तन्न क्षत्रं पुनर्वस्विति किल सकलं सूचयामास भावं ॥ २३२ ॥
कल्पांतरे क्वापि च यन्निविष्टस्तिष्यो नृणां सद्गतये विभाति ॥
श्रीरामजन्मोत्सवगौरवं तच्छक्तः प्रवक्तुं क इहाभियुक्तः ॥ २३३ ॥

रविवारेऽवतरणे हेतुमाह ।

यो हि स्वीक्रियतेऽस्य[1] यः प्रियतमः सोनेनं संभाव्यते
द्वेष्टा द्विष्यत एव लौकिकनयो मन्ये मतैः[3] श्रीपतेः ॥
यच्चानेन रवेः कुलेऽवतरता भूत्यादृतं तद्दिनं
लोकांतःकुहरे निलीनमपि यत्तत्रास चान्यत्तमः ॥ २३४ ॥

कर्कटलग्नेऽवतरणे हेतुमाह ।

चारित्र्यप्रसरा करा नरवरा भूयस्तरा जज्ञिरे

---

१ स्वीकृतस्य. २ स्वीकर्त्रा. ३ मान्यः

सद्वृत्तत्वगुणेन तेषु भगवान्रामोत्यकाष्ठां गतः ॥
वाल्मीकिप्रवरैः कवींद्रनिकरैरुक्तं तदेतत्पुन-
र्युक्तं कर्कटकोद्भवं हि न तरां हीयेत सद्वृत्ततः ॥ २३५ ॥
रवेर्मेषगतत्वे शास्त्रसिध्यमध्यान्हक्षणस्थैर्ये च
हेतुमाह ।
दिष्ट्योपैति कुले जगत्पतिरिति ज्ञात्वापि यन्मध्यगा-
देवौन्नत्यविचार एव स इति प्रख्यापयन्मेषगः ॥
युक्ता सा मम योगतः कुलगुरोरित्यन्यथा कुर्वत-
स्तामेतस्य विचारिणः सुचरितं पश्यन्जडः किं क्षणं ॥ २३६ ॥
मध्यंदिनेवतरणे हेतुमाह ।
नाट्येतु लोकः समयं श्रुतीनामिति स्फुटं दर्शयितु मुकुंदः ॥
मनुष्यनाट्यं नटयन्नुपादान्मध्यं दिनं यत्स नृणामनेहा ॥ २३७ ॥
सपुत्रस्य चंद्रस्य तदानुन्नतत्वे हेतुं फलं चाह ।
औन्नत्यं कुजमददानवसुराचार्यादेवन्नोद्वह-
श्रीमत्त्यागभृतोवतारसमये चंद्रोवसत्कर्कटैः ॥
तेनास्मै मुदितः स्वसन्निधिमसौ श्रीरामचंद्रो ददा-
वस्थानस्थितिरुन्नतिश्च हि तदेनस्तः प्रभूपस्थितौ ॥ २३८ ॥
भगवदाविर्भावेण पुरुषार्थचतुष्टयसिध्दौ निदर्शनमाह ।
व्यक्तिमेति किल यत्र परात्मा तस्य सिध्यति सुखं चतुर्थी ॥
नाकिनां शुभमभूत्तदरिष्टं यत्समृध्दमसतामशुभं च ॥ २३९ ॥
सुरकृतपुष्पवर्षे हेतुमाह ।
स्वकार्यार्थं कश्चिद्वचयति दृढं चेत्परिकरं
महामोदं तं प्रत्यपि जनयति प्राकृतजनः ॥
दशग्रीवं हंतुं प्रभुमवतरंतं प्रमुदिता
ववर्षुः संतानप्रभवसुमनोभिः सुमनसः ॥ २४० ॥
सांद्रांभोधरशामसुंदरवपुः पीतांबरोद्भासितो
लोलत्कौस्तुभतारहारवलयो भ्राजिष्णुभूषोज्वलः ॥
शंखांभोजगदासुदर्शनकरः स्मेराननः श्रीधरो ऽ

---

४ पराकाष्ठां. ५ औन्नत्यं महत्त्वंच । अविचार एव । पक्षे अविना मेषेण चारः । अथवः शैलमेषाकौ इत्यमरः ॥ ६ विचारयुक्तस्य । गहडगामिनश्च. ७ मर्यादा. ८ पूर्वाह्णो वै देवानां मध्यंदिनं मनुष्याणां अपराह्णः पितृणामिति श्रुतेः । १. सूतिकागृहं । २ आमोदो गंध-हर्षयोः । ३. कल्पवृक्षः ।

कस्माल्लोचनगोचरः समभवद्देव्याः स भव्याकृतिः ॥ २४१ ॥
सर्वाशापूरणरुचि नित्यं मुक्तावतंससहवासि ॥
मणिकोटीरं हरिणा श्लाघ्यं शिरसेति दर्शयद्रुरुचे ॥ २४२ ॥
करोतु करुणाकरः सदवतारलीलाभरा-
वलोकनसुधारसास्पदममूनि नेत्राणि नः ॥
इति प्रगदितुं निजप्रियमुपांशुलग्ना इव
प्रभोः श्रवणसन्निधौ सदवतंसमुक्ता बभुः ॥ २४३ ॥
निर्जित्याननशशिना किरीटकारागारांतर्घनतमसां निवेशितानाम् ॥
बालाः किं कवलितकर्णशष्कुलीका निर्मुक्ता इव दयया बहिर्विहर्तुम् ॥२४४॥
ध्यातॄणां मनसोऽखिलं कुटिलतां संगृह्य संगृह्यत-
त्संपन्मत्ततया अमी स्वगुरवो वृध्दा निबद्धा दृढं ॥
तस्माध्दंत तदीयमुक्तिनिपुणं पुण्यातिरेकं परं
संचेतुं श्रुतिशीलनं विदधतो बालाः किमव्याकुलाः ॥ २४५ ॥
भालं श्रीमद्रमेशस्य तन्निर्माति स्म विस्मयं ॥
विशालमपि यद्भस्त्रोत्तिलकोत्तममंडितं ॥ २४६ ॥
रेजे मुकुंदनिटिलस्थलनिलयं मृगमदोध्दृतं तिलकं ॥
विकसदभिशिरः पुष्पं परमामोदं पतन्निव भ्रमरः ॥ २४७ ॥
अगण्यलावण्यसरोवरस्य ते सुपक्ष्ममाले कमले विलोचने ॥
व्यराजिषातामसितद्युती भ्रुवावभिद्रवंत्यौ भ्रमरावली इव ॥ २४८ ॥
कृष्णार्जुनमिदमंबकमत्यासन्नं ममेति कर्णेन ॥
आत्तादिशोद्विग्नतया समुद्दिग्नतं कालपृष्ठमिव सा भूः ॥२४९॥
पद्मं वेंदीवरंऽवाच्युतनयनयुगस्योपमानं कवीन्द्रा
निःशंकं कल्पयंते न खलु पुनरिदं तुष्टये मेऽल्पशोपि ॥
यस्मादुद्वीक्षितं तैरुपमितिविधये यो गुणस्यातिरेक-
स्तन्निष्ठः पश्य सोयं प्रतिदिनमुभयोर्जायते तत्प्रसादात् ॥ २५० ॥
कृष्णस्य कुंडलयुगं कलहायमानं रत्नाकरान्मुकुटतस्तटभूप्रपन्नम् ॥
भूत्वा मिथो विमुखमत्र पुनः प्रवेष्टुं बध्दस्पृहं मकरयुग्ममिव व्यदीव्यत् ॥२५१॥
जयतोपि कुवलयस्य श्रियं सकलदर्शिनोपि न महत्वं ॥
श्रुत्यंतशीलनादत इति कर्णांतायतं हरेश्चक्षुः ॥ २५२ ॥
आश्चर्यकृद्भगवतो नितरामपांगो यस्मिन्नसौ पतति तस्य तदिदं प्रकीर्णम् ॥

---

४. अरीणां पक्षे स्पष्टं । १ वृक्षशून्यमपि तिलकारण्यवृक्षयु । पक्षे विस्तीर्णतिलकशोभितं च । २. कृपाकटाक्षविगतांगश्च ।

उन्मूल्य दुर्जयमशेषमपांगदंभमव्यंगमेव सकलं च पुनस्तनोति ॥ २९३ ॥
त्रयी तु निःश्वासवदेव यस्माद्विनिर्गता तस्य हरेर्मुखस्य ॥
कक्षां समारोढुमपि द्विजेंद्रः कल्पेत किं काव्यरिपुः कलंकी ॥ २९४ ॥

श्रीकांतास्यजिगीषया हिमकरो बालत्व एवागम-
त्साहाय्याय महेश्वरं स्वशिरसा सोप्येवमश्लाघत ॥
तद्दोषात्क्षयभाक् स्वयं पशुपतिर्भिक्षामटाटीत्यतो
भीतो विष्णुपदं क्षमापनकृते संसेवतेद्याप्यसौ ॥ २९५ ॥
ह्रासस्फीततमेऽच्छदर्पणतलस्वच्छे कपोले हरे-
र्व्यश्राजत्प्रतिबिंबितं मणिगणाकीर्णं स्फुरत्कुंडलं ॥
श्रीदेव्या अनुनीतये विमनसो भूप्रस्थितैर्नैकधा
कंठाश्लेषवशेन पत्रमकरी तद्वल्लगेवोत्थिता ॥ २९६ ॥
स्थातव्यं समया द्विजांच्छुचितमांस्तेषां प्रपाटयैव चे-
द्वैराग्यं प्रथयंति नाधरतया ये तर्हि तानात्मनः ॥
ते पुण्यप्रभया शुचीन्विदधतीत्येवं स्फुटं दशय-
न्नभ्राजीदधरोरुणोपि रदनज्योत्स्नोज्ज्वलः श्रीपतेः ॥ २९७ ॥
योगधारणयोत्क्रम्य तेजोमयतया द्विजाः ॥
प्रविश्य वदनं विष्णोः स्थिता इव विरेजिरे ॥ २९८ ॥

कस्यापि सूक्तेर्विषयो न सा स्यादित्थं दृढं चेतसि चिंत्यमाने ॥
अवर्ण्यलावण्यतया ददाति तदेव वाक्यं स्फुटमंतरं नः ॥ २९९ ॥
आनिम्नमध्यं चिबुकाग्रमुत्तमं श्रश्वत्तरां संवहतो महीयसः ॥
लावण्यपूरस्य रयाढ्यधारया प्रणीतवर्त्मेव भृशं व्यरोचत् ॥ २६० ॥
रेखामयी व्यक्ततमा कंठे वैकुंठभूपतेः ॥
इह ऋक्सामयजूंषीति योजयंती व्यराजत ॥ २६१ ॥

नाथः क्षयी द्वेषवशादमुष्मिन्छ्रीमत्कृपास्तादिति यन्मुखस्य ॥
क्षमापनार्थं किमिवोपकंठे नक्षत्रमाला लुठती विरेजे ॥ २६२ ॥
सद्वृत्तोऽच्युतगुणगणपरिशीलनतत्परो मुकुंदस्य ॥
हृदयंगमश्चिति कथयन्नुरसि बभौ तारहारोऽस्य ॥ २६३ ॥
श्रीमत्तुलस्याः प्रदीपनैमाला गलार्पिताऽराजत सा मुरारेः ॥
श्रीर्या प्रति प्राग्विहिताभ्यसूयाऽप्यथो समाधिं स्वयमभ्युपैति ॥ १६४ ॥

तथाहि ।

---

१ पादाग्रं । २ समाधानं

आस्तां स्रग् मदुपर्यहो सुमनसामेतत्क्षमं नोपरं-
त्वेषाऽथापि तया कृता भगवता सा स्वामिता केवलं ॥
नोचेन्नैव सुवासिनी न सुजनिः किंवा नमत्पल्लव-
प्राया हा हरितत्वदर्शकतया दृष्टेति सर्वं शिवं ॥ २१५ ॥

प्रसंगात्तां स्तौति ।

सहस्रपत्रैरहहेंद्रियैर्यो न साध्यते श्रीरमणप्रसादः ॥
समर्पकाणां सुलभः स नृणां यदल्पपत्रेण कथं स्तुपातां ॥ २१६ ॥
कमलालयं विशंकटमरोचत सुवर्णयज्ञसूत्राढ्यं ॥
वक्षस्थलं बहिश्चांतश्च श्रीवत्सलं मुरारातेः ॥ २१७ ॥
धरणी देवी हरिणा क्रोडेन समुद्धृतेति मात्सर्यात् ॥
विमनाः स्यादिति महता क्रोडेन धृता किमर्णवेंद्रसुता ॥ २१८ ॥
कविकामहिताः केशरलसिता भृतसाधुदेवमणयोपि ॥
सुमनोरथं समर्थाः पारयितुं रेजिरे हरेर्बाहाः ॥ २१९ ॥
लसच्छाखाः सदोदात्तसर्वदानवरोदकाः ॥
परलेखाश्रिततलाः सुरागास्ते महाशयाः ॥ २२० ॥
नित्यं वाडवपोषणैकनिपुणो भूर्युच्छलत्कंकणो
भूसज्जन्मकरः समस्तभुवनाधारो महारोहितः ॥
मीनांको निखिलादिमाशयधरो विष्णोः समुद्रः कर-
स्तल्लावण्यनिधानमेष इति किं ब्रूमः सहस्रोक्तिभिः ॥२२१॥
कुल्या यस्य भुजाः सफेननिवहो मुक्ताकलापो महा-
कल्लोलस्तनमंडलस्त्रिवलयो लोलत्तरंगावली ॥
रोमाली जलनीलिका तनुतरावर्तोपि नाभिः परी-
वाहौ ते प्रसृते स कोपि रुरुचे लावण्यपद्माकरः ॥२२२॥
न भूतो न भावी न चास्ति त्रिलोक्यां जनस्त्वीदृगित्येव कारुण्यपूरात् ॥
विधाय त्रिधात्युत्सुकत्वेन नित्यं धृतः किं बलिः स्वोदरेण श्रीवरेण ॥२२३॥
यदुत्पद्मा स्थितिमाभजन्नभूत्सर्गान्विधातुं चतुराननः कविः ॥
नाभौ हरेस्तत्र न चक्रवार्तिता नवा गभीराशयतेति कः स्मरेत् ॥२२४॥
परमोहनत्वसुरचना सुवर्णभूः सच्चमत्कृतिस्थानं ॥
बहुविद्यासु कवेरिव रसना जयति स्म तानतंत्रस्य ॥२२५॥
स्वप्रभापूरिताकाशं कार्तस्वरविनिर्मितं ॥

---

१ जलं लाक्ष्म्य । २ लक्ष्मीपाणिग्रहणकर्ता । पक्षे सर्वादि यज्जलं तदाशयधरः जलएव ससर्जादाविति श्रुतेः ।

पीतांबरं हरेस्तस्य पीतांबरमिवाभवत् ॥ २७६ ॥
शुचिमानसवास्तव्यं सर्वोत्तमपदांबुजम् ॥
निषेव्य हंसकः शेशं सुखस्वनमिवातनोत् ॥ २७७ ॥
नित्यं गंगांबुसंसिक्तो निजानंदमहीरुहः ॥
रेजेस्य भवरोगस्य पाद एकांतभेषजम् ॥ २७८ ॥
हारं हारं हठाद्रागं ध्यातृचेतःकुटुंबिनं ॥
शोणायितमिवात्यर्थं हरेः पादतलं बभौ ॥ २७९ ॥
आस्यद्वेषविशेषदोषवशतः शोषं गतोप्योषधी–
शो नः पोषक इत्यशेषमपि तं रोषं प्रमाष्टुं हरेः ॥
अंतर्धिं समवाप्य राजललनाभावात्स्वयं ज्योत्स्नया
स्वेऽल्पाल्पाः शिशवोर्पिताइव पदोरग्रे नखा रेजिरे ॥ २८० ॥

यवचिन्हत्वे हेतुमाह ।

ममैकांततः संततं चिंतकस्य विना यत्नतस्तस्य भक्तस्य मुक्तिं ॥
स्वयं निर्वहामीति संदेशकोऽभौ मुकुंदो यवं धान्यराजं दधाति ॥२८१॥

चक्रचिन्हत्वे हेतुमाह ।

शक्तो न भक्तं मम चक्रगुप्तं विबाधितुं वक्रतयापि शक्रः ॥
नक्रस्य हंतेति स चक्रपाणिश्चिनोति चिन्हं पदि चक्ररूपं ॥२८२॥

छत्रचिन्हत्वे हेतुमाह ।

न त्रस्यति छत्रवदत्र किं जनो महातपस्यो मम चेत्पराङ्मुखः ॥
इतीव संस्मारयितुं पदांबुजैश्छत्रानुकारं स ववांछ लांछनं ॥ २८३ ॥

स्वस्तिकचिन्हत्वे हेतुमाह ।

यथा हि वातातपशीतवर्षवेधोस्ति नैस्वस्तिकमास्थितानाम् ॥
बाधा तथा कापि मदाश्रितानां न स्यादिति स्वस्तिकयुक् चकास्ति ॥२८४॥

अष्टास्रचिन्हत्वे हेतुमाह ।

अष्टांगयोगोपि ममांघ्रिपल्लवाश्रयं विना नास्य फलोन्मुखो भवेत् ॥
इत्येव किं दर्शयितुं परः पुमानष्टास्रचिन्हांकितपादपंकजः ॥ २८५ ॥

जंबूफलचिन्हत्वे हेतुमाह ।

एकांतभावो मम यः पदांबुजे जातस्य जंब्वां जनुषोस्य जन्मिनः ॥
अलं फलं स्यादिति किं जनार्दनो जंबूफलं जागरयत्यदः पदे ॥२८६॥

---

१. क्षयः शोषश्च यक्ष्माचेत्यमरः ॥ २. स्वास्तिको मंगलद्रव्ये चतुष्कनृहेभेदयोरिति मेदिनी ।

सरोजचिन्हत्वे हेतुमाह ।

पंकोद्भूतिरपि प्रभूतरजसा जुष्टोपि मत्सेवकः,
सामोदः सुरसंश्रितश्च बहुना किं श्रीनिवासोपि सः ॥
संपर्कं भजते जलस्य न मनाङ् मध्ये जलं सन्नपी--
त्येतत्ख्यापयितुं परस्य चरणो रेखासरोजांकितः ॥ २८७ ॥

ध्वजाचिन्हत्वे हेतुमाह ।

भूभर्तुर्ध्वजरक्षणं निजशिरःसंरक्षणादन्यति-
श्रेयो वस्तुत एष एकममहत्काष्ठं परं चीवरं ॥
तद्वन्मे किल सर्वथाश्रितजनः संरक्षणीयो भवे--
देवं बोधयितुं दधाविव पदांभोजं सरेखाध्वजं ॥ २८८ ॥

अंकुशचिन्हत्वे हेतुमाह ।

चित्तं मत्तमतंगजो बहुरजःक्रीडानिबद्धस्पृहो
भूयः पिप्पलभोगभूरितरलो दुर्दम्य उच्छृंखलः ॥
आस्ते किं च हरेः[2] पराङ्मुखतया तं कालयेहं सकृत्
स्मर्तृणामिति दर्शयन्निव दधौ रेखांकुशं पद्मसौ ॥ २८९ ॥

वज्रचिन्हत्वे हेतुमाह ।

चेतःपुटे चिंतयतां परं नृणां तं संचितं पापचयं महाचलं ॥
निश्शूर्णयामीति विबोधयन्हरिः सवज्रचिन्हं चरणं दधाविव ॥ २९० ॥

मध्ये ऊर्ध्वरेखाचिन्हत्वे हेतुमाह ।

नराः किन्नरा आसुरा आशराश्च सकामा अकामाश्च मामाश्रयंतां ॥
इतीवात्मनः सर्वसेव्यत्वमाह हरेरूर्ध्वलेखाश्रितं[3] पादपद्मं ॥ २९१ ॥

वामे पदे शंखचिन्हत्वे हेतुमाह ।

जलोत्थोपि सन् यः सदावर्तकर्ता शुचिं तं करे हंत किं नैव कुर्या ॥
असौ ब्रह्मसंपन्न एवेति नूनं प्रभुः ख्यापयन्पांचजन्यांकपादः ॥ २९२॥

आकाशचिन्हत्वे हेतुमाह ।

अधिस्वं समावेशकर्ताऽखिलानां महावैभवो नित्यदाशङ्कनिष्ठः ॥
अनंतस्वरूपः[4] स कृष्णाश्रयेणेत्यजांघ्रिर्विभूषांछितो वांछितप्राः ॥२९३॥

निर्गुणचापचिन्हत्वे हेतुमाह ।

---

१. विषयभोगः । २. सिंहस्य । पक्षे परमात्मनः । ३ ऊर्ध्वस्थितदेवैरप्याश्रितमतएव तदपेक्षयाधःस्थितैः सर्वैः सेव्यमेव । ४ अनंतं सुरवर्मेत्यमरः ।

उदारवंश्योपि गुणप्रसंगात्कौटिल्यमेत्येव ततस्तमेतं ॥
विहाय साधुः समदाश्रयेणेत्येवं पदे निर्गुणचापचिन्हः ॥ २९४ ॥

गोष्पदचिन्हत्वे हेतुमाह ।

दुस्तरतरोपि गोष्पदसुतरो भवसागरो मदाश्रयतः ॥
इति बोधयितुं धत्ते स्वपदे गोष्पदपदं सदयत्हृदयः ॥ २९५ ॥

अमृतकुंभचिन्हत्वे हेतुमाह ।

भ्राम्यंतु नामृतकृते कृतिनः समंताच्छाम्यंतु नापि तदुपायसमीक्षणाभिः ॥
तत्पाद एव मम विद्यत एवमीशः प्रख्यापयन्नमृतभाजनलांछितांघ्रिः॥२९६॥
नष्टस्मृतिर्जाड्यभराभिभूतो मलीमसोयं विषयोपसेवी ॥
स्वस्थो जनः स्यान्मदुपाश्रयेणेत्येवं पुनर्वामृतलांछितांघ्रिः ॥ २९७ ॥

श्रीयंत्रचिन्हत्वे हेतुमाह ।

सश्रीयंत्रमिदं पदं मम यतो लब्धापि वक्षःपदं ॥
श्रीस्तत्रैव मुहुर्मुहुर्व्रजति सा कृष्टापि त्दृष्टा हठात् ॥
तत्तल्लाभकृते भ्रमंतु विबुधा नत्वेतदेवाश्रयं-
त्वित्येवं प्रतिबोधयन्स्वचरणे तल्लांछनं स व्यधात् ॥ २९८ ॥

अर्धचंद्रचिन्हत्वे हेतुमाह ।

उद्यत्कलंककलिलोपि किल द्विजेंद्रः कृष्णाष्टमीमुपवसेद्यदि तां नमस्यः ॥
प्रायः कलाक्षय इवाजनि तस्य भव्यं स व्यंजयन्निव शशांकदलांकपादः ॥२९९॥

मीनचिन्हत्वे हेतुमाह ।

नीचानुसर्पणरयेण जलाशयेन येनाश्रितोस्मि तमहं रचयामि नूनं ॥
हीनं मलैरिति सतः कथयन्स मीनं रेखाश्रयं श्रयति दीनपतिः पदाब्जे॥३००॥

दृष्ट्वा नेत्रमनोरसायनमिमं कामाभिरामं परं
ज्ञात्वा लोकमहेश्वरं श्रुतिशिरःसर्वस्वमीड्यं हरिं ॥
भूत्वा प्रह्वतनुः कृतांजलिपुटा बाष्पांबुपूर्णेक्षणा
नत्वा कोसलकन्यकातिमुदिता धन्या व्यतानीत्स्तुतिं ॥ ३०१ ॥
नृणां चर्मदृशां तु नैव विषयो यद्योगयुक्तात्मनां
ध्यानावस्थितिमात्रगम्यमहह त्रैलोक्यनाथोपि सन् ॥
ब्रह्मा जातुचिदेव गोचरयते तल्लीकृपापांगतो
रूपं तत्पृथु दर्शितं मम विभो किं भागधेयं ब्रुवे ॥ ३०२ ॥

---

१ श्रावणस्यः आकाशास्थितश्च । २ भगवत्पादैकदेशो मीनस्वभावः मीना यथा यस्मिन जलाशये तिष्ठंति तत्रस्थं मलं भक्षयित्वा तं स्वच्छीकुर्वंति ।

अधुना बालेन भाव्यमित्यत्र हेतुमाह ।

इष्टेष्वप्यखिलेषु नाथ तिलकं ग्रैवेयकं कर्णिका-
नासामौक्तिकमित्यमून्यतितरां कांतप्रियत्वेन नः ॥
अत्यानंदकराणि यत्पृथुरसावादौ महानंदनः
सत्वं चेत्पृथुको भविष्यसि तदा मोदाय सीमा न मे ॥ ३०३ ॥

एतादृशरूपदर्शने हेतुमाह ।

मयेयमयि दर्शिता करचतुष्टयोल्लासिनी
तनुस्त्रिदशकांक्षिता ध्रुवमिहापवर्गापहा ॥
स्फुर त्वरमभापि नैतदिव बालमूर्तिं क्वचि-
द्यदीतरवदादिनोप्यहमदर्शयिष्यं तव ॥ ३०४ ॥

भद्रमेतत्परं शैशवमेव तोषायेत्याह ।

पुंसुत्रोजनि वाद्यतां किमपि भो इत्याप्तवैद्यस्य वाक्
सद्यः सूतिजवातजातकठिनक्लेशस्य विस्मारिका ॥
यः प्राप्तस्य कुतूहलादथ सखीवृंदस्य वादः शिशु-
श्वश्रुष्यः पितृसन्निभोयमिति नः पुष्णाति धन्यात्मतां ॥ ३०५ ॥
साश्लेषं वदनस्य चुंबनमथ स्मेराननालोकनं
संलापप्रतिहुंकृतिर्निलयनं क्वाचित्कभीत्युद्भवात् ।
अव्यक्तालपनं प्रियेण सविधे तल्लालनं चापलं
भूयो दुर्लसितं शिशोः सृजति नो ब्रह्मात्मतां तत्क्षणात् ॥ ३०६ ॥

पृथोः पृथुकत्वे भवतः काम्यैव हेतुरित्याह भगवान् ।

वचनं निशम्य तस्या विहस्य किंचिद्विरिंचिजनकेन ॥
मातस्तत्कृतकाम्याधीनोस्म्यहमिति वचोमृतं मुमुचे ॥ ३०७ ॥

बालत्वेन जातमात्रस्य रोदने हेतुमाह ।

बालिश्येन न जीवनं क्वचिदपि ध्वस्तं शरावं करे
धृत्वा पुल्कसवीथिकास्वपि वरं भिक्षाटनं प्राणिनां ॥
इत्युक्तं मुनिभिस्तदेतदुचितं यज्ज्ञानरूपोपि सन्
बालिश्येन नटन् हि केवलमयं सद्यो रुरोद स्वयम् ॥ ३०८ ॥

तदात्व एव कश्चिदवरोधस्थो राजानं निवेदयति स्मेत्याह ।

अजनंदनः सनंदन इत्युक्तिरभूच्चिरादिहैकैव ॥
अधुना पुनः सहचरीं तस्याः पश्याम्यहं महाभाग ॥ ३०९ ॥

---

१. बालिशश्च शिशौ मूर्खे इति मेदिनी । २. अजनंदनः सनंदनः दशरथः सपुत्रश्च

आदावुदादाय नरोवरोर्धनास्पदस्थितो यत्र सुधा मुधा भवेत् ॥
तदर्पयन्वृत्तमभूत्स तादृशो वदान्यराजं वसुधाधिपं प्रति ॥ ३१० ॥
तूर्याणामथ निनदो नभोंतराले पौरोप्याशिशुमंदिरांतराले ॥
आनंदः सकलनृणां हृदंतराले बाष्पौघोपि हि न ममौ दृगंतराले ॥३११॥
बाष्पौघैरजतनयोभिषिक्तकल्पोऽ प्याप्लुत्यांभासि सरितो गुरोर्निदेशात् ॥
शुद्धः सन्नृणमुदधूनयत्सरय्वा नैवैकं परमापि तत्क्षणात्पितॄणाम् ॥ ३१२ ॥

जातमात्रस्यास्य राजीवपत्राक्षतायां हेतुमाह ।

गर्भे किं गदितं करोति किमयं पश्यामि नास्याननं
पापस्येति हि जातमात्रपृथुको नोद्घाटयत्यक्षिणी ॥
साफल्यं जनुषोऽमुना व्यरचि तत्तदर्शनं क्षेमदं
तत्कर्तुं प्रथमं प्रभुः स्वनयने विस्फारयामास किं ॥ ३१३ ॥
जातकृत्यं भगवतः केवलं न महोत्सवैः ॥
संपादयामास परं स्वात्मनोपि स पार्थिवः ॥ ३१४ ॥
निगृहीत एव नासीत्सुतजन्ममुदा विमोचनीयो यः ॥
स्वयमेव किंतु मुमुचे भवद्दृढबंधात्तदा स पंक्तिरथः ॥ ३१५ ॥
आदौ पंक्तिरथः स्वभावपरमोदारस्ततो राघव-
प्रादुर्भावमहाप्रमोदरचितोत्साहोऽर्थिनां कामनाः ॥
यावत्पूरयितुं कृतासनविधिस्तावत्तु ते मेनिरे
संतानासिरमुष्य केवलमसौ नास्माकमप्युच्चकैः ॥ ३१६ ॥
नादेयताप्रतीतिस्त्वेकं सरयूर्वसुष्वभूतत्र ॥
एतत्पुरार्थिनां किल संप्रति सकलेषु नृपवसुष्वपि सा ॥ ३१७ ॥
यो दद्यान्मम कुड्मलं नवदलं किंवा फलं वा जलं
तेन प्रीततमः करोम्यहमयं तं पूर्णवित्तान्वितं ॥
इत्येवं स्वयमूचुषा भगवता प्रत्यर्पितं सर्वथा
तत्स्वे जन्मनि तत्तदर्पकजनाः संभावितास्तादृशाः ॥ ३१८ ॥

तदानीं भुवोचलत्वे हेतुमाह ।

आगंतुदुः खक्षयमातनोति साक्षात्कृतिः श्रीरमणस्य विष्णोः ॥
स्यात्स्वस्वरूपेण ततः स्थितिस्तत्प्रदर्शयंतीन्वचला चलासीत् ॥ ३१९ ॥

जलवैमल्ये हेतुमाह ।

---

१. नरः वरः । धनास्पदास्थितः प्राप्तमाहाधनइत्यर्थः । २संतानः संततौ गोत्रे स्यादपत्ये-सुरद्रुमे इति मेदिनी । ३ वसु तोये धने मणाविति वैजयंती । ४ द्वौ नञौ प्रकृतमर्थं अतिशयं गमयतः पक्षे नथा इदं नादेयं तस्य भावस्तत्ता ।

यन्मंत्रराजमनिशं जपतो जलानि स्वच्छीभवंत्युदयतः कलशोद्भवस्य ॥
तस्यैव किं भगवतः कमलावरस्य जन्मन्यमूनि विमलान्याखिलानि न स्युः॥३२०॥

द्विधापि कार्या विमला जलाशयाः पंकाकुला नीचपथप्रसर्पिणः ॥
प्रभोर्वतारेण किमत्र तावत् स्थितेषु तेषु प्रथमं प्रचक्रिरे ॥ ३२१ ॥

त्रेताग्नीनामायतनाद्बहिःप्रज्वलने हेतुमाह ।

भूत्यावृता अप्यपहाय भूतीर्महानला माधवदर्शनार्थं ॥
निरीयुरेवेति निदर्शयंतः प्रज्ज्वलुर्यज्ज्वतनूनपातः ॥ ३२२ ॥

वायोर्मंथरगतौ हेतुमाह ।

व्यक्तिंगतेंतरवैरोधन ईश्वरेऽहं नूनं वहामि शनकैः शनकैः सुसूक्ष्मः ॥
प्रज्ञापयन्निति जनानजजन्मकाले किं मंदमंदमिव गंधवहः प्रपेदे ॥ ३२३ ॥

आकारेण न कर्मणा न च गुणैराढ्योयमुत्पादितः
पोतो मे हनुमानतीव चपलः कोन्वस्य कुर्याच्छिवं ॥
एवं दुस्तरचिंतया चिरमभूद्व्यग्रो विंदन्सांप्रतं
जातं तच्छरणं कृपार्णवमिव स्वच्छो ववौ मंथरं ॥ ३२४ ॥

आकाशनैर्मल्ये हेतुमाह ।

आपादिते सातिशयं विशेषे श्रीविष्णुधिष्ण्येन[1] तदोर्जितेन ॥
नभस्यवात्सीद्धि रजस्कभावस्तया समंताद्घनपुष्पवृष्टिः[2] ॥ ३२५ ॥

दिक्प्रसन्नतायां हेतुमाह ।

आशाप्रसादः प्रभवेत्प्रादुर्भावं गते हरौ ॥
दर्शयंत्य इतीवाशाः प्रसादं प्रतिभेजिरे ॥ ३२६ ॥

भरतस्य पुष्यनक्षत्रजत्वे हेतुमाह ।

ज्येष्ठातिक्रमणप्रसंग उदयेन्मातुः सुदुश्चेष्टितैः
सोयं मन्मतिदार्ढ्यमीषदपि मा भेदीदिह स्वात्मनि ॥
ध्यायं ध्यायमुपायमायतमयं भूयो गभीराशयः
कैकेय्या गुरुभैक्तधिष्ण्यमिव किं शंखोत्तमो ऽधिष्ठितः[3][4] ॥ ३२७ ॥

अन्यत् ।

लक्ष्मणशत्रुघ्नयोराश्लेषायां जन्मनि हेतुमाह ।

दासैराद्रियते यदि स्वभजनस्थानं विहायेतर-
त्राद्धद्राय कदापि नेति विमृशन्धिष्ण्ये स्वकीये महान् ॥

---

१ अंतःपुरे अंतःकरणे च । २ श्रवणनक्षत्रेण । विष्णुतेजसा श्रावणे आकाशेच । ३ देवकर्नृकनिबिडपुष्पवृष्टिः जलवृष्टिश्च । मेघपुष्पं घनं रस इत्यमरः । ४ पुष्यं बृहस्पतिदेवताकं। तस्मादुत्तमकुलमाधिष्ठितइव । धिष्ण्यं स्थानाग्रसद्मास्वित्यमरः ।

चक्री चांत्यकलत्रतोंबुजलसन्नेत्रात्सुमित्राह्वया-
दायाजन्म स नित्ययोगवशतश्चक्रेण किं स्वित्समं ॥ ३२८ ॥
यस्मिन्योगिजनः सदैव रमते यः साधकानां श्रियं
दाता ज्ञानमयीं तथेतरनृणां यो दर्शनीयो दृशां ॥
इत्थं योगिमणिर्विमृश्य निपुणं श्रीमान्वसिष्ठो गुरुः
कौसल्यातनयस्य तस्य मुदितो रामेति नाम व्यधात् ॥ ३२९ ॥
आदेशेन नृपस्य दंडकवनं यातेन रामेण यो
राज्यं प्राज्यहठात्समर्पि तमपि स्वीकृत्य विन्यासवत् ॥
कर्ता धारणमस्य पोषणमपीत्येवं स पश्यन्गुरुः
कैकेयीतनयस्य तस्य भरतेत्येवं व्यधादाह्वयं ॥ ३३० ॥
प्राणेभ्योप्यधिकः प्रियो रघुपतेर्नूनं भविष्यत्ययं
तेनेषोऽनुभविष्यति प्रणयिनो राज्यश्रियं सर्वशः ॥
पूर्णानंदमयः स केवलमयं राजभ्रुवो राघवो
वीक्ष्यैवं किल लक्ष्मणेति कृतवान्नाम्ना सुमित्रासुतं ॥ ३३१ ॥
आदत्ते श्रीमदाज्ञामहमहमिकया यो जनः साधुवृत्तो
लब्धैवैतत्प्रसादप्रसरमथ चरेत्कर्म यत्किंचिदेव ॥
पात्रं स्यात्तावतैवाप्यधिसदधिकृतेः सन्महत्याः प्रसिद्धे--
रित्येवं दर्शयन्सोऽकृत लवणरिपुं किंनु शत्रुघ्ननाम्ना ॥ ३३२ ॥
सानंदाः सकुतूहलाः सुवसनालंकारसंकाशिता--
श्चंचत्कुंकुमपंकरागरचनोदंचत्कपोलश्रियाः ॥
श्रीमंतः स्मितसुप्रसन्नवदनांभोजाः पुरंध्रीजनाः
श्रीरामं परिगृह्य लालसतया स्वांके निवेश्यादरात् ॥ ३३३ ॥
आकल्पान्प्रतिमुच्य रत्नखचितानाच्छाद्य कंचीरिकां
शीर्षण्योत्तमभंगिकां च रुचिरामालिंग्य संचुंब्य च ॥
दोलायां प्रणिधाय नामपदवद्द्योतानि सम्यग् जगु--
स्तासां पर्यणमत्क्रिया हि परमार्थत्वेन लौकिक्यपि ॥ युग्मं ॥ ३३४ ॥

स्वरोचिषोषि भूषणधारणे हेतुमाह ।

सन्मणिसुवर्णमुक्ता यं स्वालंकृतितयैव मन्यंते ॥
तस्य मिथो[3] भक्तेतया तन्मयभूषाः स्वरोचिषोप्यभवन् ॥ ३३५ ॥

व्याघ्रनखधारणे हेतुमाह ।

यो धर्मतत्त्वनिपुणः स्मृतिकृद्यदीये भीष्मादयः परमभागवताः कुलेऽपि ॥

---

१ कुंची टोपीति लोके । २ परमात्मनः । ३ परस्परभक्ततया । ४ पुरे वसंति ते ।

त्वद्यो नखोपि मम सन्मणिनायकस्य स व्याघ्रपादनखमेवमलं बभार ॥ २३६ ॥

पिप्पलपर्णधारणे हेतुमाह ।

नूनं देहभृतो ललाटफलके कर्माणि जाग्रत्यदः ।
सामान्येन ममापि कार्यमुगलं भालेस्ति पूर्वार्जितं ॥
देयं वैषयिकं सुखं त्ववसितौ मुक्ताश्च कार्यामये-
त्येतद्रूपकभूतमेव विलसन्मुक्तं दधौ पिप्पलम् ॥ २३७ ॥

कदाचिद्दोलानिविष्टस्य मंदहासे हेतुमाह।

बालिश्यं बहुदुःखदायकामिति प्रोक्तं मुनींद्रैः परं
सेवंतामिह देहिनः परवशा आंदोलना यद्ग्रहात् ॥
एतासां विषयं करोति तदिदं मामप्यहो संप्रती-
त्येवं विस्मयतो जहास किमयं दोलानिविष्टः स्वयम् ॥ २३८ ॥

संप्राप्य माता प्रतिमासमादृता कुमारकं मारसमं सवायनम् ॥
भव्यैरलंकृत्य च नव्यभूषणैर्वर्धापनं सा विदधे सवासनं ॥ २३९ ॥
अथ महोच्चैयं तु यथा यथा ययुरमी समयेन कुमारकाः ॥
दशमुखप्रमुखा अतिदुर्मदा जलधिमध्यपुरेपि तथा तथा ॥ २४० ॥

एकांगपरिवर्तने हेतुमाह ।

दुर्वृत्तक्षणदाचरव्रजमहाभारव्यथाविह्वला
त्वं पृथ्व्यंग सुखीभविष्यसि तरामल्पीयसाऽनेहसा ॥
चिंतां मा रचयेति सांत्वनकृते कुर्वन्निवायं रहः
संवादं परिवर्तते स्म भगवान्रामो झटित्येकतः ॥ २४१ ॥

कालेन न्यग्भूतस्य प्रथममतिनिश्वासे हेतुमाह ।

धात्रीसंघकुतूहलप्रणयिता दीक्षागुरौ स्वीकृते
न्यग्भावे त्वनुभूतभारचिपिटीभूतोदरः श्रीधरः ॥
आसीद्दूरि विनिश्वसन् वसुमती क्रोडीकृतेयं मया
क्रोन्वेनां व्यथयेदितः परमिह क्रव्यादितीर्ष्यन्निव ॥ २४२ ॥

उरसा सर्पणे हेतुमाह ।

ये केचिद्बहुधान्यनाशनिरता येऽमी निबध्नादरा
क्षोणीनिर्व्यथने निशाटनपरा ये साधुवासश्रियाम् ॥
ये व्यर्थं बहुदूषका अहमसौ तान्मूषकान्भक्षिता
सर्पोऽस्मीति निदर्शयन्निव पुनः श्रीशः ससारोरसा ॥ २४३ ॥

---

१ कर्मफलं । २ मह उत्सवतेजसोरिति मेदिनी । उपचयः वृद्धिः अपचयः नाशः ।

स्तनदानकालेंचलेनाच्छादने हेतुमाह ।

एकांतगापि जननीस्तनदानकाले राजीवलोचनमवस्त निजांचलेन ॥
भोक्तुं प्रवृत्तवति विश्वगुरौ मुरारौ सद्योंतरा जवनिकाकरणं हि युक्तं ॥ २४४ ॥

एकं पिबतोन्यस्तनमुत्खलालने हेतुमाह ।

दाक्षिण्यान्ननु तर्पये त्रिभुवनाध्यक्षं पयोभिस्त्वयं
पश्चादस्मि कथं कथं भगवते रोचेय तस्मात्स्वयं ॥
प्रस्रोतव्यमदः कृते द्रुतमिति व्यग्रं नु वामस्तनं
मामेत्यास्य उपस्पृशन्निव करांगुल्याच्युतोऽन्यं पपौ ॥ २४५ ॥

क्वचित्स्तनदर्शने हेतुमाह ।

अंके कृत्वाक्षमीलं प्रमुदितमनसा पाययंत्यामुरोजं
निध्यायंत्यां स्वमंतर्मनसि पुनरसौ लीलयेषद्ददंश ॥
साक्षादंकस्थितेऽस्मिन् यदि मनसि जनः संस्मरेत्तत्र विघ्ना-
न्कर्तेत्यावेदयन्किं स्वजनवरदतां यद्ध्रुवे दृष्टमेमत् ॥ २४६ ॥
रससंख्ये ततो मासे समस्तोत्सवदायकं ॥
चकार श्रीरघूत्तंसः समं द्वेधा रसाशनं ॥ २४७ ॥

तर्णकलांगूलग्रहणे हेतुमाह ।

पूजा गवीनां तरलायमानानितस्ततो धावत एष वत्सान् ॥
जग्राह लांगूललतासु रिंगन् स्ववत्सलत्वं स्फुटयन्निवेशः ॥ २४८ ॥
यः श्रीमान्सनकादिकान्स्वशरणानादाय हस्तांबुजे
कारुण्यादशिशिक्षत क्रममसौ लोकत्रयीसद्गुरुः ॥
कौसल्यांगुलिमाकलय्य शनकैः प्रासादभूमीतले
श्रीरामः समशिक्षित क्रममहो मातुर्मनो मोदयन् ॥ २४९ ॥
ब्रह्मिष्ठाः सनकादयोपि कवयो दृग्दोषभीत्यात्मनो
यत्पादाब्जरजःकणानसुलभानन्वेषयंतेऽन्वहं ॥
धात्र्यस्तन्निटिलस्थलं नवनवक्रीडावलोकद्रव-
त्कारुण्येन रजोभिरंघ्रितलगैरुध्दूलयांचक्रिरे ॥ २५० ॥
नित्यं राघवकार्यतत्परतया यद्राममातुः पुना
राज्ञः पंक्तिरथस्य तस्य नियते कृत्ये बभूवांतरं ॥
तत्तस्य त्वतितुष्टये समभवत्सर्वार्हणं केवला

---

१ पक्षे स्वस्य जाता येन वरदाः नूतनदंतास्तेषां भावस्ताम् स्वजनवरदातृत्वं दर्शयन् सन् ददंश ।

स्यादेवाच्युतपूजनादिति भुजोभ्दारं वदंते बुधाः ॥ २९१ ॥

भोक्तुं पित्राहूतोपि न ययावित्यत्र हेतुमाह ।

भुक्तये यदि समाह्वयेज्जनो भक्तितोपि तदतीव नैव मे ॥
रोचतेऽयमिति दर्शयन्पितर्याह्वयेपि न भोक्तुमाययौ ॥ २९२ ॥

कौसल्याव्हानेन त्वाययाविल्यत्र हेतुमाह ।

अमृतौस्पदेन तु जनेन कर्हिचित् यदि भुक्तयेप्यहमसाविहार्थितः ॥
उपयाम्यवश्यमिति किन्तु दर्शयन् जननीप्रयत्नसफलत्वमातनोत् ॥२९३॥

स्थायाततु सकर्दमपाणिरित्यत्र हेतुमाह ।

नामैक्याद्वा कथं वादतमयि भगवन्नैकधा लोकमात्रा
तत्तुष्टयै श्रीमतापि स्वकरकिसलये स्वीकृतं तत्कृतार्थं ॥
प्रायेणास्पृश्य काये मम किल जनके स्यात्प्रसादः कथंचि-
त्पदेनेत्यर्थितः किं करकृतचिकिलोभूत्स भुक्तिप्रसंगे ॥ २९४ ॥

[1]कीचत्कवलं गृहीत्वा पलायने हेतुमाह ।

भक्तेनोपदृतोंधसोपि[2] मनसो ग्रासोप्यलं तुष्टये
न द्रव्याणि भवंति संति विविधान्यन्येन दत्तान्यपि ॥
एतत्सूचयितुं रमापतिरसौ ग्रासं गृहीत्वा करे
प्रत्तं पंक्तिरथेन तृप्तइव किं सृप्तः पुनः क्रीडने ॥ २९५ ॥

रामचापल्यात्कौसल्याया गृहकृत्यत्यागे हेतुमाह ।

विष्णौ लौल्यं यदि समुदितं तत्पुनर्देहगेह-
व्यापारेषु स्मृतिमपहरेदेष शास्त्रस्य वादः ॥
आरूढो मेऽनुभवपदवीं रामचापल्यहेतो-
र्यत्कौसल्या शिथिलतरतां स्वात्मकृत्येष्वतानीत् ॥ २९६ ॥

एकदा कौसल्या रामभुक्तिप्रार्थनानादरे हेतुमाह ।

आचार्यात्सुतपत्रिकाश्रवणतो माहात्म्यजिज्ञासया
सांद्रप्रेमभरेण घूर्णदृदया माता कदाचिद्धरेः ॥
स्वाद्वन्नं मम भोजनाय वितरेत्येवं वचो नाशृणोत्
जिज्ञासा समये हि कर्मवितते: को नाम भारो मतः ॥ २९७ ॥

अथ दध्यादिस्तेयेन भुक्तमित्यत्र हेतुमाह ।

क्रुध्देनेव रघूत्तमेन परिघाघातेन भांडान्यथो
भंक्त्वा शिक्यगतैर्जनो दधिघृतक्षीरैरतर्पि स्वकः ॥

---

१ मोक्षः दुग्धंच । २ पद्मा पद्मं च । ३ लोलबलसतृष्णयोरित्यमरः ।

तद्बीजं किमिवोत्तरावतरणे नंदालये स्वेप्सितै-
तत्क्रीडावटपादपस्य महतो नाथः श्रियोऽवापत् ॥ २५८ ॥

एतद्युक्तमित्याह ।

भाविनि गोरसलुंठनविस्तारे बीजमेतदिति युक्तं ॥
बल्लवजन एवैतज्जननीं प्रति कथयितुं प्रवृत्तोभूत् ॥ २५९ ॥

सूदेनोक्तेपि माता न क्रुद्धेत्यत्र हेतुमाह ।

सूदेनोदितमेतदस्य चरितं श्रुत्वापि माता मनाक्
क्रोधं नैव बभार सा रघुवरे तुष्टैव वा प्रत्युत ॥
युक्तं युक्तमिदं यतो भगवतो भक्तस्य संतुष्टये
जायेतैव गुणानुवाद उदितो यः कोपि वा श्रीपतेः ॥ २६० ॥

मातुः सूदवचःश्रवणाद्धास्ये हेतुमाहः ।

निरंतरं स्वात्मनि राघवस्य यः प्रख्यापयन्सद्गुणतां स संप्रति ॥
दुर्वृत्ततां वक्तुमपि प्रवृत्तवानित्यद्भुतेनैव जहास सा सती ॥ २६१ ॥
सूदः स नानाविधपाकभव्यद्रव्यापहारोत्पतितं स्वपाकं ॥
प्रमार्ष्टुमेतद्रघुवीरचौर्यप्रकीर्तनेन स्वयमेव जज्ञे ॥ २६२ ॥
स सूपकारस्तु मुदा यदा तच्छ्रीरामचौर्यं जननीं चचक्ष्व ॥
स्वतत्क्रियोत्थाघनिवृत्तिहेतोः स्वस्मिन्स एवेति जनेन मेने ॥ २६३ ॥

ततः कृतकक्रोधाकुलमातृदर्शनेनैव पलायने हेतुमाह ।

पापस्तु कोपप्रतिमो नहीतरो न स्थीयते तत्र सति क्षणं मया ॥
संबोधयन्नित्थमुदीक्ष्य मातरं क्रोधाकुलामाशु पलायते स्म सः ॥ २६४ ॥
किं रे दुर्ललितं चरस्यतितरां पश्य स्तभानाधुने-
त्येवं संगिरती करेण दधती वेत्रं प्रधावंत्यथ ॥
भूयो निःश्वसती सती प्रतिपदं भूमौ स्खलंती ययौ
श्रांतिं हंत रुषः फलं कलयतैत्कृत्रिमाया अपि ॥ २६५ ॥
मत्प्राप्त्युत्कलिकां दृढां कलयतो यत्नं परं तन्वतः
खेदं संदधतः श्रमं निवहतो मांद्येन मां वेदितुं ॥
स्वेनाशक्नुवतो जनस्य कृपया प्राप्स्याम्यहं स्वात्मने-
त्येवं द्योतयितुं बभूव करगो मातुर्विधातुः पिता ॥ २६६ ॥

धृत्वा नोक्तवतीत्यत्र हेतुमाह ।

धृत्वा पाणिपुटे करेण सहसा दृष्ट्वा भयव्याकुलं
रामं कोसलकन्यका किमपि वा वक्तुं नचाशक्नुत ॥

युक्तं तत्करगोचरे रघुवरे जाते कृपातः श्रुतें-
र्व्याकोपेन भविष्यतीह वचसो विग्लापनं चेद्भवेत् ॥ २६७ ॥

स्वयमेव किंचिद्रुरोदेत्यत्र हेतुमाह ।

आदौ घोरतपो भवांतरगतं भूतिः कुले निर्मले
संगः साधुषु पुण्यकर्मणि रतिर्मत्संनिधिर्नित्यदा ॥
एवं सत्यपि विव्हला कियदहो क्रोधात्पुनः कृत्रिमा-
दीनानां तु कथं दशेति दयया मंदं रुरोदेव सः ॥ २६८ ॥

ततः सा सर्वानप्यालिलिंगेत्यत्र हेतुमाह ।

क्रोडीचकार जननी रघुनंदनस्य हार्देन राममपरानपि निर्विशेषं ॥
कांते श्रियः करगते न हि तारतम्यं स्वस्थायुकत्वमभितः प्रकटीकरोति ॥२६९॥

तृतीये वर्षे चूडाकरणे हेतुमाह ।

दग्धुं पृथुलंकाननमाविर्भूतो मरुत्सखः सशिखां ॥
अद्भुयुगांतपरिचयाद्दधार सा सर्वभूतये न कथं ॥ २७० ॥
शल्लुघ्नो भलतो वयं लथवले संयोज्य गौलान्हली-
न्सालभ्येतु सुमंत्रमल्लिकुमलं क्रत्वा चलामः पुलीं ॥
काल्यः श्रीचलनैः प्रसाद इति भूभर्तुः कलं भाषणं
तन्मूर्द्धन्यविधूननात्सदशनप्रायं सदासीन्मुदे ॥ २७१ ॥

पंचमे वर्षे उपनयने हेतुमाह ।

कुमारता प्रादुरभूदमीषु शक्तिर्विशिष्टा परिदृश्यते स्म ।
कथं नु तत्राशुतरां समीयुर्दंडोपवीताजिनमेखलाद्याः ॥ २७२ ॥

जातोपनयनमात्रस्य सर्वविद्यासंपन्नत्वे हेतुमाह ।

यो विद्यामपि भूयसीं न मनुते सर्वज्ञताहेतुकां
यो वा निष्कल एष किन्तु भगवानीक्षेत नः कर्हिचित् ॥
इत्येवं चिरमुत्सुकाः समभवंस्तातास्तु विद्याः कला-
स्ता यावत्स विभुः कृतोपनयनस्तावत्सहोपस्थिताः ॥ २७३ ॥

सर्वास्वपि विद्यासु कोदंडविद्यायामतिशये हेतुमाह।

सर्वाः सर्वस्य विद्या निजहितकृतये कांक्षितास्तत्र राज्ञा-
मावश्यावतीव प्रभवत उचिते चापविद्यार्थविद्ये ॥
तत्राप्याद्या प्रधानं भवति तदितरात्वानुषंगिक्यदः किं
ननाथो बाधयन्सोभ्यसदिव सुतरामेष कोदंडविद्यां ॥ २७४ ॥

सद्वंश्यान्गुणसंगमाशु जहतः श्रुत्यंतसंयोगतो
विद्ध्वावालक्ष्यमुपासकांस्तु विशिखानेकांततो जिम्हगान् ॥
श्रीरामः समुपास्त संततमसौ ये मां भजंते यथा
तानेतांस्तु तथा भजाम्यहमिति स्वोक्तं वचः सार्थयन् ॥ २७५ ॥
स्नात्वा प्रातरसौ यथाविधि विधिं कृत्वाथ नत्वा गुरू--
न्गत्वा संसदि पश्यति स्म निपुणं पौराक्षमार्यैः समं ॥
अश्लाघंत तदंतरेपि कृतिनस्ते ते यथावद्धरे--
स्त्रैलोक्याक्षदशोल्पकार्यविषयं नो चित्रकृत्पाटवं ॥ २७६ ॥
नरवरस्य वचोभिरजिह्मगो नगरकार्यमशेषमयं व्यधात् ॥
न च मनागपि कश्चिदगात्क्रमं नर इति प्रतिभात्यति सांप्रतं ॥२७७॥
श्रीरामचंद्रेजनि नीतिवैभवं ततश्च भूयोपि विनीतिवैभवं ॥
न तत्र सर्पेत्कमनीतिवैभवं किं दुर्घटं स्वामिनि मे रघूत्तमे ॥२७८॥

मृगयायां हेतुमाह ।

नागान्खड्गिणान्हरींश्च परितो यो वाहिनीर्भोगिनी
धत्ते कंचुकिसंचयं च महिषीर्यः सेव्यते चामरैः ॥
किं चामाति सरामलक्ष्मणतया सोऽयं नु राज्ञे दवो
जज्ञे नः प्रतिपक्ष इत्ययमभूत्सिद्धोस्य किं शुद्धये ॥ २७९ ॥

अश्वारोहणे हेतुमाह ।

विक्रांतैरपि दुर्दमो मृगगणाध्यक्षो वने केसरी ।
तत्सार्थं प्रथमप्रसंग उदये राज्ञो न आयुष्मतः ॥
तन्न स्यात्तु कथं कथं न निपुणं विद्मः कवीनामिमा-
माशंकामपहर्तुमिव किं सोश्वं तदा न्यग्व्यधात् ॥ २८० ॥

लक्ष्मणसाहाय्यके हेतुमाह ।

अस्यैकस्य तु साहाय्ये स्यादनंतसहायता ॥
इति मीमांसया जज्ञे रामः सौमित्रिसारथिः ॥ २८१ ॥
रघूत्तसचंचत्कृपाणप्रहारप्रभिन्नेभकुंभस्थलाभ्यंतरेभ्यः ॥
पतंति स्म मुक्ताः फलं साधुवृत्ता मदोन्मत्तसंसर्गजं दर्शयंत्यः ॥ २८२ ॥
आस्ते पराङ्मुखतया हि हरौ जनोसौ नूनं कपोलतलभंगमुपैति लोके ॥
दानोदकार्द्रकरतापि हिताय नेति प्रख्यापयन्करिकुलान्यभिनत्कपोले ॥ २८३ ॥
भृशं श्वसंतो धुततुंगशृंगमाभिद्रवंतो वनसैरिभेंद्राः ॥
अधः पतंति स्म कृपाणपातैर्हरिद्विषां ह्यूर्ध्वगतिः कुतस्या ॥ २८४ ॥

आः पापिनो गोविषये भवंति मुखानि वोत्युत्कुटकौतुकानि ।
तदद्य कामान्कलितान्करोमीत्यब्रीभरद्वीपिमुखानि गोभिः ॥ २८५ ॥
भूमंडलेऽस्मिन्नहमेक एव खड्गीति लोकाः प्रवदंति सर्वे ॥
तत्किन्तु खड्गव्यपदेशभाजो मृगाश्च कर्तायममृष्यमाणः ॥ २८६ ॥
साक्षादयं शंबरशत्रुरत्रेत्येवं तु यं हंत वदंति संतः ॥
तस्मिंश्चमत्कुर्वति हेतिमेति स्थितिं कथं शंबरडिंभदंभः ॥ २८७ ॥
विस्फारयंतं धनुरार्यपुत्रं ज्यादारिता गर्ववशेन कोलाः ॥
चिराभियुक्ता अपि नो कृतार्था कथं हि तं पंकभृतो भजेयुः ॥ २८८ ॥

दुर्वृत्तोयमतः पुरा किल मया मूर्द्धावशेषीकृत-
स्तावानप्यहह त्रयीमयजनं चैनं कलानायकं ॥
दिव्येकोपि पुनः पुनर्व्यथयतेऽसौ सिंहिकानंदन-
स्ते सांगा इह भूरिशः पुनरिमे कुर्युर्न किम्वित्यहन् ॥ २८९ ॥
हारिः सन् यस्तु पंचास्यो बाणस्तद्धृदयंगमः ॥
प्रादुर्भूता न तत्राभूत्सा विरूपाक्षता कुतः ॥ २९० ॥

अत्र हिंसायामपि अहिंसेत्यत्र हेतुमाह ।

अपि स्वसात्वेऽस्वसहायतायां वनस्थतायामपि चावनस्थता ॥
आखेटके सत्ववधोपि भूभुजां कथं नु न स्यादवधः सतु स्फुटं ॥ २९१ ॥

मृतास्ते सद्गतिभाज इत्यत्र हेतुमाह ।

धृतः करे श्रीरघुनायकेन यो ज्योतिर्मयः कोशविनिर्गतोऽभवत् ॥
तेनानुविद्धा ययुरुत्तमस्थितिं ते वन्यजीवा इति नात्र विस्मयः ॥ २९२ ॥
विशिखा जीवा मुक्तास्तत्संक्रमेणादहो विरक्तत्वं ॥
सद्यः प्रतिपद्य न के विदेहभावं भजेयुरिति वदत ॥ २९३ ॥
दवो जनानां बहुसत्वबृंहितस्तापप्रदोऽभूत्तमसौ रघूत्तमः ॥
निःसत्वभावं प्रतिपाद्य पादयोर्निवेदयामास पितुः सहानुजः ॥ २९४ ॥
आखेटकं यद्बहुचित्रकारि तन्नाम साकेतनिकेतलोकान् ॥
न सर्वथा चित्रसमुद्रपूरे न्यमज्जयिष्यत्क इति ब्रवीत ॥ २९५ ॥

सर्वानंदे हेतुमाह ।

मलीमसे त्वासुरसंपदोद्यैर्जने निजानंदभरः सुदूरं ॥

---

१ राहुः २ संन्यासिनः बाणाश्च ३ जीवाः मुक्ताः ४ संगमात् ५ खे अटंति ते खेटाः देवाः तानभिव्याप्य आखेटकं देवपर्यंतं यदाश्चर्यकारि तत्साकेतलोकाश्चर्यकारीति नाश्चर्यं । आखेटकं मृगया ।

यथा यथाऽवर्धत दैवसंपत्तथा तथा स स्वयमाविरासीत् ॥
स्वाभाविको लुप्त इव प्रकामं स्वामोद[1] आसीदिह हैमवेधात्[2] ॥
प्रसृत्वरे स स्वयमाविरासीत्पद्मोदये[3] शूरवरप्रतापे[4] ॥ २९६ ॥
पूर्णनिर्मलरसे[5] हि मानसे[6] जन्मिनां जगति रामनामकः ॥
राजहंस इह सन्निविश्य स व्यातनोत्कुवलये सुविभ्रमं ॥ २९७ ॥
जनस्य कस्यापि न कोपि दोषो यो वाचिको मानसिकोपि वाभूत् ॥
श्रीराघवेऽनंतगुणे परंतु दृग्दोषसंभावनमात्रमासीत् ॥ २९८ ॥

श्रीरामेण कृतमपि सर्वमकृतमेवेत्यत्र हेतुमाह ।

प्रकृत्या[7] भातु नामेह विकारो वरवस्तुनः ॥
न दूषणोपस्थितये[8] विचारे सति जाग्रति ॥ २९९ ॥

कल्पेपि यच्छेषपदं प्रकृत्या तस्मिन्विकारेऽपि विभासमाने ॥
हानिस्तु न प्रत्युत कार्यसिद्धिः प्रतीक्षतेपि प्रतिषेधमेतत् ॥ ३०० ॥
रामे मम स्वामिनि तु प्रकृत्या योगाद्विकारेऽपि विभासमाने ॥
स्वतत्वहानिर्न मनागपीति न शास्ति किं नामसहस्रकोक्तिः ॥ ३०१ ॥

समीहितं प्रार्थयते ।

वियुक्तश्चेत्स्वामिंस्त्वयि सतु विकारीति नियतं ॥
वियोगस्तन्माभूत्कथमपि विभो विट्ठलकवेः ॥
प्रपन्नोसौ त्वां तद्वितर परभक्तिं करुणया ॥
महाराष्ट्रेष्वेष प्रभवतु परेशो ज्वलतरः ॥ ३०२ ॥

इति श्रीमद्राजाधिराजरघुनंदनसुंदरपदद्वंद्वारविंदमकरंदमिलिंदायमानमानसेन शांडिल्यकुलतिलकायमानेन श्रीकरहाटकनिवासिना पंतमहादेवतनुजेन वाराणसीगर्भसमुद्भवेन ब्रह्मण्यजनाग्रगण्यकुलवरेण्यपुण्यशीलकारुण्यनिधिप्रतिनिधिपंतश्रीनिवासरायलब्धोपजीविकेन पंतविट्ठलेन विरचिते हेतुरामायणे प्रथमवर्णकं ॥ श्रीरामः प्रीयतां ॥

---

१ आमोदो गंधहर्षयोरित्यमरः । २ हेमवेध एव हैमवेधः स्वार्थे अण् । सुवर्णविषयको यो वेधश्चिंता । पक्षेहिमकर्तृकेवधात् । ३ पद्मा लक्ष्मी । पद्मं च । ४ शूरः सूर्यः - पक्षे शूरवरो रामचंद्रः । ५ प्रीतिजलं च । ६ सरोवरे अंतःकरणे च । ७ मायया ॥ ८ एकोर्थः स्पष्टः वरशब्दस्य विकारयोगेन विवरं भवति विवरं छिद्रं दूषणंच । एकमेव । वेः वरः चेश्वारश्च द्वयोरेकार्थत्वात् दूषणं न भवति । गरुडस्वामी गरुडसंचारी च । द्रुरुडंसचारी च । गरुडशेषयोः संरक्षकमिति भवति ।

भगवतः कौशिकस्य स्वमखारिष्टनिरसने श्रीरामनिध्याने हेतुमाह ।

सर्वारिष्टनिरासकर्तुरपि मेऽरिष्टस्य विध्वंसकः ॥
श्रीलक्ष्मीपतिरेव नेतर इति प्रेक्ष्यैव दिव्यं हरिं ॥
दिव्यः कौशिक आजगाम शरणं सोहं पुनः पार्थिव-
स्तत्तं पार्थिवमेव यानि इति निध्यायन्नभूत्कौशिकः ॥ १ ॥

हेत्वंतरमाह ।

स्वास्मिञ्छिराद्विरचितात्तपसो हि वर्णव्यत्यासमात्रमहह व्यरचि द्विधापि ॥
नैवाचरं किमपि हंत हरेः प्रियार्थं तत्राधुनापि यतितव्यमिति व्यवास्यत् ॥२॥

दुष्टैः सृष्टैररिष्टैर्हतसकलमखैर्भूरिदुःखैः स लेखैः
क्षीराब्धौ प्रार्थ्यमानो दशरथसदने देवदेवोऽवतीर्णः ॥
तत्प्रारिप्सोर्मखाग्रयं श्रवणपथमगात्सोऽधुनाऽरिष्टपक्षान्
धत्ते हीत्येव यातस्तदुकतरतयेत्यस्य मीमांसयेव ॥ ३ ॥
भस्मोद्धासिवपुर्विशंकटजटाजूटो द्विजेंद्रांचितो ॥
यो गंगांचलधल्लसद्रसवतीं रुद्राक्षभूषाधरः ॥
यन्नामानिशपाठलोलरसनस्तल्लीमुखालोकना-
त्साफल्यं स्वदशोर्भृशं रचयितुं साक्षाच्छिवोगादिव ॥ ४ ॥

राज्ञो विश्वामित्रं प्रत्युद्गमने हेतुमाह ।

यं स्वित्कौशिकमाहुरत्र धरणावेव द्विजाग्र्योप्यस-
न्नारूढः सुदृढं द्विजाग्र्यपदवीं घोरैस्तपोराशिभिः ।
श्रेयान्सत्पथगामिनां स विनतानंदप्रदस्तत्क्षमं ॥
तस्याभ्यागममात्रतः प्रतिययौ यद्राजहंसाग्रणीः ॥ ५ ॥
द्विजोत्तमांघ्रौ मनुजोत्तमोसौ रत्नोत्तमौघानुपदां निधाय ॥
आप्तुं स तामुन्नतिमुत्तमां तां निजोत्तमांगं नमयांबभूव ॥ ६ ॥
गाधेरगाधतपसस्तनयस्य तस्य पादारविंदयुगलस्मरजोभिषेकः ॥
स्थाने पुपोष पुरुपार्थिवभावमस्य सत्वं च यत्पुनरहो तदतीव चित्रं ॥ ७ ॥

राजसदने तदानयने हेतुमाह ।

प्रासादं नीतश्चेत्स्वार्थत्राणोचितं प्रसादं सः ॥
नीतः स्यादेवेति स तमेव नरनायको निन्ये ॥ ८ ॥
राज्ञां प्रकाशमानेन चित्रं गुरुतमो मुनिः ॥
भास्वत्कुलोज्वलत्वार्थमानिन्ये निजमंदिरं ॥ ९ ॥
अनर्घ्यतपसस्तस्य तदार्घ्यादिभिरादृतः ॥

चकारापचितिं चित्रं चेतुं स्तोपचितिं चिरं ॥ १० ॥
उभयेन स्वकायेन दक्षिणस्तं प्रदक्षिणं ॥
विधाय वंदनं चक्रे शिरसा वचसापि च ॥ ११ ॥

स्तुतिप्रपंचे हेतुमाह ।

सौधत्रावसथे प्रपाद्य किमयं मह्यं दुहंतीं पयो
गामेकां भृशमेकवर्णसुभगां दत्वा कृतार्थायते ॥
कच्चिन्नायमसूयतीति स पुनश्चानेकवर्णांचिता
बर्हीर्गा व्यसृजत्प्रमोदजनिकाः सद्यः सुधामोचिकाः ॥ १२ ॥

श्रीमदागमनेनाहं सकलकल्याणभाजनमित्यत्र हेतुमाह दशरथः ।

श्रीस्वामिपादा इह सर्वदागमाः समागमन् यत्स्वयमेव मे गृहान् ॥
अतः सुरौघा हि मयीत्यवैम्यहं कल्याणसंपत्सु तु नाधुनोक्तयः ॥ १३ ॥
पदपद्मसमागमादमुष्माद्भवतोर्था मम सिद्धिमीयिवांसः ॥
इति किमिव पुरो मुधा बुधानां विविधालापशतैर्वदामि विद्वन् ॥ १४ ॥
शतोत्सवाढ्यं विबुधोपलाल्यं कुलं पवित्रं मम सर्वथाऽद्य ॥
यत्तीर्थराजोयमगात्प्रयागो वृद्धश्रवस्त्वे स्म तु कानु शंका ॥ १५ ॥
त्रिशंकुभर्ता नवसर्गकर्ता योयं भवान्विप्रवरः समागात् ॥
स एष साक्षाज्जगदीश एव तद्भूतिराहूतिमपेक्षते किं ॥ १६ ॥

न केवलमहमेक एव मुदितः किंतु सर्वं राष्ट्रमपीत्यत्र हेतुमाह ।

ममौ न मय्येव नृपुंडरीके आमोद एकं भुवनोदरेऽस्मिन् ॥
विकाशपूर्वं सकलेपि चक्रे सूर्यागमस्यैतदतीव युक्तं ॥ १७ ॥
स्वामिन्निशांतमधिगच्छति तु द्विजेंद्रे स्वामोदराशिभरितं त्वरितं प्रकाशि ॥
जायेत यत्कुवलयं सकलं तदत्र नैको मुदे ककलिलः किमु राजहंसः ॥ १८ ॥
अंतः शांतफलैः श्रीमत्सूर्यपादैः क्वचित्कृतात् ॥
संतापादितरैः कश्चिन्न तास्यति तपोवनं ॥ १९ ॥

तापाभावे हेतुमुपन्यस्यति मुनिः ।

क्षत्राधिपे राजनि राजति त्वयि क्षमातलेस्मिन्नतिशीतलैः करैः[2] ॥
का नाम संतापकथाऽत्र तादृशे नक्षत्रनाथेपि न या क्वचिच्छ्रुता ॥ २० ॥
एतस्मिञ्जगति भवंति कंटकास्ते सन्मार्गं सहजतयैव दूषयंतः ॥
कर्तुं स्वाश्रमपदमत्र लोकयात्रां क्लिश्येत्किं दशरथजागरूकतायां[3] ॥ २१ ॥

अथ दशरथः ।

---

१ भुवनं तोयलोकयोरिति कोशः । २ किरणैः राजमात्रे च । ३ रथजागरूकतायां सत्यां ।

श्रीरामप्रमुखान्कुमारतिलकान्कामाभिरामाल्लस-
त्तूणीखेटकृपाणकार्मुकशरान्लोलच्छिखंडांकुरान् ॥
आनाय्यांघ्रियुगे निवेद्य भगवन्श्रीपादशिष्या इमेऽ
नुग्राह्या इति निर्मितांजलिपुटं राज्ञा स विज्ञापितः ॥ २२ ॥
नत्वा तं सहशिष्यवर्गमुचितं श्रेष्ठ वसिष्ठं तथा
राजानं द्विजपादपद्मरजसाभ्युत्धूल्य भालस्थलं ॥
अंतं भूषयतः कृतांजलिपुटान्पीत्वाक्षिपात्रैरगु-
र्नो चित्रं स्वयमेव तत्र सकलाश्चित्राण्यभूवंश्चिरं ॥ २३ ॥
श्रीरामचंद्रमुखचंद्रमवेक्षमाणः सद्यः समुच्छलितहार्द्रसमुद्रपूरः ॥
आर्द्रो न केवलमभूत्सहजे स्वकीये नेत्रद्वये परिहितेऽपि स तापसाग्र्यः ॥ २४ ॥
श्रीमद्रामप्रियार्थान्र चयितुमनसोभ्यागतस्यास्य सूरेः
कार्योर्थो नैव वाच्यः क्वचिदपि सुधियेत्यात्ततीव्रव्रतस्य ॥
अप्यस्मिन्वंदमानेऽतिरणरणिकयाशीःसहस्रं प्रयोक्तुं
प्रक्रांतस्यावकीर्ण्यं व्यतनुत न गलः प्रेमबाष्पोपरुद्धः ॥ २५ ॥

दशरथः—

एतस्यां ब्रह्मसृष्टौ किमपि भगवतस्तत्तपस्याप्रभावा-
न्नालभ्यं वस्त्वदृष्टश्रुतमभिनवमप्यस्त्यकार्यं न चातः ॥
आदेश्यस्त्वेष शिष्यः किमपि भगवतेत्युक्तिमुक्तित्रपार्तं
स्वामिन्मा हंत संतं मुखरयति हठाच्छ्रीमदंघ्र्यब्जभक्तिः ॥ २६ ॥
समस्तमस्ति यद्वस्तुजातं श्रीमत्प्रसादतः ॥
अतः किमपि नादेयमद्य श्रीचरणाग्रतः ॥ २७ ॥

मुनिः—

स्वकरै रुचिरैः स्वयं नभोगो बहुधान्योपयुजे वसूनि चिन्वन् ॥
भगवान् रविरस्य ते प्रयुक्तं कुलजस्योक्तमतीव युक्तमेतत् ॥ २८ ॥
तपोवनेनः सर्व[1]नाशिनः स ना[2]दागत्य भोः पुण्य[3]जनाः सहस्रशः ॥
अस्रा[4]ण्यजस्राण्यभिवर्ष्य वीक्षिते दीक्षाप्रवेशे प्रतियंति संप्रति ॥२९ ॥
मदकर्बुरकुंजरोत्करान् वनसंचारपरान्विशृंखलान् ॥
विनिहत्य नृसिंहशावको यश एव प्रतनोत्विहोज्वलं ॥ ३० ॥
रघूत्तमं लक्ष्मणमात्रसाह्यं प्रदेहि मे राक्षसलक्षशांत्यै ॥
इत्युक्तिरासीदिव कौशिकात्सा भूभृत्सभायामशनिप्रपातः ॥ ३१ ॥

---

१ यागनाशिनः यागेच्छाविशिष्टाश्च । २ निरंतरं । ३ राक्षसाः पुण्ययुक्ताश्च ।
४ रक्तानि अश्रूणिच ।

श्रुत्वा तत्कालकूटावरजमुनिवचः संगतास्तत्र पौराः
प्रोचुः सर्वे तदानीं मुनिरयमखिलामित्रामित्येव सत्यं ॥
मित्रे चर्षावितीमे स्फुटमभिदधते गौरवायास्य सूत्रं
पाणिन्याद्यास्तु भीतास्त्रिभुवनविदिताद्दारुणादस्य रोषात् ॥ ३२ ॥
कौशिक एष न तापसनाथः किं तर्हि नूनमपशकुनः ॥
आनंदनिवसतेर्नः समुपस्थित इति शनैर्जना निगदुः ॥ ३३ ॥

दशरथो दीनः ।

पृथुकेन विनानेन वर्षीयानेष राघवः ॥
जीविष्यति कथं नाम स्वामिन्नद्य प्रसीद मे ॥ ३४ ॥

मुनिः—

नादेयमस्ति सकलमित्युक्तं यद्वचः पुरा ॥
न पदभ्रष्टतां कश्चित्तत्सद्यः प्रतिपद्यते ॥ ३५ ॥
यर्हि प्रभो सदशनं वदनं तदार्थैः संपन्नया वितथया तव जिह्वया यत् ॥
ना स्पर्शिना व्ययमिदं जठरत्वभाजो वक्त्रादुदेति कथमद्य विचित्रमेतत् ॥ ३६ ॥
पूर्वापरे वचसि तेऽस्ति सदानता या वृत्तिः समैव नतु विग्रहभेदमात्रं ॥
मन्ये तवाद्य नृपते बहुलोपकौरिभात्रे भविष्यति कथं न तथाविधत्वं ॥ ३७ ॥

इह वितरणशालिता नृपाणां महितान्या रणशालितापि राजन् ॥
विमृश स्वयमेव तत्र युक्ता कतरा स्याद्भुवनत्रयीविजित्यै ॥ ३८ ॥
राजन् राजगलप्रभुः कुलपतिश्चाशाधिरोहद्यशा-
श्चोदारोर्यतितापदो पिबत चेत्कुर्यान्नकारं मुखे ॥
हीनत्वं समवाप्नुयादिति महाश्चर्याय नो जायते
पश्यास्पृश्यतयैव दृश्यत इतश्चेद्वासवोऽपीदृशः ॥ ३९ ॥
रामो रामो राम एवं वदंते नित्यं यस्मिंस्तत्र रामोस्ति सत्य ॥
यत्र त्वाहुर्नैव रामो न रामो रामः स्पष्टं तत्र नास्तीति मन्ये ॥ ४० ॥

दशरथः—

आयुष्मता राघवेण काकपक्षधरेण किं ॥

---

१ नकाररूपाव्ययं लृतुलसानां दंताः । २ दानस्य भावः तत्ता तस्याः । पक्षे सदा नस्य भावः नता तस्याः । ३ व्याकरणशास्त्रीयः । ४ उपकारी लोपकारी च । ५ राजगलसंरक्षकः । न कारमुखेन नरेषु अजगलवरिष्ठः । एवं सर्वत्र नकारयोजना । ६ वासव इंद्रोपि नकारमुखत्वेन वासवः नूतनमद्यरूपस्तेनास्पृश्यश्च भवति । ७ रा दाने । यत्र दानं तत्र रामास्थितिः । वदंते भासने तङ् । यत्र दानाभावस्तत्र रामो नास्ति ।

अवलंब्य भक्तपक्षं राक्षसान्हन्मि कौशिकं ॥ ४१ ॥

मुनिः—

अर्थिप्रत्यर्थिविषये दानेनोभयथाप्यसि ॥
शूरः परमकांडेऽद्य कुतः कोदंडतांडवं ॥ ४२ ॥
अंतं नेतुं मन्युमेकं समर्थः साकं युद्ध्वा राक्षसैर्न त्वमेव ॥
स्यात्कोऽप्यस्मिन्नप्ययुद्ध्वा तमंतं नेतुं त्वीष्टे सर्वथैवैष रामः ॥ ४३ ॥
विश्वस्य मित्रे मयि याचति त्वमरातिर्भावं प्रकटीकरोषि ॥
अतस्त्वनिष्टं भवितैव तस्मात्कुलेशितुस्ते सवितुर्न तोषः ॥ ४४ ॥
तदा दशरथः कुंतशताघातसमन्वितः ॥
शल्यार्दिताश्च कौशल्याप्रमुखा राजयोषितः ॥ ४५ ॥
विहातुं रघुं सर्वथा नोत्सहेऽहं सहस्रापराधोस्मि सर्वं मदीयं ॥
क्षमस्व क्षमस्व प्रसीद प्रसीदेत्यभिव्याहरन्पादमूले पपात ॥ ४६ ॥
नीत्वैकांतमथावदद्दशरथं श्रेष्ठो वसिष्ठो गुरू
रामोयं मनुजो न किंतु भगवान्साक्षाद्धरिः सोऽमरैः ॥
भूभारोद्धृतयेर्थितस्तवगृहे जातो भवान्कश्यपः ॥
कौसल्याऽदितिरप्यभूत्किल पुरा युष्मद्वरं साधकः ॥४७॥
राजन् रमास्य परमा रमणी विदेहराजस्य गेहममलं समलंकरोति ॥
रामेण तां सकलयौवनरत्नभूतां सीतां य एष सह योजयितुं समागात् ॥४८॥
सदाकारस्य रामस्य राजन्सश्रीकता पुनः ।
सुलभा कौशिकस्यास्य प्रसादेनैव नान्यथा ॥४९॥
अजगमरहिततेयं याते शोकाय जायते सुमते ॥
निपुणं विचार्यमाणेऽनंतक्षेमाय जायते नैव ॥५०॥
सद्यस्तपस्योपदेशेन राजाभूदृतसंशयः ॥
न किं समाधिः साधीयान्सम मे न सुमेधसः ॥५१॥
स्वस्थोऽभवद्दशरथो निजकल्पनोत्थमस्तोकमपहाय तदात्व एव ॥
शोकस्तु तावदिह रामवियोगजन्यो यावन्न सांद्रदयया गुरूपदेशः ॥५२॥

संभावितप्रत्यारव्यानां कौसल्यां समाधातुं प्रवृत्ते पंकिरथः । अंग प्रिये ।
राजा पाति निजात्मजानिव भुजा शाली द्विजाद्याः प्रजा ॥

---

१ दाने खंडने च । २ मन्युर्दैन्ये क्रतौ कुधीत्यमरः । ३ अहमपि कश्चिदपि वा । ४ शत्रुभावं दानाभावं च । ५ शापदानेन यागाभावश्च । ६ सुंदराकारस्य । अस्तीति सन्विद्यमान आकारो यस्य आराम इत्यर्थः ।

एतद्वक्तुमलं व्यनक्ति जनकेत्याख्यैव यस्य स्फुटं ॥
वृत्तं गायति यस्य च श्रुतिशिरः श्रीयाज्ञवल्क्यप्रिय-
छात्रो ब्रह्मविदामुदारचरितो राजर्षिरास्ते श्रुतः ॥९३॥

धन्यस्य विन्यासमिवास्य कन्यारत्नं प्रियेदाद्वसुधा प्रसादात् ॥
यां रत्नगर्भामवदन्वदंति बुधा वदिष्यंति यदीययोगात् ॥९४॥
लावण्यरूपकुलशीलगुणप्रकर्षानस्या निशम्य नरनायकतोकलोकः ॥
तत्कामतप्तमनसा तरसा तपोभिर्गौरीं वरांगि वरिवस्यति मंगलाख्यां ॥९५॥

औरसी तादृशी तस्य कला चांद्रमसी यथा ॥
अन्या कन्यास्त्वये धन्या या दधात्युर्मिलाभिधां ॥९६॥
विवाहयिषुणा तेन कन्यायुगमिदं प्रिये ॥
राजर्षिणैष राजर्षिरिति विज्ञापितोऽभवत् ॥९७॥
भोः स्वामिन्प्रतिसृष्टविष्टपविवाहार्हौ वरौ सुंदरौ ॥
राजर्षीं अधिगम्य सम्यगुदयौ दुर्दम्यरम्यश्रियौ ॥
स्वेभ्योऽलभ्यवरप्रदस्य भवतः कारुण्यपुण्यं विना
कन्योद्वाहमहोत्सवं कथमहो द्रक्ष्यत्ययं मैथिलः ॥ ९८ ॥
सावित्रर्चपुरश्चर्यालब्धब्रह्मत्वसंपदः ॥
नित्यप्रशंसे वंशेऽस्मिन्पक्षपातोस्य लक्ष्यते ॥९९॥
कन्यया राजसंयोगो नास्य तोषाय जायते ॥
अयं तु सौरसंबंधोऽशेषतोषप्रपोषकः ॥१००॥
तत्साध्येष तपोधनस्तव सुते भूभृत्सभासंमते ॥
सद्यस्कात्स्वसमागमात्स ऋषितामाधाय राजर्षितां ॥
तामत्र प्रकटय्य भूमिसुतयोद्वाहं मया संभ्रमं ॥
निर्वर्त्यास्य रघूद्वहस्य सवितुस्तोषाय कल्पिष्यते ॥१०१॥
अप्यतिवात्सल्या सा कौसल्या नृपतिचाटुवचनेन ॥
तनयोद्वाहकुतूहलसुधां निधायान्वमंस्त तदशेषं ॥१०२॥

कौसल्यां समाधायागच्छंतं तमवलोकयन्नेव मुनिर्मुमुदेत्यत्र हेतुमाह ।

यो जज्ञे नृपैपुंड्रकः कृतसदारामास्थितिस्तापस-
व्याकोपात्सुपरिच्छदस्य विरहाद्वस्तप्रशस्तप्रभः ॥

---

१ सामान्यराजा चंद्रश्च । कन्यागते सवितरि जाते सति भाद्रपदमासप्राप्तिः । २ तत्र ब्राह्मणानां संतोषः प्रसिद्धः । ३ राजचमेली संज्ञकः । पक्षे नृपश्रेष्ठो दशरथः । ४ माघः विश्वामित्रश्च ।

एकांतेऽथ वसंतमन्वयगुरुं संगम्य रम्यं पुन-
र्लब्धाभूद्धरितत्वमाप्तसुमनोभावान्महामोददः ॥९३॥
गृहीत्वा कराणां नराणां स राजा पराभूतमारौ कुमारौ निवेद्य ॥
मुनेः पादपद्मेऽवदत्प्रांजलिः सन् यदिष्टं तदाभ्यामुभाभ्यां विधेयं ॥ ९४ ॥

मुनिः ।

धन्यो वसिष्ठो भगवान्भवदुरुधन्यो भवांश्चार्यमवंशसंभवः ॥
एतत्तवाभ्यस्य तु नीरजस्थलं साक्षाद्रमा सा परमानुरागिणी ॥ ९५ ॥

अथ दशरथो भोजनोत्सवमारभत तत्र हेतुमाह ।

सद्वृत्तोहि निशांतगो द्विजवरो नूनं महाभोजनो
जातश्चेज्जगति प्रकाशनकृते कल्पिष्यते नः पुनः ॥
चेत्सोयं बत कालिकापचितिहान्यास्यादिहाभोजनो
दूराद्दूरतरं प्रकाशनमुत प्रांते तु गाढं तमः ॥९६॥

अप्यर्पितं स्यादमृतायमानमन्नं पुनर्यस्य वनीपकानाम् ॥
तेनादरादर्पितमेतदेभ्यः कीदृग् बभूवेति न वक्तुमीशाः ॥९७॥

भुंजानः कौशिकः स्वादु स्वाद्वन्नं तदुपस्कृतं ॥
मेने तदस्य कदलीपर्णभुक्तिमहोत्सवं ॥९८॥
स्वेष्टं साधयितुं हि रामशरणापन्नो यदि स्यादयं
सद्यः सिध्यत एव तस्य नियतं ते भुक्तिमुक्ती स्वतः ॥
स्वाद्वन्नान्युपभुज्य लोलुपतया कामं श्लथद्वासना-
संगास्ते लुलुठुर्हि राघवगुणान्गायंत एकांतगाः ॥९९॥

तदनु मनुजनाथः सभां कृतवान् ।

विद्वद्वृद्धपुरोहितैर्हितरतैर्धौरेयपौरैर्वरैः
शूरैर्जानपदैर्विचित्रनिनदैरानंदिभिर्बंदिभिः ॥
नृत्यद्वारविलासिनीभिरभितः प्राप्तागमैर्नैगमै ॥
रम्ये हर्म्यतले वितानविमले धूपोर्मिकिर्मीरिते ॥७०॥

आनीयोत्तमसंभ्रमैर्मुनिमथाभ्युत्थाय पादानतिं ॥
कृत्वा पीठवरेधिरोप्य रुचिरे दिव्यांबरैर्भूषणैः ॥
मुक्तारत्नमयैरपूजयदसौ काश्मीरकस्तूरिको-
दंचच्चंदनगंधगंधकुसुमस्रग्धूपदीपादिभिः ॥७१॥
चित्तप्रसादोजनि तत्र विश्वामित्रस्य सर्वेषु समर्चितेषु ॥

मुधैव मैत्री करुणेति सूत्रं पतंजलिः किं रचयांचकार ॥७२॥
गृहीत्वा कराभ्यां नराणां स राजा पराभूतमारौ कुमारौ निवेद्य ॥
मुनेः पादपद्मेऽवदत्प्रांजलिः सन् यदिष्टं तदाभ्यामुभाभ्यां विधेयं ॥ ७३ ॥

श्रीरामलक्ष्मणौ प्रेम्णा समालिंग्य निजांकयोः ॥
निधायास्फालन् पृष्ठं वाचमूचे मुनीश्वरः ॥७४॥
वत्स श्री रघुनाथ यास्यसि सहास्माभि (रामः) र्यदादिश्यते ॥
तल्लाघ्यं शिरसा (विश्वामित्रः) विहाय भवनं यातव्यमस्मद्वनं ॥
(रामः) स्वामिन्कोनुभवद्वनं वनमिति ब्रूयादिदं तद्वचः ॥
सत्कर्तुं मुनिनाथ लोमनिवहः सद्यः समुत्तस्थिवान् ॥७५॥
आदौ यच्च भयं नु नाम भवनं कोस्मिन्विदध्यात्पदं ॥
किं प्रस्तौमि तपोवनं कुशलता जागर्ति यत्रानिशं ॥
भोः स्वामिन्नतएव भोगवितर्तिं दूरे विसृज्याविश-
न्पूर्वैरप्यगतिं प्रभूतफलदामिक्ष्वाकुपादादयः ॥७६॥

श्रीमत्पादयुगं प्रणम्य वदति स्तोकं पुनर्लक्ष्मणः ॥
श्रेयाञ्छत्रभृतां भुवं समवतां नः क्षत्रियाणां रणः ॥
श्रेयस्यत्र जयाप्तिरस्ति सुलभा सारण्य एव ध्रुवं ॥
यत्स्वामिन्ननरण्यपादविमुखी हा हंत साभूत्कदाचित् ॥७७॥

वाक्चार्तुर्यकलाकलापकुशलः श्रीगाधिसूनोर्गलो ॥
व्यभ्राजिष्ट पुनर्निरर्गलतया विद्वत्सभामंडले ॥
सोयं राघवलक्ष्मणोक्तवचसो वैदग्ध्यमत्यद्भुतं ॥
दृष्ट्वा किं समजायतेव सहसा सद्यो निरुद्धः स्वयं ॥ ७८॥

मुनिः—

किमहं बहुधा वक्ष्ये पंक्तिस्यंदननंदनौ ॥
तवैनौ पंचभिः प्राणैर्नीराज्याविति भाति मे ॥७९॥

तदानीं ।

सद्यो वाद्यधुरंधरान्ध्वजधरान्तांस्तान्पुनः सैनिकान्
याष्टीकान्स्तुतिपाठकान्मुनिवरप्रस्थानमाज्ञापय ॥
इत्येवं गदिते सति क्षितिभुजामात्यंतमात्यंतिकं ॥
नामृष्यन्मुनिशब्दमात्मानि मनाक् तं मौनिनामग्रणीः ॥८०॥

---

१ मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं । श्रीमत्सु मैत्री दीनेषु करुणेत्यादि ।

तदात्व एव ।

राघवौ विवृततौरवत्वचौ चापसायकनिषंगसंगिनौ ॥
संगतौ ललितजूटितालकौ गाढबद्धकरवालखेटकौ ॥८१॥

तदातिद्रवद्धृदयो नरपतिराह मुनिं ॥

महाफलार्थं सुमनोभिवृद्धिपरायणाः श्रीचरणायतं ते ॥
तत्किं सदारामरिरक्षयाढ्याः संतीत्यहो वाक्यशतैर्वदामि ॥८२॥

तदनु मुनिः किंचिद्विहस्य कौसल्यादिमातृः प्रणमयितुमंतःपुरं गतः ।

स्वस्त्यस्तु वत्सावयि गत्यनुष्णशीतोर्मिलेशौ पुनरेतमाशु ॥
इत्याशिषं मातृजनप्रयुक्तामुपश्रुतित्वेन मुनिः स मेने ॥८३॥

आयुरभिवृद्ध्यर्थं सुतयोस्तयोर्मूर्धानमाजिघ्रन्नरपतिरित्यत्र हेतुमाह ।

चिराय मे राघव एष जीवता स्थिरस्य वाजिघ्रदिति क्षितीश्वरः ।
यतो नसोरन्वयतोश्चिनोः स्थितिर्न जागरूकोत्र किमायुरागमः ॥८४॥

कौशिकः स किल रामलक्ष्मणोद्दामशोभ्युभयपार्श्व आबभौ ॥
ब्रह्मविद्विरतिवैभवोज्वलो योगभागवतधर्मभागिव ॥८५॥

सद्यस्तयोश्चलितयोरथ राजलक्ष्म्या संभेदमागतवती सममार्षलक्ष्मीः ॥
तत्कांतिपूरजठरे ललनेक्षणानि पारिप्लवान्यपि ममज्जुरतीव चित्रं ॥८६॥

यज्ञपतावव्रगच्छति सहस्रशः सुमनसो महामोदाः ॥
न्यपतन्दिवोन्नहविषे द्रुतमीदृक्प्रभवितेति कथयंत्यः ॥ ८७ ॥
असंत्यजंतो मुनिपद्धतिं ते विभूषयंतः पुरराजमार्गं ॥
विनिर्ययुर्यत्तमहोत्सवेन भावस्य तत्सांप्रतिकस्य युक्तं ॥ ८८ ॥

राजा—

वत्सौ न दुःखाकुरुतं मुनींद्रमेतद्वचो नः स्मृतयो भवंति ॥
(मुनिं प्रति) असौ कनीयानतिचापलोतो वात्सल्यतो बाल्यदशैव पाल्यः ॥८९॥

पणवकाहलमर्दलझर्झरेष्वभिनदत्सु महाध्वनिसंगतं ॥
अजनि विष्णुपदं स्वयमेव तद्विबुधसूचनकृत्समपद्यत ॥ ९० ॥
तूर्णं पूर्णमभूच्चतुर्विधमहावादित्रनादैस्तदा-
काशं तच्च निदर्शनं स्वयमभूद्यद्भूतमात्रे स्थितः ॥
वैगुण्यं व्यपसृत्य पूर्णगुणता सा सांप्रतं भाविनी-
त्येवं श्री रघुनायकेखिलसुखे विन्यस्तपर्यस्तिके ॥ ९१ ॥
पुरं प्रत्यागतो जनो रामविरहार्दितस्तमेव ध्यायन्नभूदित्याह ।
रामो वनाय यातोप्यवनायैवेति किंच नागरिकाः ॥
आत्मनि लयं गता अपि वनं गताः सम्यगीक्षणे चित्रं ॥ ९२ ॥

क्रोशमात्रे स्थितौ हेतुमाह ।

मारामं सुकुमारविग्रहमिदं राज्ञः कुमारद्वयं
स्फारं संप्रति काकपक्षधरमप्यत्यादरादात्मनः ॥
आलोक्यानुचरं तु कौशिकमुनेरंघ्रिस्थितः सद्रवः
किं त्वत्पद्मामित्र न्यविक्षत यतोनुक्रोशमेवास्थितः ॥ ९३ ॥

शरयूतटे वसतौ हेतुमाह ।

प्रथमा प्रभवति यस्य प्रायः शिवशैलवाहिनीवसतिः ॥
कामार्लयोप्यदूरे तस्येत्यवसत्स सारवे तीरे ॥ ९४ ॥

बलातिबलाविद्यादानमेतद्वीर्यवृद्धयेऽत्यत्र हेतुमाह ।

एह्येहि राघवलक्ष्मणेत्यमू मुनिः समाहूय धिया प्रसन्नया ॥
वीर्यस्य वृध्दयै पयसा महोज्वलां । ददौ बलां चातिबलां किलानयोः ॥ ९५ ॥

प्रातः स्नातुमादिशन्नंतर्गतं सूचयति मुनिः ।

भविष्यति महामोद आयुष्मन्कमलाकरः ।
स्नातव्यं शीघ्रमेवातः सस्मितं स तमब्रवीत् ॥ ९६ ॥

स्नात्वैव कामाश्रमो गंतव्येत्यत्र हेतुमाह ।

कामाश्रमं कामसमान राम स्नात्वैव यामः प्रशमाभिरामाः ॥
द्विजोत्तमा यत्र समा वसंतः संतः स्वमात्मानमुदारयंति ॥ ९७ ॥

अगदेशोयं यत्र कामाश्रमः स भवता सत्कार्येत्यत्र हेतुमाह ।

जीवो द्विर्जेद्रनिवहः करणानि संति संस्था मनोहरतरेत्यपरैव लक्ष्मीः ॥
अस्यांगकस्य सुभगस्य परं तवास्य योगं प्रतीक्षत इयं पुरुषोत्तमस्य ॥ ९८ ॥

अत्र कामाश्रमे बहुमुनिनिवासे हेतुमाह ।

दुरासदः कामरिपुर्नराणां पुरा पुरारातितपो विनिघ्नन् ॥
स भस्मसादत्र बभूव यस्मात्तपस्विनोस्मिन्बहुशो वसंति ॥ ९९ ॥

गंगासरय्वोरंगदेशस्योभयस्थितौ हेतुमाह ।

संरुध्यस्य तपस्यतो भगवतो भर्गस्य भालानल-
ज्वालाजालझलक्कया मनसिजं जाज्वल्यमानांगकं ॥
किं विध्मापयितुं नु जह्नुतनयास्नेहार्दितान्मानसा-
त्संभूता शरयूर्बतैनमभितः प्राप्ते स्वसाराविव ॥ १०० ॥

---

१ त्वरितगमनं पक्षे द्रवीभावः २ अनुक्रोशं दयां पक्षे क्रोशमनु क्रोशमात्रे । ३ कैलासवाहिनी पक्षे कल्याणसमूहवाहिनी । ४ औषधीं विद्यां च । ५ प्रातःकाले कमलसमूहः सामोदो भविष्यति । ६ समावर्तनं च । ७ गृहस्थाश्रमस्वादुदारत्वं संपादयति । ८ दंतसमूहः ।

कामाश्रमवासिनोपि मुनयो रामनिष्ठया कृतार्था इत्यत्र हेतुमाह ।

सुखं नाम कामाश्रमस्था अपि स्युः सदारामनिष्ठां मुदा चेत्सचंते ।
भजंते क्रमेणामृतं ते द्विजेंद्रा न किं तारकाधीशता तत्र युक्ता ॥ १०१ ॥

रामस्य फलसमर्पणे हेतुमाह ।

संगम्य साक्षादमृतं रघूत्तमं मनोरमं कामनिकायनिष्ठिताः ॥
तत्पादमूलं त्वबलंब्य केवलं फलं समूलं सकलं समत्यजन् ॥ १०२ ॥

तत्र प्रातःस्नानमादिशन्गार्हस्थ्यमभिनंदन्नाह मुनिः ।

कामाश्रमोतिरुचिरो रमणीयतल्पं रम्याः कथा इति निशाद्य सुखं व्यतीता ॥
एवं निशम्य वचनं स्वमथ स्मितास्यं स्नातव्यमाश्वत इति स्म स आह रामं ॥ १०३ ॥

रामादीन्नदीं तारयंतो मुनयः कृतार्था इत्यत्र हेतुमाह ।

तैरणिमुपास्थितवंतः प्रातर्ये कालपर्ययाच्चाकिताः ॥
त्रय्याः प्रसादपात्रं न बभूवुस्ते कथंकारं ॥ १०४ ॥

रामस्तपस्विनिकरान्भवसागरान्तानुत्तार्य तांच सरयूं स्वयमुत्ततार ॥
आसाद्य दक्षिणतटं वचनं जगाद किं न्वेतदस्ति गहनं किल कालरूपं ॥ १०५ ॥

मुनिः—

अयि वत्स रघूत्तंस जगदानंदवर्धन ॥
आयुष्मता त्वयोक्तं यत्तथैव न संशयः ॥ १०६ ॥

अस्यारण्यस्यातिकष्टत्वे हेतुमाह ।

सुत्रामा वृत्रहत्या कलुषकलुषितः सोभिषिक्तो मुनींद्रै-
र्ब्रह्मिष्ठैर्ब्रह्मपूतांबुभिरखिलमलं निर्मुमोचातिगात्रात् ॥
तावेतौ सुप्रतीतौ किल मलदकरुषाभिधौ नीवृतौ य-
त्तत्र न्युप्तं तु कृष्णं परिणमत इवारण्यरूपेण घोरं ॥ १०७ ॥

अत्र ताटका नाम राक्षसी वसतीत्याह ।

विवासितौ जनपदौ कृत्वैतावयि राक्षसी ॥
दुरंतकाननं स्वस्य निवासाय व्यरोपयत् ॥ १०८ ॥

तद्वृत्तमाह ।

यक्षः सुकेतुर्ह्रहिणप्रसादादामजीजनत् ॥
रूपलावण्यसंपन्नां नागायुतबलोद्धतां ॥ १०९ ॥
कुंभनंदनसुंदस्य तस्याश्चोपयमोऽभवत् ॥

---

१ कामाश्रमः प्रसिद्धः । २ सतां नक्षत्राणामारामः विहारस्थानं नभः सत्रारामः । ३ सूर्यं नौकां च । ४ तयोरुपयमो विवाहो जातः स तयोः समीपे यम एव जातः कुसंतत्या मरणहेतुत्वात् ।

आदौ तु प्राणिजातस्य सर्वस्य समजायत ॥ ११० ॥
सुतं मारीचनामानं सुषुवे सुंदसुंदरी ।
मार्येवायमिति स्वार्थं यदाख्यैव व्यचिख्यपत् ॥ १११ ॥
सुंदे मृते सा स्वसुतान्विता मुनिं कुंभोद्भवं धर्षयितुं समुद्यता ॥
सद्योगता राक्षसतां समीहितं हितं कुतः पूज्यतमव्यतिक्रमात् ॥ ११२ ॥
अवतैव सा हंतव्येत्यत्र हेतुमाह ।
असुरी सा सदा सत्वप्राणसंकटकारिणी ॥
आयुष्मता सत्वभृता भवता हन्यतामियं ॥ ११३ ॥
स्त्रीवधमनंगीकुर्वाणं प्रवर्तयितुमाह ।
हंतुं प्रवृत्तवति मय्यबलां किलायं
किन्नो वदिष्यति जनोपि बतैतदास्तां ॥
श्रीमद्वसिष्ठचरणास्तु कथं सहेरन्
(मुनिः) तत्सत्यमेव यदि सा त्वबलैव सौम्य ॥ ११४ ॥
यूकायंते हि कलभा यत्कचारण्यचारिणः ॥
आयुष्मन्नवशिष्टांगप्रमाणं मातुमर्हसि ॥ ११५ ॥
रामः—
बाणस्य मे किमपि दुष्करमत्र नास्ति[1] दोषोत्थितिस्तु भगवन्भवितैव मह्यं ॥
मुनिः—
यत्र क्व वा भवतु नाम परंतु रामभास्वत्कुलैकातिलके त्वयि सा कथं स्यात्॥११६॥
एवं वचनवैचित्र्योक्त्या सदाचारेणापि द्रढयति ।
अनुरूपकर्मविमुखी हंतव्यैवाबलापि पुरुषेण ॥
लोकस्य शोकदात्री विद्युज्जिव्हा हता हि शक्रेण ॥ ११७ ॥
किंच ।
लोकं बता कौशिकमेनमृच्छती भार्या मृगोरासुरपक्षपातिनी ॥
जघ्ने महासत्वभृतापि शार्ङ्गिणेत्याख्यायेका न श्रुतिमार्गमागता ॥ ११८ ॥
रामो विरुद्धधर्माक्रांततामसहमानः पर्यनुयुंक्ते ।
नारीणां नाशः खलु नत्वैरिनाशो मतः सुधियां ॥
किंतु बलेष्वाघातो (मुनिः) नह्यबलाघात ईदृशो भवति ॥ ११९ ॥

---

१ इयं नागायुतबलत्वादबला नास्ति ।

२ नारीणां नाश इति पदैः सुधियां अरिनाशाभावइति मतः । अन्यच्च स्त्रीहननेन बलनाशश्च भवति । अबलाघातेन त्वदुक्तो बलाघातो न भवतीति मुन्यभिप्रायः ।

रामः—

अर्युच्छेदकरः कथं कथमहं स्वामिन्विदध्यामिमं
नार्युच्छेदमये भवंतु भवते भद्राणि भद्रायुतं ॥
अस्त्युच्छेदकरो गुरोर्ववचनतः स्त्र्युच्छेदकृद्भार्गवः
किन्नाभूत्सबला सुदर्दत्किमबलासून्नाहरद्वासवः ॥ १२० ॥
किंच ।
यः क्षोणीभरवारणे धृतमहादीक्षः प्रवीराग्रणी-
स्तस्य स्त्रीविध एव तत्क्रतुविधौ श्रीविघ्नराजार्चनं ॥
यद्रामो जननीं जघान भगवान्कृष्णोपि तां पूतनां
हंतेति त्वमपीदृशः कथमिमं दुस्तर्कमुत्थापयेः ॥ १२१ ॥
संभूतिस्तु भवादृशां रघुपते सत्पालनार्थं खलु
त्वत्पक्षो मम नार्यनाश उचितस्त्वेवंविधः सोप्यसौ ॥
नूनं युक्ततरो यदि त्वथ पुनः स्यादार्यनाशोद्भवः
(रामः) कर्तव्यस्तदनार्यनाश (मुनी) इति चेत्तर्हीष्टसिद्धिर्हिनः॥१२२॥
रामायमगंनोच्छेदस्त्वां धर्मपथवर्तिनं ॥
न निषेधं समाचष्टे प्रवृत्तिं प्रत्युत स्वयं ॥ १२३ ॥

अत्रांतरे लक्ष्मणः ।

प्राणस्पंदविधूयमानरजसा संकीर्णमत्युत्कट-
त्रासं नित्यतमोनिवाससदनं दूरस्थसत्वस्थिति ॥
तन्मन्ये खलचित्तवद्वनमिदं तन्निर्गुणं श्रीमता
निर्मुक्तं विशिखं विनेह कतमः संसाधयेत्कथ्यताम् ॥ १२४ ॥

रामः—

कार्याकार्यव्यवस्थायां शास्त्रमेव परा गतिः ॥
तत्तु श्रीमदादेशान्न किंचिदतिरिच्यते ॥ १२५ ॥
दंदह्यमानैव भवत्क्रोधज्वलनहेतिभिः ।
तत्रैकस्तु शरक्षेपः शिष्येस्मिन्नवशिष्यते ॥ १२६ ॥
भुक्तोच्छिष्टनरास्थिपंजरमनागाश्लिष्टमांसाशन-
भ्राम्यद्वृध्रशृगालकंककरटप्रागभारकोलाहलं ॥
झिल्लीझंकृतिनादितं रघुकुलालंकारहीरो महा-

---

१ दुष्टनाशः आनार्यनाशशब्देन नाशः फलति । २ पदच्छेदेन प्रवृत्तिं । उच्छेदो नै भवति । ३ बाणं सन्यासिनं च ।

धीरो वीरवरो विवेश विपिनं तत्ताटकाधिष्ठितं ॥ १२७ ॥
यत्र पुरस्कृतकंटककुजन्मनां प्रायशस्तु संबाधः ॥
यत्र च मित्रस्यापि प्रसरो न परस्य का कथा तत्र ॥ १२८ ॥
अथैष सज्जीकृतभीमकार्मुकः प्रावर्तयद्दंकरणं सुदारुणं ॥
येनास्फुटं तदद्भुतं दृषत्समं न तद्विचित्रं विदुषां व्यरीरचत् ॥१२९॥

तदात्वएवाद्भुतमाः किमेतदित्युच्चमाभाष्य पिशाचिका सा ॥
अभ्यद्रवत्घोरकठोरघोषाः भूभृद्वरेण्यं नवकालिकेव ॥ १३० ॥
रामास्तामवलोक्य वाचमवदत्सज्यं स्वकं कार्मुकं
कृत्वा संप्रतिसावधानमनसा भ्रातः स्थिरं स्थीयतां ॥
सा विष्वग्विसरच्छिरोरुहभराभिन्नाजनाद्रिप्रभा
तप्तभ्राष्ट्रसगर्भ्यवृत्तनयना दंष्ट्राकरालानना ॥ १३१ ॥
आध्मातश्वसनानिलोर्मिविवृतप्रोच्छूननासापुटा
लोलंत्याततसृक्कणी रसनया लेलिह्यमाना मुहुः ॥
कर्णन्यस्तकरींद्रकुंडलयुगा कंकालमालाकुला
व्यावल्गद्वरणीधराधिपसमुत्स्थूलप्रलंबस्तना ॥ १३२ ॥

क्रोधावेशवशेन बाहुयुगुलीमुन्नर्तयंती भृशं
नाभीगव्हरनिःसरच्छशमृगाकुंभोदराडंबरा ॥
मातंगांत्रवराटनद्धविपुलश्रोणीस्थलीगोणिका
क्षोणीमानमयंत्यतिस्पदपदप्रोद्यत्प्रहारैः खरैः ॥ १३३ ॥

क्रेंकारध्वनिमूर्छिताट्टहसितैरुद्गर्णिकर्णज्वरा
नृत्यंती गगने पतंत्यविरतं प्रस्फोटयंती करौ ॥
वक्त्रन्यस्तनृवर्ष्मचर्वणगलल्लोलाक्तरक्तद्रवा-
लक्तव्यक्तरसाभिषिक्तवपुषा नक्तंचरी दृश्यते ॥ १३४ ॥

(कालापकं)

नरवरस्य परस्य तु ताटका त्वदुदभेद्य चिरेण शरेण यत् ॥
अमितया तु ततेर्गतिहेतवे तदुदघाटि कपाटममुष्य किं ॥ १३५ ॥
अंजनाचलतटस्य तटाकः शक्रवज्रपतनादिव सद्यः ॥
अस्फुटत्तदिह शोणितनद्यः काननेष्वभित ऊहुरवद्याः ॥ १३६ ॥
यदैव ताटकानाम्नी निपपात निशाचरी ॥
तदावनीस्थाः प्रायेण भग्ना एव कुजन्मिनः ॥ १३७ ॥

---

१ पंतश्रेष्ठं राजश्रेष्ठं च । २ चंडिका मेघपंक्तिश्च ।

कांतारसीम्नि युगपत्पतत्त्रयीयं सा कुंभसंभवमुनेः किल शापसृष्टिः ॥
सा नाकिनां च नभसः कुसुमामिवृष्टिः सा कौशिकस्य च मुनेः परितुष्टदृष्टिः।१३८।

ताटकायाः स्वरूपावगमे हेतुमाह ।

श्रीरामेण करे कृतस्य सुमहावंशोद्भवस्य श्रुति-
स्पृष्टो बाणवरो महाफलधरो लग्नो न किन्नामतत् ।
भिद्यात्तत्र विरक्तता तु सहजा तस्योपरिष्टाद्यथो
पातोपीशदृशो विदेहफलकः किन्न स्वरूपागमः ॥ १३९ ॥

सा उत्तमलोकं गतेत्यत्र हेतुमाह ।

सद्रूपिणी यक्षसुता समस्ताऽलंकारयुक्तात्र परानुरक्ता ॥
रम्यं परिक्रम्य बहु प्रणम्य रामं समामंत्र्य जगाम धाम ॥ १४० ॥

अथ विश्वामित्रेणेंद्रनिदेशेन श्रीरामाय विद्यादाने हेतुमाह ।

आसुर्यास्तु परिक्षये परिचिता त्वद्यानवद्या पुन-
र्विद्या वृद्धिमुपेयुषी द्रुततरं रामे विशुद्धेऽर्प्यताम् ॥
तर्ह्येवास्ति कृतार्थतास्य विबुधा अप्येवमाहुस्तदे-
तस्मिन्गौरवमेव तन्मुनिवरो विद्यां स तत्रार्पयत् ॥ १४१ ॥

उपदेशमात्रादेव सर्वाण्यस्त्राणि रामं प्रति साक्षादुपस्थितानीत्यत्र हेतुमाह ।

सांगानि यानि सविधं समर्पितानि प्रसादतोस्त्राणि ॥
तानि ब्रह्मादीनि स्थितानि साक्षादुपेत्य तद्युक्तं ॥ १४२ ॥

श्रीरामेण तानि स्वत्हृदयस्थानि कृतानीत्यत्र हेतुमाह ।

तान्यस्त्राणि विपक्षदंभदमनास्ते जंभकाद्याः पुर-
स्तस्थुः प्रांजलयः प्रसन्नमनसः स्वस्पर्शनाकांक्षिणः ॥
ते सर्वे त्वद्दैर्यंगमाः समभवन् हंहो मम स्वामिनो
रामादत्र जगत्त्रये वद परं कोन्यः कृपासागरः ॥ १४३ ॥

रामः—

स्वामिन्नेष पुरः स्फुरत्यनुपमः कस्याश्रमः कथ्यतां
(मुनिः) अस्माकं वसतिस्थलं रघुपते नाम्नैष सिद्धाश्रमः ।
एतस्मिन्बलियज्ञविघ्नविधये सिद्धिं गतो वामनः
(रामः) तत्संपर्कवशेन किन्नु भवतामप्येष हंति क्रतून् ॥ १४४ ॥

---

१ शत्रुवरः पेक्ष स्पर्धं । २ देहाभावो मुक्तिरित्यर्थः । ३ आसुरसंपदः ताटकायाश्च । ४ अंगसहितानि विधिसहितं यथातथा । ५ क्रूरमूर्तयो देवविशेषाः । ६ क्रूरा अपि त्वद्दयंगमा प्रिया इत्यर्थः कृपासागरस्वास्पक्षे त्वद्दयेप्राप्ताः ।

सदाश्रमोत्र भगवन् हंत राघव तत्त्वतः ॥
परमस्याप्यलंकारकर्ता त्वं कुलनंदन ॥ १४६ ॥
येषामागमतो गृहेषु गृहिणः कंपं परं भेजिरे
सदास्ते किल कौशिकाद्विजजना नित्यं गुहावासिनः ॥
हित्वांध्यं परमां दशं समभजन्संप्राप्तमात्रे पदं
श्रीरामे दिनकृत्कुलैकतिलके चित्रं तदासीत्परं ॥ १४६ ॥
शरहस्तास्त्रयोप्येते विस्फारितशरासनाः ॥
दधुर्महामन्युदीक्षां हंतुं संपदमासुरीं ॥ १४७ ॥
प्रवृत्तेस्य शुचौ मन्यौ जगत्प्राणसहायतः ॥
ब्रह्मांडानि तृणं यत्र कैवास्थासुरसंपदां ॥ १४८ ॥

षष्ठेऽहनि मारीचादीनामागमे हेतुमाह ।

व्याः सूत्रैकंठा अपि हंत भूरिशः स्तोत्राणि शस्त्राणि च संप्रयुंजते ॥
इतीव रोषात्सहसा विहायसा निःसाध्वसाः पेतुरनेकराक्षसाः ॥ १४९ ॥

विश्वामित्रशिष्यः—

गर्जतः पर्जन्यवदस्त्रविसर्जनकराः करालास्याः ॥
मारीचसुबाहुमुखा मखांतराया रयात्प्रयांत्येते ॥ १५० ॥
अस्त्रवृष्टिकरा घोराः कर्बुरा वत्स राघव ॥
दृश्यंते (रामः) तादृशः स्वामिन्विधास्ये पश्य तत्क्षणात् ॥ १५१ ॥

श्रीरामस्य बाणे मानवास्त्रप्रयोगे तदभिमंत्रितशरेण च मारीचमस्पृष्ट्वैव सागरक्षेपे च हेतुमाह ।

श्रीरामेण नरोत्तमेन विशिखः संप्रेषितो मार्गणो
धर्मं दर्शयितापि नैनमशुचिं मारीचनीचं स्पृशन् ॥
दूराद्घाणपतत्रपातपवनैरुच्चैर्भ्रमय-
न्नीचैर्नीरनिधौ निवापविधये निन्ये निमेषार्द्धतः ॥ १५२ ।

सुबाहुवधे पावकास्त्रप्रयोगे हेतुमाह ।

दूरोज्झिते सहज रे सहसा सुबाहुः क्रोधात्पतंग इव सागर उद्दिदीपे ॥
श्रीराघवोपि भवतादृश एव पापेत्यालोचयन्समदधादिव पावकास्त्रं ॥ १५३ ॥

अथ वायव्यास्त्रप्रयोगे सर्वे तदनुचराः परास्ता इत्यत्र हेतुमाह ।

---

१ उत्तमाश्रमः सर्वदाश्रमश्च । २ अलंकरणकर्ता श्रमसमाप्तिकर्ता च । ३ दर्भः बाणश्च । ४ दर्भासनं धनुश्च । ५ मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः । ६ दुर्बला ब्राह्मणाः । ७ मेघः । ८ अस्रमश्रुणि शोणितेत्यमरः । ९ कर्बुरः पापरक्षसोरिति मेदिनी । १० मनुदेवताकः ११ मातृमरणेन.

वायव्यास्त्रं रघूत्तंसे प्रयुक्तवति तत्क्षणात् ॥
खचक्रचारिणोऽभूवन् रक्षःपुत्रकरेण वः ॥ १९४ ॥
धनुषि ज्यां नीरे मारचिं पावकास्त्रेण सुबाहुं
वायव्येनेतरान्नागने प्रयुक्तवानित्यत्र हेतुमाह ।
प्राग्भावनासदृशमेव हि वृत्तमस्यै तत्सत्यमेव समजायत संजिहीर्षोः ॥
अस्याप्यहो यदभिसंधिरनुक्रमेण ज्यानीरपावकसमीरणपुष्कराणाम् ॥ १९५ ॥
तदा मुनयो रामं सत्कृतवंत इत्यत्र हेतुमाह ।
दवावस्थिताः पक्षहीना द्विजेंद्राः शरासारतो यस्य सद्यः प्रशांताः ॥
कृतार्थाः पुनः सत्क्रियां नाम कां कां जगज्जीवनस्यास्य रामस्य चक्रुः ॥ १९६ ॥
नेत्रैश्चिरेण निपपुर्वदनं चुचुंबुर्जघ्रुः शिरस्यथ परे दृढमालिलिंगुः ॥
संतुष्टुवुर्ननृतुराजहसुश्च तूष्णीं तस्थुः परेश्च मुमुचुर्ददुराशिषोऽन्ये ॥ १९७ ॥
रामस्याग्रपूजायां हेतुमाह ।
यज्ञो दर्शयितापि योत्र निर्वर्तनं सोयं पुनश्चामृत-
प्रायोभूदुदपाश्रयेण न चिरात्तत्रत्यसभ्यार्चने ॥
अप्येतस्य रघूत्तमस्य पुरुषोत्तंसस्य शंसानिधे-
स्तद्वाचा मनसापि चाग्रयंजने को नान्वमीदज्जनः ॥ १९८ ॥
विश्वामित्रस्य प्रियछात्रः ।
कुशासनं वन्यजनान्यदमाच्छमलालसात् ॥
तद्वै रघोः परमहोपचितिं समसूचयत् ॥ १९९ ॥
द्विजवरे मखमंडपचत्वरेऽमृतकरे त्ववने जनसादरे ॥
महदतिक्रमभीरुतया तदा समकुचद्रघुनाथपदांबुजं ॥ १६० ॥
तदा मुनिः—
अर्घ्यः स्याद्भवतां नृपः परमयं नानापदक्षालना-
दायुष्मंस्त्वदृतेत्वसौ विधिरिति ब्रूमो भवच्छासनाः ॥ १६१ ॥
एतद्वैभवमीदृगेव जनकेनाप्यर्हणीयं यदि-
त्याह स्म द्विजशेखरो दरदरस्मेराननो राघवं ॥ १६२ ॥
अमी अगुरुगंधास्त इत्येवं विनिवेदयन् ॥
चातुर्यार्च्चयांचक्रे लोकाचारानुसारतः ॥ १६३ ॥

---

१ वासना. २ जगत्संहारं कर्तुमिच्छोः परमात्मनः रामस्य । ३ द्वौ वनवन्हौ चेति मेदिनी । ४ बाणो जलं च । ५ मेघस्य पक्षे स्पष्टं । ६ मृत्युं । ७ दर्भासनं पृथ्वी शासनं च । ८ उत्कृष्टतेजःसमृद्धिं । पक्षे स्पष्टं मह उत्सवतेजसोरिति मेदिनी । ९ पादधावनतत्परे । १० गुरुगंधा अपि अगुरुगंधा इति लोकाचारः । पक्षे अगुरुगंधाः ।

एताश्च वन्यसुमनोमालस्ते हृदयंगमाः ॥
भवंत्विति वदन्प्रेम्णा कंठदेशे न्यवेशयत् ॥ १६४ ॥
सद्वासश्रिय एतस्य रामस्य स्वस्य चात्मनः ॥
तत्याज द्वे त्वचावेकां तारवीं रौरवीं परां ॥ १६५ ॥
विनिवेद्य धूपदीपौ यानीह फलानि मधुरमधुराणि ॥
स्वाभिमतानि व्यसृजत्स तानि रघुनंदनस्य पदमूले ॥ १६६ ॥
सुखी भव सुपूर्णायुः सुकलत्रोथ सुप्रजाः ॥
सुशीलः सुयशाः सौम्य सुवृत्तः सुगुणः सुधीः ॥ १६७ ॥
सुप्रसन्नेन मनसा सुवर्णमयमुत्तमं ॥
आशीःसहस्रमेतस्मै दक्षिणां प्रत्यपादयत् ॥ १६८ ॥

अथ मुनिः—

पूर्णायुर्भव नीरुजो भव सदाचारप्रतिष्ठो भव
कोदंडश्रुतिपारगो भव तथैवान्वीक्षिकीज्ञो भव ॥
लोकत्राणपरायणो भव रिपुप्राणापहारी भव
श्रीस्त्रीको भव सुप्रजा भव सदा संतुष्टचेता भव ॥ १६९ ॥
अर्घ्यभ्यर्थितकामदो भव मृदुस्वादुप्रवक्ता भव
भूभृन्मौलिकिरीटसन्मणिगणोद्भृष्टांघ्रिपीठो भव ॥
लोकश्लाघ्यमहायशा भव पुनर्योगी विरागी भव
श्रुत्यंतार्थरहस्यविद्भव परं भो ब्रह्मनिष्ठो भव ॥ १७० ॥
सर्वेज्यावसितो यो द्विजैराजस्यास्य करशिरःप्रसरः ॥
विष्णुपदे समजायत स सूचकः पूर्णिमावगतेः ॥ १७१ ॥
विष्णुपदे घनरागश्चेज्जलवृष्टिस्तदा लोके ॥
सैषा पुनरस्य न किं बभूव बहुधान्यभवनिवापाय ॥ १७२ ॥
तदश्रुधारासंपातस्तत्र गंगामचीक्लृपत् ॥
चिदात्मकत्वात्सकलो जलांशो गलितो नु किं ॥ १७३ ॥
पत्न्यस्तत्र तपस्विनामुभयतोऽधिष्ठाय पंक्त्यात्मना
तस्थेदीवरसुंदरैरविरतं वक्त्रं पपुर्लोचनैः ॥
यद्यच्चास्य विधीयतेतिशयनीं तत्तत्तनोति श्रियं
दृष्टिः स्यादिति कल्पयंत्य इव किं मय्यातृटिं गच्छयोः ॥ १७४ ॥

---

१ वसनं निवासश्च । २ पूजा. ३ रामः चंद्रश्च । ४ अन्यजन्म ।

अवभृथे मुनेः करसंपृक्तजलार्द्रिनो बभूवुरित्यत्र हेतुमाह ।

नीरं परमहंसस्य समृद्धिकरमुत्तमं ॥
स्पृहणीयं न कस्यासीत्कौशिकस्य करार्पितं ॥ १७५ ॥
प्राणिनः प्रीणयामास तत्र साहुण्यसिद्धये ॥
अन्नान्यमृतकल्पानि सोनल्पान्युपकल्पयन् ॥ १७६ ॥
महार्घवस्त्राभरणैर्दक्षिणाभिश्च तोषयन् ॥
प्रेक्षकान्प्रेषयामास प्रेमवादपुरःसरं ॥ १७७ ॥

तक्रतुन्यायेन विवाहपत्रागमने हेतुमाह ।

श्रीरामविवाहमहं द्रक्ष्यामि कदेति चिंतयंत्यायात् ॥
सामरवैसुधोल्लासं मुद्रितमथ कुंकुमारुणं पत्रं ॥ १७८ ॥
स्वस्ति श्रीमुनिवृंदवंदितभवत्पादारविंदेष्वहं
वैदेहः प्रणतीः शतं विरचयन्बद्धांजलिः प्रार्थये ॥
सीताया दुहितुः स्वयंवरमहं कर्तास्मि तन्मंडपा-
लंकारं विरचय्य कार्यमखिलं दासस्य संपाद्यतां ॥ १७९ ॥

पत्रागमसामग्र्यभावेपि पत्रागमने हेतुमाह ।

विलक्षणं सर्वमनोज्ञमंते वसंतमासेदुषि निष्पलाशे ॥
वन्येत्रे पत्रागम एष तत्र निमज्जयामास न चित्रपूरे ॥ १८० ॥
भाविस्वयंवरनिमित्तकमात्रमेवं बाह्येभ्यदर्शयदसौ नरवाह्यपत्रं ॥
अंतर्मनस्यथ पुनर्नृवरस्य तत्र प्रास्थानिकीव शिबिकेयमिति व्यवास्यत् ॥ १८१ ॥

दूतस्य तस्य श्रीराघव एवायमस्मद्राजदुहितुर्योग्यो वर इत्यंतराशयं सूचयतस्त-
त्सत्कारे तेने सह संलापहेतुमाह ।

नूनं पत्रैवहस्य तत्रभवतो यातस्य तत्राश्रमे
रम्ये माधवयोगजातसुमनोभावस्य तस्याभवत् ॥
दिव्यामोदपरंपराभृशतराः संतन्वतः सर्वतः
साफल्यं द्विजराजपर्वदुपलाल्यत्वं पुनस्त्वार्यिकं ॥ १८२ ॥

---

१ अमराणां वसुधायाश्च हर्षजनकं पक्षे सामवेदघोषसुधोल्लासं । २ पत्रं गरुडे पक्षे स्वष्टं मुद्रांकितं वैष्णवत्वात् पक्षे स्वष्टं । ३ रलयोः सावर्ण्याद्रुरुडरक्षकं । शिष्यं रामं । पक्षे वसंतं । ४ पत्रशून्ये मारितराक्षसेच । ५ विश्वामित्रे वृक्षे च । ६ नरेण वाह्यं पत्रं । पक्षे नरैर्वाह्यं पत्रं नरवाह्यपत्रं । ७ पत्राणि वहतीति पत्रवहः वसंतः । पक्षे लेखवाहः तस्य । ८ गंधः हर्षश्च । ९ पक्षिणः । ब्राह्मणाश्च ।

स वासनोपबंधेपि[1] परमानंदतुंदिलः ॥
मुक्तः संचरति स्मेति चित्रमाविरभूत्परं ॥ १८३ ॥

रामः—

गुरुराज भवत्कार्यं न किंचिदवशिष्यते ॥
अतः पितृगृहं गंतुमनुग्राह्योस्मि सांप्रतं ॥ १८४ ॥

विश्वामित्रः—

विवाहोत्सवमननुभूय तव गमनं न संभवतीत्याह ।

वत्स राम महाबाहो भूभर्तुः श्रीमतस्तव ॥
महाविवाहमुत्सृज्य गतं कथमिवोचितं ॥ १८५ ॥

रामः—गुरुपादैः समादिष्टः केवलं यागसिद्धये ॥

विश्वामित्रः—तद्धनुर्याग एवायं न किं सिद्धिमपेक्षते ॥ १८६ ॥

रामः—स्फारं स्फारं प्रतीक्षेत जनको मारसान्वितः ॥

विश्वामित्रः—उपगम्याशु त र्ह्यस्य तोषो ननु विधीयतां ॥ १८७ ॥

रामः—सर्वथा गुरुकार्यंतु नावशिष्टं कथंचन ॥

विश्वामित्रः—कुशाग्रबुद्धे किं वाच्यमवशिष्यत एव तत् ॥ १८८ ॥

रामः—तत्किं । (विश्वामित्रः)—जनककृत्यं यत् ॥

रामः—स्वामिंस्तदपि किं पुनः ।

विश्वामित्रः—बत राम न जानीषे यदेवैतत्तदेव तत् ॥ १८९ ॥

किंच ।

अत्रायथाः[2] केवलमेकलं मखं नैतावता तद्गुरु कार्यमुच्यते ॥
त्वयीक्ष्यते चेत्सकलत्रता[3] तदा भवेत्पुनस्तद्व्यपदेशसंभवः ॥ १९० ॥

रामविवाहाय द्विजा इव खगा अपि निर्ययुरित्यत्र हेतुमाह ।

विवाहकार्यसिध्यर्थं श्रीरामस्यातिसंभ्रमात् ॥
द्विजानां निकुरंबाणि सकुटुंबानि निर्ययुः ॥ १९१ ॥
विवाहोपस्थितौ खेटैर्वरपक्षावलंबिभिः ॥
कथं स्थेयमिहास्माभिरिति किं नु प्रतस्थिरे ॥ १९२ ॥

द्विजाः स्वकांतानिकटे स्वकामानाविश्चक्रुः ।

यास्यामो मिथिलापुरं वयमयं श्रीरामभद्रः पुनः
कर्ता भंगमनंगदाहिधनुषोरंगांगणे संगतः ॥

---

१ वासनोपबंधेपि वसनस्यायं वासनश्चासावुपबंधश्च । २ त्राणमकरोः । ३ सकलांस्त्रायत इति तस्य भावः । पक्षे भार्यासहितता ।

कन्यामंगलमालिकां परिमिलद्भृंगामनंगाकृता-
वामुच्यांगकुरंगपुंगवदृशि स्वांगानि शृंगारयेत् ॥ १९३ ॥
पश्यामः करपीडनोत्सवमलं स्नास्याम उष्णोदकैः
पास्यामः पय उज्वलं सहसितं स्थास्याम उच्चासने ॥
पास्यामोमृतकल्पमन्नममलं स्वप्स्याम आस्तारके
प्राप्स्यामोंबरभूषणानि विपुलां लप्स्यामहे दक्षिणां ॥ १९४ ॥
इत्येवं निश्चयं चक्रुः केवलामंत्रणादपि ॥
तत्स्थाने शकुनाः[1] सर्वे यत्स्थाने पुरोभवन् ॥ १९५ ॥

तपोवनरक्षणं श्रीरामविवाहोत्सवदर्शनं च कर्तव्यमिति मुनिराह ।

अनेकप्रतिपत्त्यर्हास्तास्तास्तु[2] वनदेवताः ॥
द्विधाप्यामंत्रयामास विश्वामित्रो मुनीश्वरः ॥ १९६ ॥

मुनेः परिच्छदशकटनिर्गमने हेतुमाह ।

सहान्नयः सर्वपरिच्छदोद्भटा जटाधराणां शकटा विनिर्ययुः ॥
त्रैलोक्यनाथस्य वरस्य तस्य ते युक्तं सहाया ननु चक्रवर्तिनः[3] ॥ १९७ ॥

सर्वमहाजननिर्गमे हेतुमाह ।

सन्मण्यादिपरिष्कृतदेहा[4] आनंदभृद्वरसहायाः ॥
सन्माणिसुवर्णमुक्ता आनंदस्यास्य सहचरा युक्ताः ॥ १९८ ॥
यस्यां धत्ते चंद्रमौलिर्विहारं तं कौबेरं दिक्प्रदेशं विशंतः ॥
ते वैदेहा मंत्रितास्त्यक्तगेहा निःसंदेहाः स्वार्थासध्यै बभूवुः ॥ १९९ ॥

अनाद्रच्छतामपि तेषां शोणनदकूले एव वसतौ हेतुमाह ।

वैदेहस्य वदान्यमंडलमणेः प्राप्स्यन्महादक्षिणं
कन्योद्वाहमहोत्सवं नवनवोत्साहं समुद्यज्जवं ॥
धावंतोपि सुवर्णबाहुमधिकोदारं निरीक्ष्यांतरा
तत्रैव न्यवसंस्वभावचरितं दुर्वारमुर्वीतले ॥ २०० ॥

श्रीरामेण कोयं देश इति पृष्टे तद्वृत्तमाचिरव्यासुः ॥ स्ववंशारव्यायिकामवतारयस्वधू-विषये पुंसापि प्रयतितव्यमिति रामबुध्यारोहार्थं कुजकन्याख्यानं प्रसंजयति ।

कुशेशयजनेर्जज्ञे राजर्षिः कुशिकस्ततः ॥
कुशनाभो घृताच्यां स कन्याशतमजीजनत् ॥ २०१ ॥

---

१. शकुनाः । पक्षे पक्षिणः । २ अनेकरूपांतराणि कर्तुमर्हाः । ३ आश्रमरक्षणं । स्वसहागमनं च । ४ राजानः । शकटाश्च । ५ आदिशब्देन सुवर्णमुक्तानां ग्रहणं । ६ तत्रामकं गतं । पक्षे सुवर्णहस्तं । अत्यंतोदारं । अत्यंतजलोदारं च ।

जगत्प्राणायापि तस्मै याचमानाय वायवे ॥
नैव ताः स्पृहयामासुः क्वचिद्दाक्षिण्यशालिने ॥ २०२ ॥
वातप्रकोपात्कुटिलांगवल्लिकाः पित्रार्पिताः स्नेह[1]परिप्लुतास्ततः ॥
ता ब्रह्मदत्तस्य शुचेरुदर्चिषः[2] स्पर्शेन सद्यः कुटिलत्वमत्यजन् ॥ २०३ ॥
राजर्षिवर्यः स पवित्रचर्योऽस्मत्तातपादान्गलितप्रमादान् ॥
अगाधधाम्नः किल गाधिनाम्नः प्रभूतभून्मौ जनयांबभूव ॥ २०४ ॥

गंगावृत्तं परिपृच्छते श्रीरामाय विवाहविषये उत्साहार्थं कुमारकथां प्रसंजयति ।

अथोषसि महानृषिः स विनिवर्त्य नित्यक्रियां
जवादभिनवाद्व्रजन्सममवापदेवापगां ॥
स्वशक्तिहततारको ननु कुमार एव ध्रुवं
स वासवदिवौकसामपि विशेषतोदप्रदः ॥ २०५ ॥

पूर्वजयत्नानुसारेण सीताविषयएव भवतापि यतितव्यमित्यत्र हेतुमाह ।

स्वपिन्युद्धारिणी स्फीता शीता सुरतरंगिणी ॥
रघूणां यतमानानां प्रसिद्धिर्मूर्तिर्मत्यसौ ॥ २०६ ॥

श्रीरामेण विशालायाः पुर्याः वृत्तांते पृष्टे तदाख्यायिकामवतारयन्पुरुषवत्स्त्रियोपि सर्वोत्तमापत्यमभीप्संतीति बोधयितुं दितितपस्याख्यानं प्रसंजयति ।

पुरा किलास्मिन्विषये निदेशात्पत्युर्मरीचेस्तप आचरंती ॥
सर्वोत्तमापत्यपरीप्सया तां प्रतारयामास दितिं महेंद्रः ॥ २०७ ॥
अत्रैव चित्रं रघुवीर विष्वग् वातस्य संगेपि नवप्रसंगे ॥
अलंबुषा[3]यास्तनुगात्रवल्ली फलं विशा[4]लं बिभरांबभूव ॥ २०८ ॥

तेन विशालेनेयं पुरी विनिर्मितेत्यादिका ।

विशालाया अपि पुरो विशा[5]लापि कथा[6]नयोः ॥
कौशिक[7]स्यापि संबंधात्सुधाभूत्तन्महाद्भुतं ॥ २०९ ॥
(रामः) कस्यैतदाश्रमपदं **(विश्वामित्रः)** गौतमस्य महात्मनः ॥
(रामः) हा कुतस्तर्हि भगवन्निःसत्व इव दृश्यते ॥ २१० ॥

निःसत्वे हेतुं दर्शयति मुनिः ।

---

१ तैलं प्रेम च । २ तन्नामकऋषेः शुद्धस्य वन्हेश्च । ३ अलंबुषा तु मुंडीर्या स्वर्गवारांगनांतर इति मेदिनी । ४ विशालनामकं पुत्रं । तन्नामका अप्सरा लतानेदश्च कडुवृंदावनं । विशाला त्विंद्रवारुणीत्यमरः । ५ कडुवृंदावनं । ६ रामलक्ष्मणयोः । ७ गुग्गुलोः विश्वामित्रस्य च ।

वसिष्ठे नानुशिष्टोपि बत बोत्सि न राघव ॥
निःसत्व[1] एव नियतं केवलार्थपरायणः[2] ॥ २११ ॥

एवं वचोवैचित्र्या राममनोविनोदं विरचय्य वास्तववृत्तं व्यवृणोत् ।

अप्यात्मानं प्रार्थयानं विरिंचिस्तं राजानं निर्जराणां निरस्य ॥
लावण्याब्धिं पुण्यशीलाग्रगण्यां कन्यां वन्यायाप्यदाद्गौतमाय ॥ २१२ ॥

तत्र हेतुमाह ।

यः स्वस्थोपि निकामकामवशतो स्वस्थो भवन्याचते
तं संत्यज्य न भोगमंडनमिमं को नैव दद्यात्सुतां ॥
स्वास्थ्येनार्थविचारतत्परधिये न्यक्कुर्वते भोगिनो
भूमानं ननु नित्यनिश्चितनवं द्रव्याय भव्यात्मने ॥ २१३ ॥
तदादि पांसलयितुं गौतमस्य मुनेर्गृहान् ॥
अनिशं कामयांचक्रे स पांडुरकरेश्वराट् ॥ २१४ ॥

शचीरंभादिस्वीयसामान्यवनिताः संत्यज्यास्यामेव कुतो लंपट इत्यत्र हेतुमाह ।

हावान्सर्वान्मुग्धमध्यादिभावानातन्वानान्द्विप्रकारान्स्वदारान् ॥
हित्वाहल्यैवास्य कामाय जज्ञे संभोगेस्या यच्छतानंदलाभः ॥ २१५ ॥

तथा ।

वारांगना वापि वरांगनापि वा न रोचतेऽमुष्य यया परांगना ॥
स्वापे यया ब्रह्मपदावलंबवल्लो लभ्यलाभः[3] पुरुषार्थतां वहेत् ॥ २१६ ॥

इंद्रः स्वगतं । उपागतं मां न कदाचित्प्रत्याख्यास्यतीत्यत्र हेतुमाह ।

वृद्धेऽस्मिन्द्विजराज्यकिंचनज्यजनोत्तंसे तपःकर्कशे
मृद्वंगी तरुणी कथंचिदपि वा रज्येत सा पद्मिनी ॥
आदित्यं किल कामयेत नियतं कामाभिरामाकृतिं
श्रीमंतं बत निर्जरोत्तममिमं मामीक्षमाणेव सा ॥ २१७ ॥
कदाचिच्छिष्यवर्गे तु समाहर्तुं समित्कुशान् ॥
निर्गते स्वाश्रमात्स्नातुं गौतमोपि जगाम सः ॥ २१८ ॥

अत्रांतरे इंद्रप्रवेशो युक्त इत्यत्र हेतुमाह ।

द्विजराजे परिवारैर्निर्गच्छति वनांतिकम् ॥
आदित्यस्य निशांतेस्य प्रवेष्टुं काल एव सः ॥ २१९ ॥

---

१ सत्त्वगुणशून्यः २ अर्थपरायणः रजोगुणयुक्तः । न्यायशास्त्रस्य केवलार्थपरायणत्वं प्रसिद्धं । ३ लभ्यलाभः पुरुषार्थतां नावहति किंत्वलभ्यलाभः । परांगनाया अलभ्यलाभत्वात् । ४ चंद्रे ब्राह्मणश्रेष्ठे गौतमे च ।

ब्राह्मणस्य गौतमस्य च वेषकरणे हेतुमाह ।

ब्रह्मकन्याविलासस्य पात्रं नाहं सुराधिपः ॥
इति वेषं द्विजेंद्रस्य कृतवान्गौतमोपमं ॥ २२० ॥
कृष्णाजिनाच्छन्नदुकूलकक्षः कुशाग्रमुष्टिं तिलनारिकेलं ॥
कुर्वन्कराब्जे कैरकं विवेश वृषोटजं गौतमवेषधारी ॥ २२१ ॥

स्नातुं गतस्य झटिति पुनः प्रत्यागमने हेतुं पृच्छति अहल्या ।

भोः स्वामिन्किमु विस्मृतं झटिति यत्प्रत्यागतं सांप्रतं
(इंद्रः) प्राणप्रेयसि विस्मृतं चिरमभूदद्यैव सद्यः स्मृतं ॥
(अहल्या) तर्किनाथ (इंद्रः) रतोत्सवेषु रजनौ न प्रीयते पद्मिनी-
त्येवं मन्मथतंत्रवाक्यमपि तत्प्रत्यागतस्त्वत्प्रियात् ॥ २२२ ॥
एवं समाभाष्य हितं मितं स्मितं विधाय पंचायुधविद्धमानसः ॥
निधाय तं स्नानपरिच्छदं क्षितौ रंतुं समारब्ध स चोरतापसः ॥ २२३ ॥
आश्लिष्य स्तनमाकलय्य चिकुरानाकृष्य गल्लस्थलं
संचुंब्याधरपल्लवामृतरसं प्राश्नन्नखैरालिखन् ॥
नाभिं चाभिमृशन्निपीड्य निभृतं स्थूलं नितंबस्थलं
कांचीं विस्रलथयन्नुदस्य वसनं रेमे स तां प्रीणयन् ॥ २२४ ॥
विन्यासो न विशेषभूषणकृतो नो पत्रवल्लीकथा
नैव स्रग्रचनं न सूक्ष्मवसनं नैवांगरागोदयः ॥
नो वा मंजुलसिंजितं न भणितं नो चाटुकारो न वा
सीत्कारो मृदुलं न चैव शयनं रत्यैव रेमे परं ॥ २२५ ॥
दृष्ट्वा मन्मथकेलिकौतुकमसावस्मिन्नपूर्वक्रमं
सद्यः शंकितमानसापि बहुशः सा धर्मपत्नी मुनेः ॥
प्रत्याख्यातुमथापि शप्तुमथवा क्रोशं विधातुं मनाक्
नाशक्नोन्निजभावविभववशाल्लेभे विशेषाद्रतिं ॥ २२६ ॥
नूनं प्रच्छन्नरूपस्याप्यादित्यस्यास्य संगमः ॥
मोदयेन्न कथं नाम सरोगामपि पैद्मिनीं ॥ २२७ ॥

सत्या अपि व्यभिचारांकुरोदये हेतुमाह ।

नायं निर्जरसां निरीक्ष्य सुरताविर्भावरम्यश्रियं
भार्याऽतन्वत वृद्धगौतममुनेः सा नार्यकार्यक्रमं ॥

---

१ तुंबा इति ख्यातम् । २ कमलिनीं स्त्रियं च ।

नित्यं हि व्यभिचारतत्परनृणां संसर्गगंधद्विषे
भीरोरात्मसुशीलशैलशिखरात्पातो न भारः परः ॥ २२८ ॥

गौतमोपस्थितौ शक्रस्यातीवनिस्तेजस्त्वे हेतुमाह ।

कस्त्वं मामकवेषभृत्कथय रे नीचेति वाचं मुखा-
न्मुंचंतं द्विजराजमप्यतिरुषादित्यायमानद्युतिं ॥
पश्यन्नेव जघन्यकर्मवशतः संजातपूर्वां द्विधा-
सौ तेजश्च्युतिमन्वभूत्पुनरपि व्याजद्विजाधीश्वरः ॥ २२९ ॥

इंद्रः स्वापराधक्षमापने हेतुमाह ।

स्वामिन्गौतम भोः क्षमाधिवसते जानीहि देवर्षभं
मामेनं शतमन्युरस्मि यदसौ कामस्य दासोधुना ॥
कन्या सौभगदायि पूजनविधेः शच्यास्तु देव्या भव-
त्कारुण्येन विशालभालतिलको जैत्रातृको जायतां ॥ २३० ॥

तदानीं गौतमस्याधरस्फुरणातिशये हेतुमाह ।

हित्वा यस्त्वपवर्गसर्गकरणाचारं परं रागवां-
श्चक्रे हंत सकृद्द्विजोपगमनं सोप्युत्तरः का मम ॥
स्यादस्मिन्कुपिते दशेति चकितः संवेपते तत्र मे
कैवास्थेति विशेषभीत इव किं स्फारं चकंपेऽधरः ॥ २३१ ॥

तथा नयनारुणिमनि हेतुमाह ।

अस्माकं श्रुतिपारशीलकतया सर्वोपरिष्टात्स्थितौ
सत्यामप्यमुना जडेन रचिता क्षेत्रे निजेधास्थितिः ॥
सोढं तत्त्वधुना परत्र यतते कर्तुं बतास्मत्स्थितिं
निर्मर्यादतयेति कोपत इवारक्ते मुनेरक्षिणी ॥ २३२ ॥

मम प्राणान् रक्षितैव भगवानित्यत्र हेतुमुत्थापयति बृहस्पतिच्छात्रः ।

न्यायेन वर्तमानत्वाद्भवान्ज्ञातेशवैभवः ॥
भगवन्ननु मां रक्षेदेव नास्त्यत्र संशयः ॥ २३३ ॥
अहं तु सर्वथान्यायी भवान्न्यायविशारदः ॥
अतोधुना प्रपन्नस्य कापि शिक्षा विधीयताम् ॥ २३४ ॥

गौतमस्य शरीरमात्रविकाररूपशापदानप्रवृत्तौ हेतुमाह ।

जीवो यस्य गुरुः स्थिरस्तमराधीशं तु वन्यो यथा
निर्जीवं विदधामि तादृशमहाशापोपि नास्मि ध्रुवं ॥

---

१ तेषां संसर्गरूपमत्तहस्तिनि प्राप्ते सति । २ आयुष्मान् । ३ मोक्षः पक्षे पवर्गाभावः ।
४ ब्राह्मणीं दंताश्च । ५ ईशवादित्वात् ।

एष प्रत्युत तादृगित्यथ कृशक्रोधो मुनिर्गौतमः
शप्तुं तच्चरितोचितं प्रववृते शिक्षाकृते केवलं ॥ २३५ ॥
महद्भगं यत्परमेश्वरेण प्रत्तं न तुभ्यं तदलं ततः किं ॥
गवेषयस्यन्यभगानि हंत गात्रे सहस्राणि भगानि संतु ॥ २३६ ॥
आः प्रवर्तयसे मत्तः प्रभवन्देवपुंगवः ॥
गवोर्द्रवमेवातः पातये वृषणौ तव ॥ २३७ ॥

देवाधिपतेस्तादृशभवने हेतुमाह ।

रागाकुलः सन्विबुधेश्वरोपि वरांगनाशः सुचिरं बभूव ॥
भृंगालिवत्तत्क्रतुनीतितोभूद्वरांगसत्वेपि वरांगनाशः ॥ २३८ ॥

ततः शक्रो मुदैव दिवमगादित्यत्र हेतुमाह ।

अहं वृषोच्छेदकरीमरीरचं क्रियां भवेत्तेन स एव सर्वथा ॥
वपुर्विकाशे वृषणोपपातनं शिवं विजानन्स दिवं मुदा ययौ ॥ २३९ ॥

गौतमः—

आस्त्रस्तधम्मिल्लभरामधोमुखीमामृष्टभालस्थविशेषकां मुहुः ॥
तां वेपमानां श्वसतीं कृतांजलिं बाष्पेक्षणामंतरवैक्षत स्त्रियं ॥ २४० ॥
एतस्याः सुरतोत्साहस्पर्शं स भृशवेपथुः ॥
पैशून्यं रचयामास क्रुद्धगौतमसन्निधौ ॥ २४१ ॥
दृश्यसे पांसुला दुष्टे प्रत्यक्षं नानुमानतः ॥
सम्यगुज्वलिता कच्चिच्चतुरास्यचतुर्मुखी ॥ २४२ ॥

किं मया जडया कार्यं वंचितास्मीति भाषिणीं शिलारूपशापदाने हेतुमाह ।

स्त्रीत्वाज्जडैवेति मम क्षमं परं त्वपूर्वदेहेंद्रियसंगमादपि ॥
न ज्ञानमासीदिति वेद्मि दुर्भगे शिलासि तस्माद्भव सैव साक्षात् ॥ २४३ ॥

अहल्या—

अपराधस्थिता नूनं भाव्यनुल्लंघ्यमेव तत् ॥
चरणास्त्रातुमर्हंति क्षमैकनिलया इमे ॥ २४४ ॥
आकल्पं दृषदेव चेदपयशो मह्यं न दुःखप्रदं
मत्संबंधवशात्परं भगवतो दुःखाकरिष्यत्यलं ॥
कर्तुं पापमयीमिमामपि पुनः पुण्याग्रगण्याममी
श्रीपादा न च शक्नुवंति किमहो ईशोपि येषां वशः ॥ २४५ ॥

---

१ अमराधीशः । २ देवश्रेष्ठः पक्षे पुंगवः खोंड इति प्रसिद्धः । ३ गवि पृथिव्यामुपद्रवं पक्षे गवामुपद्रवं । ४ वरांगना विषयिणी आशा यस्य । ५ वरांगं मूढगुह्ययोरिति कोशः पक्षे उत्कृष्टांगनाशः । ६ धर्मः वृषणश्च । ७ आगः पक्षे अपरस्याधःस्थिता ।

गौतमकोपशांतौ हेतुमाह ।

चतुरास्यसुतासूक्तसुधामास्वाद्य गौतमः ॥
तदात्व एव संजातः शांतः क्रोधधनंजयः ॥ २४६ ॥

श्रीरामस्यैव त्वत्तारकत्वं नान्यस्येति शापमोचनमाह ।

युगे कुत्रचिच्छेषपर्यंकशायी दृषत्तारकः संभविष्यत्यमायी ॥
पदस्पर्शतस्त्वां स लोकत्रयेशः प्रिये तारयेदित्यये प्रत्ययेऽहं ॥ २४७ ॥

किंच ।

ललाटपट्टलिप्यां यदशुद्धं समुपस्थितं ॥
शुध्येत तत्कथंकारं विनैव हरितारकात् ॥ २४८ ॥

आशिषमाह ।

मेघश्यामः कोटिकामाभिरामो विश्वाधारः कौस्तुभोदारहारः ॥
राशिर्भासां पीतकौशेयवासा आस्तां चित्ते गोचरोतश्चरस्ते ॥ २४९ ॥
स्फुरन्मौक्तिकोत्तंसकोटीरधारी लसत्कुंडलो योगिचेतोविहारी ॥
गदारी दधद्भक्तचित्तानुसारी स पायादपायात्प्रिये त्वां मुरारिः ॥ २५० ॥
धन्ये विरिंचिकन्ये मन्ये हरिचरणपांसुला भवती ॥
पापा यया ननु तथा ह्यगण्यपुण्याग्रगण्यतां याता ॥ २५१ ॥

ततः ।

निमज्याप्सु सद्यः समाचम्य वारि परिक्रम्य पत्युः पदाब्जे प्रणम्य ॥
दुकूलांचलं निश्चलं संनिवेश्य स्थिता शासने चासने प्राङ्मुखी सा ॥२५२॥
दृढा बद्धपद्मासनस्थांगयष्टिर्निधम्यानिलं दत्तनासाग्रदृष्टिः ॥
प्रशस्तौ स्व उत्संग आधाय हस्तौ समाकृष्य गां द्वेषरागाबुदस्य ॥ २५३ ॥
समाधाय चित्तं हृदंभोजसंस्थं स्फुरंतं सती श्रीहरिं संस्मरंती ॥
सतः पश्यतस्तस्य सा प्राणतुल्याऽप्यहल्या शिलारूपिणी संबभूव ॥२५४॥

एतच्छिलारूपत्वं युक्तामित्यत्र हेतुमाह ।

सा चारुशीलैव परंतु कामयोगादहो लेखकनायकोस्याः ॥
शीले लघुत्वं रचयेत्तदा सा कथंतरा चारुशिलैव न स्यात् ॥ २५५ ॥

गौतमः—तदास्यं समालोच्य बाष्पं विमुच्य समामंत्र्य ता देवता आश्रमस्थाः ॥
समुत्सार्यसत्वा निहित्वा वनं तत्तपस्तप्तुकामो हिमाद्रिं समागात् ॥ २५६ ॥

प्राणिसंमुत्सारणे हेतुमाह ।

विक्षेपादपि विक्षेपोऽपक्वचित्तस्य दृश्यते ॥
तत्सत्वरहितो भूयादिदमादिममाश्रमः ॥ २५७ ॥

---

१. पक्षिचालनात् । २ अद्यारभ्य ।

हिमाद्रौ गमने हेतुमाह ।

स्वशास्त्रसिद्धांतितमेकमाद्यमन्यत्तपोनाशकशापजन्यं ॥
इति द्विधा जाड्यवतो मतोस्य हिमालयः प्रायो समाश्रयाय ॥ २५८ ॥

इंद्रपितृप्रसादाद्विकृतिपरिहाने हेतुमाह ।

पितृप्रसादाद्वृषणोपपन्नः सहस्रनेत्रश्च स वृत्रहाभूत् ॥
त्यजंतु गुर्वापदि सर्वलोकाः परं किमेनं पितरस्त्यजंति ॥ २५९ ॥

जघन्यकर्मणोपि साधुफलपरिणामेन जघन्यत्वमित्यभिमन्यते कविः ।

प्रालब्धात्प्रबलादसावुपनतो भोगो न कर्म स्वकं
दुःखोदर्कमथापि यत्फलमहो पुण्यक्रियाया अपि ॥
दुःसाधं तदनार्यकार्यमिति ये जल्पंति तेभ्यो नम-
स्तत्त्वं त्वद्व्यभिचारकर्म तदिति ब्रूमो वयं निश्चयं ॥ २६० ॥

मुनिः श्रीरामस्याश्रमांतर्गमने हेतुमाह ।

चिरं स्मरंत्येव विरिंचिकन्या धन्या वदान्याद्भवतः स्वदातुः ॥
पदाब्जपांसूनभिकांक्षमाणास्त्यये रघूत्तंस कृतार्थयैनां ॥ २६१ ॥

द्विजधर्मपत्नीं प्रति पदस्पर्शकरणे बिभ्यद्रामः पर्यनुयुंक्ते ।

पांसुला गौतमस्त्रीयं ममाधमपदास्पदैः ॥
रजोभिः किमु पूयेत पांसुलायेत वाधिकं ॥ २६२ ॥

मुनिः—रजोभिरेवेयं शुध्यतीत्यत्र हेतुमाह ।

अशुद्धस्यापि रजसो दर्शनं स्त्रीविशोधनं ॥
पवित्राणां शिरोरत्नं तव त्वांघ्रिगतं रजः ॥ २६३ ॥
सुरेशानकृशानूत्यनाशा विधिवशादियं ॥
पवनाशापदस्पर्शात्पुनीहि मम शासनात ॥ २६४ ॥

रामः—स्पष्टं ।

अस्याः पदांभोजरजोभिषेचनात्स्वसंपदां क्षत्रियबांधवा वयं ॥
भवेम पात्रं बत तां पदाऽस्पृशन्नामो व्यक्तिक्रामतु नाम हा कथं ॥ २६५ ॥

नायं पदस्पर्शो व्यतिक्रमायेति मुनिः ।

यस्मिन्नाम समुल्लसंति बहुशो निःश्रेयसश्रेणयः

---

१ सर्वं जडं अपूर्वदेहेंद्रियसंयोगेन तत्र चैतन्यादिगुणोत्पत्तिरिति सिद्धांतः । २ प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोरिति मेदिनी । ३ सत्र नार्या अकार्यं पुनस्तत्रार्या व्यभिचारसंज्ञमिति तु ब्रूमहे । ४ अवीन्यवर्तानभिचारयतीति अव्यभिचारो इंद्रस्तस्य कर्म पक्षे स्पष्टं । ५ इंद्रविषयककोपानलदग्धा । ६ पवित्रीकरणे आशा यस्याः । पक्षे वायुभक्षिणी ।

संमिश्रो रजसाल्पशस्तव पदस्पर्शोप्यनेतादृशः॥
सत्रे सत्ववधो यया द्विजनुषां चाखेटके भूभुजां
यत्स्वातंत्र्यनिधेर्विधेरनुमतिस्तत्रास्त्यये भूयसी ॥ २६६ ॥
करे गृहीत्वाथ रमाधिनाथं द्रुतं समागम्य तदाश्रमांतः ।
क्षमां तपोभिर्मुनिवर्यरामां तां स्पर्शयामास पदा मुदा सः ॥ २६७ ॥

श्रीरामभद्रपदस्पर्शमात्रेण सर्वथा कृतार्येत्याह ।

स्वपदाब्जरजःस्पर्शात्सद्यिदानंदरूपिणीं ॥
ननाम रामः स्वं नाम श्रावयंस्तां महामनाः ॥ २६८ ॥
तं शापमश्मसारं क्रोधाक्रांतस्य गौतमस्य मुनेः ॥
चक्रे सुवर्णसारं भूभृद्वरपादसंभवः स्पर्शः ॥ २६९ ॥

तां प्रति रामेण नमने हेतुमाह ।

दूरे सर्वं सत्वरं न्यस्य पत्युः प्रैषं[2] तोषाद्धारयंतीं विशुद्धां ॥
बुद्धां युक्तं योगपट्टाधिरूढामेनां नेमे विश्ववंद्योपि रामः ॥ २७० ॥
जलदश्यामलकोमलविग्रहं कुटिलकुंतलकुंडलनावहं ॥
विहितकुंकुमपंकविशेषकं मकरकुंडलकांतकपोलकं ॥ २७१ ॥
विकचपंकजशंकिविलोचनं विशदशारदचंद्रसमाननं ॥
अरुणबिंबनिभाधरपल्लवं मधुरमंदतरास्मितवैभवं ॥ २७२ ॥
रुचिरकंबुवरोपमकंधरं पृथुलचारुविशालभुजांतरं ॥
भुजगभोगचतुर्भुजशालिनं दरगदारिसरोरुहमालिनं ॥ २७३ ॥
कटकतोडरहारविभूषितं घुसृणचंदनकर्दमरूषितं ॥
उभयपार्श्वलुठत्पृथुशाटैंकं प्रपदचुंबकचंपकमालिकं ॥ २७४ ॥
त्रिवलिसंगविभंगुरितोदरं कनकभंगपिशंगवरांबरं ॥
कटितटार्पितमंजुलशृंखलं रविमरीचिलसद्वसनांचलं ॥ २७५ ॥
विधृतकांचननूपुरतोडरं नखमणिद्युतिधूतसुधाकरं ॥
ध्वजसरोरुहवज्रलसत्पदं नियुतमन्मथरूपमदच्छिदं ॥ २७६ ॥
सुकृतराशिवशात्प्रियदर्शनं भवमहार्णववैभवकर्शनं ॥
रघुपतिं भगवंतमवेक्ष्य तं पतिवचःस्मरणात्प्रणनाम सा ॥ २७७ ॥
तमासेचनकं प्रीत्या पश्यंती हरिणेक्षणा ॥
दृशो विस्फारयांचक्रेतर्निधातुमनाइव ॥ २७८ ॥
पापीयस्या मम स्पर्श एतयोररिपूतयोः ॥
अभूदिति शुभैर्वार्भिः स्नपयामास किं सती ॥ २७९ ॥

---

१. राजा रामः पर्वतश्च । २ आज्ञां । ३ शेला इति प्राकृतभाषायां ।

श्रीदेव्याप्युपलाल्यमस्य चरणं प्रक्षालयंती जलै-
स्तल्लावण्यविमोहिता करतलेनास्फाल्य चाघ्राय तं ॥
चुंबंती च मुहुर्मुहुर्मम कृते क्लेशोस्य हाहा विभो
एवं गद्गदिताश्रुपूर्णनयना प्रोच्छंत्यभूत्सा चिरं ॥ २८० ॥
गाढं गाढं सा समालिंग्य साध्वी तावास्वाद्य स्वांकयोस्तन्मुखांतः ॥
स्वादु स्वादून्यर्पयंती कलानि मंदं मंदं सुंदरं संबभाषे । २८१ ॥
कौशल्या जननी सखे दशरथो नाथ स नः स्वस्तिमा-
नास्ते कच्चिदये (रामः) द्वयोरपि शुभौ (अहल्या) त्वां राम पृच्छाम्यहं ॥
सा साध्वी तु तवेदृशस्य गुणिनः सेहे वियोगं कथं-
कारं नाप परं (लक्ष्मणः) ब्रवीमि किमहो मातर्भवत्याः कृते ॥ २८२ ॥

अहल्या–

सत्यं नु किमये सा तु पश्यता त्वन्मुखं चिरं ॥
इत्यालिंग्य दृढं साश्रुः स्नपयामास सा सती ॥ २८३ ॥
सर्वं भद्रमभूदये परमहं त्वामेकमभ्यर्थये
स्वस्योद्वाहमहोत्सवाय नियतं त्वं मामिमामाव्हय ॥
को नामास्य गुणाकरस्य रुचिराकारस्य पक्षं वरं
नानंदप्रचुरं भजेत मतिमान्विदेहपक्षादपि ॥ २८४ ॥
दंपत्योर्युवयोः परस्परपटग्रंथेर्विमोक्षे मिथो
नामादानकुतूहलेन हसति स्त्रीणां कदंबे हि नः ॥
तत्तत्कालिकमंदहासमधुरश्रीमेदुरे वां मुखे
संवीक्ष्य त्वनयोर्वयं नमनयोः साफल्यमाशास्महे ॥ २८५ ॥
तस्यास्तदानीं सौहार्दसुधासागरधूरगः ॥
चिरं प्रवहति स्मायं मुनिर्गुरूरपि स्वयं ॥ २८६ ॥
शुद्धसत्वमये रामे संगते तत्र सत्वरं ॥
सर्वसमूहोर्यादाससादैव सर्वतः ॥ २८७ ॥

मुनिः–

रोमांचकंचुकविशेषलसच्छरीरां बद्धांजलिं नयननिर्गलदश्रुधारां ॥
ऊचे मुनिः स भगवांश्चिरविप्रलब्धा[1] त्वं साध्वि तावदधुना भव तादृगेव ॥२८८॥

अहल्या हिमालयं जिगमिषुः ।

नमस्ते परब्रह्मणे तारकाय नमः साधुसंपत्तिवितारकाय ॥
नमः शत्रुसंघातसंहारकाय नमो बाणतूणीधनुर्धारकाय ॥ २८९ ॥

---

१. वियुक्ता । पक्षे विप्रेण लब्धा ।

तं कौसल्यानंदनं वीतशल्या नत्वाहल्या स्वात्मनो जन्मवल्याः ॥
साफल्यार्थं पूर्णपीयुषकुल्यातुल्यां वाचं तामभूल्यां व्यतानीत् ॥ २९० ॥
मनसि जलदश्यामं कोटिकामाभिरामं करधृतशरचापं रूपमेतत्तवास्तां ॥
वचसि च मम नित्यं राम ते नाम सत्यं किमपि न परमन्यत्स्वार्थकृत्प्रार्थयेहं ॥२९१॥

जडसंयोगवियोगरूपायाः मुक्तेः सत्वकार्यत्वात् कथंतरां तद्रजसोभूदित्यत्र हेतुमुत्प्रेक्षते ।

सत्वं सत्वविमुक्तये ह्यधिकृतं नाथ त्वया सांप्रतं
योगोयं तु कदापि मेस्विति रजः पादांबुजं शिश्रिये ॥
पादांभोजद्दढाश्रितार्थितमहाकल्पद्रुमो मामकः
स्वामी तां द्विजडामनेन दयया किं मोचयामास सः २९२ ॥

रामायं गौतमाश्रम इत्येतावदुक्त्वा सरलं गंतव्ये सति कौशिकस्यैतावत्प्रवृत्तौ हेतुमाह ।

अस्योद्वाहकृतेय ते खलु परं जायालयैंगारकः
सोयं दारवियोगमस्य जनयेदेवेति नैवान्यथा ॥
तत्तन्निष्कृतिरस्य शास्त्रविहितैवापेक्षितेति ध्रुवं
विप्रेंद्रस्य सदारयोगमधुना किं कारयामास तं ॥ २९३ ॥

इत्यल्योद्गारः ।

स रामं मुनिं नावमारोढुकामं समालोक्य हंहो स्तभानस्तभान ॥
इति प्रब्रुवाणोद्भगंभीरवर्णं स तूर्णं रुरोधार्णसः कर्णधारः ॥ २९४ ॥

मुनिमुपेत्य ।

लोके शेषस्थितं वस्तु मानुषीकुरुते तु कः ॥
अनुगृह्णीष्व मां देव स दूरादेव वर्ततां ॥ २९५ ॥

मुनिना सोयमिति दर्शिते रामं प्रति ।

वराकेपोतिका वन्यकुटुंबपरिपोषका ॥
चिरादायुष्मती भूयात्तुभ्यं राम नमो नमः ॥ २९६ ॥
रे रे जाल्माशेषमान्यो वदान्यो धन्यो राजा मन्यतां नान्यथायं ॥
नद्याः पारं तारयैनां विचारं मा त्वं कार्षीः कारय स्वात्मकार्यं ॥ २९७ ॥
भूयानस्मात्स्यात्स्वलाभो यथा त्वं धाम्न्येव स्वे रंस्यसे पूर्णकामः ॥
कृत्यः स्पर्शस्ते जलस्यैष कष्टः किं ते [3]पोतैः [4]पोतिकाभिश्च किंवा ॥२९८॥

कर्णधारः——

नैव जानामि राजानं बालमेनं मुनीश्वर ॥
स्वलाभे प्रतिभूश्चेत्स्यास्तारयाम महानदीं ॥ २९९ ॥

---

१. पक्षे लोकेशो विष्णुस्तस्य पादजलं तत्र स्थितं । २ पक्षे श्रेष्ठा ब्रह्मपुत्री । ३ पुत्रैः ।
४ पुत्रिकाभिश्च । ५ जामीन इति प्राकृतभाषायां ।

सहचरैः समं स्वगतं ।

अस्यानर्थकरं रजः पुनरतः प्रक्षाल्य सम्यक्तरा-
मुच्चाल्यैव सहानुजेन सहसैवाभ्यंतरे स्थाप्यतां ॥
तत्रादौ तरणौ सितांशुकमिदं कृत्वाशुचिं सद्रुचिं
न्यस्यैनं बहुसत्वरं भवनदीपारं परं गम्यतां ॥ ३०० ॥

तदनु

पीठाग्रे विनिवेश्य विष्टरवरे कोष्णैः सुगंधोदकैः
लक्ष्मीः क्षालयितुं स्वयं यमभयं धत्ते स्वचित्ते ह्रियं ॥
तं पादं स पटच्चरेऽश्मनि मृदः कुंभोदकैर्धावयां-
चक्रे पश्यत नन्वकिंचन वशीभावोद्भवं वैभवं ॥ ३०१ ॥

तीर्णायां नद्यां तरपण्यविषये ब्रुवाणं राममाह ।

जडतारकौ तरणिकुलनाथौ वनचौरिणावपीत्यावां ॥
सदृशाविति भवतोहं रघुवर नार्हामि किमपि तरपण्यं ॥ ३०२ ॥

किंतु ।

उपयमगमनप्रसंगतोद्य त्वमयि मयेह ययैव तारितोसि ॥
त्वमपि मम तथाविधप्रसंगे रघुवर तारय न प्रतारयैनं ॥ ३०३ ॥
चित्रं स चक्रे प्रचुरं चतुरास्यगुरोरपि ॥
श्रीरामेण स्मृतः सद्यो मनसीदृक् स मुक्तिभाक् ॥ ३० ॥

इति नाविकमुक्तिप्रसंगः ।

मिथिलोपवने प्रातः प्रवेशने हेतुमाह ।

रामोयं शशभृत्कलानिधितया पूर्णप्रतापत्वतः
सूर्योपीति निशांतरे तदुदयः स्यादत्र चेत्पत्तने ।
योऽस्माकं तु चिकीर्षितः स कमलोल्लासः कथं स्यादिति
ध्यायं ध्यायमयं तपस्वितिलकः प्रातः प्रवेशं व्यधात् ॥ ३०४ ॥

ऋषिवाटनिवेशने हेतुमाह ।

कन्यागमो यत्र समस्तहस्तोल्लासः स शूरस्य रघूत्तमस्य ॥
अदूरभावीति विवेश विश्वामित्रः स वन्याधिपसिंहराशिं ॥ ३०५ ॥
सद्वृत्तसामृतकरद्विजेंद्रशरणागतिः ॥
प्रतापिनोपि झटिति स सीतत्वाय जायते ॥ ३०६ ॥

---

१ डलयोः सावर्ण्यं । २ सूर्यः नौका च । ३ काननं सलिलं च । ४ कन्याराशिः । पुत्रीच । ५ हस्तो नक्षत्रं पक्षे दक्षिणाप्राप्त्या हस्तानंदः । ६ ऋषिश्रेष्ठसमूह पक्षे सिंहराशि । सिंहराशिगमन विना कन्याप्राप्तिर्न भवति ।

मुनिवाटप्रवेशमात्रेणैव गतश्रम इत्यत्र हेतुमाह ।

निबिडतरतरूच्छाये मुनिवाटांतःप्रविष्टमात्रास्ते ॥
कांतारे श्रांता अपि रविरहि[1]ततया भवन्समं शांताः ॥ ३०७ ॥

आगतानां तेषां तत्रत्यगृहमेधिभिरातिथेयीकरणे हेतुमाह ।

दृष्ट्वैव निलयवासी[2] यो हि महातापसत्वमतिथीनां ॥
नोपचरति हिममधुरैः रेफदृशस्तत्र साधवो नूनं ॥ ३०८ ॥

कौशिकागमनेन जनकानंदे हेतुमाह ।

कौशिकौ[3]गमनं नूनं नेह तोषाय जायते ॥
ननंद जनकस्त्वेनं मत्वा सुदि[4]नदर्शनं ॥ ३०९ ॥
तं कौशिकं शिष्ययुतं समागतं नृपः समाकर्ण्य समागमद् द्रुतं ॥
तदा विदेहोपि पदा चरञ्छतानंदेन मूर्तेन सहैतदद्भुतं ॥ ३१० ॥

मुनये आसनदाने हेतुमाह ।

परिक्रम्य प्रणम्याथ समाश्लिष्य पुनः पुनः ॥
अददात्सत्प्रधानायात्रासनं नरशासनः ॥ ३११ ॥

पाद्यदाने हेतुमाह ।

आशु स्वश्रेयसं गंतुं विदेहनरनायकः ॥
जग्राह किमयं प्रीत्या धावनार्थं मुनेः पदं ॥ ३१२ ॥

महापूजायां हेतुमाह ।

अलंचकार प्रवरं द्विजेश्वरं गंधैः शुभैश्चंदनकुंकुमांचितैः ॥
हारैरुदारैरुचिरांबरैस्तथा कल्पैरनल्पैः स विदेहभूषणः ॥ ३१३ ॥

स्वकृतार्थतायां हेतुमाह ।

एष भोः कौशिक स्वामिन्नुदाराशयसन्मणे ॥
लब्धार्यो जनकस्त्वद्य भवत्पादप्रसादतः ॥ ३१४ ॥

मुनिर्जनकधन्यतायां हेतुमुपन्यस्यति ।

कुशलं वसु जातं ते त्वमप्ययमनामयः ॥
विदेहाधिपते कच्चित् (जनकः) प्रसादेन भवादृशां ॥ ३१५ ॥
महतां पदपद्मपांसुपूरान्परिचिन्वन्पुरुधन्यतां प्रयातः ॥
स कुशले[5]वसुतोन्यथा कथं त्वं प्रथितं चोर्मिले[6]यान्वितोसि राजन् ॥३१६॥

---

१ रविः सूर्यः पक्षे रेफशून्यतया श्रांतपादात् रेफनिष्कासेन शांता भवंति । २ गृहाश्रमी महातापसत्वमत्यंततापस्थिति हिममधुरपदार्थैः । रेफदृशः कुत्सितदृष्टयः पक्षे महातापसतां रेफदृशः निरयवासीति । ३ उलूकः । पक्षे विश्वामित्रः । ४ दिनदर्शनवंतं पक्षे शोभनदिनदर्शनं । ५ कुशलवसुनौ यस्यास्तया सीतया सहितः । पक्षे कुशलवसुतासहितः । ६ षड्मिलयः पक्षे ऊर्मिला ।

मौनींद्रोभयपार्श्वतः स्थितिकृतौ लोलच्छिखंडाहतौ
तूणीखेटकृपाणकार्मुकभृतावैणेयचर्मावृतौ ॥
तन्वानौ कमनीयतामतितरां राजर्षिताशालिनीं
दिष्ट्या दाशरथी धृतादरतयाऽद्राक्षीद्विदेहाधिपः ॥ ३१७ ॥
मत्स्वामिनो रघुपतेर्महिमा महीयान्यं पश्यतो हि जनकस्य दृशावगम्यैः ॥
पुण्यैर्महद्भिरनिमेषतुलां प्रपन्ने सद्यस्तरामगमतामनिमेषभावं ॥ ३१८ ॥

श्रीरामदर्शनं जनकं सहजब्रह्मासिकाया व्यचालयादित्यत्र हेतुमाह ।

जनकस्यानुभवतोप्येष स्वानंदमाधुरीं ॥
श्रीरामः सांप्रतं जज्ञे विशेषानंददायकः ॥ ३१९ ॥
मनसि रघुकुमार एष तस्मै बहुलतरं जनकाय रोचते स्म ॥
समदृश इति नात्र चित्रकृत्तद्विषमदृशोपि यदेष रोचनीयः ॥ ३२० ॥
बृहदात्मजतोषमुत्तमं जनकः सोनुभवन्नपि स्वयं ॥
रघुनंदनमाधुरीभवं कुतुकं तत्किमपि व्यगाहत ॥ ३२१ ॥

जनकः—

कस्यैतौ मुनिशार्दूल कुमारौ सुमनोहरौ ॥
गुणैरसुलभैः सर्वैर्वरावितिं मतिर्मम ॥ ३२२ ॥

जनकवचो वैचित्रीमवधार्य हैं हैं इत्युक्त्वा मुनिः—

शूरः सन्वसुमांस्त्रयीमयतनुः सद्वृत्तभाग्वाडव-
स्तुत्यः सर्वनमस्कृतोपि च सदाचारः प्रतापोद्धुरः ॥
तद्वंशे स्त्यमितप्रथो दशरथो येन स्वयं निर्भयं
निर्जित्यासुरमंडलानि मघवा देवाधिपः स्थापितः ॥ ३२३ ॥
तस्य प्रभूतविनयौ तनयौ सुमहोदयौ सदयहृदयौ ॥
सुरसवरक्षणकरणे मया हृतौ वीरसंमतावेतौ ॥ ३२४ ॥

राममुद्दिश्य ।

कोनेन शक्तः सदसि प्रसंगाय द्विजाधिपः ॥
यत्र शस्त्रादिविद्यायामस्ति कस्यापि गौरवं ॥ ३२५ ॥
यद्बुद्धेः सौष्ठवज्ञो न भवति भगवान्ब्रह्मनिष्ठो वसिष्ठो
वक्षःपीठं पिशाच्याः पविरिव परुषं पौरुषं यस्य वेत्ति ॥
पावित्र्यं गौतमस्य प्रथयति च शिलारूपिणी धर्मपत्नी
सौभाग्ये त्वस्य राजन्वपुष इह वयं साक्षिणः सर्व एते ॥ ३२६ ॥
अस्मासु मौनिषु तपस्विषु याजकेषु भक्तेषु योगिषु ययोः प्रथितं पदासीत् ॥

---

१ ब्राह्मणः अग्निश्च ।

तद्ब्रह्मवित्स्वपि भवत्सुतयोः प्रतीतमेतद्वरत्वमिति संप्रति भद्रभद्रं ॥ ३२७ ॥
जनकस्य प्रेमाश्रुविसर्गमुत्प्रेक्षते ।

मौनिच्छात्रं पवित्रं जनकनरपतेर्मन्मथापीच्यगात्रं
पात्रं मत्वा सुहृभ्यां सपदि सुविधिनाऽकारि सीताप्रदानं ॥
कौशल्यं त्वेतदेव स्फुरति हि सुदृशां यद्धुतं स्वात्मकार्यं
संपाद्यं चातएवाविधिरपि सुधियो दूरमुत्सारितोभूत् ॥ ३२८ ॥

जनकः सीतावृत्तं श्रावयति ।

यज्ञार्थं परिशुद्धये मम महासीरैः पुनः कांचनै-
र्भूमिं कर्षयतो सतो वसुमतीगर्भस्य सारं परं ॥
कन्यारत्नमिदं नरेंद्रतनयैः संप्रार्थनीयं विभा-
हार्यं संप्रति (विश्वामित्रः) हे विदेह परमेव स्यात्पुनस्तर्ह्यसौ ॥ ३२९ ॥

पणकरणे हेतुं दर्शयति ।

पणं विना किं कृपणस्य कन्या श्रीमंतमत्यंतमयेत कांतं ॥
अतो मयायं बहुधा गुणाढ्य एवं विमृश्यैव वितर्कितोभूत् ॥ ३३० ॥

विश्वामित्रः—मम रामभद्रस्यायं तव पणजय ईषत्कर इत्यत्र हेतुमाह ।

शंखं महासुरहिरण्यमनेकराजरत्नानि यत्नविरहाद्बलिसंपदं च ॥
शक्तो विजेतुमपि यो रघुनंदनोसौ राजन्प्रजेष्यति पणं जनकस्य किंस्वित् ॥ ३३१ ॥
धनुषि ज्यामधिगते सीतायाप्तिर्महीभृतां ॥
इतीव हेतोः किं राजन् पणमेनमचीकृपः ॥ ३३२ ॥
देवैः प्रत्तमनर्घकार्मुकमहारत्नं पुरा भिक्षवे
तत्सम्यग्विनियोजने ह्यकुशलः प्राज्ञे पणाय न्यधात् ॥
अस्यैतत्पणनान्मिलंतु शतशो वृत्तान्यहो मौक्तिका-
न्येतेभ्यो भवितैव भाववशतो भूयान्स्वलाभस्त्विति ॥ ३३३ ॥

अथ लौकिकीं दृष्टिमवष्टभ्यैष रामभद्रः सीतापरिणयार्होऽतीव सुकुमारः कथं महेशमहेष्वाससमारोपणं पणं साधयिष्यतीति चिंतयतो महीभृतश्चिरतामपनेतुकामः शतानंदः कौशिकप्रभावं प्रकटयन्श्रीरघुनंदनमभिलक्षयति स्मेत्यत्र हेतुमाह ।

मातुर्मुत्प्रतिदानाय रघुनाथातितुष्टये ॥
गुरुप्रभावस्तवनं पुरोधास्तमभिव्यधात् ॥ ३३४ ॥
श्रीकौशिकांघ्रय इमे सहचित्रसेनानानाविधैश्च विबुधैरुपशोभमानां ॥
नित्यामृतार्जितशमां विलसत्सुधर्मां रामाधिकं दिवमिवापि भुवं शशासुः ॥ ३३५ ॥

---

१ सीताप्रदानमिति प्राप्तं तत्रत्याविधिगमनेन सीताप्रदानमेघोवर्तितं भवति पक्षे सुविधिना अविधिर्नश्यत्येव ।

अवन्यवनसंभवज्जाडिमहानये जातुचि-
न्मनः सवनविघ्नमं रचयितुं सुमेधा व्यधात् ॥
विहत्य दवदूनितः प्रशमनाय नाथो नृणां
व्यगाहत तपोवनं भगवतो वसिष्ठस्य सः ॥ ३३६ ॥
आतिथ्यं सबलस्यास्य नाबला कर्तुमर्हति ॥
इतीव शबलाद्वारा[1] यथाकाममतर्पयत् ॥ ३३७ ॥

शबलाख्यधेनुद्वारा ससैन्यस्य तस्य राजन्यस्य कथं यथाकामं संतर्पणमिति शंकापनोदकं हेतुमाह ।

वसिष्ठानां हि सुमनःश्रेष्ठानां सुरभिः सखे ॥
भोः सदारामनिष्ठानां न संतर्पयितुं क्षमा ॥ ३३८ ॥
तादृशस्य वसिष्ठस्यातिमुक्तस्य[2] स पार्थिवः ॥
सैरभिं चकमे भूभृत्पुत्रकाय[3] बतात्मने ॥ ३३९ ॥

मंत्रादिभिः प्रार्थ्यमानस्यापि वसिष्ठस्य धेनोरपरित्यागे हेतुमाह ।

भो ब्रह्मणो मे शबला स्थितिश्चेन्नित्याग्निहोत्रं क्रतवश्च तेते ॥
सुरार्चनं प्राप्तनरातिथेर्यात्यादिप्रवृत्तिः कथमन्यथा स्त्र ॥ ३४० ॥
मुनिना सांत्ववादेन बोधितोपि मुहुर्मुहुः ॥
बलावलेपाच्छबलां जहार स महाबलः ॥ ३४१ ॥
निबध्यमाना विकटैर्वराटैर्निहन्यमाना लगुडैर्दृढैः सा ॥
हुंबारवानुत्सृजती वसिष्ठं तं नीयमाना समुवाच वाचं ॥ ३४२ ॥
स्वामिन्किनु मयापराद्धमधुना यन्नीयमाना परै-
रप्येतैश्चरणैर्विमुक्तकरुणैरेषा वृतोपेक्ष्यते ॥
(वसिष्ठः) वत्से चेदबला भवत्यथ बलं प्रादर्शयिष्यं स्वकं
त्वं तावत्सबला यथेच्छसि तथा कुर्वात्मरक्षाविधिं ॥ ३४३ ॥
वसिष्ठेनैवमुक्ता सा शबला शबला रुषा ॥
जनयामास गात्रेभ्यः शबलान्प्रबलान्बहून् ॥ ३४४ ॥

अथ जडमतेर्नृपतेः सैन्यपलायने हेतुमाह ।

अत्युग्रतायां सुरभेर्धनुःसंक्रांतिदर्पितं ॥
जडानीकं कांदिशीकं सद्यस्तत्समपद्यत ॥ ३४५ ॥

ततो महातपसा तोषिताद्विधेरनेकास्त्रलाभेन पुनर्योद्धुमागतस्य तस्य विश्वामित्रस्य सर्वास्त्राणि ब्रह्मदंडेन निवारितानीत्यत्र हेतुमाह ।

---

१ अत्यंतमुक्तस्य पक्षे चमेलीसंज्ञकस्य । २ मुगंधं कामधेनुं च । ३ राजपुत्राय पाषाणपुत्राय च ।

ततोतितप्तस्य महानरस्य हेतिर्व्रजोनेकविधोप्यशाम्यत् ॥
प्रभंजनाविष्कृतभूतिनास्य धैनेन दंडेन करस्थितेन ॥ ३४६ ॥
अथ तस्य वाडवमहामहसः स्वरमात्मनः परमहीनमहः ॥
लघु भासते स्म तत आत्मनि तत्परमं महो रचयितुं चकमे ॥ ३४७ ॥

अथ तपस्तप्तुमारभतेत्यत्र हेतुमाह ।

ब्रह्मात्मभावो हि समाधिमूलकः स च क्रियायोगपुरोगमो मतः ॥
तपस्तु तस्मिन्प्रथमं पतञ्जलिर्जगावतस्तीव्रतपश्चचार सः ॥ ३४८ ॥

ब्रह्मभावाय तपस्यतो राजर्षित्वं ब्रह्मदत्तमनुशोचति स्मेत्यत्र हेतुमाह ।

तपतः सुवर्णपतितोद्देशादथ राजतापसत्वमभूत् ॥
विधिवशतो बत तस्माद्विधेर्बलीयस्त्ववागवितथैव ॥ ३४९ ॥

तदानीं त्रिशंकोर्नाम रविवंशसंभूतेर्नरपतेरनेनैव वपुषा दिवं गंतव्यमिति मनीषाऽभवदित्यत्र हेतुमाह ।

त्रिधार्जितं यत्किल पार्थिवत्वं स्वर्गेपि तन्नश्यतु न क्वचिन्मे ॥
इति त्रिशंकुश्चकमे स्वभावाद्दिवं प्रयातुं वपुषामुनैव ॥ ३५० ॥

तदनु तदर्थं वसिष्ठं गुरुमुपससाद स चैनं प्रत्याचख्यौ ।

स ब्रह्मनिष्ठस्तपतां वरिष्ठो वसिष्ठ एतेन कदर्थितः सन् ॥
जगाद राजन्नविचार्य कार्यमकार्यमार्यैरवधार्यतां नः ॥ ३५१ ॥

वसिष्ठेनैवं प्रत्याख्यातस्तत्पुत्रानुपसृत्य स्वेष्टसिद्धयेत्याग्रहं चकारांततः पौरोहित्यं न प्रवर्तयिष्यामीत्युक्ते कुपितैस्तैः शप्तश्चांडालतामापेत्यत्र हेतुमाह ।

पौरोहित्यविनाशोक्त्या वसिष्ठानां कृतक्रुधां ॥
व्याकोपेन पुमानर्थी न गच्छेल्कोनु दुर्गतिं ॥ ३५२ ॥
करालवक्त्रोज्ज्वलकालगात्रभृन्नीलांबरोऽश्लीलवचोविलासभाक् ॥
भूषोच्चयैर्लोहमयैः स शास्त्रतो शशास चांडालदशां विशांपतिः ॥ ३५३ ॥

कविः ।

अत्याग्रहीवष्टतया त्रिशंकुवन्न वर्तितव्यं महतामुपांतिके ॥
यस्त्वेष्टसिद्धिस्तु सुदूरवर्तिनी तत्कालसूत्रं त्वुपकंठसंगतं ॥ ३५४ ॥

अथानेन प्रार्थितो विश्वामित्रस्तदभीष्टसिद्धये तमनुजग्राहेत्यत्र हेतुमाह ।

---

१ हेतिः स्यादायुधज्वालासूर्यतेजस्सु योषिति इति मेदिनी । २ वायुः नाशश्च । ३ दहेन पक्षे मेघेन । ४ उत्कृष्टं रसाधिपत्यरूपतेजः । ५ समाधिः । ६ ब्राह्मणश्रेष्ठत्वोद्देशात्पक्षे सुवर्णाधीशत्वोद्देशाद्राजर्षित्वं पक्षे रजतशून्यत्वं । ७ पृथुपुत्रत्वात्पृथ्वीपतित्वात्पृथ्व्यशत्वात् । ८ आर्यैः विचारं कृत्वा अकार्यं न कार्यं । ९ अतिशयेन वसुमंतो वसिष्ठाः । १० चांडालतां दारिद्र्यं च । ११ नीलवर्णसूत्रं यमपाशश्च ।

स्वश्रेष्ठत्वं ख्यापयंतं महेच्छं दिव्यालोकं कौशिकं तं विनैकं ॥
स्वास्थ्यं कर्तुं दुर्गतस्येदृशस्य को नामास्मिन्ब्रूहि कल्पेत लोकः ॥ ३५५ ॥

ततस्त्रिशंकुं पार्थिवेनैव वपुषा दिवमारोपयितुं कंचिक्रतुमारभत कौशिकस्तत्र मिलितेष्वनेकब्रह्मनिष्ठेषु वसिष्ठा आहूता अपि नागच्छन्नित्यत्र हेतुमाह ।

सुरालयावलंबेन महासवमहोत्सवे ॥
चांडालस्यास्य नागच्छन्वसिष्ठा ब्रह्मगोत्रजाः ॥ ३५६ ॥

अनागतास्ते विश्वामित्रशापेन यवनतां गता इत्यत्र हेतुमाह ।

युगपत्प्रकुपित्रविश्वामित्राक्रांता वसिष्ठपुत्रास्ते ॥
अबलायुता हताभा दुर्गतिमभजंत हंत धृतिमंतः ॥ ३५७ ॥

तस्मिन्क्रतौ हाविर्ग्रहणाय देवता नागमन्नित्यत्र हेतुमाह ।

शापाग्निदग्धमेनं न कुंजन्मानं हि सुमनसोभ्यगमन् ॥
युक्तं सुरभिर्विपक्षोपलालिते यत्र नोपलाशाशा ॥ ३५८ ॥

सुराधिपानागमनेन सद्यः क्रुद्धः स झंझानिलवन्मुनींद्रः ॥
जवाद्दिवं पार्थिवपांसनं तं क्रमात्समारोपयितुं समास्थात् ॥ ३५९ ॥

तपःप्रभावोस्य सखे तपस्विनो न गोचरः स्याद्वचसश्च चेतसः ॥
यदुक्तिमालंब्य महीभृदप्यसौ द्यामध्यरोहत्सकलस्य पश्यतः ॥ ३६० ॥

स्वर्गद्वारं प्रपन्नमेनं निवेदयंति स्म सुराधिराजाय ।

स्वामिन्कौशिकनामकेन मुनिना संप्रेषितं पार्थिवं
मामेनं त्रिदिवं निवेशयत रे नाम्ना त्रिशंकुं द्रुतं ॥
एवं कोप्यधरो नरस्त्वरयते चंडालवेषो भृशं
तत्किं कार्यमिदं विचार्य सुधियामार्येण नः प्रेर्यतां ॥ ३६१ ॥

महेंद्रः ।

आः कृत्यो बत कौशिको मुनिरसौ कृत्यस्त्रिशंकुर्जडो
द्यौरेषा हि ममाक्षिपात्रसदृशी यात्वप्यणुं पार्थिवं ॥
सोढुं न क्षमते तदत्र यतते दुष्टो निवेष्टुं खरो
नैतत्सांप्रतमित्यवाङ्मुखममुं नीचैर्द्रुतं पात्यतां ॥ ३६२ ॥

तदात्वएव प्रतीहारैस्तथा पातितस्त्रिशंकुः ।

स्वामिन्नेनं पाहि मां पात्यमानमित्यत्युच्चैरारटंतं पतंतं ॥
पश्यन्सद्यस्तिष्ठ तिष्ठेति जल्पन् दिव्येवेनं स्थापयामास मानी ॥ ३६३ ॥

---

१ मद्यं देवाश्च सवो आसवश्च । २ ब्रह्मदेवः ब्रह्मणश्च । ३ सर्वशत्रुव्याप्ताः । ४ स्रोसहिताः बलस्य अयुतं तद्रहिताः अयुतबलहीनाश्च । ५ वृक्षं । ६ कुत्सितजन्मानं च । ७ देवाः पुष्पाणि च । ८ सुरभिर्वसंतः कामधेनुश्च । ९ राजाधमं । पृथ्वीपरमाणुं च ।

यत्रोदंचन्मरुत्वत्यां सदारविबुधाश्रयः ॥
दिव्यत्र स्थापयन्नस्य दौर्मनस्यमवभिवत् ॥ ३६४ ॥

अथ विश्वामित्रस्त्रिशंकुतोषाय तपःप्रभावान्नवं सर्गं निर्मातुमारभतेत्यत्र हेतुमाह ।

सुकृती हि संप्रति भयायुक्तमना नृपमनोविनोदाय ॥
श्रितसाहित्यसमुद्रो व्यदधान्नवसर्गबंधविधिं ॥ ३६५ ॥

अथ देवता भीता इत्यत्र हेतुमाह ।

प्रक्रांतोभिनवो नवोत्तरलितो यः सर्गबंधोधुना
नूनं स्याद्बहुधा सदानवमहामोदप्रधानोद्धुरः ॥
सोनर्थायह एव नः सुमनसामेवं नु ता देवता
भीता एत्य तपोधनं सुमतयस्तं सांत्वयांचक्रिरे ॥ ३६६ ॥

भोः कौशिक ब्रह्मणाप्यनुल्लंघनीया पुराणस्थितिरिति नायं व्यवसाय आर्यसंमत इत्युपसंहर्तव्यमित्युक्तेन मे प्रतिज्ञान्यथा भवितव्या निर्मितं च नक्षत्रादिकमाकल्पमातिष्ठत्वित्युक्ते तथैव कुर्म इत्याहुः ।

भास्वन्नक्षत्रमालोल्लसिततनुरयं राजरंकुस्त्रिशंकु-
स्तिष्ठेद्दिव्येव दीप्यन्नसुलभसुरैतोल्लासशाली चिराय ॥
तस्मादस्मात्कवीशो विरमतु बत तत्तोषदात्सर्गबंधा-
द्भूयो नैवार्दयिष्यत्यधुतरमपि योऽवाङ्मुखः स्थापितोस्ति ॥ ३६७ ॥
कवीशितुस्ते नृप कामसंपत्समर्थनो यो नवसर्गबंधः ॥
एनं निषिद्धं विबुधा वदंति कृतं तदेतेन विजृंभितेन ॥ ३६८ ॥

स्मर्यं कदाचिदपि नो मनसाप्यकार्यं
यदाप्यदो विधिकृताद्बलवत्सहायात् ॥
सिद्धिं कथंचिदपि याति तथापि तस्मा-
ल्लाभः परं चिरमवाङ्मुखतैव लोके ॥ ३६९ ॥

देवताप्रभावक्लेशोपरतः कौशिकः पश्चात्तप इत्याह ।

चिरार्जितानां तपसां वृथाऽत्र मे व्ययोनयालं किल दक्षिणाशया ॥
त्रयीमयस्यापि महातपच्युतिं यद्ब्रह्मणोस्यां वसतः समीक्ष्यते ॥ ३७० ॥

तपोव्ययकरीमेनां दक्षिणाशामयं स्वयं ।
विहायातितरां पश्चात्तपति स्म तपोधनः ॥ ३७१ ॥
अगाधत्वदयो गाधिनंदनोथाधियत्नतः ॥
तप उज्जृंभयामास तीव्रं त्रैलोक्यतापनं ॥ ३७२ ॥

---

१ मरुतौ पवनामरौ इत्यमरः । २ सस्त्रीकाः । २ रविबुधाश्च । अंतरिक्षं । स्वर्गश्च ।
३ देवत्वं । ४ अधोमुखः । पक्षे नास्ति वाक् मुखे यस्य सः ।

तदानीं ।

यज्ञेबरीषनृपतेर्दुद्राव नृपशुर्भयात् ॥
यं नाकं हंत नेतापि प्रतिभूभूय पावकः ॥ ३७३ ॥

नष्टपशुस्थाने ऋचीकनाम्ना केनचिन्मुनिना गोशतेन विक्रीतः शुनःशेफनामा मध्यमपुत्र एनं नगाम शरणमित्याह ।

अयोर्पजन्यप्रवरः परं महामेध्योपि पित्रा शतकेन यो गवां ॥
त्यक्तः शुनःशेफ इमं भयातुरो महाभिमानं शरणं समागमत् ॥ ३७४ ॥

अथ विश्वामित्रेण तत्त्राणाय एतत्प्रत्याम्नायेन केनचिद्भवितव्यमिति स्वपुत्रा आदिष्टा अपि मांगीकुर्वतो यवनत्वमगमन्निति आह ।

स्वनिदेशप्रत्यङ्मुखनिजतनयशतं वसिष्ठतनयदशां ॥
सद्योनयत परार्हितकरणे स्वार्हितमपि स्वयं सविधं ॥ ३७५ ॥

अथास्मै गाथाद्वयमुपादिदेशेत्याह ।

द्वे अस्य गाथे शतमन्युविष्णुप्रसादिके केचिदसौ दिदेश ॥
यतोबरीषः परिपूर्णमन्युर्निजाश्रितश्चापि भवेद्विमुक्तः ॥ ३७६ ॥

अथास्य तपउज्जृंभणेन देवता आगत्य तस्मादृषित्वं दत्वा गता इत्यत्र हेतुमाह ।

वितताञ्चिते[2] रसातल उज्जृंभितवति तपस्युपागमनं ॥
विपुलानां हि सुमनसामुदयेपि च तापसत्वस्य ॥ ३७७ ॥

तदनु तं प्रलोभयितुं मेनका जगामेत्यत्र हेतुमाह ।

अधुना मेनकाप्राप्तिरिति तीव्रतपोमदात् ॥
स्मरतस्तक्रतुन्यायः प्रादुरासीदिव द्रुतं ॥ ३७८ ॥

ततस्तां परिगृह्य रमते स्मेत्यत्र हेतुमाह ।

कामानुकूला सा ब्रह्मभूतिरित्येव किं मुधा ॥
परिगृह्य तया रेमे दशवर्षाण्यृषीश्वरः ॥ ३७९ ॥

तपोभंगे हेतुमाह ।

अनया रममाणस्याप्यतितेजस्विनो मुनेः ॥
तेजश्च्युतिरतीवासीदत्राभूत्कस्य संशयः ॥ ३८० ॥

पश्चात्तापमापेत्यत्र हेतुमाह ।

हंतैनामेपरां धिक् धिगहो यां गंतुमिच्छतः ॥
त्रयीमयब्रह्मणोपि तेजश्च्युतिरधोगतिः ॥ ३८१ ॥

कविः

---

१ मध्यम इत्यर्थः । २ गततया रसाले आम्रे माघमासे उज्जृंभितवति सति । ३ माघे तपसि च । ४ पुष्पाणां देवानां च । ५ तापस्यतापसतायाश्चोदयः । ६ क्षेत्रमाकाशं च ।

पुष्करेष्वास्थितस्यास्य सुतरां तपतो मुनेः ॥
तपसः परिपाकोयमनुरूपतयाभवत् ॥ ३८२ ॥

अथोदीचीं दिशं तपसे ददर्शेत्यत्र हेतुमाह ।

अथ परमहिमानं चेतुकामो मुनीशो
दिशमगमदुदीचीं शासितामीश्वरेण ॥
व्यवसितामिदमेतज्ज्ञायते तन्मया य-
त्परमहिमसमृद्धिर्यत्र जागर्ति नित्यं ॥ ३८३ ॥

तत्र तपसा तोषितेन ब्रह्मणा महर्षित्वं प्रत्तमप्यस्याः संतोषाय जायतेस्मेत्यत्र हेतुमाह ।

महातपस्यिते तस्मिन्कौशिके देशिकेश्वरे ॥
विधियोगाद्भुत महातापसत्वमजायत ॥ ३८४ ॥

तत्र तं प्रलोभयितुं देवेंद्रप्रेषिता तं न चालयितुं शशाक प्रत्युत शापेन शिलाभूदित्यत्र हेतुमाह ।

न ब्रह्मदंडविभग्नाकृष्टहृदे प्रखरकैरभाय ॥
अतिकोमलापि रंभा रुरुचे प्रत्युत शिलीभूता ॥ ३८५ ॥
महातपस्यितेर्वृद्धिं विश्वामित्रस्य मित्रवत् ॥
कुर्वाणाप्युत्तराशास्य नातीव प्रीतिमादधौ ॥ ३८६ ॥

तदनुपूर्वां दिशमधिष्ठाय ब्रह्मभावमावहति स्मेत्यत्र हेतुमाह ।

मुख्यायां दिश्यथ प्राच्यां मुनेस्तीव्रतरं तपः ॥
तपतो ब्रह्मसंदेशाद्ब्रह्मर्षित्वमजायत ॥ ३८७ ॥
एतैः श्रीचरणांभोजैः स्वप्रियार्थप्रसाधकैः ॥
जनको ज्ञानकैस्तात मन्ये धन्यतमः कृतः ॥ ३८८ ॥

एवं प्रस्तुत्य शतानंदे तूष्णीं स्थितवति जनको मुनिं प्रति ।

सन्मार्गवती सुमनोरयो मे चिराय कालं हरिर्बुद्ध आस्ते ॥
श्वो मत्प्रसूता भवदंघ्रयोभी समेत्य तं तु प्रतिपारयंतु ॥ ३८९ ॥

मुनी रामं ।

आयुष्मन्जनको ब्रवीति किमिदं तद्वत्स विज्ञायते
(रामः) स्वामिन्किं शिशवो विदंति महतां वाचो गभीराशयाः ।
(मुनिः) कोदंडं तु विभंजयस्यपि सखे (रामः) भक्ता प्रसादो गुरोः
(लक्ष्मणः) स्वामिंस्तिष्ठति लक्ष्मणे परिजने नायं श्रमायार्हति ॥ ३९० ॥

---

१ वसिष्ठ दंडः । पक्षे उदुंबरादारो औषधिभेदः । २ प्रखरकरः सूर्यस्तत्सदृशी भा यस्य तस्मै पक्षे करभः उष्ट्रः । ३ विष्णुरश्वश्च । ४ मया कृतसूचनाः पक्षे सारथिनः ।

जनकः—

स्वदृशाश्रुभरं परं चिरं स समाधिं च मुमोच लोचयन् ॥
वपुषो वचसश्च चेतसस्त्वनयोः कामपि रम्यमाधुरीं ॥ ३९१ ॥

मुनिं प्रति ।

आदेशं भगवन्नयं परिजनो गंतुं गृहं वांछति ।
(**मुनिः**) राजन्हंत वरं (**जनकः**) करोमि शतशः पादारविंदानतीः ॥
(**मुनिः**) सद्यः संतु मनोरथाः सुफलिताः (**जनकः**) स्नानं पुनः सत्वरं ।
प्रातः कश्चित् (**मुनिः**) अयेत्र तत्रभवतोप्यस्त्येष शंकोदयः ॥ ३९२ ॥

करमर्शनप्रसादितकौशिकपद उदितसद्विजानंदः ॥
जोषितचक्रो[1] जनकः पुरं जगामास्तमस्तकं च रविः ॥ ३९३ ॥
गृहमेत्य स्वकांतां सुमेधसं नाम ।
धन्यः पंक्तिरथः प्रभूतसुकृतो भूपालमौलिस्थितः
कन्या कोसलनायकस्य च सती मान्यातिधन्या पुनः ॥
कामान्पूरयितुं समस्तजगतां श्रीरामनाम्ना परं
चिंतारत्नमये यतः समभवल्लोकत्रयीमंडनं ॥ ३९४ ॥

अथ जनकः स्वाभिलाष इव एतस्याः पतिदेवताशिरोमणेरभिलाषे तीव्रपातिव्रत्य-प्रभावात्सेस्यतीष्टमिति तां प्रेरयति स्म ।

अंगश्रीकुशिकात्मजस्य चरणांभोजद्वयी वंदना-
दात्मानं दयिते कृतार्थय सतां संदर्शनं कामधुक् ॥
पुत्रौ पंक्तिरथस्य तत्रभवत[2]श्छात्रौ चरित्रोत्तरौ
दृष्ट्वा देवि दृशः परं च जनुषः साफल्यमुल्लासय ॥ ३९५ ॥

राममुद्दिश्य ।

नरनाथालभ्यगुणो दयिते यदयं महेष्वासः ॥
स्वाधिकमहोपहारानर्हति तद्व्रचय सांप्रतिकं ॥ ३९६ ॥
मुनींद्रसन्निधौ भद्रे दृष्ट्वैव रघुनंदनौ ॥
भवत्या गिरिजामाताप्युपयाचिष्यते ध्रुवं ॥ ३९७ ॥
कुमारौ सुकुमारौ तौ कुमारसमविक्रमौ ॥
शीताभिनंदिनौ शीतैरुपचारैरुपाचर ॥ ३९८ ॥

सुमेधाः—

प्रियतमवचनाशयं विदित्वा महिलामैथिलमंडलाधिपस्य ॥
स्वसुताकरविभ्रमानुदारानुपहारानुपकल्पयांचकार ॥ ३९९ ॥

---

१ ब्राह्मणाः । पक्षिणश्च । २ राष्ट्रं चक्रवाकश्च ।

उपचारविशारदाय राज्ञी परिचारानुपवाह्य सत्वराऽसौ ॥
उपहारपरंपरा अपारा निरगच्छन्मुनिनाथदर्शनार्थं ॥ ४०० ॥
नत्वा मुनींद्रचरणौ दत्त्वोपायनमग्रतः ॥
कृत्वा पाणिपुटं राज्ञी मंदमंदमुवाच सा ॥ ४०१ ॥
द्विजेंद्रमंडना एते ह्यागताः श्रीमदंघ्रयः ॥
मन्यामहेथ कन्यायां विवाहो भविता वरैः ॥ ४०२ ॥

रामलक्ष्मणौ सादरं वारंवारं पश्यंती तद्वृत्तं जिज्ञासमानां प्रति मुनिः ।

एतौ पंक्तिरथस्य तन्वि तनयौ चंडांशुवंशोदया-
दस्मत्तः सरहस्यमस्त्रनिगमं संप्राप्तवंतौ पथि ॥
धीरौ वीरवरौ कुशाग्रधिषणौ सुंदरांगनासूदना-
वस्मत्सक्रतुरक्षकौ भवदुपाध्यायसमुद्धारकौ ॥ ४०३ ॥
जामातरौ सुंदरौ कश्चिदार्ये

(सुमेधाः) आस्तामेतस्याभिमानो गुरूणां ॥

(मुनिः) स्यादेतत्तु स्वात्मसंवेदनीयं संकल्पो वा किंनु मिथ्यापि सत्याः ॥ ४०४ ॥

सुमेधाः प्राह्य ।

इदं राजाज्ञया नीतं भोज्यजातमनेकधा ॥
भगवन्भोजनस्यास्य सदाः कामः प्रसिध्यतां ॥ ४०५ ॥

मुनिनांगीकृते ।

विन्यस्य पीठानि मनोहराणि विरच्य नानाविधरंगवल्लीः ॥
आसाद्य पात्राणि हिरण्मयानि प्रसाद्य दीपान्सुरभींश्च धूपान् ॥ ४०६ ॥
पूरिकाघारिकावार्पिकाफेनिका मोदकान्गुंडकान्पिंडकान्मंडकान् ॥
शष्कुलीः कुंडलीः पायसं सद्रसं तत्सुधास्रावकं संज्जेसं यावकं ॥ ४०७ ॥
रम्यां रसालां पनसं रसालं जंभोणि रंभां लकुचामृतानि ॥
द्राक्षाः प्रियालानि दधीनि दुग्धं हैयंगवीनं मथितं ससारं ॥ ४०८ ॥
अंजीरकोलानि तथैक्षवानूर सान्शाकान्येनकानि च रागखांडान् ॥
स्वयं सती संपरिवेषयंत्यसौ महादरान्भोजयति स्म तान्मुनीन् ॥ ४०९ ॥
पुष्पसारैर्गंधनीरैर्पुष्पहारैर्मनोहरैः ॥
पिष्टातपत्रैरतुलैस्तांबूलैस्समपूजयत् ॥ ४१० ॥

प्रत्यावर्तनसमये सुमेधाः—

---

१ गरुडमामीच । २ उत्कृष्टः । ३ वडे. । ४ पेढे. । ५ सांजा. । ६ कंजी. । ७ श्रीखंड. ८ गरे. । ९ निबुभेद. । १० अननस. । ११ चारोळ्या. । १२ बदराणि. । १३ इक्षुसंबंधिनः । १४ मोरंबा. ।

नत्वा श्रीमत्पदांभोजे भगवन्नेकमर्थये ॥
चापारोपविधावस्य जयः श्रूयतां मया ॥ ४११ ॥

मुनिः-

तत्तथैव महामत्या भवत्या यदुदीरितं ॥
सत्यालापः कथं नाम मिथ्याभवितुमर्हति ॥ ४१२ ॥
गृहं प्रत्यागता सुमेधाः पत्या पृष्टाऽवीवदत् ॥
याज्ञवल्क्यप्रसादात्तद्ब्रह्मसाम्राज्यवैभवं ॥
फलितं श्रीमतस्त्वद्य यत्प्राप्तौ रामलक्ष्मणौ ॥ ४१३ ॥
कौसल्यातनयस्य नाथ सहजं तेजःप्रभावं परं
योगींद्रस्य महाप्रसादमजरं तस्योपरिष्टात्स्थिरं ॥
पश्यंत्याश्च नवप्रवालवदमुष्यायुष्मतः श्रीकरं
चापारोपविधौ मम प्रभवति प्रेखायमानं मनः ॥ ४१४ ॥

तस्मात् ।

श्रीमंश्चापगुणाधिरोपणपणः संत्यज्यतां यत्नृणां ॥
वैतथ्यं श्रुतिसिद्धमेव न परं बाधाय (जनकः) कस्मादिदं ॥
(सुमेधाः) संदिग्धोस्य जयः (जनकः) कृतं तदमुना
(सुमेधाः) साक्षादहो श्रीधरः ॥
मुग्धे मुह्यसि किं मुधैव न जैयोस्याग्रेसरः सर्पति ॥ ४१५ ॥

सर्वराजकुमारागमने हेतुमाह ।

शौर्योष्मणा ये तु भृशं ज्वलंतः सीताभिलाषात्स्वयमाव्रजंतः
तत्रास्य पत्रं जनकस्य राज्ञः सर्वे किमायंतनराजपुत्राः ॥ ४१६ ॥
काशीमिमावसंस्तां जनैकनुताः सर्वमंगलासंगाः ॥
समंहासेनासुमहावहा महानंदिनः क्षितिर्भृदीशाः ॥ ४१७ ॥

आगतानां मधुरमधुरभोजनप्राप्तौ हेतुमाह ।

आहूता आदरतो जनकेन श्रीमतां प्रवेकेन ॥
पृथुकामा रविभास्ते मधुरमधुरभोजिनः कथं न स्युः ॥ ४१८ ॥

राज्ञां जानकीध्याने हेतुमाह ।

मदनज्वलनज्वालाजर्जरा राजकुंजराः ॥
अप्यधिष्ठाय शिबिराण्यासन्सीतार्पितांतराः ॥ ४१९ ॥

---

१ जयः पार्षदः । पक्षे विजयश्च. २ हिमं सीता च । ३ पुरीं । ४ जना एजनकाः । ५ मंगलानि पार्वती च । ६ उत्तमोत्सवमावहंतः । पक्षे तेजः सेना षडाननश्च । ७ आनंदो संदीच । ८ राजानः शिवाश्च ।

अथ मंडपवर्णनं । तस्य सुवर्णरत्नादिमयत्वे हेतुमाह ।

बभौ सुवर्णप्रचुरः स मंडपः सद्रत्नकीर्णः सुमनःस्रगुज्ज्वलः ॥
मुक्तान्वितो ब्रह्मविदा विनिर्मितो यतो हि रामाद्भुतविक्रमाश्रयः ॥ ४२० ॥

तस्योच्चरतत्वे हेतुमाह ।

उच्चैस्तरां स्थितिं बिभ्रदमंडत स मंडपः ॥
सुमनःसेविनो युक्तं तदिदं सुवितानिनः ॥ ४२१ ॥

तत्र स्तंभदर्शनेन जडीभावे हेतुमाह ।

सत्पथचारी भास्वान् हैमस्तंभोंचितश्च सन्मणिभिः ॥
प्रेक्षकजनस्य यस्मिन्सृजति स्म स्वात्मभावमचिरस्य ॥ ४२२ ॥
तरलतरैः स्मितमधुरैर्निजभावव्यंजिकेव नयनांतैः ॥
यच्छालभंजिकास्मिन्प्रेक्षकजनधैर्यभंजिका रेजे ॥ ४२३ ॥

वितानमुत्प्रेक्षते ।

पाणिग्रहणकठिणतरपणकुतुकनिरीक्षणाय निजदुहितुः ॥
अवतीर्ण इव क्षीरार्णव उल्लोचो व्यरोचताभिनवः ॥ ४२४ ॥

पुष्पमालामुत्प्रेक्षते ।

सामोदाः सालिकौ[1] रामपराक्रमदिदृक्षवः ॥
दिव्यत्वात्सुमनोमाला अंतरेवावतस्थिरे ॥ ४२५ ॥

मणिदीपानुत्प्रेक्षते ।

दिदृक्षवः श्रीरघुवीरविक्रमं निरंजनत्वाच्छुचयो महोमयाः[2] ॥
वतीर्य किं सन्मणिदीपिका दिवः संबाधभीता इव तस्थुरंतरा ॥ ४२६ ॥

नर्तकीं वर्णयति ।

यद्भ्रूछपाल्योनुपमास्तिलोत्तमा यदुत्तमांगस्थितयः सुकेशिकाः ॥
यत्कंठनाल्यः किल मंजुघोषिकास्ता लासिकौ[3] यत्र जगुर्विलासिकाः ॥ ४२७ ॥

जलयंत्रं वर्णयति ।

किरंत्यमृतशीकरान्कृशतनुर्नटंती मुहु-
र्बहुप्रथितसुस्वरा जनमनोविनोदावहा ॥
प्रतिस्तबकमाहिता रुचिरनीरयंत्रोत्थिता
समं सलिलधारिका गणिकया समं स्पर्धत ॥ ४२८ ॥

व्यंजनं वर्णयति ।

सद्वंश्यं दड्मधुरं सद्वृत्तं तत्र सुजनवद्व्यजनं ॥
आमोदामोचि सदावर्तेन सुजीवनं न कथमासीत् ॥ ४२९ ॥

---

१ सभ्रमराः । २ तेजोमयाः । ३ नृत्यकरणाख्या स्त्रिया ।

स्तंभोत्कीर्णशुकादीन्वर्णयति ।

वयःस्फुरत्स्तंभकुलोयसंश्रया असंशयास्ते शुकसारिकादयः ॥
वेदांतसिद्धांतवचोविजृंभितैर्मिथः कृतैर्गृह्यकभावमावहन् ॥ ४३० ॥

मंचान्वर्णयति ।

मंचाः पुनः कांचनसारसंचिताश्चंचन्मृदुश्लक्ष्णसुतूलिकांचिताः ॥
सहोपधानाः सविलाससाधनाः समे समाना नृपनंदना इव ॥ ४३१ ॥

तत्रत्यकार्यपुरुषान्वर्णयति ।

सोष्णीषा मणिकुंडला अधिगलं मुक्तालतालंकृता
भ्राजत्तोडररत्नमुद्रिककराः संक्रुमकट्टाटिकाः ॥
चंचत्कंचुकचुंबिचारुवपुषो विन्यस्तपर्यस्तिका
भव्या भावविदोस्य कार्यपुरुषास्तत्तत्स्थलस्था बभुः ॥ ४३२ ॥

जनकमंत्री ।

प्रातश्चापगुणाधिरोपणमहः संकल्पितस्तद्भुतं
रंगोलंक्रियतां समं परिजनैः श्रीमद्भिरित्येष वः ॥
विज्ञप्त्यै प्रहितोस्मि भूमिपतिनेत्येवं समामंत्रिताः
पृथ्वीनाथसुतास्तपस्थितिपराः शीतातुराजज्ञिरे ॥ ४३३ ॥
स्नानं मांगलिकं विधाय तरसा निर्वर्त्य सांध्यं विधिं
लिप्त्वा कुंकुममंगकेषु रुचिरानाच्छाद्य सूक्ष्मान्पटान् ॥
आकल्पान्प्रतिमुच्य रत्नमुकुरे संवीक्ष्य चामीकरैः
संपूज्य द्विजपुंगवान्सकुतुकास्तस्थुः प्रयाणोन्मुखाः ॥ ४३४ ॥
तां तां द्विजेंद्रगदिताशिषमावहंतो मौहूर्तिकोदितमुहूर्तमनुव्रजंतः ॥
प्रास्थानिकीं वाचमुदाहरंतो जग्मुर्गृहीतशकुनाः सुमनोरथस्थाः ॥ ४३५ ॥
बृंहत्सु नागेषु नदत्सु वाजिषु ध्वनत्सु वाद्येषु वदत्सु बंदिषु ॥ ४३६ ॥
पदातिषु स्फूर्जयुमुक्षिपत्स्वरं समाजिरं भव्यतमाः समागमन् ॥ ४३७ ॥
राजालयो न्यविक्षंत सूर्यालोकविकस्वरं ॥
सश्रीकं नीरजस्थानं तन्निध्यातरसोदयाः ॥ ४३८ ॥
प्रत्युद्गतास्ते जनकेन भूभृता नता धृताः पाणितले प्रवेशिताः ॥
पर्यंकवर्येषु सपर्ययांचिता नृपाधिपाः शौर्यदृपा उपाविशन् ॥ ४३९ ॥

राजोपवेशनप्रकारं वर्णयति ।

पृष्ठे भृत्याः पार्श्वयोरप्यमात्याः सामंताश्चालंकृता अंतिकस्थाः ॥
याष्टीकौघोप्यग्रतो व्यग्रमेवं मंचश्रेष्ठेष्वासचंत क्षितीशाः ॥ ४४० ॥

---

१ पक्षिणः । २ पक्षिगृहं ।

अथ रात्रावेकांते सर्पस्वभावसुलभां जनसमाजभीरुतां क्षत्राधीशस्यात्मनो नाहृततया द्विजैः सहगमनाक्षेपेणाच्छादयंतमिव स्वविजयस्यापि न नियतत्वमिति ब्रुण्णी साकेतानुसरणं वरमिति वदंतं भ्रातरं रामः ।

ये यथा गुरुनाथानां वितथा न मनोरथाः ॥
तया यतावहेवश्यं भ्रातरस्तान्मान्यया कृयाः ॥ ४४१ ॥

सकलनृपमीलनानंतरं मुनीश्वरानानयामास जनकस्तत्र हेतुमाह ।

सालंकरणसमृद्धापि शर्मसंदर्शिका न राजसभा ॥
अवरेति सत्वशालिनमृषिवाटं प्राहिणोदिवामात्यं ॥ ४४२ ॥
तुरंगमातंगशतांगसंघैर्वाद्यैर्मृदंगानककाहलाद्यैः ॥
ध्वजैः पताकाभिरमात्यवृद्धः संरंभतोगान्मुनिवर्यवाटं ॥ ४४३ ॥
सभृत्यः प्रणिपत्यासावमात्यः कृत्यकोविदः ॥
उवाच वाचमुचितां मोचारसमुचं शुचिं ॥ ४४४ ॥

स्वामिश्चापगुणाधिरोपणपणं जेतुं नृपाणां गणः
पूर्णः शौर्यगुणेन मंगलचैणं रंगांगणं संगतः ॥
किंतु स्वस्य कृतार्थतां रचयितुं श्रीपादपद्मस्पृशः ॥
पांसूनेव हि वांछता क्षितिभृता संप्रेषिताःस्मो वयं ॥ ४४५ ॥

किमयं ब्रवीत्यहो इति कौशिकपृष्टः स्वदेशीयः कश्चिन्मुनिर्नैवान्यथा ब्रवीतीत्याह ।

सद्वृत्ताब्धिर्भवानेव वररत्नप्रदः प्रभुः ॥
लब्धार्थतायामेतस्य नामी भूमीभृतः क्वचित् ॥ ४४६ ॥

विश्वामित्रः—

अये वत्स रघूत्तंस सज्जो भव सहानुजः ॥
सभां सर्तुं रसाधीश समुदायसमावृतां ॥ ४४७ ॥

श्रीरामः क्षणधृतलक्ष्मणाशयः ।

नरोत्तमा समायाता यत्सभायां महत्तमाः ॥
गंतव्यं गुरुराजैस्तल्लघुभिः किं प्रयोजनं ॥ ४४८ ॥

वत्स भवंतं विना सा सभा मया द्रष्टुमप्यनर्हा किं पुनस्प्रष्टुमित्याह ।

सुवर्णाढ्या विद्युद्भमदसिचया साधुवलया
लसत्सन्मुक्तौघा सगुणधनमूर्द्धन्यनिचया ॥
प्रसर्पत्सौरभ्या परमरमणीया नृपसभा
भवानेवामुष्या रघुतिलक सौभाग्यमखिलं ॥ ४४९ ॥

किंच यदुक्तं लघुभिः किं प्रयोजनमिति न तद्वक्तुमर्हमित्याह ।

---

१ राज्ञां सभा । रजोगुणकांतिश्च । २ समर्थे ।

स्वस्य प्रियतमावाप्तिर्गुरूणामतिगौरवं ॥
अनायासेन येन स्यात्स किं प्राज्ञः सखे क्वचित् ॥ ४५० ॥

नहि धनुर्गुणारोपणं मदवस्थमिति नियम इति चेन्नैवं ।

वत्स चापलतायां तु लोके यद्गुणदर्शनं ॥
रघुनाथं विना नास्ति तद्धुस्तर्काद्विरम्यतां ॥ ४५१ ॥
समर्पिताखिलास्त्रस्य गुरोरस्य रघूत्तम ॥
चापभंगकटात्कारनिनादो दक्षिणायते ॥ ४५२ ॥

किंच दैन्यमवलंब्य ।

समुपाश्रितोसि यस्त्वं राम विधातुं भवस्य चापजयं ॥
सोयमुदास्से यदि तच्छालीनोये यथेत्युपनिषत्स्यात् ॥ ४५३ ॥

राम आर्जवमालंब्य ।

भगवंस्तत्तथैव स्यात्प्रसादाद्विशदाद्गुरोः ॥
नोद्घनीयं लघुभिर्गुरूणां वचनं क्वचित ॥ ४५४ ॥

कौशिकादिष्टा मुनिपत्न्यः ।

तं भोजयित्वामृतवत्फलानि नीराज्यसन्मंगलगीतिकाभिः ॥
स्थिरोदयां तां श्रियमश्नुहीति प्रीत्याशिषं प्राब्रुवतार्षिपत्न्यः ॥ ४५५ ॥
अंतर्गतांस्तानाकर्ण्य सत्यालापान्मुनीश्वरः ॥
प्रास्यानिकं प्रत्यमुंचद्रोमांचैः किं नु कंचुकं ॥ ४५६ ॥
अथ भूर्यनुभावास्ते सूरयः सूर्यवर्चसः ॥
अनेकतूर्यनिनदैर्नभ आपूर्य निर्ययुः ॥ ४५७ ॥

याज्ञवल्क्यादीनां रामानुगमने हेतुमाह ।

मैत्रेयीवर गाधिनंदनभरद्वाजादयस्ते द्विजा
जग्मू रम्यरथैरतीवसुभगा रामानुगा द्वंद्वशः ॥
युक्तं तद्भुवनत्रये न भविता हंतात्र रामानुग-
स्तादृक्पुण्यजनः पुनः प्रविरलः स्यात्सत्तमस्थानगः ॥ ४५८ ॥

कविः ।

स भारतैः सस्मृतिभिः पुराणैर्युक्ता त्रयी सा हि शतांगसंस्था ॥
यदाभवत्सत्पथसंप्रवृत्ता भवास्त्रभंगस्य कुतोय चिंता ॥ ४५९ ॥

---

१ प्रकर्षेण अज्ञः किं किंतु प्राज्ञः । २ संसारस्य पराभव=पक्षे शिवस्य धनुः । ३ स्याद्-धृष्टस्तु शालीन इत्यमराल्लज्जायुक्ता स्यात् । ४ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति । ५ रामा स्त्री रामचंद्रश्च । पुण्यशाली जनः राक्षसश्च । ६ उत्तमस्थानं प्राप्तं । पक्षे तमस्थानं प्राप्तः । रावणं विना कोपि न स्यात् । ७ शतांगो रथः शतशः शाखाश्च ।

श्रीमद्राघवफुल्लगल्लफलके द्वंद्वोपसंभावनात्
प्रस्थाने मुनिनाथ दारनिवहैः कस्तूरिकानिर्मितं ॥
इंदुर्बिंदुमवेक्ष्य वक्त्रसमतालाभादविंदन्मुदं
युक्तं तद्द्विजराजतुष्टय इयं यन्मे प्रवृत्तिः प्रभोः ॥ ४६० ॥

मुनिपत्नीनामनुगमने हेतुमाह ।

एनं तपोधनजनं नूनं यतमानमजरपरमार्थे[1] ॥
मुनिनाथ धर्मदाराः सिद्धय इव सादराः पुरान्वगमन् ॥ ४६१ ॥
अथ सत्पथसंचारी नक्षत्रेक्ष्वेषु[2] सत्सु सः ॥
विरराज रघूत्तंसो राकाचंद्र इवापरः ॥ ४६२ ॥

मंदगमने हेतुमाह ।

सकलाल्हादिनी मौनियात्रा विरतिमत्यसौ ॥
मंदमंदमगात्पुर्याः पथि प्रौढवधूरिव ॥ ४६३ ॥

शिष्यगणं वर्णयति ।

गृहीतनानागमपत्र आदरात्समाश्रितः सद्गुरुराजसन्निधिं ॥
शिष्यव्रजः संप्रति भान्वितोऽत्यजन्नपाठकालश्रियमप्ययन्पथि ॥४६४॥

छत्रं वर्णयति ।

त्रय्यात्मनो धर्मगुरोर्महातपस्थितेस्तिरस्कारमचीकृपत्तरां ॥
तदोन्नतच्छात्रगणोपि सन्यतो न्यग्राहि किं रत्नसुवर्णदंडतः ॥ ४६५ ॥

सुरकृतकुसुमवृष्टौ हेतुमाह ।

संरंभान्महतः पुरः पथि यतः संदर्शनाच्छ्रीमतः
सद्यो ये त्वनिमेषतामुपगतास्तैर्हंत संपाद्यते ॥
नायेस्मिन्सुमनः प्रपातनमहो तास्माभिरेतत्पुनः
स्थाने नोत समत्सरा इव सुरास्तत्तत्र संतेनिरे ॥ ४६६ ॥

श्रीरामदर्शनेन संतोषाधिक्ये हेतुमाह ।

इह बहुशः स्तव्याकृतिविलोचका मैथिला जनाः सकलाः ॥
राघवदर्शनसंभवमन्यभवन्नुत्सवं नवं कमपि ॥ ४६७ ॥

श्रीरामदर्शनेन तृप्तिं नान्वभजन्नित्यत्र हेतुमाह ।

तमपूर्वं तु पुनर्वसुभूतं स्वानंदकंदमभिवीक्ष्य ॥
तृप्तिं न जना जग्मुर्न्वासेचनक एष शाश्वतनुः ॥ ४६८ ॥

---

१ अजरा ये देवास्तेषु वरः श्रेष्ठः रामः तस्य मायायाः अर्थे प्राप्तौ । पक्षे । स्फुटं ।
२ नक्षत्रतुल्येषु ऋषिषु । पक्षे क्षत्रभिन्नेषु ब्राह्मणेषु ।

वरत्वे रघुनाथस्य प्रेक्षामास पुरस्त्रियां ॥
अंगमुत्तममेकत्रांतरंगमपरत्र च ॥ ४६९ ॥
जानक्या अंगनः सख्या वरयात्रां प्रपश्यत ॥
इति गौरीजनः सद्यः प्रासादे प्रत्यपद्यत ॥ ४७० ॥
सौंदर्यशौर्यबलधैर्यमहः प्रभादीस्तैस्तैर्गुणैर्नृपसुताः शतशो हि दृष्टाः ॥
अस्मात्परं नरवरं न वरं परंतु वीक्षामहे विदितभा इति सांवविद्युः ॥ ४७१ ॥
तं सर्वतः प्रवरपौरवधूसमूहः स्नेहात्स्वदृक्कुवलयं भ्रमयांबभूव ॥
रत्नाकरांबरवती वसुमत्यपीयं नैवास्य मूल्यमिति किं कथयन्प्रवृत्तः ॥ ४७२ ॥
जायंते मलिनांतराः कतिपये श्रुत्यंतगा अप्यहो
रंभान्वेषणतत्पराः पुनरसावेतादृशां स्त्रीदृशां ॥
यन्नीरंध्रतया भवन्निवसतिः सोयं मम स्वामिनः
श्रीमद्रामविभोरगण्यमहिमा लोके समुज्जृंभते ॥ ४७३ ॥
प्रतीपगामिन्यपि सांजनापि दृक्प्रेम्णा प्रपन्ना रघुपुंगवं प्रति ॥
समस्थितिः साथ निरंजनाऽभवत्तथाहि गीता अपि चेत्स्थितिस्थिताः ॥ ४७४ ॥
तं प्रासादारूढा नृपललना जालरंध्रतोऽपश्यन् ॥
युक्ता हि भोगिनीनां रंध्रान्वेक्षैव लोकसंबाधे ॥ ४७५ ॥
दृष्ट्वात्यद्भुतमस्य वैभवभरं स्नेहातिरेकोद्भव-
द्रोमांचाश्रुपरिप्लुता मनसि सा सद्यः सुमेधाः स्वयं ॥
सीतायाः करपल्लवं रघुपतेर्हस्ते निधायार्पय-
द्वारं युक्ततरं सुमेधस इदं यद्वाविसंकल्पनं ॥ ४७६ ॥

तद्राघवाय रोचतेत्यत्र हेतुमाह ।

सा सर्वज्ञगुरोस्तस्य श्रीमतः स्वामिनो मम ॥
सुमनःक्लृप्तिरभवत्परमामोददायिनी ॥ ४७७ ॥

घंटापथे परमसंबाधे हेतुमाह ।

जनसंबाधसंभीतं घटापथगतं सुखं ॥
मनो बहुसमावेशं जनानामाविशद्ध्रुवं ॥ ४७८ ॥
द्वारे नरेश्वरसभस्य महाप्रभस्य रंभोच्छ्रयः सकलशोभित एष किंस्वित् ॥
सन्मंगलार्थमिति मोदभृतेन सद्यः संभावितोऽभवदनेन सुनेत्रपातात् ॥ ४७९ ॥

---

१ दृक्कमलं । पृथ्वीमंडलं च । २ छिद्रं गवाक्षाणि च । ३ समा । ४ वक्रगामिनी । ५ अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सइति । १॥ ६ नृपस्त्रीणां पक्षे सारंगीणां । ७ सभायाः । ८ रंभा कदल्यप्सरसोरिति मेदिनी । ९ सकलशः कलशयुक्तदास्याः वस्त्रदानं क्रियते इति लोकोपचारः पक्षे सकलशोभितः १० वस्त्रं कटाक्षश्च।

नीराज्यदीपप्रभदिव्यरत्नोल्लसन्मुकुटया जनकः स्वदोर्भ्यां ॥
रामं परिष्वज्यवतार्य बाष्पैरक्षालयत्तत्पदपद्मपांसून् ॥ ४८० ॥
साष्टांगं प्रणिपत्य कृत्यकुशलस्तत्तत्पदाब्जान्यसौ
वंदित्वाथ पृथक्तदीयरजसाभ्युद्धूल्य भालस्थलं ।
बाहुभ्यां परिरभ्य सभ्यतिलकः श्रीमत्कृपापांगतो
लब्धार्थोस्म्यहमंजसेति निगदन्प्रावेशयत्प्रांजलिः ॥ ४८१ ॥
अभ्युत्थितान्सन्नमतो महीभृतो निवेदयत्सु प्रियवादिवंदिषु ॥
मंचानलंचक्रुरकिंचना जनाः सत्वस्य हीदं स्फुटमेव वैभवं ॥ ४८२ ॥
अंतः समुधिते सत्वे[1] राजसार्थो[2] व्यलुप्यत ॥
संदोहलक्षणा साथ रमणीया सभाभवत् ॥ ४८३ ॥
न मेने जनको यत्र राज्ञस्तान्सकलानपि ॥
तत्र शीतोदये चित्रं तापसप्रवरानमून् ॥ ४८४ ॥
श्रीद्यौरिव सभाशोभां पूर्वमेवाभ्यपद्यत ॥
तां परां रामचंद्रेण लक्ष्मणाग्रेण सांप्रतं ॥ ४८५ ॥
श्रीरामे तत्र संप्राप्ते चंडांशुकुलदीपके ॥
सद्यो वसुमतीशानां सीताशा समभज्यत ॥ ४८६ ॥
रामे लोचनगोचरे क्षितिभृतां प्रौढाभिमानोपले
भग्नो भूमिसुतां लभेमहि नवेत्येवंविधः संशयः ॥
छिन्नश्चापगुणाधिरोपणपणे कार्याणि कर्माण्यपि
क्षीणानीत्युचितं हि भिद्यत इति स्पष्टा श्रुतिर्मौडकी[4] ॥ ४८७ ॥
नानेकशो निर्जरमल्लतल्लजा निर्वाहका यस्य च पेटिकां क्षमाः ॥
ततः स वज्रोत्सह[5] चक्रतो महाकालास्त्रतः[6] केन नरा भयातुराः ॥ ४८८ ॥
न मृषा मनुजस्यास्य महाकालास्त्रभंजनात्[7] ॥
वैदेह्यवाप्तिरित्येष जनकप्रेक्षितः पणः ॥ ४८९ ॥
सख्येन कंचुकैः साकमभूवन्भूभुजां भुजाः ॥
सीताभिसंधिशैथिल्ये कृत्या पीवरताकया ॥ ४९० ॥
तत्रोग्रधन्व्यधिसंगतेजसा रसाधिपानां मुखसारसान्यहो ॥
सद्योन्वशुष्यन्न वनैकवासिनोरप्येनयो राघवयोस्तदद्भुतं ॥ ४९१ ॥
अथ यावच्छतानंदे विदेहाधिपतेः पणं ॥

---

१ रामचंद्रे सत्वगुणे गर्भेच । २ राजसमूहो रजोगुणो स्त्रीरजश्च । ३ भयसहिता ।
४ भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशया इतिश्रुतिः । ५ वज्रा होरकाः पक्षे इंद्रवज्रं ।
६ महाकालः शिवस्तदस्त्रं धनुः पक्षे प्रसिद्धः । ७ कालास्त्रभंजनं विना मोक्षाभावः ।

प्रकाशयति तावत्तु प्रतिहारो व्यजिज्ञपत् ॥ ४९२ ॥
ककुभ्यपाच्यां बत सत्वसिंधुभिः संताडयमानः पिशिताशबंधुभिः ॥
संश्रूयते व्योमनि चंडदुंदुभिर्विज्ञाप्यते हीत्यमुदंतबिंदुभिः ॥ ४९३ ॥
उज्जृंभिते राजसभाविशुद्धसत्वप्रकाशश्च विदेहगेहे ॥
तन्मत्सरात्किंनु तमो दशास्यरूपेण सद्यः प्रतिपद्यते स्म ॥ ४९४ ॥
उपस्थिते हंत तमोमयोस्मिन्महासुरेनंतपथेन राज्ञः ॥
आविर्बभूवुः सहसा प्रकाशमोहादयस्तन्न विचित्रमासीत् ॥ ४९५ ॥

माद्यद्दिग्द्विरदेंद्रदंतमुसलाघातव्रणांकोल्लस-
द्रक्षा लक्षविपक्षकक्षदहनप्रत्यक्षदावानलः ॥
स्वर्लोकाहृतनंदनद्रुकुसुमस्रग्बंधगंधोत्कट-
स्कंधः श्रीदशकंधरस्त्रिभुवने वर्वर्ति सर्वोपरि ॥ ४९६ ॥

सद्यः समुत्थितवता जनकेन राज्ञाभ्युद्गम्य सम्यगुदितेन समं प्रणम्य ॥
हस्ते धृतः सपदि मंत्रिवरोपनीतस्फीतप्रपंचवति मंच उपाविवेश ॥४९७॥
आः कस्मान्मिलिता अमी नरपते (**जनकः**) लंकेश्वर श्रूयतां
कन्याया करपीडनाय विहितं जेतुं पणं (**रावणः**) सांप्रतं ॥
आहूताः स्वयमेव किंनु मिलिताः (**जनकः**) पत्रैः समामंत्रिताः
(**रावणः**) कस्मादत्र महोत्सवे जडमते नास्माकमामंत्रणं ॥ ४९८ ॥

न वयं किंनु राजेंद्रा नैव वा ब्रह्मशालिनः ॥
किंन वा सुंदराकाराः कस्मान्नामंत्रणं वद ॥ ४९९ ॥

जनकः—

मध्ये वारिधिवासिनो न विषया यूयं नृणां नः परं
निध्याता मनसा नवेति निपुणं ज्ञातुं भवंतः क्षमाः ॥
(**रावणः**) सत्यं सौम्य समागतोस्म्यहमतो नामंत्रितोपि स्वयं
तत्ताद्दग्गमनं कनीयसि पुनः स्याज्जायसां भूषणं ॥ ५०० ॥

शतानंदः पणमाह ।

भोः सर्वामोदकरीं धन्वलतां[1] संविधाय कंचित्तैज्यां[2] ॥
अनुभूय कुसुममालां रमणीयफलामवाप्य तां नूनं ॥ ५०१ ॥

रावणः—

सांबं सायुधशक्तिवाहनपरीवारं दधानं गिरिं
कैलासं किल केलिकंदुकमिव प्रेंखोलयन्रावणः ॥
ताभिः सारतया समुज्झितमयं क्रष्टुं कयं वर्तता-

---

१ धनुर्लतां पक्षे मरुदेशलतां । २ जलयुक्तभूमिकां संधितमौर्विकांच ।

मेतद्धौतमज त्वमेव वद तन्मूढं नृपं बोधय ॥ ५०२ ॥

शतानंदः—

भो लंकाधिप सत्यमेतदखिलं किंतु प्रसंगो ह्यसा-
वुद्वाहस्य वधूपरंजकतया नात्र प्रतीकोभवत् ॥
इत्येवं करपीडने स भगवान्सांख्यायनो सूत्रय-
त्तस्मादेव च वीटिकोत्सवमुखाचाराः क्रियंते वरैः ॥ ५०३ ॥

रावणः—

उक्तं राजपुरोहितेन रुचिरं किं त्वत्र सूत्रे पुनः
शेषोस्ति प्रतिषिद्धवर्जमिति तन्माहेश्वराणां हि नः ॥
भंगोयं प्रतिषिद्ध एव धनुषः (**शतानंदः**) भंगोस्तु नामेदृशो
भो लंकेश परंतु तत्र सुगुणारोपस्तु नैतादृशः ॥ ५०४ ॥

रावणः—

मकरालयवास्तव्यैर्न धनुः किमधः कृतं ॥
(**शतानंदः**) कन्याप्रसंगमासाद्य तुलायां किल दूरतः ॥ ५०५ ॥

रावणः—

गौतमश्च पुलस्त्यश्च भ्रातरौ तद्भवानिह ॥
ज्ञातेयमातनोषीव (**शतानंदः**) ईर्ष्योत्पादाय नान्यथा ॥५०६॥

रावणः—

चंडीशचंडभुजदंडनिपीडनेन कोदंडकांडमखिलं शिथिलं यदासौ ॥
तन्मूढ विप्र शिशुकर्षणजर्जरांगं कृष्टुं दशाननभुजास्त इमे त्रपंते ॥ ५०७ ॥

शतानंदः

मैवं वचोर्हति भवान्गदितुं महेश भक्तो यतो धनुरिदं परदेवतायाः ॥
निर्जीवभावमवलंब्य चिरं स्थितं तत्संजीवयत्वतितरामिह भासमानः ॥ ५०८ ॥

रावणः—

किरे कटु प्रलपसि द्विज कुत्रचिदन्नैतज्जयप्रदमिति प्रभुणा निरस्तं ॥
संजीवयंस्तदहमस्य मुदे कथं स्यां (**शतानंदः**) भंक्त्वैव तर्हि भव रावण
भूरितुष्टये ॥ ५०९ ॥

रावणः—

वैदेह्यवाप्तिरिह पुण्यजनाधिपस्य नैवेतरस्य कुजनस्य भवेदिति त्वं ॥
तं याज्ञवल्क्यमभिपृच्छ (**शतानंदः**) परं समाप्तावारब्धकर्मण इति प्रवदंति
संतः ॥ ५१० ॥

---

१ प्रतिषिद्धोन ।

रावणः—
एवं ह्यानय कन्यकां द्रुततरं माहेश्वरं कार्मुकं
कन्यायाः करपल्लवं च युगपद्गृह्णात्ययं रावणः ॥
(**शतानंदः**) कन्याकार्मुकयोः क्वचिद्धि युगपद्भावो न दृष्टः श्रुतः ।
(**रावणः**) तर्ह्यास्तां क्रम एव गौतमशिशो (**शतानंदः**) नात्रेष्यते विक्रमः[1] ॥५११॥
रावणः—

रे रे क्षुद्रनृपा वदध्वमधुना को नाम राजा कर-
ग्राही (**राजानः**) हंत भवंत एव न परः (**रावणः**) स्थानेथ यूयं मयि ॥
वर्तध्वे कथमद्य (**राजानः**) किंकरतया (**रावणः**) स्थानेस्मदीयं पुनः
कार्यं फल्गु[2] विधीयतां झटिति कैः (**राजा**) अस्माभिराज्ञाधरैः ॥ ५१२ ॥
स्थानेसौ द्विजशावकः किमपि यज्ञापस्य जल्पत्यदः
संपादैव विदेहराजतनयां लावण्यलब्धोदयां ॥
प्राप्तां संवरणस्रजं धृतवतीमस्मत्करेत्यादरा-
त्कृत्वास्यात महीयसो द्रुततरं पात्रं प्रसादस्य नः ॥ ५१३ ॥

राजानः— (युग्मम्)
श्रीमंतोत्र यदादिशंति शिरसा तद्वंदनीयं परं
बद्ध्वा पाणिपुटं त्रिलोकजयिनो विज्ञापयामोल्पशः ॥
कार्यं फल्गु भवादृशां तु यदहो तन्नो महादुष्करं
(**रावणः**) आः षंढा इह तर्हि किंनु मिलिताः (**राजानः**) द्रष्टुं प्रतिष्ठां प्रभोः ॥५१४॥
शतानंदः—

तत्तादृग्विदधीत कोपि न पुनः कन्यावशे स्यात् (**रावणः**) अरे
नास्ते चाटुशताय वक्रदशकं नत्यै भुजाविंशतिः ॥

शतानंदः—

श्लाघ्यं कर्म भवादृशस्य तदिदं (**रावणः**) किं वच्मि विद्वच्छिशो
ह्यैवांचीति[3] किल श्रुतिः स्फुटतरं संशास्त्यलं विस्तरैः ॥ ५१५ ॥

शतानंदः—

वाचःपल्लवितेन केवलमिहाशक्तिर्निजा व्यज्यते
तत्तूष्णीमभियुज्यतां तव जनाः पश्यंतु दोर्विक्रमं ॥
नूनं पंक्तिभुजेन पंचवदनेनाकृष्यमाणं धनुः
क्रष्टुं भक्तवरोस्य विंशतिभुजः शक्तो दशास्यो न किं ॥ ५१६ ॥

---

१ क्रमोत्र नेष्यते किंतु विक्रमः पराक्रमः क्रमाभावश्च । २ अल्पं । ३ अर्वांचो सुभगे भव सीते वंदामहे त्वा इति ।

रावणः—

एतैः किं तुल्यामि बाहुपरिघैश्चामीकरक्ष्माभृतं
किंवा मंदरमुद्धरामि किमु वा कैलासमुत्पाटये ॥

शतानंदः—

तत्तत्कर्तुमलं भवान्खलु परं तत्तद्भवत्कर्मणि
श्रीमन्नद्यधुना मनागपि गुणाधानं समीक्षामहे ॥ ५१७ ॥

रावणः—

पश्यंतु भूपशिशवो भुजविक्रमं मे कन्या करोतु कुसुमस्रजमात्महस्ते ॥
अद्यास्तमेतु जनकाधिरसौ दशास्यः सद्यः करोतु धनुषा यशसा शितां ज्यां ॥५१८॥

शतानंदः—

अये वत्से सीते दशमुखकरे दुर्विधिवशा-
द्गतासीत्युक्ते वै वचसि कुपितास्तत्र सहसा ॥
इदं ब्रूयुः सत्यो वचनमभवज्यांगुलिलता-
अये दुर्गेस्यैतत्पततु हतकस्योरसि धनुः ॥ ५१९ ॥
सत्यालापः स तु कथं मिथ्या स्यादिति तर्कयन् ॥
व्यतानीत्स शतानंदस्तां स तां समतां गिरं ॥ ५२० ॥

जानकीसख्यः—

उत्थितोंग सखि पश्यत दुष्टो रावणः किमधुना करणीयं ॥
मातरंबिक इदं धनुरैशं संपतत्वशनिवद्धृतकोस्मिन् ॥ ५२१ ॥
यो रात्रिंचरशेखरः किल दशौस्यः कोणैपाल्याश्रयो
वज्रौवाधितशक्तिको नृरुधिरं पातुं सदा वांछति ॥
उन्मत्तो मधुयोगतो भवति यस्तद्रावणो मत्कुण-
स्तन्मन्ये हतशक्तिकः समभवत्सद्यो धनुःसंक्रमात् ॥ ५२२ ॥
न स्प्रष्टुमप्यर्हसि मुंच मुंच मामिति व्यचालीद्धनुराक्षिपन्निव ।
रावणः—ज्यापातनं हंत विधित्सितं मया
(धनुः) ममाप्यदोभीप्सितमित्यपीपतत् ॥ ५२३ ॥
पतिते दशानने ।
सिंचंतां नयनानि शीतलज्जलैर्नीरं हिमं प्राश्यतां
धीरं धीरमुशीरैंजव्यजनकैः सद्यः समीरोर्ष्यतां ॥

---

१ शुभ्रां बद्धांच । पृथ्वीं मौर्वीच । २ दशा आस्ये यस्य सूक्ष्मवदन इत्यर्थः । ३ दैत्य-पंक्तिः । ४ पविहीरकौ । ५ चैत्रे मद्ये च । ६ हेंकुण इति प्राकृतभाषायां । ७ वाळा इति प्राकृत भाषायां ।

भैषज्यं च वितीर्यतां क्रमहरं दृष्टिः समुत्तार्यता-
मित्येवं विपुलं निशाचरकुलं कोलाहलं निर्ममे ॥ ५२४ ॥
व्यपानयन्धुरस्यं तत्कार्मुकं मल्लवल्लभाः ॥
यच्छीतांकुलितस्यैव [२]चापोतीव दुरासदः ॥ ५२५ ॥
तथा तयोपाचरितो दशाननः शनैः शनैश्चेतनभावमावहन् ॥
जजल्प नाद्यापि किमत्र जानकी नवा गले संवरणस्रगीक्ष्यते ॥ ५२६ ॥

शतानंदः—

शांतं पापं चिरंजीव चिरंजीव दशानन ॥
विवाहोत्सव एतस्मिन्मयि माभूदमंगलं ॥ ५२७ ॥
बहलं दोषमेवात्र संप्रकाशितवान्भवान् ॥
न गुणं स्वल्पकमपि कुतस्त्या कन्यकाकथा ॥ ५२८ ॥

रावणः—

कैलासमांदोलयता मयैतत्तुलितं न किं ॥

शतानंदः—

एवं तर्ह्यंग जातैव सीतावाप्तिर्धनुष्कृता ॥ ५२९ ॥

रावणः—

रेरे गौतम दायाद नर्मचरसि किं मुहुः ॥

शतानंदः—

कर्मणः शर्मदत्वं चेन्नर्मणोवसरः कुतः ॥ ५३० ॥

रावणः—

को नाम वीरवर्योत्र गुणं गिरिशकार्मुके ॥
कृत्वा कन्यां करे कुर्यात्कलयत्येष रावणः ॥ ५३१ ॥

शतानंदः—

कैलासं किल केलिकंदुकमिव प्रेंखोलयंस्त्वादृशो
वीरः पुण्यजनोप्यधोपतदतः कालस्य चित्रा गतिः ॥
कुर्यात्कोपि [३]लघुर्धनुर्न [४]सगुणं नोवा वधूमुद्वहेत्
तद्भूतयस्तरतापतो वरमरं [५]रंभासमालिंगनं ॥ ५३२ ॥

स्त्रीजनं च कथय ।

दिव्यांगनापरीरंभरससंतुष्टचेतसां ॥
अस्मादृशामुत्तमानां नानुरूपा कुकन्यका ॥ ५३३ ॥

---

१ शीतं सीता च । २ आपश्चापश्च । ३ रघुः । ४ धनुः सगुणं न कुर्यादिति न अपितु कुर्यादेव । ५ तापशांत्यर्थं रंभासमालिंगनमेवोत्तमम् ।

रावणः—

कुनायकाः कुकन्या च कुभृदीश्वरकार्मुकं ॥
एकः पुण्यजनः कर्तुं सुकृत्यं कल्पते कथं ॥ ५३४ ॥
अभून्मौनमादुंदुभेः सुप्रतिष्ठं महातापसत्वं च रक्षोधिनाथे ॥
अहो ब्रह्मविन्मंदिरांतः प्रवेशप्रभूतं वरीवर्ति माहात्म्यमेवं ॥ ५३५ ॥

रावणः—

सुरसावहा[1] यदि हि सौ[2] वृतमपि विरहय्य[3] भूभृतं[4] स्वयंकं[5] ॥
मध्ये जलनिधिविशतीसंस्थानं नस्त्वंलंकृषीष्टेषा ॥ ५३६ ॥

शतानंदः—

यस्मिन्कुंठितदोर्बलः समजनि क्रव्याद्दशास्योधुना
यः कोप्यांमिषमाददातु तदिदं कामं नृपंचाननः ॥
गौर्यानुत्तमया महाक्षितिभृतस्तं धन्यया कन्यया
साक्षात्सप्रमदा बुधा इह विदांकुर्वंतु[9] पंचाननं ॥ ५३७ ॥

राजानः—

अये धनुस्तुंलामध्ये स्वयमापत्य[10] बुद्धिमान् ॥
वृथैव यातनां भोक्तुं कोनु कल्पेत कथ्यतां ॥ ५३८ ॥
विलोक्य तं कैरवसंघभंगं[11] धनुष्प्रसंगस्य सुदारुणत्वं ॥
रंगेत्र हेमंत इवाखिलेन जनेन सीता कुलितेन मेने ॥ ५३९ ॥
भूपाश्चापारोपात्सीतावार्ष्णि न भेजिरे तत्र ॥
व्यजनसमीरप्रहितैर्जलयंत्रोत्सिक्तशीकरैस्त्वभजन् ॥ ५४० ॥
रंगे तदानीं सारंगे[12] नृणां कोपि न नायकः ॥
गुणाधिरोपमकरोदकुर्वन्नायिकौ[13]: परं ॥ ५४१ ॥

शतानंदो जनकं—

महाराज महीपालमंडली बहुमांड[14] ॥
सारंगसंगताप्येषा नैव सारंगसर्गतां[14] ॥ ५४२ ॥
उल्लसद्वसनरत्नमंडितं मल्लतल्लजशतैः समावृतं ॥
वल्लभेन तु भुवो न केनचित् फुल्लपंकजदृशापि नेक्षते ॥ ५४३ ॥

शतानंदः महाघोषं—

---

१ रसो जलं शृंगारादिश्च । २ सीता । ३ त्यक्त्वा । ४ पर्वतं राजानं । ५ स्वयमेव स्वयकं । ६ समुद्रं । ७ आमिषं भोग्यवस्तुनि पललं चेति मेदिनी । ८ जनकस्य । ९ जानंतु । १० वृश्चिके । ११ कुमुदं राक्षसस्त्रिसंघश्च । १२ धनुषि रागविशेषे च १३ नर्तक्यः । १४ विरोधः शब्दतः ।

श्लाघ्यो विदेहसंबंधः कन्या चानुत्तमा स्थिता ॥
अथापि कोपि नोत्तिष्ठत्यवीराघवसुंधरा[1] ॥ ५४४ ॥

लक्ष्मणः—

यस्या भर्तरि देव जाग्रति भवत्यस्मिंस्तया पुत्रयोः
सीतामंगल्ययोः सतोरपि शिरःश्लाघ्यां सतां संमतां ॥
तामेतां प्रति गौतमात्मजकृता संप्रत्यवीरेयमि-
त्युक्तिः शूलशतायते श्रुतिपथे तद्वृत्य आदिश्यतां ॥ ५४५ ॥

विश्वामित्रः—

अये शतानंदगिरा सह त्वया द्रुतं समुत्थाय यदेष राघवः ॥
विज्ञाप्यते तत्त्वयि वत्स सांप्रतं नेक्षामहे चापलताविभंजनं[2] ॥ ५४६ ॥

रामं प्रति

किं स्थीयते संप्रति वत्स तूष्णीं पर्यस्तिकामाश्रुतरां बधान ॥
त्वया विना किं भवधर्मभंगः (रामः) गुरोः प्रसादस्य परं प्रतीक्षा ॥५४७॥

तदानीं दाशरथेः सीतावदनमुहुर्निरीक्षणे हेतुमाह ।

जाड्यं यत्र विजृंभते स धनुषः सत्यं प्रसंगो महान्
दुर्धर्षः परमेष भूरिसुसहः शीतांप्रसादे[3] सति ॥
स्वालोकेन धृनोदयेन[4] न विना स स्यादितीवांतरे
निध्यायन्नधिशीतमेष मतिमांस्तं तादृशं व्यातनोत्[5] ॥ ५४८ ॥

अथवा

यस्मिन् राक्षसराजभीषणभुजस्तंभस्यदंभः क्षणं
न व्याजृंभत तत्र शांभवधनुर्भंगप्रसंगाव्हये ॥
मामेनं विनिपातयंति भगवत्पादा महासंकटे
तत्किं तादृशमीमिषंत्विति रघूत्तंसः समैक्षिष्ट[6] किं ॥ ५४९ ॥

अथ जानकीप्रेमबाष्पमुत्प्रेक्षते ।

मद्रूपे स्वानुरूप्यं कलयति भगवान्किन्वहो तत्तथा चे-
त्तादृश्येषा न सत्यं त्वय यदि विरमेत्तर्हि सर्वस्वहानिः ॥
इत्येवं तर्कयंतीं कलुषितधिषणामश्रुपूर्णाकुलाक्षीं
पश्यन्दीनेयमेवं स सदयहृदयो धैर्यभारं बभार ॥ ५५० ॥

कविः—

तुष्यति भक्तोपहृतं पुण्यजलं प्राप्य माधवो बहलं ॥

---

१ अवीरा निष्पतिसुतेत्यमरः । २ चापलत्वस्य पक्षे स्पष्टं । ३ शीतस्याप्रसादे सति पक्षे सीतायाः प्रसादे । ४ अभ्रेण विना ५ आलोकं । ६ आमिषं भोग्यस्तुनीत्यमरः ।

यस्य तु दर्शनमात्तादिह वरीवर्ति लोचनीयजलं ॥ ५५१ ॥

जटाजूटमध्ययोर्बंधने हेतुमाह ।

यो जात्या कुटिलो निकाममलिनो नित्यं शिरश्लाघितः
स्निग्धत्वं परिदर्शयन्नपि जनो यो वा पुनर्मध्यमः ॥
सोप्यश्रांतजघन्यसंगमवशात्कीदृक्प्रसंगे भवे-
त्को वेत्तीत्यवयन्नुभावपि सभामध्ये बबंध प्रभुः ॥ ५५२ ॥

अत्र करयोरेव साहाय्यके हेतुमाह ।

तत्सत्कार्यकरावेव सन्नतौ नखरस्थितौ ॥
ददृशाते सुरागौ तौ शाखासाम्राज्यशालिनौ ॥ ५५३ ॥

विश्वामित्रपदनतौ हेतुमाह ।

गुरुघनरसवर्षं नैव सांद्रं हि याव-
त्प्रभवति किल तावद्धन्वनस्तापदत्वं ॥
इति कुशिकसुतांघ्र्योः शस्तयोरस्तदंभं
विरचयति यतहस्तं न्यस्तवान्मस्तकं सः ॥ ५५४ ॥

द्विजनतौ हेतुमाह ।

रसायतस्तोषमवाप्नुयाद्भृशं भंगस्य तादृक्काठिनस्य वस्तुनः ॥
न स्याद् द्विजानुग्रहमंतरा दृढं तद्युक्तमेषां स सभामवंदत ॥ ५५५ ॥

द्विजाः—

आयुष्मन्विजयोस्तु ते रघुपते भास्वत्प्रतापो भव-
त्कीर्तिं सौम्य लभस्व चंद्रधवलां निर्विघ्नकार्यो भव ॥
वीरश्रीर्वृणुयात्सखे तव भुजौ देयाद्बलं ते दिति-
र्मातेयं भगवान्प्रसादसुमुखो भूयात्स ते धूर्जटिः ॥ ५५६ ॥
सत्याः संतु मनोरथाः शुभमते त्वां पांतु सर्वे सुराः
विघ्नाः संतु सुदूरतो विजयतां श्रीरामभद्रः प्रभुः ॥
वत्स श्री रघुनाथ शांभवधनुर्भंक्त्वा वरित्वा द्रुतं
तां सीतां तृषितामिमां मम दृशं सद्यो भृशं तर्पय ॥ ५५७ ॥

मैत्रेयीप्रभृतिसतीनां दुर्गायाचने हेतुमाह ।

अरं विधत्ते भवकार्मुकं ते समुल्लसज्जीव मयि प्रसादः ॥
अतोंबिके त्वं झटिति प्रसीद यजामहे त्वामुपयाचितैस्तैः ॥ ५५८ ॥

विश्वामित्रवपुषि रोमोत्थाने हेतुमाह ।

रामोत्थानं दृष्ट्वा रोमोत्थानं बभूव गुरुतत्वां ॥
तेषां चिरसंश्रिततामात्राधिक्यं च मत्सरे हेतुः ॥ ५५९ ॥

यावद्गुणाधिरोपाय चापल्याच्चापमाप सः ॥
जजाप तापसस्तावद्धन्वनेति शनैः श्रुती ॥ ५६० ॥

धनुषो हर्षे हर्षे हेतुमाह ।

आरादुपस्थितं दृष्ट्वा शामलं विश्वजीवनं ॥
युक्तमानंदसंदोहा अन्वजायंत धन्वनः ॥ ५६१ ॥

शैवं धनुरेव रामभद्रहस्तं स्पृष्टुं प्रावर्ततेत्यत्र हेतुमाह ।

क्षेमायेशमुपासदं भगवता तेनापि हस्ते कृतं
शक्त्या पर्यचरं ततः प्रियतमच्छात्राय तेनार्पितं ॥
क्लिष्टं तत्र चिरादनेन जनकागारे बत स्थापितं
वीक्ष्यैनं बहुमुक्तिदं तदिह किं तत्स्पर्शनायोत्सुकं ॥ ५६२ ॥

चापतोलनसमये जनताटस्थ्ये हेतुमाह ।

प्रवृत्ते रामभद्रस्य विक्रमे तत्परायणाः ॥
भेजिरे सकलालोकास्तदानीमनिमेषतां ॥ ५६३ ॥

जनप्रवादमाह ।

रामे लसदाकारे चापमुपश्रयति सति जना जगदुः ॥
सीतोदारविलासास्पदमयमेव न महांशुका लोकाः ॥ ५६४ ॥

दाशरथेर्हस्तेन धनुर्गुणासंजनेनात्याश्चर्यमित्याह ।

वैगुण्यं किल धर्मगं सपदि यत्पादारविंदस्मृते-
र्यन्नाम्नः कथनाच्च सर्वमपि यत्कूलंकषं नश्यति ॥
सत्वे तस्य करांबुजे निपतितश्चेत्सद्गुणालंकृतो
भूत्वा संप्रति दर्शको नहि भवेद्वैदेह्यवाप्तेः कथं ॥ ५६५ ॥

धनुर्भंगे हेतुमाह ।

सद्वंश्यो यदि गां मुमुक्षुरिह चेत्कोटिद्वयीभास्वत-
स्तेनैतेन सता गृहे चिरतरं वस्तव्यमत्यादरात् ॥
श्रीमांस्तं कलयेत्करेण सुगुणासंगस्ततो नम्रता
श्रुत्यंताकलनं विदेहभवनं चैष क्रमः संगतः ॥ ५६६ ॥

भंगसमये महाह्लादोभूदित्याह ।

आकृष्टमात्रं हि धनुर्विधातुं रामे प्रवृत्तेति भयंकरोभूत् ॥
बाणो[1] भवल्लोकविमूर्छनोद्रिशिरस्थैलक्ष्यं विबिभेद चित्रं ॥ ५६७ ॥

कटकनिनादे हेतुमाह ।

कदैवाहं श्रीमद्रघुपरिवृढेनार्पितगुणं

---

१ बाणः शब्दः प्रसिद्धश्च । २ ध्यानस्थितशिवलक्ष्यं च ।

स्वकृत्यं नाद्याप्याचरसि सुमनःसंघ किमिदं ॥
द्रुतं तद्वर्षेति प्रकटतममाख्यातुमिव किं
दिविस्पृक्कोदंडात्कर्टकटेति ध्वनिरभूत् ॥ ५६८ ॥

सुमनेधृष्टिमुत्प्रेक्षते ।

उत्पद्येत विदेहराजसदने सीतेति शक्तिर्हि मे
तद्योगाद्भवदीयकार्यमखिलं संपादयिष्याम्यहं ॥
इत्याज्ञप्तमभूत्परा स भगवन्योगोद्य वृत्तः कृपा
तल्क्षिप्तं क्रियतामिदं सुमनसो वक्तुं न्यपप्तन्निव ॥ ५६९ ॥
पत्त्राणि क्षितिभृद्रणस्य गणिकागानस्य गुर्वी सुधा
पूगो[4] मौनिचयस्य फुल्लहृदयः सारो महाधन्वनः ॥
लंकेशस्य च दंतचर्वणमथ श्रीरामनिष्ठो वधू
रागो रामभुजोष्मसृष्टिरवनेस्तुष्टिश्च पुष्टिः प्रभोः ॥ ५७० ॥

अथ द्विजाः ।

त्यक्तासना द्विजजनाः सुमनायमानाः पानात्ययादिव विसृष्टशरीरभानाः ॥
कृष्णाजिनानि वसनानि मुहुर्धुनाना नानाजयं रघुपतेर्नृतुर्गृणानाः ॥५७१॥
मुदा व्याकुलाः पद्मरुद्राक्षमाला मृगव्याघ्रकृत्तीः प्रतिच्छन्नभूतीः ॥
यशोजल्पमल्पेतरं कल्पयंतो द्विजास्तल्पयांचक्रिरे पूर्णपात्रं ॥ ५७२ ॥
भर्गकोदंडभंगोत्थभीमनिन्हादमूर्छिताः ॥
लब्धसंज्ञा महीपालाः परस्परमथाब्रुवन् ॥ ५७३ ॥
कस्यायं बटुको मुनेरिति जना आहुः स कः कौशिकः
शिष्यो वाथ सुतोस्य शिष्य इति वै जल्पंति स ब्राह्मणः ।
क्षत्रं वाथ नहीदृशं प्रियसुतं काचिद्वृत क्षत्रिया
घोरायेह तपोवनाय विसृजेत्तन्मन्महे ब्राह्मणं ॥ ५७४ ॥
तपःप्रभावाहितनव्यविप्रतापक्षावलंबादुपमर्दनाय नः ॥
प्रावर्ततास्यं मुनिरस्य न क्वचित्स्वास्थ्यं विहायाद्भुतकृत्यमीदृशं ॥ ५७५ ॥
नैवं नैवं दशरथमहाराजदायाद एषः
किं ब्रूताहो प्रवदति जनस्तत्र तत्रेति सत्यं ॥
अस्मिन्नर्थे पुनरतितरां संशयोस्माकमासी-
दीदृक्कृत्ये प्रभवति यतः क्षात्रमेवात्र तेजः ॥ ५७६ ॥

---

१ कटे वर्षावरणयोरिति । २ बाहनान्येव पत्त्राणि । ३ सुधे वसुधा । ४ पूगः समूह एव पूगः क्रमुकः । ५ सारएव सारः । खदिरः ६ वधूराग रागः रक्तिमैव । ७ उष्मसृष्टेरुष्मसृष्टिः (विडंबाचं रूपक) ८ भस्मार्ची बेली ।

स एष मातुलेयो नः पितृष्वस्रीय एष नः ॥
पुत्रकल्पोयमस्माकं यन्नरेंद्रः स नः सुदृत् ॥ ५७७ ॥
पुराप्रभृति सोस्माकं राजा दशरथो ध्वजः
तत्साधु साधु वार्धक्ये यदेतस्येदृशोगजः ॥ ५७८ ॥
वाडवीयपरोत्कर्षाद्विरसा ये रसाधिपाः ॥
राजसंबंधमासाद्य रसवृद्धिं परां ययुः ॥ ५७९ ॥

अथ शतानंदो जानकीं प्रति ।

सुमुखि धनुषो भंगो वृत्तः परं शिशिरास्थितिः
स्मरसहचरेप्यस्मिन्नार्ये विराजति माधवे ॥
तव सुमनसः शाखावृंदेन किं सुममालिका
(सीता) किमिव भगवन् शुच्यग्राणामनुग्रहमंतरा ॥ ५८० ॥
एवं ब्रुवंती वैदेहीमवगत्य महामतिः ॥
स्त्रीभिः सह शतानंदः स्वास्मिन्नन्वर्थतां दधौ ॥ ५८१ ॥

अथ वरीतुं प्रवृत्ता ।

स्फुरत्स्वर्णप्रांतं घुसृणमसृणं सूक्ष्मसिचयं
वसाना तादृश्यं वपुषि रुचिरं कंचुकवरं ॥
सखीसंघातस्था कुटिलकचजाला करतले
समुन्मीलन्माला जनकनृपबाला विजयते ॥ ५८२ ॥
मणिव्रातद्योतत्कनकघृणिचूडामणिफणि-
प्रसूनौघन्यंचच्छशिशकलचंचत्कचभरा ॥
लसन्नासामुक्ताधृततिलकभाला करतले
समुन्मीलन्माला जनकनृपबाला विजयते ॥ ५८३ ॥
तडिद्गौरी कुंदप्रतिमरदना चंद्रवदना
नतभ्रूर्बिंबोष्ठी तिलकुसुमनासाब्जनयना ॥
चलन्मुक्तोल्लिप्ता स्मितसितकपोला करतले
समुन्मीलन्माला जनकनृपबाला विजयते ॥ ५८४ ॥
विराजत्केयूरा कटकपटलीतोडरकरा
लुठन्मुक्ताहारा कटिघटितदामव्यतिकरा ॥
रणत्सन्मंजीरा गतिजितमराला करतले

---

१ ध्वजवदुच्चः । २ वाडवेभ्रिर्ब्राह्मणश्च । ३ राजानः । समुद्राश्च । ४ हर्षे जलं च । ५ शांतता ऋतुश्च । ६ विष्णुरूपे रामचंद्रे वसतेच । ७ जातिरूपायाः अगुंलिकासमूहे शिफावृंदे च ।

समुन्मीलन्माला जनकनृपबाला विजयते ॥ ५८५ ॥
किरंती स्वच्छायामपि चपलयंती नृपतिदृक्-
चकोरान्यालोलानुदयमयतो राघवविधोः ॥
मता कृत्स्ना ज्योत्स्ना धवलितनृशाला करतले
समुन्मीलन्माला जनकनृपबाला विजयते ॥ ५८६ ॥

सीतां ततोद्वाहिव रत्नसानोर्वतीर्य सोपानपरंपरायाः ॥
प्रसादरम्या कमलौधिवासमवाप लोलद्घनपुष्पमाला ॥ ५८७ ॥
औत्सुक्यभाररभसात्सहसा प्रवृत्ता स्कंधेनवाप्य रघुवीरसुरद्रुमस्य ॥
तस्यास्तदा भुजलता विमनायिताभूत्स्वामोदिनी न कलितोत्कलिका क्वचि-
त्स्यात् ॥ ५८८ ॥

विश्वामित्रः—

भग्नोत्साहा तनुतनुरियं हा विदेहेंद्रकन्या
तत्तां रामावनभयशिरोजायतामाप्तकामाः ॥

रामः—

नावाग्ग्रीवारघुकुलभुवो देवविप्राद्विनामी
(**विश्वामित्रः**) हंहो कुब्जं यदि निजगृहं (**रामः**) तर्ह्यवाग्भावभाक्कम् ।
॥ ५८९ ॥

विश्वामित्रः—

लौकिकस्थितिभंगाय कल्पते किंनु राघव ॥
(**रामः**) श्रुतिरेव (**विश्वामित्रः**) शिवं ते स्यात्तदवीचीति संस्मर ॥५९०॥

रामः—

यतेयदन्यथार्थत्वे तथार्थत्वोपबृंहकाः ॥
सर्वेमी स्मृतिकर्तारः पुराणवचनान्यपि ॥ ५९१ ॥

लक्ष्मणः—

विमृश्यते किमु चिरं शिर आनम्यतां द्रुतम् ॥
सुमनोमालिकेयं त्वां भगवन्नुपतिष्ठते ॥ ५९२ ॥

विश्वामित्रः—

वत्से विदेहनृपनंदिनि पुण्यपुष्पमालाकुला भुजलता विततां तवेयं ॥
श्रीरामचंद्ररमणीयनिलिंपशाखिस्कंधं समेत्य सफला सपदि प्रभूयात् ॥५९३॥

---

१ भागीरथी । २ मेरोः । ३ विष्णुरूपं रामं समुद्रंच । ४ घनपुष्पं जलं पक्षे प्रसिद्धा-
माला ।

सीता--

किंचित्कुंचितगात्रवल्लिविकचद्रोमांचमंतस्मितो-
दंचच्चारुकपोलमुन्नतगलं न्यंचद्दृगब्जांचलम् ॥
मंजीरद्वितयांतरप्रतिविशत्पीतांबरांतोच्चयं
चक्रे संवरणस्रजं रघुकुलोत्तंसांसयोः सादरम् ॥ ५९५ ॥
तदानीं वरस्त्रीणां स्वमुखे स्वांचलसंयोजने हेतुमाह ।
मुख्या अपि विवस्त्राः स्युर्मुदांधाः सहसा द्विजाः ॥
इतीव जवनीं तेनुः स्वांचलैर्वरयोषितः ॥ ५९५ ॥
रामकौशिकसंलापस्तया रामानीतिर्यतः ॥
हस्तास्याः सितां चक्रे तां सीतां तत्र संसदि ॥ ५९६ ॥
सरोजरम्यं कुजनैरगम्यं सुरादिनम्यं चरणं प्रणम्य ॥
विश्रम्य सम्यग्विनियम्य पाणी वनम्य सा सौम्यमुखीवतस्थे ॥ ५९७ ॥
अस्य काव्यस्य निर्माता पंतविट्ठलनामकः ॥
बाणग्रहर्षिभूसंख्ये (१७९५) शाके श्रीमुखवत्सरे ॥ ५९८ ॥

चैत्रमासोत्तरे पक्षे एकादश्यां दिवं गतः।
तस्मादपूर्णमेवाभूदिदं काव्यमिति स्फुटम् ॥ ५९९ ॥

---

१ रामस्य नम्रीभावः । २ शर्करां ।

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH OF THE

V
891.22
Bha/ Kal

[काव्येतिहास-संग्रह]

६

बाण्ड्राजकृतम्

B6a

कालेयकुतूहलम् नाम प्रहसनम्.

हें पुस्तक

काव्येतिहास-संग्रह-कर्ते

यांणीं

प्रकाशित केलें.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

इ० स० १८८२.

कालेयकुतूहलप्रहसनम्

श्रीगणेशायनमः

जीनेच्छातेवृषाधिरूढमुरगालंकारमाशौंबरं ॥
चूडाबालमृगांकमंबरसरिज्जूटं त्रिलोकीश्वरं ॥
दीनातंकवती नताद्भुतमयी सेर्ष्या सचित्तोन्नतिः ॥
पश्यंती पतिमद्रिराजतनया निःश्रेयसायास्तु वः ॥ १ ॥ अपि च
दृष्ट्वा चूडेदुखंडं लघुं समुपगतः सक्तऊर्वंतराले ॥
कर्षन् दिग्वाससोऽलं झटिति शिशुतया पाणिना कौमदंडं ॥
स्थित्वा दंतांकुरो नः किमिति विनिहितो मूर्ध्नि तात त्वयासौ ॥
नो मुंचामो न दत्से यदिति हठधरः पातुमामेकदंतः ॥ २ ॥

नांद्यंते सूत्रधारः

(ससंभ्रमं परिक्रम्य सर्वतोऽवलोक्य च) कथमुदित्वरैर्भगवतः कमलबांधवस्य जगच्चक्षुषो भुवनाभोगआपूरितः सर्वतः क्रमेण किरणैर्विसरैः ॥ यथा

ये हेमांबरैसूक्ष्मपल्लवदशासंदेहसंदायिन
स्त्वंगैश्चंपककेसरच्छविमुषो हारिद्रकूचोपमाः ॥
पश्चात्कांचन दंडिकाप्रतिभुवो जाताः पुनः सांप्रतं ।
सौवर्णद्रवलिप्तभूमिवलया भानोरमी भानवः ॥ ३ ॥

(पुरतोऽवलोक्य । सप्रमोदं ।)

अद्याहं महत्येवोषसि सबहुमानमाहूयाजप्तोस्मि सामाजिकैः । यथा किल सुगृहीतनाम्नः सरस्वतीपदलांछनस्य कवेर्भारद्वाजस्य कृतिः **कालेयकुतूहलं** नाम प्रहसनमिति श्रोत्रपरंपरातः श्रुतं न च प्रयोगतो दृष्टं । द्रष्टव्यं च तत्प्रयोगतः कीदृगिति कुतूहलिनीयमस्माकं वासंतिकानां परिषत् । तदेतद्यथाप्रयोगमभिनीय सभाजयतु भवानिमामिति ॥ (सपरितोषं)

आर्यसभायामृच्छति गुणवानेव हि गुणस्य गरिमाणं ॥
अकलितंतुर्हातिशब्दः करटैः श्लाघापदं क्व वा दृष्टः ॥ ४ ॥

तदहमपि प्रियसखं मे वसंतकमाहूय हास्यरसप्रधानं रूपकमभिनेतुमारभेयेति (नेपथ्याभिमुखमवलोक्य) सखे ।

---

१ स्नातारा. २ रोडका. ३ नग्न. ४ भीति ५ कल्याण. ६ झडकन. ७ भेहनं. ८ सूर्य. ९ प्रसार. १० जशीचा पदर. ११ हलणारे. १२ कांति. १३ नेतर. १४ गच्छति. १५ कोकिलाचा शब्द. १६ कावळा.

विकृताकारवाक्चेष्टाविशेषैर्हासयन् जनान् ॥
इतएहि स्वैकैर्मज्ञ कलिप्रिय विदूषक ॥ ५ ॥

(प्रविश्य विदूषकः)

भो किं ति तुए हक्कारिदो हगे । मं खु एहिं छुहा बाहेइ ता देसु मे पुढमं पादरासं । अज्ज गोसम्मि च्चेअ एत्थ णअरे घरं घरं बह्मणा भोअनत्थं गच्छंति घरे घरे अ महंता मोदआणं पव्वदा पडिदा वित्थिण्णाइं च कअलीपत्ताइं मांडिदाइं एस रच्छाए धौइदतंडुल मिस्सो दुद्धसरिच्छो जलप्पवाहो पसरिदो ता पुत्तीणं मादरं मे बह्मणिं गेह्हिअ कस्स वि लच्छीइल्लस्स घरं गदुअ भोअणसुहं लहिस्सं* (इतिकराभ्यां नितंबबिंबं ताडयन् विधूनितशिरा विकटं नृत्यति)

सूत्र०–अरे कोयमानंदोद्गारः । कोयमस्थाने नृत्यसमारंभः । न मया जेमनार्थमामंत्रितो भवान् । किंतु नाटयप्रयोगे मम साहाय्यं कर्तुं । तत्किमप्रस्तुतं प्रस्तूयते ।

विदू०–मए क्खु एदं रंगट्ठाणं ति जाणिअ णच्चिदुं पअट्टं । किं एदे पारिसदा मह बुहुक्खिदस्य भोअणं पि ण देइस्संति । ता किं अजुत्तकारित्तणं मह दिट्ठं तुमए† ।

सूत्र०–अये किमनेनाप्रस्तुतेनोपोद्घातेन ।

विदू०–हुं चिट्ठदु मह अपत्थुओ उपोग्घाओ । कहे हि दाव किं एत्थ जुत्तं । तं चेअ करिस्सं‡ ।

सूत्र०–शृणु कथयामि ।

ये पाषंडाः कलिबलवशात्कामचारप्रचारै ॥
र्नैकान् लोकान् विरतिकपटाद्वंचयंतोऽतिधूर्ताः ॥
धन्यंमन्या धनगणमहो अर्जयंतः सुवेषा ॥
नानावस्त्राभरणभरणैः कोपयंते संचरंति ॥ ६ ॥

---

* भोः किमिति त्वयाहूतोऽहं । मां खल्विदानीं क्षुद्बाधते तदेहि मे प्रथमं प्रातराशं । अद्य प्रातरेवात्र नगरे गृहं गृहं ब्राह्मणा भोजनार्थं गच्छंति । गृहे गृहे च महांतो मोदकानां पर्वताः पतिताः । विस्तीर्णानि च कदलीपत्राणि विन्यस्तानि । एषरथ्यायां धौततंडुलमिश्रो दुग्धसदृक्षो जलप्रवाहः प्रसृतः । तत्पुत्राणां मातरं मे ब्राह्मणीं गृहीत्वा कस्यापि लक्ष्मीवतो गृहं गत्वा भोजनसुखं लभेय ।

† वि०–मया खल्विदं रंगस्थानमिति ज्ञात्वा नर्तितुं प्रवृत्तं । किमेते पारिषदा मम बुभुक्षितस्य भोजनमपि न दास्यंति । तत्किमयुक्तकारित्वं मम दृष्टं त्वया ।

‡ वि०–निष्ठतु ममाप्रस्तुतजपोद्घातः । कथय तावत् किमत्र युक्तं । तदेव करिष्यामि ।

१७ भोजनम्. १८ फराळ, न्याहारी. १९ सारखा. २० मुलाबाळांची आई. २१ भलतेंच. २२ वाईट मार्ग.

किंचेदानीं पात्रविशेषोपलंभात्

आहो पंच प्रसवविशिखानैक्षवं चापदंडं ॥
गुंजन्मत्तभ्रमरपटलीसिंजिनीमाशु[२३] लब्ध्वा ॥
देवो वीरोऽखिलसुमनसां मूर्ध्नि विन्यस्तपाद ॥
स्त्रैलोक्यस्योन्मथननिपुणः[२४] केलतीजानिरेकः ॥ ७ ॥

तेषामत्र चरित्रप्रपंच इत्यर्द्धोक्तेः । (नेपथ्येगीयते)

एदे वसंतसमए महुपाणमत्ता ॥ भुंगा रसाललइआसु छइल्लमल्ला ॥
कंताहिं मोहणकेलिभरालसाहिं[२५] ॥ गाअंति एंति अ पिअंति खलंति भुंगा ॥ ८ ॥

अवि अ

एस बओ धुत्तवरो लीलं हंसस्स अहिणेंतो[२६] ॥
पोम्मासणम्मि[२७] रेहइ वंचेंतो बालमीणाइं ॥ ९ ॥ *

विदू०–(विभाव्य) कहं पअट्टे चेअ गादुं सज्जीकदवण्णिओवअरणेहिं[२८] कुसीलवेहिं[२९] ।

सूत्र०–अथकिं । यदियं धर्मकंचुकवतो **विरतिसागरस्य** प्रावेशिकी ध्रुवा[३०] । तदावामप्यनंतरकरणीयाय सज्जीभवावः

॥ इति निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशत्यासनोपविष्टः स्वप्रासादगतो **विरतिसागरः**[३१] । (आत्मनो विभवमालोक्य सगर्वं ।)

एतन्मंदिरमुन्नतं विरचितं प्राकार एष स्वयं
बद्धो यत्र च राधिकाप्रियतमो देवश्च संस्थापितः ॥
उद्यानानि च कल्पितानि ललितान्यापूरि कोषो धनैः[३०]
राक्रांताश्च महाधना ननु मया धन्यो मदन्योऽस्ति कः ॥ १० ॥

किंच योऽहं द्वादशवर्षदेशीयएव[३१] श्रीगुरोरासनभूमिमाक्रम्य ।

---

* एते वसंतसमये मधुपानमत्ता भृंगा रसाललतिकासु विदग्धमल्लाः ॥
कांताभिर्मोहनकेलिभरालसाभिर्गायंति यंति च पिबंति स्खलंति भृंगाः ॥ ८ ॥
अपिच
एषबकोधुर्तवरोलीलां हंसस्याभिनयन् ॥
पद्मासने राजते वंचयन बालमीनान् ॥ ९ ॥

† वि०–कथं प्रवृत्तमेवगातुं सज्जीकृतवर्णिकोपकरणैः कुशीलवैः ।

२३ धनुष्याची दोरी. २४ मदन (रतिपति). २५ सुरतक्रीडा. २६ कमल हेंच आसन (पक्षीं पद्मासन=आसनविशेष) २७ नेपथ्य. २८ नट. २९ खचित. ३० भांडार. ३१ बारा वर्षांचा नाहीं झालों तोंच.

गाहं गाहं दुरितहतये तीर्थवारीणि भक्त्या ॥
नामं नामं हरिहरगुहब्रह्मणामाद्यमूर्तीः ॥
दर्शं दर्शं बहुविधजनाकीर्णतो निर्वृतः सन् ॥
हारं हारं द्रविणमतुलं संगतः स्वेन धाम्ना ॥ ११ ॥

अन्यच्च ।

छात्राणां गुरुसेवनैकविदुषामेषामियं संगता
नित्यं पंचशती मदीयचरणौ संसेवते चाश्रयौ ॥

पुनः साहंकारं ।

भक्त्या यच्च समर्पितं भगवते श्रीशाय तत्सादरं
भुंजानाः परमान्नमंतरतुलं मोदं भजामो वयं ॥ १२ ॥

अधुना तु पर्यवसिततया कार्यजातस्योत्तमतया च मध्यमस्य वयसः केवलं भगवतः कालस्य कलेः प्रसादमहिम्ना सुदूरमुन्नतांश्चेतासि कामादीन्नियंत्रितुमशक्तोऽपि बहिर्विरागविषयकं प्रपंचमभिनीय दर्शयन्नर्थदृष्टिकाये वित्तवित्तानि धैर्येण वंचयन्नुपांशु गुरूपदेशापदेशेन वरस्त्रीभिरममाणः कालमतिवाहयामि ।

साश्चर्यं । अहो गरीयान्मयि गुरुप्रसादः । गरीयसी च मम भगवति भक्तिमंदारमंजरी । यतो यदहं चतेसि समानयामि तदनंतरायं निर्वहामि । यद्राजा रंजनश्छात्रभावेन नाद्यापि मामुपास्तइति तदासन्नवर्तिनः प्रसादभाजः कदाचिदप्यभज्यमान राजकुलप्रणयान् सचिवपुरोहितादीन् राजपुरुषान् विधेयपरंपरयात्मसात्कृत्वानेन तीर्थेन निगूढमारब्धो मया महानुद्यमः संप्रति फलोन्मुख इव प्रायेण संपन्नइति भाति । तन्न किंचित्परिहीयते । (क्षणमात्रं विचिंत्य)

कः कोऽत्र भोः ? (प्रविश्य शिष्यैकः)

शिष्यः-भगवन्नेषोऽस्मि सदानंदआज्ञापयंतु गुरुचरणाः ।

विर०-वत्स सदानंद अपि निवृत्तो भगवतः संपर्याविधिः ?

सदा०-अथकिं ।

विर०-कथं तर्हि भगवंतं श्रीमधुमथनमुपवीणयितु मनंगसेना नाम नागता वारवधूः । किमिति वाद्यापि चिरयति तीर्थप्रसादसादरो नगरवासी नितंबवतीजनः । वत्स सदानंद त्वदितो गत्वा शीघ्रमनंगसेनामादायागच्छ । अतिक्रामत्युपवीणनवेला देवस्य ।

सदा०-(स्वगतं) अहो महान्मकरध्वजस्य प्रतापगरिमा । यदयमहर्निशं वि-

---

३२ कार्तिकस्वामी. ३३ देश. ३४ तेज (पक्षी घर). ३५ वचनपाळणारी. ३६ पायस. ३७ तारुण्य. ३८ धनाचे वेड. ३९ समृद्ध. ४० गुपचूप. ४१ द्वारानें. ४२ पूजा. ४३ रिझवणें.

स्मृतनित्यानित्यविवेकः केवलं तन्मयइव दासभावेन विनतानां गुरुब्रह्मेश्वरेदेश्यानामर्यवर्याणां[४५] मुक्तिपथोपदेशव्याजेन विविधकरेणरसिकाभिः कामिनीभिःसह विहरमाणोऽपि न तृप्यति। तदिदं "नाग्निस्तृप्यति काष्ठानां नापगानां पयोनिधि" रितिवदापतितं। कृते तु भूतार्थविचारे।

क्व जपः क्व तपः क्व वा समाधिः क्व च दीक्षा क्व च वा रमेशभक्तिः॥
क्व धनं क्व मदः क्व वानुरागः क्व च नारी क्व च मान्मथो विकारः॥ १३॥

हा हंत

कष्टायते नूनमसौ गुरुर्नः कांताधरास्वादनलोललोलः[४७]॥
स्वात्मावबोधाद्गमदूरचेता विद्वेष्यते वक्ति च मंद्यते कः॥ १४॥

किं चेदानीं निजमनसि कुट्टिनीत्वसाम्राज्ये मामभिषिच्य बहिरुपवीणनोपधिना वेशवनितामानेतुं नियोजयति। योजयिष्यति चान्या अप्यानेतुं। परंतु प्रज्ञावान्धूर्तशिरोमणिरिति न स्फुटं कथयति। किं करवाम। यदस्मदग्रेब्रह्मनामा गुरुरित्यादेशः समनुष्ठेयः। अथवा तादृशएव यादृशानां परिवारः कुतो न भूयात्। ममापि सुमहाँल्लाभः।

उत्तमस्य वणिजः सुकलत्रं। यत्नतः समुपभुज्य च पूर्वं॥
दीयतेऽथ गुरवे यदि भक्त्या। राघवेंद्रबदरीफलनीत्या॥ १५॥

भवत्वेवं तावत्। (प्रकाशं) भगवन्नेषसमागच्छति महार्हवस्त्राभरणालंकृतो महता परिबर्हेण नागरीजनः। अहमप्यनंगसेनामादायानुपदमागच्छामीति

(निष्क्रांतः)

विर० (पुरोऽवलोक्य) कथं महर्शनलालसःसमागतएवांगनाजनः। (सप्रमोदं)

इमाः पीनोत्तुंगस्तनभरवलन्मध्यलतिकाः
पृथुश्रोणीभाराकुलचरणविन्यासमधुराः
अपि स्नानस्वच्छा घुसृणतिलकाश्चित्रवसना
लसद्रत्नाकल्पा[५१] ललितमितआयांति ललनाः॥ १६॥

[ततः प्रविशतियथानिर्दिष्टः सपरिवारोनागरीजनः]

एका—हला* रअणमाले अज्ज भअवंतं विरइसाअरं णमिऊण किं मुवाअणं करेम्ह।

---

* हला रत्नमाले अद्य भगवंतं विरतिसागरं नत्वाकिमुपायनं कुर्मः.

४४ कुबेरतुल्य. ४५ श्रेष्ठसावकार. ४६ व्रत. (पक्षीं सुरतासन). ४७ अतिशय लंपट. ४८ विद्वानाप्रमाणें आचरण करतो. ४९ माझ्या सारखा आहे. ५० ज्याचें शास्त्र निषेध असल्यामुळें नांव घेऊं नये असा (वस्तुतः ज्याचें नांव घेऊं नये असा ध्वन्यर्थ.) ५१. अलंकार.

रत्नमाला—*सहि विलासवदि मए खलु घरे एअ विस्मारिदं उवाअण माणेदुं। एव्वं किर वुड्ढाओ कुलधम्मिणीओ वक्खंति ण देवा राआणोगुरूणोवा रित्त-पाणिणा दट्ठव्वा। ता एदं ललाडिअं[५२] गुरुचलणेसुं अप्पिस्सं तण्णिमित्तं च कहिं सा गलिदा मए ण लक्खिद त्ति कहिअ गुरुजणाणं गंजणं सहिस्सं।

अनंगलेखा—†हला मए उण अज्ज भअवंतस्स ललंतिअं[५३] दादव्व त्ति मणम्मि करिअ णिसीहे गाढसुत्तस्स पइस्स कंठाते जोस मुत्तारिअकाहिं पि अदिट्ठाणे णिऊढं ठाविदा तदो सोगोसम्मि सअणादो उट्ठिदो णिअकंठं सुण्णं दट्ठुण जहिं तहिं सेज्जाए कीलामंदिरम्मि अ अण्णेसअंतो अलहिऊण मं पुच्छिदुं पअट्टो तदा तुह चेअ कंठम्मि सआ चिट्ठइ तुएचेअ काए वि धुत्ताए दिण्णा आसी कदा वि अहं पुच्छिस्सं ति एसो पआरो दंसिदो त्ति सपरिहासेस्सं दिण्णुत्तरो किदो। एसा सा [इति दर्शयति]।

कर्पूरमाला—‡मएकिर अज्ज खणदाए[५४] खणदाए[५५] जूदकीलणेण विणिज्जिअ भत्तारं तस्स मणिबंधादो[५६] आमोचिअ रअणकडअं गहिदं तं चेअ मह पाहुअं अत्थु।

मंजुला—हला§§ मह जणणीए पेरूं[५७] मह किदे प सिदा एसा एआवली[५८] कंठ-ट्ठिदा साअत्थिचेअ।

---

* सखि विलासवति मया खलु गृहएव विस्मृतमुपायनमानेतुं। एवं किल वृद्धाः कुलधर्मि-ण्यो वदंति न देवा राजानोगुरवो वा रिक्तपाणिना द्रष्टव्याः। तदेतां ललाटिकां गुरुचरणयो-रर्पयामि। तन्निमित्तं च क सा गलिता मया न लक्षितेति कथयित्वा गुरुजनानां गंजनं सहिष्ये।

† सखि मया पुनरद्य भगवते ललंतिका[५३] दातव्येति मनसि कृत्वा निशीथे गाढसुप्तस्य पत्युः कंठाज्जोषमवतार्य काप्यदृष्टस्थाने निगूढं स्थापिता। ततः प्रातः शयनादुत्थितो निजकंठं शून्यं दृष्ट्वा यत्र तत्र शय्यायां क्रीडामंदिरे चान्विष्यन्न लब्ध्वा मां प्रष्टुं प्रवृत्तस्तदा तवैव कंठे सदा तिष्ठति त्वयैव कस्याअपि धूर्तायै दत्तासीत्। कदाप्यहं पृच्छामीत्येषप्रकारो दर्शित-इति सपरिहासेर्ष्यं दत्तोत्तरः कृतः। एषा सा।

‡ मया किलाद्य क्षणदया[५४] क्षणदायां[५५] द्यूतक्रीडनेन विनिर्जित्य भर्तारं तस्य मणिबंधादा-[५६]मोच्य रत्नकटकं गृहीतं तदेव ममप्राभृत मस्तु।

§§ ममजनन्या परुन्ममकृतेप्रेषितै[५७] कावलीकंठस्थितास्त्येव[५८]।

५२. बिंदी. ५३ कंठा. ५४ उत्सव देणारी. ५५ रात्र. ५६ मनगट. ५७ गतवर्षी. ५८ हार, माळ.

हेमलता---हला** किं कहिस्सं अदिकिवणस्स भत्तुणो हत्थादो ण केण वि वैरोडिआसअलं लद्धं तस्स घरे पडिदाए उत्तरहिदाए मए एसो णाहो ण मं बोल्लेइ ण मं पेक्खदि ण मह आहरणाइं पि धारेदुं देइ साँडिअं पि तहच्चेअ ति उव्वेवरीए केवलं णिअहिअअगदं फलं कप्पिदं ।

परिहासलता---*सहि हेमलदे मा उत्तम्म एसो क्खु भअवं महाणुभावो तुह हिअअगदं फलं गेण्हिस्सदि । तुमं पि एदस्स अणुग्गहेण पुत्तसुहं पाविस्ससि । मए उण भअवंतस्स किदे एक्को अहरमणीजो पदत्थो कप्पिदो ।

[इति सर्वा विहस्य परिक्रामन्ति]

चेटः-§ एसो भअवं विरदिसाअरो तुह्माणं उवरि पसादं कादुं पाअपीठे चिट्ठइ ता इदो इदो सामिणीओ ।

सर्वाः-[उपसृत्य] ‡ भअंव एदाओ अह्मे सवाओ चलणेसु वंदामो ।

विर० -अभिलषितेन युज्यध्वं । इदमासनमितआस्यतां ।

सर्वाः-[आभरणान्युपायनीकृत्योपविशंति]

विर०-[सर्वा निरूप्य स्वगतं]

अयं लावण्याब्धेः समजनि वशीकारकरणं ।
वरारोहाहारः सुरयुवतिमानोन्नतिहरः ॥
समीपत्या जेतुं त्रिभुवनमनंगेन विभुना ।
कृतं चित्तं मन्ये सपदि ततउत्साहकलिलं ॥ १७ ॥

यदासां दर्शनमात्रेणानधीनकरणग्रामस्तन्मयतया कृत्याकृत्यविवेकविधुरः परवानिव समभवं ॥ अहो रूपलक्ष्मीः ॥ अहो प्रतीकसंविभागः । अहो वचनमाधुरी । अहो वीक्षणस्य धाटी । अहो पीवरा कुचस्थली । अहो तदुपरि परिष्काराणामुदीपकता ।

** हला किं कथयामि । अतिकृपणस्य भर्तुर्हस्तान्नकेनापि वराटिकाशकलं लब्धं । तस्य गृहे पतितया पुत्ररहितया मया एष नाथो न मां वदति न मां पश्यति न ममाभरणान्यपि धारयितुं ददाति शाटिकामपि तथैवेत्युद्विग्नया केवलं निजहृदयगतं फलं कल्पितं ।

*सखि हेमलते मा उत्ताम्य । एष खलु महानुभावस्तव हृदयगतं फलं ग्रहीष्यति । त्वमप्येतस्यानुग्रहेण पुत्रसुखं प्राप्स्यसि । मया पुनर्भगवतः कृते एकोऽथ (ध) रमणी(णिः) यः पदार्थः कल्पितः ।

§ एषभगवान् विरतिसागरो युष्माकमुपरि प्रसादं कर्तुं पादपीठे तिष्ठति तदितइतः स्वामिन्यः ।

‡ भगवन्नेता वयं सर्वाश्चरणयोर्वंदामहे ।

५९ कवडी. ६० साडी, चिरडी. ६१ हृदयांतलें (पक्षी) हृदयस्थित. ६२. स्त्री समुदाय. ६३ एकदम, एककालीं. ६४ भरलेलें, पूर्ण. ६५ इंद्रिय समुदाय. ६६ अवयव.

तत्किमेता आलपामि । किमाश्लेष्यामि । किमुत चुंबामि । किं वा करवाणि [क्षणं विचिंत्य] भवत्येवं तावत् । [प्रकाशं]–अपि कुशलं कुसुमशरविहारललितानामिति [सव्याकूतस्तंभं] ननुकुशलं भवतीनां ।

परि०—*महाणुभावस्स अज्जस्स इत्यर्धोक्तौ [सव्रीडहासं] णं भअवंतस्स प्पसादेण अम्हे एदाओ कुसलिणिओ.

विर०–[कूणिताक्षास्तिर्यग्विलोक्य स्वगतं]

येऽष्टांगक्षपितांहसो मुनिवराः शर्वादयो ये सुरा
ये वीरा इह पूरुषाश्च तइमे सर्वे मदंकी इति ॥
स्वोत्कर्षस्य विबोधिकाइव महाराजेन पंचेषुणा
मन्ये संप्रति हस्तदीपकलिका एताः समुद्दीपिताः ॥ १८ ॥

परि०–†भअवं एसाणो पिअसही हेमलदा सअं वत्तुं लज्जेदित्ति अहं विण्णवेमि जह एसा दुल्ललिदस्स भत्तुणो सुहदंसणा जह अ दिट्ठपुत्तमुहचंदिरा हुविस्सदि तह प्पसादं करेदु भअवंतो ।

विर०–[स्वगतं] कथमियमनुकूलं प्रतिकूलं च वक्ति । तथाहि यदीयमस्माभिः संगता हेमलता ध्रुवं पुत्रमुखविलोकनानंदनिर्भरा श्लक्ष्णतेजसो निजभर्तुः प्रसादपात्रं भविष्यति । परंतु कुसुमितः फलितः सद्य एव यौवनमहातरुर्भज्येत । तदिदमिष्टानिष्टाभ्यामुभयतआकृष्यमाणं कष्टमापतितं । अथवा ।

यदि संति सहस्रशो युवत्यो नगरेऽस्मिन्प्रियया यौवनेन प्रकांडाः ॥
यदि वा वशगाः सदैव शिष्याः कुलटाः शंबलिकाश्च का क्षतिर्नः ॥ १९ ॥

तदिमामात्मानं चाधुना कृतार्थयामि [प्रकाशं] यदि भवतीनामनुमतिस्तर्हि सुदिनौहमद्य समानीयतां सपर्योपकरणं । इयमुपदिश्यतेऽस्माभिः । भविष्यति च सिद्धार्थेयं पुत्रीयंती वः सखी हेमलता ।

परि०–‡भो सहीओ उवह उवह सफलं दाणिं पिअसहीए हिअअगअं इरिफलं

हेम०–§ अइ उड्डामरसीले जुत्तमिणं सरिसमिणं जइ एवं भणासि ता इदोवरं ण बोलिस्सं ।

---

* महानुभावस्य आर्यस्य—ननुभगवतः प्रसादेनवयं एता कुशलिन्यः

† भगवन्नेषा नः प्रियसखी हेमलता स्वयं वक्तुं लज्जतइत्यहं विज्ञापयामि यथैषा दुर्ललितस्य भर्तुः सुखदर्शना यथा च दृष्टपुत्रमुखचंदिरा भविष्यति तथा प्रसादं करोतु भगवान् ।

‡ भोसख्यः पश्यत पश्यत सफलमिदानीं प्रियसख्यात्तदयगतं श्रीफलं ।

§ अयि उद्दामरसीले युक्तमिदं सदृशमिदं । यद्येवं भणसि ततः परं न वदामि ।

६७ पाप. ६८ माझें चिन्ह धारण करणारे (माझे अंकित). ६९ दिवट्या. ७० निस्तेज, निर्वीर्य. ७१ प्रशस्तयौवना. ७२ दिनशुद्धि, चांगला दिवस. ७३ आपल्यास पुत्र व्हावा अशी इच्छा करणारी. ७४ श्रीयुक्तफल (पक्षी बिल्वफल)

परि०–अलमलं दाणीं गोवणिज्येण हंजे णिउणिए आणेहि दाव पूजोवअरणाइं । (अ)

चेटी–सामिणि इमाइं बलिपत्ताइं ता अच्चेदु सामिणी भअवंतं । (क)

परि०–सहि अच्चेहि भअवंतं । (ख)

हेमलता–[लज्जया [७६]विपर्यस्तं पूजयति]

विर०–उपदेशकाले गुरवे दक्षिणा दीयते अन्यथा कर्म गुणवन्न भवति ।

परि०–किवाइल्लेण भअवदा इअं चेअ मंतव्वा । (ग)

विर०–तर्हि फलं वा प्रदेयं ।

परि०–तं पि तहिं अत्थि चेअ । (घ)

विर०–तथा वा भवतु [हेमलतांप्रति] इतएहि गर्भगृहे त्वामुपदिशामि ।

[इति हेमलतया सह [७७]गर्भगृहं प्रविश्य]

अयि प्रिये अयमस्ति मदुत्संगस्ते पादपीठं अत्रोपविशतु प्रेयसी ।

हेम०–[सलज्जं] भअवं किं मिदमसंगदं करीअदि । (च)

विर०–ननु संगतं क्रियते । [इति बलादेनां ग्रहीतुमिच्छति]

हेम०–मुंचदु मं खणमेत्तं भअवंतो महाणुभावो नाव किं पि पिअसहीं मे परिहासलदं पुच्छिअ आअच्छामि । (छ)

विर०–यास्यसि ।

हेमल०–[अधोमुखीभूय] कदा ।

विर०–यदा–

अधरः परिपीयते मया मदिराक्षि क्षणमेष तावकः ॥
मुखमुन्नमय क्षपाकरः क्षणमंदैक्षिविलक्षतामियात् ॥ २० ॥

[नेपथ्ये] केच्चिरं गुरुपाअदं सणाणंदो अणुहुवीअदि पडिवालेदि च घरे

(अ) अलमलमिदानीं गोपनीयेन । निपुणिके आनय तावत्पूजोपकरणानि ।

(क) स्वामिनि इमानि बलिपात्राणि [७५]तदर्चयतु स्वामिनी भगवंतं ।

(ख) सखि अर्चय भगवंतं ।

(ग) कृपावता भगवतेयमेव मंतव्या ।

(घ) तदपि तत्रास्त्येव ।

(च) भगवन् किमिदमसंगतं क्रियते ।

(छ) मुंचतु मां क्षणमात्रं भगवान् महानुभावो यावत्किमपि प्रियसखीं मे परिहासलतां पृष्ट्वा-गच्छामि ।

७५. पूजापात्रैं. ७६ उलटसुलट. ७७. मध्यगृहं, गाभारा. ७८ लाज.

गुरुजणो ता तुरिद माअच्छध सामिणीओ एदे हक्कारिदुं आअदा अम्हे चेडा सामिसिट्ठीए. (ज)

हेम०–महाणुभाव साहीणो च्चेअ अअं जणो साअमागमिस्सदि अहुणा बाहिरं गच्छम्ह । (झ)

विर०—[शून्यवत्तया सह गर्भगृहान्निर्गत्यासनउपविशति]

सर्वाः—[उत्थाय] अम्हाणं तित्थप्पसादं देउ भअवंतो अइक्कामइ वेल घरगमणस्स । (ट)

विर०—[तीर्थप्रसादं ददाति]

सर्वाः—[गृहीत्वा] भअवं एदाओ अम्हे वंदामो साहआमो अ [इति सपरिवारानिष्क्रांताः] (ठ)

विर०—कथं दृक्पथमतिक्रम्य गताएव गुडदारुधन्वनो विजयवैजयंत्यः । अहहेदानीं ।

मधुतृणतृणतां करेऽवलंब्य स्फुटमथ विशिखान् रसालमुख्यान् ॥
मयि रणरणकः कथं न शक्योदिति रणरणिकाभृतं हृदंतः ॥ २१ ॥

तदात्वे तु

यत्तस्यामुखमुन्नमय्य न मया दंतच्छेदश्चुंबितो ।
नो पीनस्तनकुंभभित्तियुगेला संभाविता वक्षसा ॥
न स्पृष्टा रशना मणीझणझणप्राग्भारविस्रंसिनी ।
नीवी तन्मम दैवदुर्विलसितं प्रादुर्बभूव स्फुटं ॥ २२ ॥

हा किं करोमीदानीं मंदधीः । किमिति वाद्यापि चिरयत्यनंगसेना सदानंदश्चेति चिंतयति (ततः प्रविशत्यनंगसेनया सह सदानंदः)

सदा०–अज्जुके इत इतः ।

अनं०–भो सआणंद किं करेदि भअवं विरइसाअरो । (ड)

सदा०–अधुनैव निर्वर्तितनियमबलिना महासनोपविष्टेन भवदंतिकं प्रेषितोऽस्मि । (इति परिक्रामतः)

(ज) कियच्चिरं गुरुपाददर्शनानंदोऽनुभूयते प्रतिपालयति च गृहे गुरुजनः तत्त्वरितमागच्छत स्वामिन्यः एते आमंत्रितुमागता वयं चेटाः स्वामिशिष्या ।

(झ) महानुभाव स्वाधीनएवायं जनः सायमागमिष्यति अधुना बहिर्गच्छावः ।

(ट) अस्मभ्यं तीर्थप्रसादं ददातु भगवानतिक्रामति वेला गृहगमनस्य ।

(ठ) भगवन्नेतावयं वंदामहे साधयामश्च ।

(ड) भोःसदानंद किं करोति भगवान् विरतिसागरः ।

७९ आज्ञेनें. ८० ऊंस. ८१ पताका. ८२ धनुष्य. ८३ काम. ८४ चिंता. ८५ ओंठ. ८६ वेश्या.

अनं०–(पुरोऽवलोक्य) अए, सआणंद किमेसो भअवं विरइसाअरो परं बम्हं चिंतेंतो विअ दीसइ। (ढ)

सदा०–(सविस्मयहासं) किमयं परमं ब्रह्मापि चिंतयति चिंतयिष्यति वा। एवं स्वप्नेऽपि न भक्तिष्यति किं पुनर्जागृतौ। अयं खलु।

कस्त्वं भोजयितुं जनानिहगतान्को वायमत्रागतः।
केनास्मै कथितं वसेति कइदं कुर्यात्त्वदीयः पिता॥
कस्यायं क्रियते व्ययः किमिति नो पृष्ट्वा कृतं कर्म मा।
मेवं यः क्षपयत्यनेर्हसमहो का तत्र वा ब्रह्मधीः॥ २३॥

किंच।

कस्येयं वणिजः सुता नु विधवा को वामृतोऽस्याः पति
र्द्युम्नं यद्वशगं कियद्भवति वा किं मे न शिष्याभवत्॥
एषा मत्पदयोः समर्प्य सकलं वित्तं निदध्यात्पदं।
शय्यायामिति चिंतयन्नविरतं चंचूर्यते दुर्ग्रहः॥ २४॥

परंतु इयान् किल विशेषः।

निष्पुण्यासु धृतादराः कति परेऽत्रीरीः स्वयं ग्राहिणः।
केऽप्यन्ये वृतहस्तदारनिरताः केपीत्वरीसेकृताः॥
सौहित्यं कुहरस्य हंत कलयंत्यन्ये पुनर्यः स्वयं।
चक्षुष्यो लडहांगनाभिरनिशं संसेव्यतेऽस्मद्गुरुः॥ २५॥

केन वा वर्ण्यते तादृशस्य तादृशः प्रतिपत्तिप्रकारः। यतः।

भार्याठानन्नदानेन तर्पयत्यक्षतव्रतः॥
अहो अनुग्रहविधिरहो विश्राणनव्रतं॥ २६॥

(इति परिक्रम्य) अज्जुके एष भगवान् विरतिसागरस्तदुपसर्पेन।

अनं०–(उपसृत्य) भअवं विरदिसाअर एसा दे पादे वंदेइ अणंगसेना। (ण)

विर०–(मनसोत्थायांकपालिं विभाव्य) अपि कुशलं भवत्याः।

अनं०–(सविनयं) भअंतस्स विरदिसाअरस्स अनुग्गहेण विसेसदो दाणिं पाददंसणेण कुसलं। (त)

(ढ) अये सदानंद किमेषभगवान् विरतिसागरः ब्रह्म चिंतयन्निव दृश्यते।
(ण) भगवन् विरतिसागर एषा ते पादौ वंदते अनंगसेना।
(त) भगवतो विरतिसागरस्यानुग्रहेण विशेषतइदानीं पादर्शनेन कुशलं।

८७. काल. ८८. अपस्रियते ८९ अवीरा निष्पतिसुता. ९० कुलटा. ९१ तृप्ति. ९२ सुरत. ९३ डोळे थंड [illegible] करणारा, सुंदर. ९४ विदग्ध, प्रौढ. ९५ तजवीज, तोडजोड. ९६ भार्य्याठः स्त्री [illegible] विज्ञेयो भार्य्यया यश्च जीवति.

विर०–वत्स सदानंद आनय तावद्विपंचीं[१७] अद्य भगवंतं राधिकाप्रियतममुपवीणयितुं महान्कालातिपातः संवृत्तः ।

सदा०–यदाज्ञापयंति गुरुचरणाः । (इति निष्क्रम्य) (पुनः प्रविश्य) भगवन्नेषा विपंची सज्जा ।

विरति०–अज्जुकेऽनंगसेने उपवीणय तावद्भगवंतं राधिकादयितं ।

अनं०–जह आणवेदि भअवं । (इति वीणां वादयंती गायति)

वंसीवादणसीलो दइओ राहाअ मअणपिदा ॥
गोवंगणाहिं कीलइ जो सो देवो सुहं देऊ ॥ २७ ॥

अवि अ ।

मुणिणो वि मोहणवरा आणाए जस्स तित्थकरा ॥
हरिणंकभाइणिज्जो सरणं एण्हिं क्खु कंदप्पो ॥ २८ ॥ (थ)

(नेपथ्ये भेरीनादानंतरं)

स्नायं स्नायं मरालाः सरसि विदधते धूननं पक्षपाले- ।
र्ग्राहंते धेनुकाभिः[१००] सह सलिलमिभास्तीव्रतापाभितप्ताः ॥
जंबालांतर्निमग्नाः[१] किमपि ततइतः कासराः[२] संवलंते ।
कुल्यांभःपातुकामा उपवनहरिणा यत्र संघीभवंति ॥ २९ ॥

अपिच ।

विहितनियमस्नाना अर्घ्यं वितीर्य विवस्वते[३] ।
सपदि गृहिणः कुर्वत्यावेशिकापचितिक्रियां[४] ॥
सदसदखिलं कर्म द्रष्टुं जनस्य नभोऽतरं ।
विशति महसां[५] राशिर्लोकत्रयीनयनं हरिः ॥ ३० ॥

किंच ।

झंकारिणो मधुकरा निजनामवृत्या[६] । भिक्षामटंति मधुनः कमलांगणेषु ॥
अंतः प्रविश्य चरणानि च पंचषाणि[७] । चंचूं प्रसार्य पटखंडमखंडिताशाः ॥ ३१ ॥

(थ) यथाज्ञा[illegible]पयति भगवान् ।

वंशीवादनशी[illegible]लो दयितोराधायाप्यदनपिता ।
गोपांगनाभिः क्रीडति[illegible] यः स देवःसुखं ददातु ॥ २७ ॥

अपि च ।

मुनयोपि मोहनपरा आज्ञया यस्य [illegible]र्थकराः[९८]
हरिणांकभागिनेयः[९९] शरणमिदानीं खलु कंद[illegible]र्पः ॥ २८ ॥

१७ वीणा. १८ शास्त्रकार, सूत्रकार. ९९ चंद्राचा भाचा (मद[illegible]न). १००. हत्तिणी. १ चिखल. २ हेले. ३ सूर्य. ४ अतिथि पूजा. ५ तेज. ६ मधुकरवृत्ति, माधुकरी. ७ पांचसाहा.

(पुनर्नेपथ्ये) एषमुंडितमुंडः कुंडीदंडैकांडपाणिर्धातुरागरंजितेन वाससा परिमंडितमूर्तिः कस्मिंश्चिदेवतायतने शारीरकमुपनिषदो भगवद्वचनानि च श्रावयित्वा मुमुक्षुभ्यः कृपणास्तिकधनिकेभ्यो विश्रब्धस्ताभ्यश्च कस्यापि गृहमेधिनो गृहेषु संपन्नेनाभ्यवहारेणोपशमितभोगपिशाचिकः [11]कर्मदी मंदं मंदमितएवाभिपतति ।

विर०—(सुदूरं विलोक्य) (सानंदं) सखि **अनंगसेने** पश्य पश्य । अयं खलु बाल्यमित्रं मे **चैतन्ययति**रितः समापतति ।

अनं०—(साकूतं) ता एदस्य सव्वं चरिदं णाणेसि । (द)

विर०—अथ किं । अनेन द्वितीयाश्रममूमिकामलंकुर्वता कुपूर्यंप्रायामिकेन विटशिरोमणिना **मुद्गलभट्ट**नाम्ना काचिदपि योषिदनुपभुज्य नोत्सृष्टा । धनपिशाचिकाप्यस्याप्रतिहतगतिर्नीरधारेव तादृशी प्रतीपगामिनी सततमासीत् । एषतदानीमर्थलुब्धो नारीलुब्धइति नगरे नानानामुपक्रोशपात्रमभवत् ।

अनं०—ता कहं एसो जदीसरो संव्वुत्तो । (ध)

विरति०—कदाचित्तादृशाचारदुर्ललितो निष्प्रतीकारेण महामयेन ग्रस्तो विहस्तः शीर्णध्वजइवायं सर्वैरात्मजनैरेतदुराचारपरित्रस्तैर्बांधवैश्च बलात्तुरीयाश्रमवर्णिकां प्रापितः । अधुनापि कस्यांचिन्मठिकायामेकाकी स्वतंत्ररसनेंद्रियो विविधावलेहनादिवस्तुनातमात्मनासमुपचिन्वन्निशि भुनक्ति । निशीथे पुनरुपात्तनागरिकवेषो वेशवाटिकायां प्रतिगृहं परिश्रमन्नलब्धगम्यजनाभिर्मंजिकाभिर्विहरमाणः परिशिष्टे च पश्चिमयामार्धे छन्नमेव निजमठिकायामुपेत्य स्वपिति ।

अनं०—(विहस्य स्वगतं) कदा कदा मह वि घरं आअच्छदि अअं क्खु जदीसरो कोलमग्गपडिदो पव्वे पव्वे कालिआदेईमच्चेंतो मए पिज्जमाणं मइरं पिज्जइ । —राअरज्जुं च तप्पेंतो अप्पणो मणरहं पूरेदि । (न)

विर०—अन्यच्च एकदा गाढतमे तमसि कस्यचिदतिश्रेयसः सार्थवाहस्यावासे भांडसारमात्मत्यानयावीथ्या निभृतचरणः संचरन्नर्धपथएवोदयशिखरमारूढे तस्करपरिपंथिनि पीयूषभानौ यामिकैरुपुरुषैर्दृष्टश्चौरोऽयमिति दृढतरं बद्धा नीयमानो यदृच्छया चंद्रशालागतेन मया कोऽयमस्यां वेलायां कलकलइति प्रतोलीदत्तचक्षुषा

(द) तदेतस्य सर्वं चरितं जानासि

(ध) तत्कथमेषयतीश्वरः संवृत्तः ।

(न) कदा कदा ममापि गृहमागच्छति । अयं खलु यतीश्वरः कौलमार्गपतितः पर्वणि पर्वणि कालिकादेवीमर्चयन्मया पीयमानां मदिरां पिबति । रागरज्जुक्षतपर्यन्नात्मनो मनोरथं पूरयति ।

८ कमंडलु. ९ विधवा. १० क्षुधा. ११ यति, संन्यासी. १२ गृहस्थाश्रम. १३ कुत्सितकर्म. १४ व्याकुल. १५. विट. १६ वेश्या. १७. काम. १८ पहारेकरी. १९ गली. २० रस्ता, गली.

झटित्यधस्तादुपेत्याभिज्ञातः प्रियसखोऽयं मम परिव्राट् चैवमापन्नइति तान् मच्छिष्यतया सदाश्रवान्बव्हनुनीय लोत्रेण[२१] सह मोचितः । संत्येवमस्य सुबहून्यपदानानि[२२] किंतु परिव्राड्यमिति वंदनीयो न निंदनीयः [२३]पौरोभागितयाऽस्मादृशः । (ततःप्रविशतियथानिर्दिष्टो भिक्षुः)

भिक्षुः—अहो अच्चरिअं अच्चारिअं अज्ज मए जस्स गिहवइस्स घरे भिक्खाएसमत्ती कदा तस्स घरे भोअणवेलाए परिवेसेती मअणकामिणीए रूवाहिमाणं खुडेंती सव्वंगसुंदरा पीणत्थणी णव्वजोव्वणा सोह्मा दिट्ठा मह हिअअरंगम्मि णच्चिदुं च पउत्ता ता णमो देवस्स मणहवस्स णमो मज्झ भिक्खुअस्स ।

तहिं खु ओसरे ।

किं मिट्ठं किममिट्ठ मुह्म महवा णोह्मं अमिल्लं णु वा ।
तित्तं खारट मत्थि एद मिअ णो णादं मए जेमणं ॥
णो वा तस्य गिहेसरस्स वअणं पच्चुत्तिए सक्किदं ।
लोणं पाअसमिस्सिदं च करिऊणं भक्खिदं केवलं ॥ ३२ ॥

ताए मुहं जइ किं मिंदुकहाअ होइ जोह्मासवीदिकलहो ण चओरआणं ॥
पोम्माइँ जाअ चलणस्य तुलं ण एंति ताइं कहं णुव अणस्स समाइँ होंति ॥ ३३ ॥

ता कहं एसा मह पासवट्टिणी हुविस्सदि कहं वा मह मणरहो किदत्थदं गमिस्सदि का वा एत्थ पडिवत्तीति वाउल्लोह्मि अहवा एसा एत्थ पडिवत्ती एदस्सिं मंदिरे मह पिअवअस्सो विरइसाअरो चिट्ठइ तहिं गदुअ तें कहिस्सं सो क्खु इमाए आपदाए मं उत्तारइस्सदि अत्थिसो मह संकडसाअरे तरणी (इति परिक्रम्य गृहप्रवेशं नाटयति) [प]

(प) आश्चर्यं आश्चर्यं अद्य मया यस्य गृहपतेर्गृहे भिक्षायाः समाप्तिः कृता तस्य गृहे भोजनवेलायां परिवेषयंतीα मदनकामिन्यारूपाभिमानं त्रोटयंती सर्वांगसुंदरा पीनस्तनी नवयौवना स्तुषा दृष्टा ममहृदयरंगे नर्तितुं च प्रवृत्ता । तन्नमो देवाय मनोभवाय नमो मह्यं भिक्षुकाय ।

तस्मिन् स्वल्पवसरे ।

किं मृष्टं किममृष्टमुष्णमथवा नोष्णमम्लं तु वा तिक्तं क्षारमत्स्ये तदिति नो ज्ञातं मया जेमनंb ॥ नो वा तस्य गृहेश्वरस्य वचनं प्रत्युक्त्या सत्कृतं लवणं पायसमिश्रितं च कृत्वा भक्षितं केवलं ॥ [२४] (तामनुसधाय)

तस्यामुखं यदि किमिदुकथया भवति जोत्स्नासपीतिकलहो न चकोरकाणां । पद्मानियस्याश्चरणस्यतुलां न यंति तानि कथं नु वदनस्य समानि भवंति ॥ तत्कथमेषा मम [२५] पार्श्ववर्तिनी भविष्यति कथवा मम मनोरथः कृतार्थतां गमिष्यति का वात्र प्रतिपत्तिरिति व्याकुलोस्मि । अथवैषात्र प्रतिपत्तिः । एतस्मिन्मंदिरे मम प्रियवयस्यो विरतिसागरस्तिष्ठति तत्र गत्वा तं कथयामि । स स्वल्पस्या आपदो मामुत्तारयिष्यति । अस्ति स मम संकटसागरे [२७] तरणिः । २१ चोरींचामाल २२ कर्मे २३ दोषदृष्टीनें. α वाढणारी. b भोजन, जेवण. २४ ध्यान करून. २५ एके ठिकाणीं बसून पानकरणें २६ इलाज, उपाय. २७ नौका.

विर०—[ससंभ्रममुत्थाय सानंदं] नमो भिक्षवे। वत्स सदानंद आसनमासनं।

सदा०—भिक्षो इदमासनमितआस्यतां।

भिक्षुः— (आसनेउपविश्य) वअस्स अहवा भअवं विरइसाअर अवि कुसलं णाअरीजणपरिरंभस्स अहवा तुज्झ। [फ]

अनं०—भो भिच्छुआ एसा दे णिऊटसहअरी (इतिसवाकूस्तंभं विहस्य) णं एसा अणंगसेणा पणमदि अवि कुसलं जहिच्छाचारसुललिदस्स जइवेसस्स। (ब)

भिक्षु०—(अनंगसेनायाः परिरंभं संभावयन्) हुं किं भणिदं तुए। (भ)

अनं०—णं कुसलं जहिच्छाचारललिदस्स जइवेसस्स। (म)

भिक्षु०—अहइं। (य)।

विरति०—भिक्षो किमुद्दिश्य मंदिरमिदं कृतार्थतां नीतं किमिति वा चरणचार-परिश्रमो न गणितः।

भि०—णं भूअंतो अदीदो समओ तुह लोअणगोअरस्स त्ति तं दट्ठुं। (र)

वि०—भिक्षो यद्येवं तर्हि जितं मे भागधेयेन। (सपरिहासं) किं तु न हि भवादृशानां निष्प्रयोजना क्वापि प्रवृत्तिः। तत्किं फलं पश्यति गुप्त्या भिक्षुस्तत्रापि मैलमल्लकमित्रं मे मुद्गभट्टः।

भि०—(स्वगतं) सच्चं कहं णिप्पओजणा मे पउत्ती हुविस्सादि। कहं वा ण कहिस्सं जं आगमणस्स प्पओजणं। होदु एव्वं बोल्हिस्सं। (प्रकाशं सरोषमिव) अरे विरइसाअर कहं मुत्तलज्जो तुमं पुव्वं तस्सिं आसमे वट्टमाणस्स दाणिं गहिदचउत्थासमदिक्खस्स मह तं णामं गेण्हसि। (ल)

विर०—(सम्मोद्घाटनं) कथं तर्हि भवान् पूर्वतनमाचारमधुनाप्याचरति किं भवतः प्रतिवेशिन्यापि न त्रपया भवितव्यं। अस्माकं पुनर्दग्धयानया अनन्या भवितव्यं।

भि०—एव्वं णेदं तुम्हाणं सा हदासा जणणी अम्हाणं पुण ण कावि (व)

(फ) वयस्य अथवा भगवन् विरतिसागर अपि कुशलं नागरीजनपरिरंभस्य अथवा तव।

(ब) भो भिक्षो एषा ते निगूढसहचरी नर्म्मदा अनंगसेना प्रणमति अपि कुशलं यथेच्छाचारसुललितस्य यतिवेषस्य।

(भ) किं भणितं त्वया।

(म) ननु कुशलं यथेच्छाचारललितस्य यतिवेषस्य। (य) अथकिं।

(र) ननु भूयानतीतः समयस्तव लोचनगोचरस्येति त्वां द्रष्टुं।

(ल) सत्यं कथं निष्प्रयोजना मे प्रवृत्तिर्भविष्यति। कथं वा न कथयामि यदागमनस्य प्रयोजनं। भवतुएवंवदामि। अरे विरतिसागर कथं मुक्तलज्जस्त्वं पूर्वं तस्मिन्नाश्रमे वर्तमानस्येदानीं गृहीतचतुर्थाश्रमदीक्षस्य मम तन्नाम गृह्णासि।

(व) एवमेतत् युष्माकं सा हताशा जननी अस्माकं पुनर्न कापि।

२८. लंगोटमित्र. २९. शेजारीण.

विर०–तिष्ठतु नाम सा वराकी त्रपा । परंतु श्रुतिस्मृतिप्रणीतं स्वमाचारं परित्यज्य यदृच्छाचारमर्चयंतस्तव कथं न भीः कारुणायाः[३] कृतांतस्य ।

भिक्षु०–(पुनः सक्रोधं) अरे मूढ कुलपरंपरागदं आआरं आअरंतो जणो किं ति वा कारणादो डरिस्सदि अत्थि किर एव्वं महापबंधेसु पढिदं । (श)

कुलधर्मानुष्ठायिनः सुलभमेवामुष्मिकं[३१] श्रोवसीयं नाप्निष्टमपि स्पृशत्येनस्तं[३२] पुरुषमिति ।

विर०–भिक्षो कथय कीदृशस्ते कुलधर्मइति ।

भि०–(साहंकारं) कहेमि दे अम्हाणं कुलधम्मं जइ तुमं सीसो होसि । (ष).

विर०–(साश्चर्यं स्वगतं) अहमुपदिशामि लोकानयं पुनर्मामुपदेष्टुमिच्छति । भवतु कोदोषः । शृणोमि तावदस्यापि धर्ममार्गं । (प्रकाशं) भिक्षो तथा भवतु कथय तावत् ।

भि०–अवि सच्चं । (स)

वि०–सत्यं ।

भि०–सुण दाव अम्हाणं पुव्वपुरिसस्स भेरवाणंदमिस्सस्स वअणसंदब्भं । (ळ)

विर०–अवहितोऽस्मि ।

भि०–(स्मृतिमभिनीय पठति) मंतो ण तंतं ण अ किं पि णाणं झाणं च णो कोवि गुरूप्पसादो ॥ मज्जं पिबामो महिलं रमामो मोक्खं च णामो कुलमग्गलग्गा ॥ ३४ ॥

अवि अ ।

रंडा चंडा दिक्खिदा धम्मदारा मज्जं मंसं पिज्जए खज्जए अ ॥
भिक्खा भोज्जं चम्मखंडं च सेज्जा कौलो धम्मो कस्स णो भादि रम्मो ॥ ३५ ॥ (क्ष)

(श) अरे मूढ कुलपरंपरागतमाचारमाचरन् जनः किमिति वा कारणाया भेष्यति । अस्ति किलैवं महा प्रबंधेषु पठितं ।

(ष) कथयामि ते अस्माकं कुलधर्मं यदि त्वं शिष्यो भवसि ।

(स) अपि सत्यं ।

(ळ) श्रुणु तावदस्माकं पूर्वपुरुषस्य भैरवानंदमिश्रस्य वचनसंदर्भं ।

(क्ष) मंत्रो न तंत्रं न च किमपि ज्ञानं ध्यानं च नो कोऽपि गुरुप्रसादः ॥
मद्यं पिबामो महिलां[३३] रमयामो मोक्षं च यामः कुलमार्गलग्नाः[३४] ॥
अपि च ।
रंडा चंडा दीक्षिता धर्मदाराः मद्यं मांसं पीयते खाद्यते च ॥
भिक्षा भोज्यं चर्मखंडं च शय्या कौलो[३४] धर्मो कस्य नो भाति रम्यः ॥

३० यातना, दुःख. ३१ पारलौकिकसुख. ३२ पाप. ३३. स्त्री. ३४ वाममार्ग.

अनं० सम्मं खलु भिच्छुअस्स धम्मणिरूवणं । (ज्ञ)

भि०—अणं वि सुण ।

मुत्तिं भणंति हरिब्रह्ममुहादि देवा । झाणेण वेदपढणेण कउक्किआहिं ॥
एक्केण केवल मुमादइएण दिट्ठो । मोक्खो समं सुरअकेलिसुरारसेहिं ॥३६॥(अ)

सदा०—[सहासं] अहो धर्मः । अहो भिक्षुवेषः । अहो स्वैरचारिता । चिरेण च चरितार्था कौलदीक्षा भवता पाहिग्राहकेण । किं च । यः कयोश्चित्पूर्वमभूत संवादः स इदानीं त्वयि भिक्षौ युक्तरूपः संगच्छते । यथा

भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना ।
किं ते मद्यमपि प्रियं प्रियमहो वेश्यांगनाभिः सह ॥
वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा ।
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य का वा गतिः ॥ ३७ ॥

भि०—[सक्रोधं दंतैर्दंतान्निष्पीड्य] अरे हदास किं मे मम्मं उग्घाडेसि [इति दंडमुद्यम्य हंतुमिच्छति] [इ]

विर०—भिक्षो मा कोपीः । अस्य सदानंदस्य गर्भरूपविलसितमेतत् । अत्र किं तीक्ष्णः कटाक्षपातो विधीयते ।

भिक्षुः०—अए तुमं पि भणासि गब्भरूवविलसिदमेदंत्ति । किं एसो बावीसवरिसदेसीओ घोडओ मह वक्करं करेदि । (सदानंदं प्रति) अरे छिणालिआपुत्त ण जाणेसि मं मुग्गभट्टं (इत्यर्धोक्ते) णं ण जाणेसि मं चेतण्णभिच्छुं । जइ अहं कुविस्सं तदा तिहुवणम्मि वि तुह णत्थि रक्खिदा एसो तुज्झ गुरू देवो पिशाचो रक्खसो वा । (उ)

सदा०—सत्यं महानुभावः खल्वनेन रूपेण भिक्षुः ।

भिक्षुः—जइ तुमं पुणो पुणो वाचाडो एव्वं वोल्लेसि तदा खग्गधाराए तं तोडिअ कालिआए उवहारं करिस्सामि (क) (इति शोणचक्षुर्भ्रुवमुन्नमय्य पश्यति)

(ज्ञ) सम्यक् खलु भिक्षोर्धर्मनिरूपणं ।

(अ) अन्यदपि शृणु । मुक्तिं भणंति हरिब्रह्ममुखादिदेवा ध्यानेन वेदपठनेन क्रतुक्रियाभिः ।
एकेन केवलमुमादयितेन दृष्टो । मोक्षः समः सुरतकेलिसुरारसाभ्यां.

(इ) अरे हताश किं मे मर्मोद्घाटयसि ।

(उ) अये त्वमपि भणसि गर्भरूपविलसितमेतदिति । किमेष द्वाविंशतिवर्षदेशीयो घोटको मम परिहासं करोति । अरे बंधकीपुत्र न जानासि मां मुद्गलभट्टं । ननु न जानासि मां चैतन्यभिक्षुं यद्यहं कुप्यामि तदा त्रिभुवनेऽपि तव नास्ति रक्षिता तव गुरुर्देवः पिशाचो राक्षसो वा ।

(क) यदि त्वं पुनः पुनर्वाचाट एवं वदसि तदा खड्गधारया त्वां त्रोटयित्वा कालिकाया उपहारं करिष्यामि ।

३५. पोर. ३६ शिनळ. ३७ बळि.

203

सदा०—(सभयकंपं अंजलिं बध्वा) भिक्षो क्षमस्व तावदेकमपराधं। एष तवाद्यप्रभृति विधेयैस्तत्परिरक्षस्व मामिति (साष्टांगं प्रणमति)

भि०—वअस्स अहवा सिस्स पेक्ख मे पुरिसकारं जं एस मे णव्वो अण्णाअरो संवुत्तो। (सदानंदं प्रति) इदो पहुदि अहं जं जं दे कहिस्सं तं तं कुण। (ख)

सदा०—यथादिशंति भिक्षुचरणाः।

विर०—(सहासं) अये वयस्यपदप्रयोगमपहाय कथमधुनैव शिष्यपदप्रयोगं योजयसि।

भि०—को संदेहो उवदिट्ठस्स सिस्सपदप्पओओ जुज्जइ चेअ। अरे सिस्स अहवा पिअवअस्स मह एकं कज्जं करेसि। (ग)

विर०—किं तत्कार्यं।

भि०—एव्व मेव्वं (इति कर्णे कथयति) (घ)

विर०—(विहस्य) इयं तत्करिष्यति। (इत्यनंगसेनांमगुल्या दर्शयति)

अनं०—(उत्थाय) किं भणादि भअवं विरइसाअरो। (ङ)

विर०—एष भिक्षुस्त्वां कस्मिंश्चित्कर्मणि युयुक्षति।

अनं०—किं तं कम्मं। (च)

विर०—अस्ति कस्यचिद्गृहिणः स्नुषा (इत्यर्धोक्ते)

अनं०—(सरोषं) अलमलं इदो वरं कहिदेण जाणिदं मए एसो मं संभलिं कादुमिच्छदि किं। (छ)

भि०—(सविनयं) अयि अणंगसेणे सच्चं कुणसु मह तं कज्जं। अहं क्खु तुज्झ चलणसेवओ होमि। (ज)

अनं०—(सरोषहासं) अरे हदास भिच्छुआ तं कज्जं दे मातरं कहेहि पिदरं

(ख) वयस्य अथवा शिष्य पश्य मे पुरुषकारं एष मे नव्य आज्ञाकरः संवृत्तः। इतः प्रभृत्यहं यद्यत्ते कथयामि तत्तत्कुरु।

(ग) कः संदेहः। उपदिष्टस्य शिष्यप्रयोगो युज्यतएव। अरे शिष्य अथवा प्रियवयस्य ममैकं कार्यं करिष्यसि।

(घ) एवमेवम्।

(ङ) किं भणति भगवान् विरतिसागरः।

(च) किं तत्कर्म।

(छ) अलमलमितःपरं कथितेन। ज्ञातं मया एष मां शंभलीं कर्तुमिच्छति किं।

(ज) अयि अनंगसेने सत्यं कुरुष्व मम तत्कार्यं अहं खलु तव चरणसेवको भवामि।

३८ वचनांत नागणारा. ३९ पराक्रम. ४०. कुटण.

वा कहेहि बहिणीअं वा कहेहि । (इति भिक्षोः शिरस्यालोलिकां[४१] प्रदातुमिच्छति) (झ)

भि०–अइ **अणंगसेणे** जहा तहा वा भण किं दु कुण तं कज्जं । एसे दे धणसरिसो कमंडलू दिज्जइ एसो दे कामंकुससरिसो दंडो दिज्जइ । (इति चिबुकं[४२] जिघृक्षति) (ञ)

अनं०—(हस्तेन मुखचपेटिकां[४३] दित्सति)

विर०—(उभयोरंतरे भूत्वा) **अनंगसेन** नोर्धं[४४] तिष्ठ । [भिक्षुं प्रति] भिक्षो किं मन्मथमत्तः प्रमत्त इवान्मार्गगो भवासि । नह्येवंरूपेण सिध्यंति कार्याणि । अन्यः स कोऽपि पंथाः । अन्या सा चातुरी । अन्या सा परिपाटी । अन्ये च ते सिद्धिमंतः । ये स्वार्थमापाद्योपधिनाऽ[४५] निरीहाइव स्थौस्नवो[४६] लोके प्रचरंति तएव धूर्ताः । क्वायं यतिभावः । क्व वा यदृच्छा चारः । क्व वा प्रमत्तता । [इति बहु खेलीकुर्वन्नासन उपविशति]

भि०–[सदानंदं प्रति] अए अहिणवसिस्स तुमं वा कुण मह तं कज्जं । [ट]

सदा०–नहि नहि । [इति शिरो धूनयति]

विर०—[सविस्मयं] कथमपैकृतोऽपि न विरमति भिक्षुः ।

भि०–[सोन्मादं पृष्ठतो गत्वा **सदानंदस्यांसपिंडाववलंब्य**] अए पेक्ख पेक्ख एसा सा एसा सा गिहवइसोण्हा गिहवइसोण्हा । [इति मध्येनांदोलनलीलां नाटयति] [ठ]

सदा०–हा गृहीतोऽस्म्यनेन पापीयसा गंधगजेनेव हरिणशिशुः । तत्परित्रायतां परित्रायतां भगवान् ।

अनं०—ओसल भिच्छुआ ओसल । [इति **सदानंदं** मोचयति] [ड]

सदा०—[निश्वस्य] हा नीवितोऽस्मि । [इति **विरतिसागरस्य** पार्श्वे उपविशति]

विर०—[साश्चर्यं] अहो उन्मत्तदशां प्रापितो भगवता शूर्पकारेण[४७] भिक्षुः ।

(झ) अरे हताश भिक्षो तत्कार्यं ते मातरं कथय पितरं वा कथय भगिनीं वा कथय ।

(ञ) अयि अनंगसेन यथा तथा वा भण । किं तु कुरु तत्कार्यं । एषतेऽ (स्त) नसदृशः कमंडलुर्दीयते । एष ते कामां(मं)कुशसदृशो दंडो दीयते ।

(ट) अये अभिनवशिष्य त्वं वा कुरु मम तत्कार्यं ।

(ठ) अये पश्य पश्य एषा सा एषा सा गृहपतिस्नुषा गृहपतिस्नुषा ।

(ड) अपसर भिक्षो अपसर ।

४१ चापटया. ४२ हनुवटी. ४३ चपराक. ४४ उगीच. ४५. कपटानें. ४६ राहणारे. ४७ निर्भत्सना करून. ४८ धिक्कार केलेला. ४९ मदन.

नूनमनेन बालेयाकृतिराप्रकाशिता । अहो संविधानं । किमितो वा विकृतं दर्शनीयं ।

सदा०–भगवन् पश्य पश्य अनंगसेनया किमप्यालंब्य निष्पीडितः शीर्णमदो भिक्षुः संवृत्तः ।

भि०–(जातानुशयो लज्जयाधोमुखस्तिष्ठति)

विर०–भिक्षो सुष्ठु संपन्ना ते [५०]विकृतिः । उदित इदानीं तव विप्रतीसारः [५१] । मा पुनरनुसरेतःपरं कुपूयं पंथानं । साधय समाधिं । नियमय मानसं ।

भि०–एव्वं करीअदि । (इति निष्क्रांतः) (ढ)

अनं०–भअवं दाणिं साहेमि साअमागमिस्सामि । (इति निष्क्रांता) (ण)

सदा०–भगवन्नेष समागच्छति पादवंदनायात्मना तृतीयः **किन्नरदासः** ।

विर०–(सहर्षं) आगच्छतु ।

सदा०- अहमपि साधयामि । (इति निष्क्रांतः)

(ततः प्रविशति कुटुंबिन्या बंधुलेन चानुगम्यमानः **किन्नरदासः**)

किन्नर०–(कुटुंबिनीं प्रति) अज्जे भअवं विरइसाअरो पणंतव्वो त्ति महंतो मे परितोसो । (त)

कुटुंबिनी०–अज्जउत्त अज्ज भअवंतो दट्ठव्वो त्ति ममा विभूअंतो हिअअविकासो । (थ)

बंधु०–मह वि संपण्णो मणरहो । (इति परिक्रम्य) इदो एदु इदो एदु सामी एसो भअवं विरइसाअरो । (द)

किन्नर०–(उपसृत्य) भअवं एसो सेट्ठिकुमारो **किण्णरदासो** पादेसं वंदेइ । [ध]

विर०–(स्वगतं) अस्मत्पादयोः कुटुंबिन्या नीवीमर्पयितुं दानशौंडो भूयाः । (प्रकाशं) दीर्घायुर्भूयाः ।

कुटुं०–भअवं एसा केलिकुरंगिआ दे पादे पणमदि । [न]

विर०–अखंडितचारित्रा भर्त्रा भोगिनी स्याः ।

(ढ) एवं क्रियते ।

(ण) भगवन्निदानीं साधयामि सायमागमिष्यामि ।

(त) आर्ये भगवान् विरतिसागरः प्रणंतव्यः इति महान्मे परितोषः ।

(थ) आर्यपुत्र अद्य भगवान् द्रष्टव्य इति ममापि भूयान् हृदयविकासः ।

(द) ममापि संपन्नो मनोरथः । इत एतु इत एतु स्वामी एष भगवान् विरतिसागरः

(ध) भगवन्नेष श्रेष्ठिकुमारः किन्नरदासः पादयोर्वंदते ।

(न) भगवन्नेषा केलिकुरंगिका ते पादौ प्रणमति ।

५० विकृतिः अविकृतिश्च, ५१ पश्चाताप.

बंधु०–भअवं दुवेणं एदाणं कम्मकरेण संघडओ णाम बंधुलो दे चलणे गेण्हइ । [प]

बिर०–स्वामिनः प्रसादपात्रं भूयाः । [**किन्नरदासं प्रति**] अपि कुशलिन्यहरहर्वर्द्धमाना ते वाणिज्या ।

किन्न०–भअवंतस्स अनुग्गहदिट्ठीए विसेसदो कुसलिणी ! [फ]

बिर० (सस्मितं) भोश्रेष्ठिन्नलमलमवहित्थयाऽनया । यद्येवं तर्हि किमित्येषु वासरेषु तनुभावमालंबते ते संहननं । अधिकतरतामेति च काशकांडनिभः पांडिमा । न दृश्यते यथापूर्वमिवावयवेषु कार्यधूःपाटवं । मनस्कारोऽप्यप्रभुरिव शून्यतां बिभर्ति । नापि व्यापारेषु तादृशी चर्चा । तन्मन्ये

द्युम्नं तावदियद्धनैर्भवनिलये स्याद्वा न वेति क्षणं ।
लोकः सांशयिको भवत्यभिजनस्तादृङ् न किं विश्रुतः ॥
रूपेणाप्रतिमो भवानथ तथा चेयं नतांगी युवां ।
संपन्नौ वयसा च केवलमहो दुःखाय निष्पुत्रता ॥ ३८ ॥

कुदुं०–[लज्जया तिर्यगधोमुखी तिष्ठति]

बंधु०–[सस्मितं] सम्मं क्खु जाणिदं भअवंतेण । मण्णे दिव्वचक्खु असि तुमं । कह मण्णहा अम्हसामिणो हिअअगदं जाणीअदि । महंतो क्खु पहावो भअवंतस्स । अप्पणो भद्दं मिच्छंतेण अम्हसामिणा दाणिं भअवंतस्स गिहमवि अप्पाणिज्जं । को वा अण्णो एआरिसो महाणुभावो दीसइ [ब]

बिर०–[स्वगतं] सत्यं संधानकुशलः संघट्टको नाम बंधुलः । निपुणमुपन्यस्तमनेन । गृहशब्दनिर्देशादुभयथापि नः समीहितसिद्धिः । भवतु । [प्रकाशं] भो श्रेष्ठिन्नलममुनापत्यविषादेन । नियत्यायत्तानि खलु सुखदुःखानि देहिनां । तथापि

गुरुप्रसादेन च देवसेवया । प्रदक्षिणाभिः किल पिप्पलस्य वा ॥
भवंति पात्राणि सुतोदयस्य यत् । सदर्चनाः सत्फलदानसम्मुखाः ॥३९॥

बंधु०–किं किं ण किदं अम्हसामिणा पुत्तमुहदंसणवाउलेण देवदाओ कुलदेवदाओ अ कादिवारं ण बलिदाणेहिं सक्किदाओ । के के वा ण बम्हणा णिअधणदाणेण अच्चिदा सामिणीए । को वा ण पाहुणो एदस्स घरं पत्तो सामिणीए

(प) भगवन् द्वयोरेतयोः कर्मकरः संघट्टको नाम बंधुलस्ते चरणौ गृह्णाति ।

(फ) भगवतोऽनुग्रहदृष्ट्या विशेषतः कुशलिनी ।

(ब) सम्यक् खलु ज्ञातं भगवता । मन्ये दिव्यचक्षुरसि त्वं । कथमन्यथास्मत्स्वामिनो हृदयगतं ज्ञायते । महान् खलु प्रभावो भगवतः । अत्मानोभद्रमिच्छतास्मत्स्वामिनेदानीं भगवते गृहमप्यर्पणीयं । कोवान्यएतादृशोमहानुभावो दृश्यते ।

५२ गोपन. ५३ शरीर. ५४ उत्साह. ५५ कुबेर.

सेवाविसेसेण पूरिदासो कदो । तह [ ] ण दिट्ठो णेण पुत्तमुहचंदो । किं च ।

एदस्स समाणवरिसेहिं वअस्सेहिं भ. वदपुत्तसुहेहिं लज्जं पाविदो ण तुमं पुरिसो अवि दु पंडवरो त्ति अवज्झत्थो तारिसपुरिसत्थविहुरो अदिसरलमदी जं तं पुच्छ-अंतो कहं पुत्तो होई केण प्पआरेण होइ का वा जुत्ति त्ति आसी । अण्णं च णइ वि लज्जेमि तह वि प्पसंगागदंति कहेमि । एकदा केण वि पोरधुत्तेण पुच्छं-तस्स एदस्स किर एव्वं कहिदं अइ तुह पुत्तो अहिमदो ता कालट्ठमीरत्तिपरभागे सेज्जाए णिअकामिणीं अहोमुहीं आइऊण कीलसी जइ वा ताए चूचुअं चूससि तदा णिच्चएण पुत्तसुहं पावेसि । एव्वं क्खु अत्थि तोडओ त्तिवंचिदो । तदो अ अरे संघडआ तुमं मे एआरिसं तं कज्जं कुण त्ति मं कहिदुं पउत्तो । मए वि परिसजणविरुद्धं कदा विअणणुहूदं त्ति पडिसिद्धो । भअवं एवं वट्टणसीलेण इमिणा च्चेअ लोएं अप्पणो पंडत्तणं पक्खविदं । परु किर अम्हसामिणी मज्झमावत्थं पत्ता । कि मिअंतेण कालो अदिक्कंतो । कि मेसा णिक्कला संवुत्ता । केवलं अप्पण्णो अहीरदाए अण्णारिसं च्चेअ कादुं पउत्तो । मए उण सव्वहा एद मेअस्स मह सामिणो चरिअं ण जुत्तं ति विचारिअ भअवंतस्स पाअसआसं आणीदो सामी । इदोवरं भअवंतो प्पमाणं । [भ].

विर०—[स्वगतं] अहो मे ग्रहाणामानुकूल्यं । अहो मे भाग्यधोरणी । यद-यमतर्कितोपनतः [५८]शेवधिः पृथुश्रोणीच । जितं तर्हि पुण्यपरिणामेन । सरलमतिः

(भ) किं किं न कृतमस्मत्स्वामिना पुत्रमुखदर्शनव्याकुलेन । देवताः कुलदेवताश्च कतिवारं न बलिदानैः सत्कृताः । के के वा न ब्राह्मणा निजध(स्त)नदानेनार्चिताः स्वामिन्या । को वा न प्राघुणिकएतस्य गृहं प्राप्तः स्वामिन्या सेवाविशेषेण पूरिताशः कृतः । तथापि न दृष्टोऽनेनपुत्रमुखचंद्रः । एतस्य समानवर्षैर्वयस्यैर्भावितपुत्रसुखैर्लज्जांप्रापितो न त्वं पुरुषो अपि तु पंडवर इत्यवज्ञस्तत्तादृशपुरुषार्थविधुरोऽतिसरलमतिर्यैतं पृच्छन् कथं पुत्रो भवति केन प्रकारेण भवति का वा युक्तिरित्यासीत् । अन्यच्च । यद्यपि विलज्जे तथापि प्रसंगा-गतमिति कथयामि । एकदा केनापि पौरधूर्तेन पृच्छतेऽस्मै किलैवं कथितं । यदि तव पु-त्रोऽभिमतस्तत्कालाष्टमीरात्रिपरभागे शय्यायां निजकामिनीमधोमुखीं शाययित्वा क्रीडसि यदि वा तस्याश्चुचुकं चूषसि तदा निश्चयेन पुत्रसुखं प्राप्स्यसि । एवं खलस्थित *त्रोटकइति वंचितः । ततश्चारे संघटक त्वं म एतादृशं तत्कार्यं कुर्वीति मां कथयितुं प्रवृतः । मयापि पुरुषजनविरुद्धं कदाप्यननुभूतमिति प्रतिषिद्धः । भगवन्नेवं वर्तनशीलेनानेनैव लोकआत्मनः पंडत्वं प्रख्यापितं । पश्चात्किलास्मत्स्वामिनी मध्यमावस्थां प्राप्ता । किमियता कालोऽतिक्रांतः । किमेषा निष्कला संवृत्ता । केवलमात्मनोऽधीरतयाऽन्यादृशमेव कर्तुंप्रवृत्तः । मया पुनः सर्वथैतदस्य मम स्वामिनश्चरितं न युक्तमिति विचार्य भगवतः पादसकाशमानीतः स्वामी । इतःपरं भगवान् प्रमाणं ।

* तोडगा. ५३ गतवर्षी. ५७ ह्मा तारो. ५८ डबोलें.

श्रीमान्कापि कामदुघा धूर्तानां । भवत्वेवं तावत् । [प्रकाशं] अरे बंधुल सम्यगवधारितं भवता । नूनं साधुदर्शी दीर्घदर्शी च भवान् । स्वामी च तव सुकृतराशिरतएव भवादृशा [५१]येदंचले सुष्ठुदुष्ठुविचारचर्चणाः परिणामदृष्टयोऽतर्निविष्टास्तिष्ठंति ।

किन्न०—एवं णेदं किं कहेमि भअवं एआरिसी मवत्थं गदस्स मह सव्वो एव्व कज्जभारो उत्तंभिदो इमिणा ण कहिं पि ऊणं दंसेदि । एत्थ एसा घरिणी मे पुच्छिदव्वा । [म]

कु०—[सलज्जस्मितं शिरोऽशुकेन मुखमपिधत्ते]

विर०—[स्वगतं]

स्मितचंद्रिकया कृताङ्गो । मदिराक्ष्या मुखचंदिरः स्फुटं ॥
वसनांचलसंवृतोऽपि मां । सुखयत्येष विशेषसुंदरः ॥ ४० ॥

बंधु०—भअवं सच्च मुत्तं सामिणा । पेक्ख पेक्ख एआणं दुवेणं कम्मकरस्स मह सरीरे तेअस्स लवो वि णत्थि । तरूणो वि दुब्बलदाए णिक्कलो संवुत्तो म्हि । ता दाणिं दुवेण मेआणं मणरहं पूरेंतो मह उवरि किवं करेदु सूरदो भअवंतो । [थ]

विर०—अये बंधुल अल्पमतिकातरतया । भावेष्यति भवान् अविलंबितमविकलः सिद्धार्थश्च ।

बंधु०—ता णिव्वुदो दाणिं बंधुलो भअवंतस्स पसादेण । [र]

विर०—भोःश्रेष्ठिन्मा खल्वितःपरं धूर्तवंचनावैगुरायां पत । कथयामि ते भूतार्थं । दृष्टं हि मया समाधिचक्षुषा भविष्यति भवतः पुत्र इति । किंत्वस्ति महान्प्रत्यूहस्तव पितामहो भूतयोनिमुपाश्रितस्तमप्रतिकृत्य कथमासाद्यतेऽपत्यसुखं । येन महांतमायासमनुभूय समासादितमपर्याप्तं द्रविणमिदमनुपभुज्य महाशयेन सता संस्थितं[६३] । तदेवेदानीं त्वया भुज्यमानमसहमानस्तवैव दुःखहेतुराधिशंकुरिव मूर्तिमान्प्रतिबंधकः समजायत । भवतु किमनेन । सोऽस्ति तादृङ्मंत्रो यस्य गुणवता संभृतोपस्करेणानुष्ठानविधिना मोचयित्वा भूतयोनेरुत्तमगतिर्विधेयः प्रथमं तावत्पितामहः । अनंतरमुत्तमधातुपुष्टिमासाद्य लघुसंजातोत्थानभरो भवान् शक्तः समीहितार्थसिद्धये ।

(म) एवमेतत् । किं कथयामि भगवन्नेतादृशीमवस्थां गतस्य मम सर्वएव कार्यभार उत्तंभितोऽनेन न काप्यूनं दर्शयति । अत्रैषा गृहिणी मे प्रष्टव्या ।

(थ) भगवन् सत्यमुक्तं स्वामिना पश्य पश्य एतयोर्द्वयोः कर्मकरस्य मम शरीरे तेजसो लवोऽपि नास्ति । तरुणोऽपि दुर्बलतया निष्फलः संवृत्तोऽस्मि । तदिदानीं द्वयोरेतयोर्मनोरथं पूरयन्ममोपरि कृपां करोतु सूरतो भगवान् ।

(र) तन्निर्वृतहृदानीं बंधुलो भगवतः प्रसादेन ।

५१ पहरी. ६० कुशल. ६१ कृपालु. ६२. जाळें, पाश. ६३ मेला.

अस्मिंश्च कर्माणि तृणाय मत्वा निजमर्यराशिमनया सहधर्मिण्या सहामुष्मिन् देवतायतने प्रयतितव्यं । अस्ति च परश्वः पुण्याहं यत्र मया तन्मंत्रोपदेशः क्रियते भवतः सदारस्य । एषोऽहमस्मि ते निर्धार्यः[६४] । अद्यैव सायं बलिसाधनसाधूनि प्रेषय दशसहस्राणि दीनाराणां । जानीहि च संवृत्तः संप्रति भवान् शुंभंयुरिति ।

किन्न०—जह आण्णवेदि भअवंतो । [ल] [इति पादयोः प्रणिपत्य कुटुंबिन्या बंधुलेन च सह निष्क्रांतः]

विर०—[सगर्वं] तादृक् संबंधेनैव ममास्ति वचसो येनैष लोकःस्वयं ।
दरिर्वापि हृदापि वा सुवचसा वा स्वापतेयेन वा
प्रह्वीभावमुपेत्य पादयुगलं संसेवते मामकं ।
तन्मन्ये निपुणेन मूर्द्धनि मया न्यस्तं पदं भोगिनां ॥ ४९ ॥

[पुरोऽवलोक्य सविस्मयं] कोयमंतरीयांचले पितरमाकर्षन्वाचाटः संभ्रांतो बटुरितः समापतति ।

[प्रविश्य यथानिर्दिष्टो बटुः]

बटुः—[पितरं प्रति] अरे कहं णाम णाअच्छसि । कहं वा मह तादो सि तुमं णं एसो हं जइ कविणासो णाम बडू ता तुवं बलादो गेण्हिअ विरइसाअरं णइस्सं । सो क्खु तुज्झ गुरू सासिदा दंडं करिस्सदि । अण्णहा अण्णाअपउत्तो तुमं ण्ण विरमसि । [इति तमाकर्षन्नुपेत्य] भो विरइसाअर एसो तुए छत्तवरो मह पिदा सम्मं क्खु उवदिट्ठो । [व]

विर०—बटो किमपकृतं ते तातेन ।

ब०—[सहासं] भअवं सुठ्ठु किर भणासि कि मवकिदं दे तादेण त्ति । सुणं अवकिदं । जो एसो हदासो अणवराहिणं मं दिवा वि रत्तिं वि ताडेंतो ण लज्जेइ । एरिसो जो पावो तंडाअण त्ति णामं बिम्हरिअ उत्तरखंडओ त्ति णामेण हक्कारीअदि जणेण तह वि जो जणस्स तुंडं दंसेदि । अदो भणामि किं तुए सिरसाणं उत्तताडणं पलमो धम्मोत्ति उवदेसो करीअदि । [श]

(ल) यथाज्ञापयति भगवान् ।

(व) अरे कथं नाम नागच्छसि । कथं वा मम पितासि त्वं । नन्वेषोऽहं यदि कपिनासो नाम बटुस्तत्त्वां बलाद्गृहीत्वा विरतिसागरं नयामि । स खलु तव गुरुः शासिता दंडं करिष्यति । अन्यथा अन्यायप्रवृत्तस्त्वं न विरमसि । भो विरतिसागर एष त्वया छात्रवरो मम पिता सम्यक् खल्वुपदिष्टः ।

(श) भगवन् सुष्ठु किल भणसि किमपकृतं ते तातेनेति । शृणु यदपकृतं । यएष हताशोऽनपराधिनं मां दिवापि रात्रावपि ताडयन्न लज्जते । ईदृशो यः पापस्तांडधायनेति नाम विस्मृत्य पुत्रखंडक इति नाम्नाह्वयते जनेन तथापि यो जनस्य तुंडं दर्शयति । अतो भणामि किं त्वया शिष्येभ्यः पुत्रताडनं परमो धर्मइत्युपदेशः क्रियते ।

६४ कार्यकर्ता. ६५ वशीकारः ६६ द्रव्य, धन. * शुभान्वित.

विर०—[पितरं प्रति] अरे तांड्यायन किमित्यहेतुकं ताडयसि बटुं तत्राप्यात्मनः प्रियपुत्रं ।

तांड्या०—भगवन् कथं न ताडयाम्येनं स्वाध्यायमनधीयानं दुर्वृत्तं ।

विर०—बटो किमिति स्वाध्यायं नाधीषे । कुतो वा दुर्वृत्तः संवृत्तोऽसि ।

ब०—भअवं सज्झाअं ण पढामि त्ति कहं सोहइ से वअणं णं मए संहिआ अहीदा बम्हणस्स पंचपंचिआ अ पढिदा । अहुणा किल कालेआ जण्णिआ जहा तहा कम्मं णिरवग्गहा अणंकुसा जहिच्छं कुणंति जेण धम्मो रसाअलं गच्छदि । अदो हुविस्स विवाहमंगलस्स मह तस्सिं कम्मे विअलदा मा होदु त्ति संपदं विवाहप्पअरणं पढामि । कहिं पि मं पुच्छदु भअवंतो जइ अहं पाढक्कमादो चुक्किस्सं तदा मं ताडेदु विरइसाअरो । [ष]

विर०—[सकौतुकं] बटो शृणोमि ते पाठक्रमं पठ तर्हि किंचित् ।

ब०—जह आण्णवेदि भअवंतो । किंदु मह मोदअं देऊ भवं । [स]

वि०—मोदको दीयते कन्यापि दीयते । पठ पठ ।

ब०—(सानंदं) एसो हं पढामि (इति पठति) महुपक्को महुपक्को महुपक्को । एसो गड्डुहो गड्डुहो गड्डुहो । ससुरो ससुरो ससुरो । एसा करहग्गीवस्स विग्गवरस्स कण्णआ दिबंधमुही णाम कविणासेण परिणीअदि । (ह)

विर०—(विहस्य । बटोः पृष्ठमास्फाल्य[६७] च) अलमलमतिपरिश्रमेण । बटो सुष्ठु भवानाहतलक्षणो[६८] जातः । तातस्तु तव यथाजात एव । को वातःपरं ते कन्यां न दास्यति । गृहाणेमं मोदकं निष्प्रवाणियुगलंच[६९] (इति ददाति)

ब०—(सानंदं गृहीत्वा मोदकं विलोक्य) भअवं मह जेट्ठबहिणिआए दुवे मोदआ कंचुलीए ठ्ठाविदा ताणं मज्झ एक्को वि ण दिज्जए ता ताए दंसिऊण तारिसो मोदओ एक्केण मए भक्खीअदि सच्चं तुमं गुणण्णो किवालू दादा अ

(ष) भगवन् स्वाध्यायं न पठामीति कथं शोभतेऽस्य वचन ननु मया संहिताधीता ब्राह्मणस्य पंचपंचिकाश्च पठिताः । अधुना किल कालेया याज्ञिका यथा तथा कर्म निरवग्रहा अनंकुशा यथेच्छं कुर्वंति येन धर्मो रसातलं गच्छति । अतो भविष्यद्विवाहमंगलस्य मम तस्मिन्कर्मणि विकलता मा भवत्विति सांप्रतं विवाहप्रकरणं पठामि । क्वापि मां पृच्छतु भगवान् यद्यहं पाठक्रमाद्भ्रश्येयं तदा मां ताडयतु विरतिसागरः ।

(स) यथाज्ञापयति भगवान् । किंतु मम मोदकं ददातु भगवान् ।

(ह) एषोऽहं पठामि । मधुपर्को मधुपर्को मधुपर्कः । एष गर्दभो गर्दभो गर्दभः । श्वशुरः श्वशुरः श्वशुरः । एषा करभग्रीवस्य विप्रवरस्य कन्यका दिवांधमुखी नाम कपिनासेन परिणीयते ।

६७. थोपटून. ६८ गुणांनीं विख्यात ६९ कोरें वस्त्र.

किंवणसिहामणिणा तादेण मे कोवीण मंतरेण पट्टचीरखंडं वि ण दिण्णं । [ळ]

तांड्या०–पश्य भगवन् कथमयं वाचाटस्त्वत्समक्षमेव कुपूयं वदति ।

बटु०–पेक्खदु भअवंतो ईरिसो वि अहं मुहा णेण ताडीआदि । ता एसो दुव्वीणीदो विणेओ गुरूणा । (क्ष)

विर०–(सनिकारं) अरे तांड्यायन किं वृथा पीडयति देवानांप्रिय इव भवान् । नास्याल्पिष्ठमप्यसद्वृत्तं पश्यामि ।

तांड्या०–भवानेव पृच्छत्वेनं किमिति ताडयामीति ।

विर०–बटो कमर्थमुद्दिश्य ताडयति त्वामेष निरवग्रहः ।

बटु०–सुणादु भअवं जदा किर एस पीवा खणदाए पढमजामद्धे अइक्कंते अम्हेसु सगब्भेसु ब्बलादो णिद्दं पाविदेसु णुण्णं णुण्णं उण्हं उण्हं असणजादं करीअ अम्हे वंचिऊण सव्वण्णीणो एक्को एव्व चव्विदुं पउत्तो होइ तदा मए सअणीअपडिदेण अलद्धणिद्देण पाअगंध मुवलहीअ सण्णाए पबोहिआणं सोदराणं मज्झे एक्क मेक्को उट्ठिऊण से पुरदो चिट्ठइ । (ज्ञ)

विर०–(विहस्य) अहो धैर्यं बटोः । ततस्ततः ।

बटु०-तदो कालपुरिसे ब्ब णे उवट्ठिदे दट्ठूण मक्खिआ विअ एक्केण करेण वारेंतो तुवराए तहा महंते कवले गेण्हइ जहा ण भुत्तसेसल्लवो वि दिट्ठिपहं ओदरेदि । (अ)

विर०–(सौत्सुक्यं) ततस्ततः ।

ब०–तदो जंबुआ विअ सहाअमाणे अंते अम्हे ताडेदि । अण्णं च सव्वाणमम्हाणं कणिट्ठं णिसीहे रुअंतं गब्भरूव मवि ताडेदि । (इ)

(ळ) भगवन् मम ज्येष्ठभगिन्या द्वौ मोदकौ कंचुल्यां स्थापितौ तयोर्मम एकोऽपि न दीयते तत्तस्यै दर्शयित्वा तादृशो मोदक एकेन मया भक्ष्यते । सत्यं त्वं गुणज्ञः कृपालुर्दाताच । कृपणशिखामणिना तातेन मे कौपिनमंतरेण पट्टचीरखंडमपि न दत्तं ।

(क्ष) पश्यतु भगवानीदृशोऽप्यहं मुधानेन ताड्यते । तदेव दुर्विनीतो विनेयो गुरुणा ।

(ज्ञ) शृणोतु भगवान् यदा किलैष पीवा* क्षणदायाः प्रथमयामार्द्धेऽतिक्रांतेऽस्मासु[७१] सगर्भेषु बलाच्चिद्रां प्राप्तिषु नूनं नूनं उष्णं उष्णं अशनजातं कृत्वाऽस्मान् वंचयित्वा सर्वान्[७२] नेक एव चरितुं प्रवृत्तो भवति तदा मया शयनीयपतितेनाल्पध्वनिद्रेण पाकगंधमुपलभ्य संज्ञया प्रबोधितानां सोदराणां मध्ये एकैक उत्थायास्य पुरतस्तिष्ठति ।

(अ) ततः कालपुरुषानिव न उपस्थितान् दृष्ट्वा मक्षिका इवैकेन करेण वारयंस्त्वरया तथा महतः कवलान् गृह्णाति यथा न भुक्तशेषलवोऽपि दृष्टिपथमवतरति

(इ) ततो जंबुकानिव शब्दायमानान् रुदतोऽस्मांस्ताडयति । अन्यच्च । सर्वेषामस्माकं कनिष्ठं निशीथे रुदंतं गर्भरूपमपि ताडयति ।

७१. मूर्ख. * गलेलठ्ठ. ७१ भांवडें. ७२ सगळें चट करारा.

विर०–(सतिरस्कारं) रे रेफतांड्यायैन गर्भरूपमपि ताडयसि ।

तांड्या०–किं करोमि भगवन् कोऽयं मोहनसमये महान् कासोदय इति तमपि ताडयामि ।

विर०–(सरोषं) आः ब्रह्मणब्रुव कथमात्मीयं दुर्णयमनालोचयतस्तवैरसेष्वपि जातकेषु नैर्घृण्यमभ्युदेति । अहो कालस्य वैषम्यं । अहो लोभस्य माहात्म्यं । यन्निजेष्वप्यपत्येषु वंचनया प्रेमानुबंधः । अहो गृह्यका लोकयात्रा ।

तांड्या०–भगवन् श्रूयतां । अपर्यंतेऽस्मिन्संसारगव्हरे पतितेन बव्हपत्येन मयाऽत्यागारिकेण महता कष्टेन प्रचुरतरमप्युपार्जितं नात्मनो भोगाय कनीयोऽपि लभ्यते । अतः सुष्ठु विचार्यात्मनः सुखाय निष्कासितोऽयं पंथाः । तत्राप्येते पापाः काननगृध्रकाइव परितो मामभ्युपेत्य वारिता अप्यशनजातं बलाद्घस्मरा अश्नंति न मया भुज्यमानं सहंते । अतो मयाप्येते तत्र तत्र मुहुस्ताड्यंते । नास्ति मे कापि भीः । कुतो वा कालस्य वैषम्यं । किंच । यथेष्टमिंद्रियसुखान्यनुभवन् कोवा गणयति लोकयात्रां ।

ब्र०–भअवं णं पुच्छामि मए उण जादमेत्तेण दिण्णो से तादपदाहिआरो । ता एसो मे सिक्खओ उदअह मेदस्स सिक्खओ एसो मे सासणं धारेदु उदं अह मेदस्स सासणं धारेमि एसो मे कम्मकरो उद अहं से कम्मकरो इअ विआरिअ सच्चं कहेदु भअवंतो । (ऋ)

विर०–(विहस्य स्वगतं) यादृशास्य तादृशः परिवारः । जनयितापि तथा तनयोऽपि तथा मधूकप्रसवान्मधूकप्रसव इति किमाश्चर्यं । अनयोः को न दंड्यः को वाप्यदंड्यः । भवत्वेनं तावत् । (प्रकाशं) बटो किमनर्गलवाग्भवसि किमाचाराअपि गुरवः पुंत्रभांडैर्युष्माभिः प्रश्रयेणार्हणीया न पुनरवमाननीयाः । तांड्यायन त्वमप्यर्हितं लोकैर्वाटमनुपालयन् यथेष्टमुपभुंक्ष्व प्रपंचसुखानि । अलमतिप्रसंगेन ।

ब्र०–जह आणवेदि भअवं (इति पित्रा सह निष्क्रांतः) (लृ)

(नेपथ्ये)

एष निखिलसामंतचक्रचूडामणिनीराजितपादपीठः प्रकृतिरंजनो रंजनो नाम कतिपयप्रकृतिपुरुषैः पुरोधसा काश्यपेन चानुगम्यमानो भगवतो विरतिसागरस्य पादवंदनायेतः समापतति । तदपसरतार्या अपसरत ।

(ऋ) भगवन्ननु पृच्छामि मया पुनर्जातमात्रेण दत्तोऽस्मै तातपदाधिकारः । तदेष मे शिक्षक उताहमेतस्य शिक्षकः एष मे शासनं धारयतु उताहमेतस्य शासनं धारयामि । एष मे कर्मकर उताहमेतस्य कर्मकर इति विचार्य सत्यं कथयतु भगवान् ।

(लृ) यथा ज्ञापयति भगवान् ।

७३. अधम. ७४ ब्राह्मणाधम. ७५. स्वच्छंद. ७६ कुटुंबभरणांत निमग्न. ७७ पुत्र, पुत्रापमार्गे. ७८ लोकमार्ग.

बिर०–(सप्रमोदं) कथं महर्षीनाकांक्षी रंजनोऽपि राजा संवृत्तः । तर्हि पूर्णा नः संप्रति मनोरथाः । विशेषतः प्रसीदति चांतरात्मा कुतः

लब्धं दैशिकपादपीठमतुलं संपादितं भूरिशो ।
वित्तं कीर्तिरुपार्जिता भुवि परां काष्ठां गुणाः प्रापिताः ॥
श्रीर्लीं दास्यमवापिता मम यया कूटं यया कौशलं ।
भूपः केवलमेष नो वशगति श्रेयान्प्रयत्नः कृतः ॥ ४२ ॥

किंच ।

नैराश्यं बहिराप्रदर्श्य यमितां विख्याप्य गूढं मया ।
ते ते राजकुलप्रियाश्च घटका यत्प्राभृतैः सत्कृताः ॥
तद्वारा य इहोद्यमोविरचितः सोऽयं समस्तोऽधुना ।
पूर्णां सिद्धिमुपागतश्च सफलास्ते ते विकल्पा मम ॥ ४३ ॥

मन्ये पुरोधसा काश्यपेन तेषु तेषु प्रसंगेषु समुदीरितं महुणग्राममुपश्रुत्य समुत्पन्नभावनः प्रवृत्तो महर्षीनाय स्यात् । स किल मया तथैवोपग्राहितः शिष्यप्रशिष्यद्वारा तथैव प्रतिश्रुतवान् । (सश्लाघं)

अगत्वा गृहमन्येषामकृत्वा चात्मलाघवं ॥
अप्रकाश्य धनस्याशां घटनेयं मया कृता ॥ ४४ ॥

(ततः प्रविशति यथानिर्दिष्टो राजा विभवतश्च परीवारः)

राजा–अये पुरोहित अपि सत्यं महानुभावो भगवान् विरतिसागरः ।

काश्यपः–महाराज किमुच्यते महानुभाव इति । ननु भगवान् विरतिसागरो विरतिसागर इव । पश्यतु महाराजः ।

पः किल ।

दाता शास्त्रविशारदो नियमिनामग्र्यो दयालुः क्षमी ।
नीरागो ऋतवाक् समाधिनिरतो ब्रह्मत्वमाप्तोद्विजः ॥
यत्पादाब्जरजःकणो निपतितो मूर्ध्नि ध्रुवं देहिनां ।
हत्वा संचयमंहसां[८] प्रभवति क्षेमाय लोकद्वये ॥ ४५ ॥

(इति सर्वे परिक्रामंति)

कंचुकिः–महाराज एष भगवतोविरतिसागरस्य मंदिरद्वारदेशः । तदत्र प्रविशतु महाराजः ।

(सर्वे प्रवेशं नाटयंति)

कंचु०–इत एतु महाराजः । एष महार्हासनोपविष्टो भगवान् ।

रा०–(समीपमुपेत्य दीनारसहस्रं पीठांतिके निधाय सपादोपग्रहं प्रणंतुमिच्छति)

---

७१. गुरु. ८० श्रीमंत. ८१. पातक.

वि०–(स्वगतं) सुष्ठु संपन्नं । भवत्वेवं तावत् । (प्रकाशं)
(सभ्रूभंगं हुंकारेण तिरस्कुरुते)

का०–(सांजलिबंधं) भगवन्नभ्युपपत्तिभाजनं भवतु नाम भवतः प्रजारंजनो रंजनः ।

वि१०–(साश्चर्यमिव) पामरा अपि मां विलोभ्यापावृतैर्मधीनं चिकीर्ष्यंति । अहो कथं न ज्ञायते जगदपि पलालैर्जालमिव मन्यमानानां निरीहाणां राजा रंकश्च समान एवेति । किमस्माभिरस्मिन् राष्ट्रे न स्यातव्यमित्येषप्रकारो निष्पादितः । भोः काश्यप सम्यगुद्बोधितं नो भवता । साधु तर्ह्येति वयमितो यास्यामः ।

का०–नहि नहि भगवन् क्षम्यतां । ननु मया विज्ञाप्यते । भूतदयापरिष्कृता भवंतः सर्वेष्वपि जीवेषु तुल्यवृत्तय इति विज्ञायागतोऽयं भूपः पादवंदनाय । तद्राष्ट्रमिदमनुग्रहीतुमात्मनः परीवारकक्षां प्रविशतु नः स्वामी ।

वि१०–कः स प्रकारः । किमनेन नस्तृणपूलैर्निचयेन दर्धनेन धनेन ।

काश्य०–(नेत्रत्रिभागेन संज्ञां करोति)

वि१०–(स्वगतं) साधु सूचितं काश्यपेन । प्रथममुपगतो भूपतिर्नाधिकतरमर्दनीयः किमपि रमणीया इति बल्हाकृष्टाः कदलीगर्भकांडतंतवस्त्रुटयंति न पुनः संयुज्यंते । एवं सति विफलतामुपेयात्प्रसवोन्मुखो मे यत्नवनस्पतिः । तदुपसंहरामि कोपाडंबरडामरं मिथ्यानिस्पृहतावेशं । (प्रकाशं) (सशिरःकंपं) (किंचिद्विहस्य) अये काश्यप वद किमस्ति ते मनसि ।

का०–नार्किंचिदपि । किंतु महासत्त्वोऽयं राजा त्वत्पादपरामर्शेन निजमात्मानं कृतार्थीकर्तुमिच्छति ।

वि१० एवं भवतु नाम यद्यस्ति भावना । परंतु नास्ति मम वशे कापिसिद्धिः । भवंतः किं जानंतीति न जाने । अस्य च धनस्य क उपयोगः ।

काश्य०–यदि न जानंति जनास्तव महानुभावतां तर्हि कथमागच्छंति भावभाजो दृष्टश्रुतसामर्थ्यास्त्वत्पादपद्ममभिवादयितुं । किंच । रिक्तपाणिना न द्रष्टव्यो भवानिति यत्किंचिदुपहारीकृतं । तच्च निरीहस्य दीनजनानुकंपिनस्तव भविष्यति कदाचिदतिथिसार्थवासनापूरणायोपयुक्तं ।

वि१०–भोः काश्यप सत्यमाह भवान् । अभिज्ञः खल्वसि मन्मनोगतधर्माणां लोकव्यवहाराणां च । सुष्ठु शोभते त्वामुपाश्रित्य पौरोहित्यं । राजापि तव तथैव । (राजानं प्रति) राजन् स्वस्ति भवते । इदमासनमित आस्यतां ।

रा०–यदाज्ञापयति भगवान् । (इतिभूमावुपविशति)

प्रकृतयः–(प्रणम्य तथा तिष्ठंति)

---

८२. अनुग्रह. ८३ स्वतंत्र. ८४ कडवा. ८५. गवताची पेंढी ८६ दुष्टधन.

विर०–राजन्नन्वर्थो भवान् क्षमाशाली यदेवं यथाखलीकृतोऽपि न विकृतिमवाप भवान्। मयापि तव परीक्षा कृता। नहीतरजनसाधारणं त्वामभिस्पृशति चापलं। अस्ति च त्वयि काप्यनिर्वचनीयकला। तत्कथमन्यथा।

गायाविधाय यशसां तव कोमलांग्यो।
गायंति यत्किलगृहेषु गृहेषु हर्षात्॥
द्वीपांतरेष्वपि दिवानिशमुद्वहंति।
कार्यं सुमुद्रनवनीतरुचामिहेति॥ ४६॥

किंच।

संख्यासंख्यातखड्गाहतरिपुजनता निर्जरीभूय नाके॥
पीयूषं नाम शेषं सपदि कृतवती तुल्यपानक्रियाभिः॥
स्वोर्दन्याशांतिपात्रं भगणसिकतिले पुष्करे कूपकः किं।
शीतांशुर्नाकलोकैर्व्यरचि नृप भवत्कीर्तिपीयूषकोर्त्तेः॥ ४७॥

अपिच।

त्वद्द्वैरिभूपतरुणी परिदेवयंती। वन्येभकुंभमदवारिकषायभीता॥
नीता वने विधिवशाद्वनमानवीभिः। पर्णालयं भृशममन्यत रम्यहर्म्यं॥४८॥

अस्तु किमनया वाक्परिपाट्या। अद्य भवानिहागंतेति पूर्वमेव मयालोचितं समाधिदृशा। अतएवमभून्मे विचेष्टितं। तत्परितुष्टोऽस्मि। ब्रूहि किमभीप्सितं ते करवाणीति।

प्रकृ०–भगवन्नयमस्माकं राजा जन्मनैव विषयवासना विमुखत्वाद्दोष्वपि संसारसुखेष्वदत्तापेक्षः शांतिमानस्मादृशादिनिग्रहेण कृतावधानो राज्यमिदमनुपालयति। वयं तु ब्रह्मनिष्ठोऽयं साक्षादीशांश इति मन्महे। किमिदं भगवतो दिव्यचक्षुषः पिहितेमास्ति।

रा०–(आत्मनो भगवदंशभावनया नयने निमील्याधोमुखस्तिष्ठति।)

विर०–एवमेतत् कः संदेहः।

प्रकृ०–(सांजलिबंधं) भगवन्निदमेव पुनःपुनरभ्यर्थ्यते यथा प्रकृतीनामासां योगक्षेमाराधनाय प्रलंबमानबाहुदंडः कुलप्रदीपोऽस्य भविष्यति तथायं प्रभुरनुग्राह्यः। देवी च रंगदत्ता दिवानिशमदृष्टपुत्रमुखकमलतया दूयमानमानसा बहुलपक्षेदर्शविपादिव क्षीयमाणा निरर्थकमात्मानं कलयति। इच्छति च भगवतः पादवंदनेनात्मानं कृतार्थयितुं।

विर०–(विहस्य) भो प्रकृतयः मा विषीदत। यथा न चिराय चरितार्था

८७. क्षान्ति, पक्षी पृथ्वी. ८८ चंद्र. ८९. तद्वान. ९० नक्षत्रगण. ९१ शिरा, ज्वरा. ९२ ज्वरा. ९३ अगोचर. ९४ चंद्र.

भविष्यति भवतां मनोरथसिद्धिस्तथा दीयते वरो मया क्षितिपालाय । आगच्छतु च मदर्शनाय देवी रंगदत्ता ।

(राजानं प्रति)

शौर्यौदार्याद्यात्मगुणैरुपेतं चक्रवर्तिनं ॥
गिरीशइव क्रौंचारिं पुत्रमाप्नुहि भूपते ॥ ४९ ॥

रा०–(पादयोर्मौलिं निधाय) भगवतः प्रसादाद्यत्किंचिदेतत् पूर्णा मे मनोरथाः । जन्मापि सफलं पादस्पर्शेन । अद्य प्रभृति विधेयोऽयं जनो दासकोटिमनुप्रविष्टः ।

का०–इतः परं पादवंदनाय प्रतिदिनमागच्छतः प्रभोरनिवारितः प्रवेशोऽस्तु ।

बिर०–एवं भवतु । (नेपथ्ये वैतालिकः)

वै०–जय जय महाराज सुखाय सायंतनी संध्या भवतु देवस्य ।

संप्रति हि

प्रासादाग्रेष्वपि विटपिनामंतरालेषु कुंजे–
ष्वद्रिप्रस्थेष्वपि निपतितं मैत्र्या रश्मिजालं ॥
कैशीरीयस्तबकनिचयं पुंजयन् शोणशोची–
रोदःक्षेत्राग्निगैर्महितो भानुमानस्तमेति ॥ ५० ॥

किं च ।

कालव्यालगजोऽतरिक्षसरसस्तन्नाडिकाशुंढया ।
प्रोत्पाट्यारुणपद्ममस्तपरतश्चिक्षेप यद्दूरतः ॥
तद्वेगातिशयेन संधिशिथिला ये केसराः प्रच्युताः ।
क्वापि क्वापि भवंति नेत्रविषयास्तेऽमी मयूखा इति ॥ ५१ ॥

(प्राचीं प्रतीचीं युगपद्विलोक्य)

दृश्येते उभयत इंदुभानुमंतौ । [१५]मांजिष्ठाविव च नभोविहंगिकायाः ॥
कोटी द्वे सममवलंब्य लंबमानौ । [१६]काँचौ द्वावनुगतरश्मिनालबद्धौ ॥ ५२ ॥

अपि च ।

एकत्र लब्धजयसंगतनव्यभूप-स्यान्यत्रभंगहतपूर्वमहीश्वरस्य ॥
साम्यं पुरस्य कलयत्यधुनांतरिक्षं । भानोश्च शीतकिरणस्य गमागमाभ्यां ॥ ५३ ॥

रा०–(सांजलिबंधं) भगवन्नातिक्रामति ते संध्यासमयस्तदाज्ञापयतु मामुपकारिकागमनाय ।

बिर०–ययाह भवान् । वयमपि संध्यामुपास्महे ।

---

१५ लेशतः १६ केशराचे. १७ वेड. १८ तांबडे रंगबलेले. १९ कावडे. १०० शिकें.
१ ढेरा.

कंचु०–इत इतो महाराजः ।

रा०–(प्रणम्य प्रकृतिभिः पुरोधसा च सपरिवारो निष्क्रांतः)

(प्रविश्य पुरोहितः)

पुरो०–भगवन्नपि सफलास्ते मनोरथाः । राजापि तव पादपरिचर्यानिरतः संवृत्तः के पुनरन्ये ।

विर०–अथ किं ।

पुरो०–किं ते भूयः प्रियमुपकरोमि ।

विर०–अतः परमपि प्रियमास्ति । तथापीदमस्तु ।

(भरतवाक्यं)

राजानः परिपालयंतु धरणीमव्याहताज्ञा जनैः ।
काले वारिमुचो भवंतु च घना अन्वर्थशब्दोर्वरा[२] ॥
काव्यज्ञाश्च सभासदः कविगुणान् विज्ञाय निर्मत्सरा ।
भूयासुः कमलासखस्य पदयोर्भक्तिः सतां निश्चला ॥ ५४ ॥

(इति निष्क्रांताः सर्वे.)

॥ इति कालेयकुतूहलं नाम प्रहसनं संपूर्णं ॥

---

२ उर्वरा सर्वसस्याढ्या.

SK 891.21
Pur / Shr

[काव्येतिहास-संग्रहान्तर्गतम्]

७.

अथ श्रीपुरुषोत्तमपण्डितविरचितस्य

श्रीशिवकाव्यस्य

पूर्वार्द्धम्।

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH OF THE

इदं

बी. ए. उपपदधारिणा साने इत्युपनामधेयेन

नारायणसूनुना काशिनाथेन

नैकपुस्तकसमालोचनपूर्वकं संशोध्य सटीकं प्राकाश्यमानायि।

शकाब्दाः १८०६.

शिवकाव्य-पूर्वार्द्ध.

अनुक्रमणिका.

चमत्कार १.

मंगलाचरण-काव्यमहात्म्य-विषयावतरण-शिवाजीमहाराजवर्णन-श्रीरामदास-समागम व प्रसाद-शिवाजीस बापाचा उपदेश-त्यावर शिवाजीचें उत्तर-शहाजी विजापुरीं परत येतो-विजापूरच्या मुसलमान राजाचा दरबारी मंडळीस प्रश्न-मंडळीचें उत्तर-शहाजीचें उत्तर-विजापूरचा राजा चिंतातूर होतो.

चमत्कार २.

विजापूरच्या राजाची चिंता-शिवाजीस धरून आणण्याचा विडा विजापूरचा राजा तयार करितो-धर्मधुरंधर यानें त्याचा प्रतिज्ञापूर्वक स्वीकार-धर्मधुरंधर व शिवाजी यांचें राजगडाजवळ युद्ध-शिवाजीस धरण्याकरितां अफ़्जूलखानास पाठविलें-त्यानें प्रयाण-त्यानें दयालु नामक ब्राह्मण सामार्थ शिवाजीकडे पाठविला-त्याचें व शिवाजीचें भाषण-दयालु परत येतो व अफ़्जूलखानास हर्ष होतो-देवीपूजन-ठगास ठकविण्याचा बेत-प्रतापगडाजवळ तंबू ठोकला-सेनापतीस उपदेश-देवीप्रार्थना-दोन योद्धयांसह शिवाजीचें प्रस्थान-अफ़्जूलखानप्रस्थान-शिवाजीचे रक्षणार्थ लोकांची प्रार्थना-उभयतांची भेट. अफ़्जूलखानपतन—त्यांचा शिरच्छेद-यवनसेनापलायन.

चमत्कार ३.

अफ़्जूलखान व शिवाजी यांचे फौजांची लढाई शिवाजीसेनापतिविजय-त्याचा सत्कार-तो लूट शिवाजीस देतो-शिवाजी शिपायांस वांटन देण्याकरितां ती परत देतो—प्रतापगडावर भवानीची स्थापना—विजापूरचा राजा व त्याची आई यांचा विलाप.

चमत्कार ४.

चार वर्षांत ३६० किल्ले शिवाजी बांधितो-मालवणचा किल्ला-सातारा राजधानी होते-गागाभट्ट-मुंज-लग्न-दिल्लीवर स्वारी-नर्मदास्नान-युद्ध-बादशहाचा पराभव- दिल्लीहून फौज निघते.

चमत्कार ५.

शास्ताखान-शिवाजीचे अंगांत देवी संचार करून युद्ध कर म्हणून सांगते-शास्ताखानाची बोटें कापतो-शास्ताखान दिल्लीस परत जातो-त्याचा अपमान-शिवाजीवर जयसिंहाची योजना-दिलेरखान-जयसिंह नर्मदातीरीं देवीची आराधना करतो-मसलत-युद्ध करूं नको असें देवी सांगते-दिलेरखानाचा पुरंदरावर हल्ला-मुरारप्रभूचें शौर्य व मृत्यु-जयसिंह व शिवाजी यांचें सख्य-पुत्रासह दिल्लीस जातो-तेथें सत्कार-प्रतिबंध-चिंता-स्वप्नांत देवीचें दर्शन-पेटाऱ्यांतून नजराणा पाठवितो-पेटाऱ्यांत बसून दिल्लीहून जातो-फकीरवेष-बाराणसीस येतो-भागीरथीस्तुति-बादशहा त्याचा शोध करितो-पत्ता लागत नाहीं-स्वदेशीं परत येतो-शके १५९६ त-राज्याभिषेक-पुत्र-

क्ष्यप्राप्ति--राज्यविभाग--अष्टप्रधान--राज्योपभोगकाल-मृत्यु.

चमत्कार ६.

संभाजी--दिल्लीपतिपराभव--अवरंगजेब चिंताग्रस्त होतो-कबजी पूर्वप्रधान आवडत नाहींत-कबजीचे नादीं लागतो-दिल्लीपति भीमातीरीं-दिल्लीपतीच्या कन्येचें लावण्य-कबजी दिल्लीपतीचें मन संभाजीविषयीं दूषित करतो-संभाजीचे सौंदर्याचें वर्णन-अवरंगजेबाचे कन्येचें संभाजीवर प्रेम-संभाजी व अवरंगजेब यांची भेट-संभाजी कारागृहीं-संभाजीचा मृत्यु-अवरंगजेबाची कन्या त्यामुळें शोक करते-अवरंगजेब शाहूस घेऊन जातो.

चमत्कार ७.

शाहुजन्म-बादशहा व त्याची कन्या यांचा शाहूची क्रीडा पाहून आनंद-अवरंगजेब दक्षिणेत-शहरें वेढतो व मूर्ति फोडतो-पंढरीस येतो-विठ्ठलाचा कर कटीवर व शिरीं लिंग असण्याचीं कारणें-नरसोबाचे वाडीस जातो भुंगे राजारामाचा पुत्र शिवाजी-शाहूचें लग्न-अठरा वर्षें दिल्लीस वास-बादशहा स्त्रीसह दर्शनास बलावितो-दासीस राणीचा वेष-बादशहाचें दर्शन-बादशहा चौथा हिस्सा आपले राज्याचा देतो-देशीं जाण्याची आज्ञा मिळते-बादशहाचे कन्येचा निरोप-ताराबाई हा खरा शाहू नव्हे असें म्हणते-ती युद्धास प्रवृत्त होते-बाळाजी विश्वनाथ शाहूस भेटतो-तो ताराबाईकडे जातो-शके १६२९ त शाहूस राज्याभिषेक.

चमत्कार ८.

शाहूचे राज्याची भराभराट-बहिरोपंत पिंगळे-बाळाजी विश्वनाथ रजपूत व यवन यांस जिंकतो-त्यास पेशवे पद मिळतें--प्रधानमंडळ--शाहूची मृगयादातृत्व--दर्डीभाकर देणारी बाई--तिळागांव इनाम-जयसिंह.

चमत्कार ९.

कोंकणस्थ ब्राह्मणांचें दारिद्र्य-बाळाजी विश्वनाथाचे दोन पुत्र-बाळाजी विश्वनाथाचा मृत्यु-बाजीराव बछाळ पेशवा होतो-त्रिंबकराव दाभाडे सेनापति यास बाजीराव ठार मारतो-गोदास्तुति-बाजीराव दक्षिणा घेतो--बाळकृष्ण पंडित-साताऱ्यास बाजीराव परत येतो-शाहू व बाजीराव-निजामउलमुलुक व बाजीराव यांचा बिवाड-सख्य-शाहू व बाजीराव.

चमत्कार १०.

पुण्याची वसाहत व भरभराट-ब्राह्मणांच्या दक्षिणेचा इतिहास-रमणा-दक्षिणा समारंभवर्णन--शाहूस अतिसंतोष--चिमाजी आपा वसईवर जातो-समुद्रस्तुति-हल्ला-वसई सर करतो-संतति-मस्तानी-समशेरबहादर-होळकरासह उत्तरेस बाजीराव जातो-त्याचा नर्मदातीरीं मृत्यु-राणोजी शिंदे व त्याचा वंश यांचें वर्णन.

चमत्कार ११.

बाळाजी बाजीराव प्रधान-त्याजवर राज्यभार-पुण्याचें वर्णन-देशाची भरभराट-शाहूचें वार्धक्य-पेशव्याचे हातीं राज्यनिक्षेप--माहुली--कृष्णास्तुति-मृत्यु--शोक-उत्तरकार्य-शाहूचे वंशज.

शिवकाव्य-उत्तरार्द्ध.

अनुक्रमणिका.

चमत्कार १२.

बाळाजी बाजीराव ऊर्फ नानासाहेब.

मंगलाचरण-राघोबादादाकृत उत्तर दिग्विजय--ऋतुवर्णन--उपवनक्रीडावर्णन-जलक्रीडावर्णन.

चमत्कार १३.

नानासाहेब.

वर्षाऋतुवर्णन--शरदृतुवर्णन--राघोबादादाकृत उत्तरदिग्विजय--जयपूर जोधपूरदिल्लीविजय--यवनविजय--बल्लाळसंततिवर्णन-राघोबासंततिवर्णन--सदाशिवरावभाऊचें अनपत्यत्व-द्रव्यखिचडीदान-ब्राह्मणमज्जन.

चमत्कार १४.

नानासाहेब.

गोपिकाबाई नानासाहेबांचें मन दूषित करिते--सोनपतपानपतयुद्ध-नानासाहेब व गोपिकाबाई यांचा शोक--नानासाहेबांचा मृत्यु.

चमत्कार १५.

थोरलेमाधवराव.

कलितपश्चर्या-कलिधर्मवर्णन--कलीस वरप्राप्ति-निजाम पुणें जाळतो-राक्षसभुवनची लढाई-हैदराचा पराभव-क्षयरोगानें माधवरावाचें मरण-रमाबाईचें सहगमन.

चमत्कार १६.

नारायणराव.

पूर्वजन्मवृत्त-वध.

चमत्कार १७.

सवाईमाधवराव.

जन्म--तळेगांवची लढाई-बिट्ठुर (हटचुअर्ट साहेब) याचें पलायन-राजनीति-यशोदेशीं विवाह-पुणें शहराचें वर्णन. हरिपंत फडके यांचें मरण-महादजी शिंद्याचें मरण-निजाम युद्धाची तयारी करितो.

चमत्कार १८.

सवाईमाधवराव.

खर्ड्याची लढाई-निजामाचा पराभव-निजामाची दुर्दशा-मशीरग्रहण-माधवराव गच्चीवरून उडी टाकतात-मृत्यु-नानाफडणीसाचा-मृत्यु-दौलराव शिंद्याचें वर्णन.

चमत्कार १९.

अमृतराव यांची कारकीर्द.

चमत्कार २०.

द्वितीय-बाजिराव.

स्तुतिनिंदात्मक वर्णन-इंग्रज लोक चाकरीस ठेविले-सदाशिव माणकेश्वर दिवाण झाले-तीर्थाटण-सदाशिव माणकेश्वर व कवि यांची भेट-शिवाजी आदिकरून मराठे राजांवर संस्कृत काव्य करण्याविषयीं सदाशिव माणकेश्वर कवीस सांगतात-कवीस स्वप्नांत व्यासदर्शन व काव्य करण्याविषयीं व्यासाची आज्ञा-बापूगोखले सेनापति झाले-मोरोबा दीक्षित दिवाण झाले-इंग्रजांबरोबर लढाई (खडकीची) बाजीरावाचा पराभव-दीक्षित दिवाण यांचें मरण-बाजीरावाचें पलायन-बापूगोखले यांचें मरण--बाजीरावाचें भागीरथीतीरीं (ब्रह्मावर्ती) राहणें-अल्फिन्सटन साहेब पुण्यांत राज्य करूं लागतो-कविपूर्वजवर्णन-काव्यसमाप्तिकाल.

समाप्त.

श्रीगणेशायनमः

अथ श्रीशिवकाव्यम्

वंदे तं भगवंतमंबुजपदं पीतांबरं वारिमन्-
मेघाभं तुलसीविनिर्मितमहामालान्वितं कौस्तुभं
कंठे शंखमुखानि पाणिषु सरोजाक्षं दधानं हरिं
कर्णालंकृतिभासुरं सुमुकुटं पाथोधिकन्यापतिं ॥ १ ॥

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ श्रीकृष्णायनमः ॥

तमोमत्तमातङ्गकुम्भप्रभेद-प्रगल्भैकसिंहं प्रशस्यं ग्रहेशम् ॥
प्रजेशाद्यमर्त्यप्रगीतप्रतापं नमामि प्रभापूरितानेकलोकम् ॥ १ ॥

अथतत्रभवान् पुरुषोत्तमकविःश्रीवेदव्यासेन स्वप्ने पुनःपुनःप्रेरितःश्रीशिवकाव्यं चिकीर्षुःचिकीर्षितस्य निर्विघ्नसमाप्तिनिर्विघ्नप्रचारप्रतिबन्धकदुरितपरिहारकामो विघ्नादिपञ्चदेवतानमस्काराशीःप्रार्थनारूपं मङ्गलमाचरन् शिष्यशिक्षायै पञ्चपद्यैर्निबध्नाति । ननुकाव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयत्वादस्मिन् काव्ये आधुनिकानां राज्ञां वर्णनादिदमसत्काव्यमत्र कथं प्रवृत्तिरितिचेदुच्यते । श्रीवेदव्यासेनैतेषां देवांशत्वप्रतिपादनादसत्काव्यं न । देवांशत्वप्रतिपादनप्रकारस्तु मूले एव चरमचमत्कारे स्फुटीकृतः । किंचात्र काव्ये शिवनृपो मुख्यः स हि मनुष्यो भवितुं नार्हति येनार्जुनवदलौकिकानि कृत्यानि विहितानि । भगवद्वाक्यं चात्र प्रमाणम् । यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं ममतेजोंशसंभवमिति । किंच प्रजाभक्षकैराजभिराक्रान्ते महीतले वर्तमानानामन्नाच्छादनरहितानां ब्राह्मणादिसर्वजातीनां रक्षणार्थमेतद्राजरूपेण भगवानेवावतीर्णः । अत्र प्रमाणं भगवद्वचनम् । परित्राणाय साधूनां विनाशाय च दुष्कृताम् धर्मसंस्थापनार्थाय संभवामि युगे युगे । यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति । किंच भगवती देवी यस्य शरीरमाविश्य दुर्वृत्तान्म्लेच्छानघातयत् तस्य मनुजत्वकल्पनं भ्रमएव । तदनन्तरं ज्ञाता राजानोऽपि उत्तरोत्तराधिका अतस्तद्वर्णने पुण्यमिति काव्यं निबबन्ध ।

वन्देतमिति । तं प्रसिद्धं भगवन्तं भगमस्यास्तीति भगवान् तं षड्गुणैश्वर्यसंपन्नं । ऐश्वर्यस्यसमग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णांभगमितीरितमिति ।

शुंडासंभृतदुग्धपानकरणोद्युक्तस्वबालोद्गम-
च्छुंडाचुम्बनकौतुकोद्गतपयःपूरावृतैकानने
तिर्यग्दृष्टिशरप्रपातनपरेष्वन्येषु चाधोमुखो
लज्जाव्याकुलमानसोऽवतु हरो देवो भवानीपतिः ॥ २ ॥

तदस्यास्त्यस्मिन्निति मतुप् । मादुपधायाश्चेति मतोर्मस्यवः । अंबुजपदं अंबुजे इव पदे यस्य तं सुकुमारपदमित्यर्थः । यद्वा । अंबुजं रेखाकारं कमलं पदे चरणे यस्य तं । सप्तमीविशेषणेबहुव्रीहावित्यत्र सप्तम्यन्तस्य पूर्वनिपातविधानात् ज्ञापकात् व्यधिकरणबहुव्रीहिः । अत्रसप्तम्यन्तस्य पूर्वनिपाताभावस्तुगड्वादित्वात् । रेखात्मककमलपदत्वं श्रीमद्भगवता कपिलेन मातरं प्रत्युक्तं । संचिन्तयेद्भगवतश्चरणारविन्दं वज्रांकुशध्वजसरोरुहलाञ्छनाढ्यमिति । यद्वा । अंबुजं कमलं पदं चिन्हंयस्य तं । यद्वा । अंबुजःशंखःपदं यस्य तं । यद्वा । अंबुजस्य कमलस्य शंखस्य च पदं स्थानं । यद्वा । अंबुजानां मुक्ताफलानां पदं स्थानं मुक्ताहारयुक्तमित्यर्थः । यद्वा । अंबुजस्य लक्ष्मीसंज्ञकस्य कलत्रस्य पदं स्थानं उरःस्थलस्थितलक्ष्मीकामित्यर्थः । पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वितिअमरः। पीतं अंबरं वस्त्रं यस्य तं पीतांबरं । वारिमान्सजलो यो मेघस्तस्य आभेवआभा यस्य तं वारिमन्मेघाभं । तुलशीभिर्विनिर्मिताया महती माला तया अन्वितं युक्तं-तुलशीविनिर्मितमहामालान्वितं । आन्महतइत्यादिना महत आत्वं । कौस्तुभं मणिं कण्ठे धत्तेऽसौ दधानःतं दधानं । डुधाञ्धारणपोषणयोरस्माल्लटिशानच् । पाणिषु करेषु बहुवचनाच्चतुर्षु शंखो मुखं मुख्यं येषां तानि आयुधानीतिशेषः । वामाग्रकरमारभ्य दक्षिणाग्रकरपर्यन्तं शंखचक्रगदापद्मानि यथाक्रमं दधानं धारयन्तम् । सरोजेइवअक्षिणी यस्य तं सरोजाक्षं । बहुव्रीहौसक्थ्यक्ष्णोरित्यादिनासमासान्तःषच् । कर्णयोरलंकृती अलंकारौ ताभ्यां भासुरं शोभनम् । शोभनो मुकुटो यस्य तं सुमुकुटम् । पायोधिकन्या लक्ष्मीस्तस्याःपतिं पायोधिकन्यापतिं लक्ष्मीसहितमित्यर्थः । हरिं श्रीविष्णुं अहमितिशेषःवन्देनौमि स्तौमि वा वदिअभिवादनस्तुत्योरस्माल्लटिनुमिउत्तमैकवचनम् । अस्मिनपद्ये पाठक्रमादर्थक्रमोबलीयानिति न्यायमननुसृत्यैव पादादिशिरःप्रभृतिध्यानमनेन प्रकारेण कर्तव्यमितिसूचनार्थं पदानि क्रमेणैव निबद्धानि विष्ण्वादिदेवानामनेनैवप्रकारेणध्यानं कर्तव्यमिति श्रीमद्भागवतादिषूक्तं । सूर्यैर्धैर्मसजस्ततासगुरवःशार्दूलविक्रीडितमिति लक्षणादिदं शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

शुण्डेति ॥ शुण्डया संभृतं धृतं यद्दुग्धं तस्य पानकरणं पानक्रिया तत्र उद्युक्तःयःस्वःस्वकीयःबालःगजवक्त्रःतस्य उत् उर्ध्वं भ्रमन्ती या शुण्डा तस्याश्चुंबनं तत्र यत्कौतुकं तेन उद्गतो यः पयःपूरस्तेन आवृतं पूर्णं एकं आननं तस्मिन् । अधिकरणे सप्तमी। अन्येषु मुखेषु तिर्यग्दृष्ट्यएव शरप्रपातास्तेषां प्रकर्षेण पातनं तस्मिन् । परेषु-

अतिप्रीतितः स्वां सतीमर्धदेहां विधायावतस्थे यदा नीलकंठः
तदा तत्र रुष्टोऽपि भक्तेषु तुष्टो गणेशोऽवतात् स्तन्यपानातिसक्तः ॥३॥
तरणिस्तरणिर्भवाम्बुधेः सरणिं यो दिशतीह कर्मणाम्
उदयेन दयाघनोऽघनुन्नुतपादः सुरभूसुरैः स माम् ॥ ४ ॥

आसक्तेषु सत्सु । लज्जया व्याकुलं मानसं यस्य स लज्जाव्याकुलमानसः अतएव अधोमुखं अर्धादेकमेव यस्य तथोक्तः । भवस्य पत्नी भवानी । इन्द्रवरुणेत्यादिनाङीषिआनुगागमः । तस्याःपतिःभवानीपतिः देवः द्योतमानो हरःनःइतिशेषः अवतु रक्षतु । आशिषिलोट् । अनेन वर्णनेन शिवस्याङ्के भवानी तस्याअङ्के गजाननस्तस्मिन् दुग्धपानं कुर्वति सति शिवश्चु बुम्ब इतिज्ञेयम् । पत्नीस्तन्यपाने दोषस्मरणादेकेन वक्रेणअज्ञानतः कृतं स्तन्यपानं तद्दोषोऽस्माकं संसर्गिणामपि भविष्यतीति रोषाविष्टानीतराणि मुखानि क्रोधदृष्ट्या तन्मुखं ददृशुरिति भावः । वृत्तंपूर्ववत् ॥ २ ॥

अतिप्रीतितइति । नीलःकृष्णःकण्ठो यस्य स नीलकण्ठो हरः यदा यस्मिन् काले इतियदायच्छब्दाद्दाप्रत्ययः । अतिप्रीतितःअत्यन्तप्रीत्या सार्वविभक्तिकस्तसिल् यद्वा । अतिप्रीतेरितिअतिप्रीतितः पञ्चम्यास्तसिल् । स्वां स्वकीयां । स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोऽस्त्रियांधनइतिविश्वः । सतीं स्त्रियं । अर्धो देहो यस्याः सा तामर्धदेहां वियोगभयादितिभावः । यद्वा । अर्धे देहार्धे देहोयस्यास्तां । विधाय कृत्वा अवतस्थे स्थितवान् । अर्धदेहे निधायेति सुगमःपाठः । समवप्रविभ्यस्थइत्यात्मनेपदम् । तदा तस्मिन्काले तरिमन्निति तत्र शिवे सप्तम्यास्त्रल् । रुष्टोऽपि भक्तेषु तुष्टः । स्तने भवं स्तन्यं । शरीरावयवाद्यत् । तस्य पानं प्राशनं तस्मिन् अतिशयेन सक्तः गणेशः नोऽस्मान् अवतात् रक्षतु । तुह्योस्तातङित्यादिना तातङ् । अतिप्रेमप्रसरसंक्षुते सांबे पत्नीवियोगभयात् योगबलेनदेहद्वयस्य एकमेव देहं विधाय स्थिते सति बालो गजाननः स्वमातुरेकस्तनावशेषणोदरपूर्त्यभावाज्जाठराग्निना पीडितोऽपि भक्तेषु परमकृपया तुष्टो वोऽवतु इत्यर्थः । अत्रस्तन्यपानातिसक्त इति साभिप्रायविशेषणात्परिकरालङ्कारः । तदुक्तं कुवलयानन्दे । अलङ्कारः परिकरः साभिप्राये विशेषणे । सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः । भुजङ्गप्रयातं वृत्तं । भुजंगप्रयातं भवेद्यैश्चतुर्भिरिति लक्षणात् ॥ ३ ॥

तरणिरिति । भवःसंसार एव अंबुधिःसमुद्रः तस्य तरणि नौका । स्त्रियां नौस्तरणिस्तरिरित्यमरः । मुक्तिप्रदइत्यर्थः । यतो दयाया घनो मेघः । अतः सुरा देवा भूसुरा विप्रास्तैर्नुतौ स्तुतौ पादौ यस्य तथोक्तः । सापेक्षकत्वेऽपि गमकत्वात्समासः ।

---

१. ' अर्धदेहे । निधाय ' ' गणेशोऽवतु ' इति पाठभेदौ.

२. ' त्रिदिशैःसनोऽवतु ' पाठभेदः

गिरिजां जलजायतेक्षणां क्षणदासंचरचारवारणाम्
करुणापरिपूर्णमानसां सततं चिन्तय चिन्तितां बुधैः ॥ ५ ॥

काव्यानि यद्यपि बुधेष्विह सन्ति सन्ति
श्रीकालिदासमुखसूरिकृतानि तानि
तत्तद्रसं रसितुमत्र समेतु मे तु
प्रज्ञो रसज्ञ इति काव्यमकारि हारि ॥ ६ ॥

पारंगतो मत्कृतिशैवलिन्याः श्रीहर्षकृत्यस्वनिधेर्जवेन
दर्भाग्रबुद्धिः कुशलः प्रयायादन्तं विनाध्ययनश्रमेण ॥ ७ ॥

अघं नुदतीति अघनुत् । दुःखैनोव्यसनेष्वंघमित्यमरः । य उदयेन कर्मणां सरणिं दिशति दर्शयति स तरणिःसूर्यः । द्युमणिस्तरणिर्मित्र इत्यमरः । मां अवतु इतिशेषः । रूपकानुप्रासयोः संसृष्टिः । वैतालीयं वृत्तम् ॥ ४ ॥

गिरिजामिति । हे मन इतिशेषः । जले जाते जलजे सरोजे । सप्तम्यांजनेर्डः । तेइव आयते विस्तृते ईक्षणे नेत्रे यस्याः सा तां तथोक्तां । क्षणदा रात्रिः । त्रियामा क्षणदा क्षपेत्यमरः । तस्यां सञ्चरन्ति ते क्षणदासञ्चरा राक्षसास्तेषां चारो विहारस्तं वारयतीति तां । वृञोणिजंतात्कर्तरिन्युः । करुणया परिपूर्णं मानसं यस्याः सा तां । स्वान्तं हृन्मानसं मन इत्यमरः । बुधैर्देवैः पण्डितैर्वा सततं निरन्तरं चिन्तितां । सततानारताश्रान्तसंततानिरतानिशमित्यमरः । गिरिजां पार्वतीं । गिरिजा मेनकात्मजेत्यमरः । चिन्तय । चिन्तयतेर्ण्यन्तमध्यमैकवचनम् ॥ ५ ॥

काव्यानीति । यद्यपि श्रिया ज्ञानसंपत्त्या युतः कालिदासः श्रीकालिदासः । शाकपार्थिवादित्वात्समासः । स मुखं मुख्यो येषां तैः सूरिभिः पण्डितैः कृतानि सन्ति शोभनानि काव्यानि पञ्च प्रसिद्धानि इह लोके बुधेषु पण्डितेषु सन्ति वर्तन्ते । बुधाः पठन्ति पाठयन्तीत्यर्थः । तथापि रसान् शृङ्गारादिरसान् जानातीति रसज्ञः प्रकर्षेण जानातीति प्रज्ञः प्रज्ञ एवप्राज्ञः बुद्धिमान् । प्रज्ञादिभ्यश्चेत्यण् । मे अत्र काव्ये तस्य तस्य रसः तत्तद्रसस्तं रचनाविशेषं । नित्यवीप्सयोरितिद्वित्वं । रसितुं आदातुं तु पुनः समेतु आगच्छतु । इति हेतोर्हारि मनोहारि काव्यं मयेतिशेषः अकारि कृतं । करोतेः कर्मणि लुङि चिणः परस्य लुक् । पञ्चानामपि काव्यानामेकत्र रचनाविशेषं ज्ञातुं निबद्धमित्यर्थः । वसन्ततिलकावृत्तम् । उक्ता वसन्ततिलकातभजाजगौग इति लक्षणात् ॥ ६ ॥

पारमिति । ममकृतिर्मत्कृतिर्मत्कविता । प्रत्ययोत्तरपदयोश्चेति अस्मदो मदा-

श्रीमद्भिर्मुनिभिः पराशरमुखैरुक्ताः कलौ ये नृणां
धर्मा भूमिभृतां तएव सकला दृष्टा मयात्रापि हि
राजानः कृतजातधर्मनिरताः केचित्प्रजापालकास्
तद्वृत्तं कुतुकाकुलं कलिहरं संवर्ण्यते विस्तरात् ॥ ८ ॥
यवनैरवनीशपालकै र्निखिलैराकलिता धरा यदा
सुकला विकलाः कलावतां शिवभूपः शिवकृत्तदाजनि ॥ ९ ॥

देशः । सैव शैवलिनी नदी । तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनीत्यमरः । मयूरव्यंसकादित्वात्समासः । तस्याः पारं परतीरं समाप्तिमित्यर्थः गतः । दर्भाग्रबुद्धिः सूक्ष्मबुद्धिर्मनुजः । श्रीहर्षनामा कविस्तस्य कृतिः काव्यं स एव अंबुनिधिः समुद्रः तस्य अन्तं समाप्तिं जवेन वेगेन अध्ययनमेव प्लवोनौका । उडुपं तुप्लवः कोलइत्यमरः । तेन विनैव । पृथग्विनेत्यादिना तृतीया । प्रकर्षेण यायात् गच्छेत् । रूपकालंकारः । विषयाभेदताद्रूप्यरञ्जनं विषयस्य यत् । रूपकं तु त्रिधाधिक्यनूनत्वानुभयोक्तिभिरिति लक्षणात् । इन्द्रवज्रावृत्तम् । स्यादिन्द्रवज्रा यदितौ जगौग इति लक्षणात् ॥ ७ ॥

श्रीरिति । श्रीः अतीन्द्रियज्ञानसंपदस्ति येषां तैः पराशराद्यैर्मुनिभिः कलौ वर्तमानानामितिशेषः नृणां मनुष्याणां ये धर्मा आचरणानि तथा भूमिभुजां राज्ञां धर्मा उक्ताः त एव मयाअत्र अस्मिन् कलौ सकला धर्माः दृष्टा । अत्रापि अस्मिन्नपि अतिदुष्टे कलौ । अत्रेत्यस्या वृत्तिः । केचिद्राजानः शिवप्रभृतयः । कृते जाता उत्पन्ना नलादयस्तेषां धर्मे निरता अत एव प्रजापालका नाता इतिशेषः । तेषां वृत्तं कुतुकेन कौतुकेन आकुलं व्याप्तं कलिहरं कलिदोषहरं विस्तरात् विस्तरेण सम्यक् वर्ण्यते । वर्णयतेः कर्मणि लट् ॥ ८ ॥

अथ शिवभूपं वर्णयति तत्रादौ त्रिभिः श्लोकैर्विशेषकेणाह । यवनैरिति । अवनीश इन्द्रप्रस्थवर्ती सार्वभौमो यवनाधिपः स पालको येषां तैरवनीशपालकैः प्रबलैरितिभावः । यद्वा । अवनीशानां स्वस्वदेशाधिपानां माण्डलिकभूपानां पालकैः सकलराजवृन्दमाक्रम्य स्थितैरित्यर्थः । निखिलैर्यवनैः नत्वन्यजातीयैरित्यर्थः । यदा धरा पृथ्वी । धरा धरित्री धरणीत्यमरः । आकलिता आक्रान्ता अत एव यदा कलावतां गुणिनां कला गुणा विकला अनुपयुक्ताः । कलावतां कला इत्युपलक्षणं । विद्यावतां विद्या अपि । गीतनृत्यादिकलानामनुपयोगः । का कथा विद्यानामितिभावः । अभूदभवदितिशेषः । तदा तस्मिन् काले । शिवकृत्कल्याणकृत् । कृञः क्विपि-

८. 'भूमिभुजाम्' पा० भे०.

जनताभवतापहारको निजधर्माचरणप्रवर्तकः
शरणागतदीनपालकः कलिकालाकुलदुःखनाशकः ॥ १० ॥
विजितैः करणैर्महत्तमो मनुमुख्योत्तमभूपवर्त्मगः
द्विजराजपदाब्जपूजन-प्रतिलब्धातुलभौमकामनः ॥ ११ ॥

तुक् । शिवभूपोऽजनि जातः । जनेः कर्तरि लुङि च्लेर्दीपजनेत्यादिना चिणि लुक् ॥ ९ ॥

जनतेति । शिवभूपमेव द्वाभ्यां विशिनष्टि । जनानां समूहो जनता । ग्रामजनबंधुसहायेभ्यस्तल् । तस्यां भव उत्पन्नो यस्तापो यद्वा । जनताया भवतापः संसारदुःखं तद्धरतीति जनतभवतापहारकः । ण्वुल् । दारिद्र्यादिपरिहारेण सुखप्रद इत्यर्थः । तथोक्तः । निजाःस्वकीया ये धर्मास्तेषामाचरणं तस्य प्रवर्तकः । तथोक्तः । शरणमागता ये दीनास्तेषां पालकः । कलिरूपो यः कालस्तेनाकुलानां दुःखं नाशयतीति । तथोक्तः ॥ १० ॥

विजितैरिति । विशेषेण जितैर्विजितैःकरणैरिन्द्रियैः अतिशयेन महानितिमहत्तमो जितेन्द्रिय इत्यर्थः । अतिशये तमप् । इत्थंभूतलक्षणे तृतीया जटाभिस्तापसइतिवत् । मनुर्मुख्यो येषां तेषां उत्तमभूपानां वर्त्म मार्गं गच्छतीति तथोक्तः । मन्वादिप्रोक्तराजनीत्यनुसारीत्यर्थः द्विजराजा ब्राह्मणा स्तेषां पदाब्जे पादकमले तयोः पूजनं तेन प्रतिलब्धाः प्राप्ता अतुला अनुपमा भूमिसंबंधिन्यः कामना मनोरथा येन तथोक्तः । ब्राह्मणभक्त्यालब्धाखिलार्थः इत्यर्थः । भूमिशब्दादिदमर्थेऽणिङीपि पुंवद्भावः । यद्वा । द्विजे गरुडे राजतेऽसौ द्विजराजो विष्णुः । राजाहः सखिभ्यष्टच् । तस्य पदाब्जयोः पूजनेन प्रतिलब्धाः० । यद्वा । द्विजराजो गरुडः स पदं स्थानं यस्य स द्विजराजपदो विष्णुः तस्य अब्जैः कमलैःपूजनं तेन प्रतिलब्धाः० । विष्णुभक्त्या लब्धाखिलार्थ इत्यर्थः । यद्वा । द्विजराजोहंसः स पदं स्थानं यस्य स द्विजराजपदोब्रह्मा तस्य अब्जैः पूजनेन प्रतिलब्धाः० । ब्रह्मभक्त्या लब्धाखिलार्थ इत्यर्थः । यद्वा । द्विजराजो मयूरः स पदं यस्य स द्विजराजपदः कार्तिकेयः तस्य अब्जैःपूजनेन प्रतिलब्धाः कार्तिकेयभक्त्या लब्धा० । यद्वा । द्विजराजश्चन्द्रस्तस्य पदाब्जपूजनेनप्र० चन्द्रभक्त्या लब्धा० । यद्वा । द्विजराजश्चन्द्रस्तस्यपदं स्थानमतःशिवः तस्य अब्जपूजनेन प्र० शिवभक्त्या लब्धा० । यद्वा । द्विजराजो विष्णुः स पदं यस्याः सा लक्ष्मीस्तस्या अब्जपूजनं तेनप्र० । लक्ष्मीभक्त्याल० । यद्वा । राज्ञःपातीति राजपः कार्तवीर्यार्जुनः तं द्यति खण्डयतीति राजपदो द्विजो ब्राह्मणश्चासौराजपदश्च द्विजराजपदः परशुरामः तस्य अब्जपूजनंतेनप्र० परशुरामभक्त्या० इत्यर्थः । एवमन्येऽपि अर्था-

११. ‘ ०मौमभोगभाक् ’’ पा० भे०.

तरुणीं रमणीं परस्त्रियं जननीं स्वां मनुते स्म सर्वदा
निजयोषितमीश्वरोऽम्बिकामिव देहार्धगतामममन्यत ॥ १२ ॥
स चखान यदा यदा भुवं धनमिच्छासदृशं प्रलब्धवान्
सकला हि मही हिरण्मयी कृतपुण्यस्य नरस्य सर्वदा ॥ १३ ॥
निजसूनुमिवाव भूपतिर्निखिलं लोकमतीन्द्रियार्थवित्
अपराधिनमाप्तमप्यसौ मनुवाक्यानुसृतः शशास च ॥ १४ ॥

ऊह्याः । एतद्विशेषणविशिष्टः । शिवभूपोऽजनीति पूर्वेण तृतीयश्लोकेनान्वयः । श्लेषालङ्कारः । नानार्थसंश्रयःश्लेषो वर्ण्यावर्ण्योभयास्पदः सर्वदोमाधवःपायात्सयोगङ्गा मदीधरत् ॥ ११ ॥

तरुणीमिति । स इति शेषस्तरुणीं नवयौवनां । नञस्नञीत्यादिनाङीप् । रमणीं सुन्दरीमपि परस्त्रियं पराङ्गनां । वामृशसोरितिइयङ् । स्वां स्वकीयां जननीमिव सर्वदा नतु कदाचिदित्यर्थः । मनुतेस्म । लिटोऽपवादःस्मेलट् । अतिसुरूपामपि नवयौवनां परस्त्रियं मातृभावेनावलोकितवानित्यर्थः । निजयोषितं स्वस्त्रियं तु ईश्वरः साम्बोऽम्बिकामिव देहस्यार्धं तत्र गतामममन्यत । स्वपत्न्यामतिप्रीत्या रंस्तेति भावः ॥ १२ ॥

सचखानेति । स शिवभूपो यदा यदा । वीप्सायां द्विर्वचनं । भुवं भूमिं चखान निखातवान् । तदा तदेत्यध्याहारः । इच्छासदृशमिच्छानुरूपं धनं प्रलब्धवानलभत । उक्तमर्थान्तरन्यासेन द्रढयति । हि यतः कृतपुण्यस्य पुण्यवतोनरस्य सकला संपूर्णा मही पृथ्वी हिरण्मयी सुवर्णमयी भवतीतिशेषः । हिरण्यशब्दात्प्राचुर्ये मयटिदाण्डिनायनेत्यादिसूत्रेण निपातनाद्यलोपः । अर्थान्तरन्यासालङ्कारः । तदुक्तं कुवलयानन्दे । उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः । हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ॥ १३ ॥

अथास्य दण्डप्रकारमाह । निजसूनुमिवेति । इन्द्रियाण्यतिक्रान्तायेऽर्था धनानि तान् वेत्तीति तथोक्तः । चर्मचक्षुरगोचरभूमिगतधनज्ञानवानित्यर्थः । यद्वा । अतीन्द्रियो योऽर्थो ब्रह्मस्वरूपं तद्वेत्तीति ब्रह्मज्ञानसंपन्नइत्यर्थः । अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः । भूपती राजा निखिललोकं जनं निजसूनुमिव स्वपुत्रमिव । यद्वा । स्वानुजमिव । सूनुः पत्रेऽनुजेरवाविति विश्वः । आव ररक्ष । अवतेर्लिटि द्वित्वेऽभ्यासदीर्घेसवर्णदीर्घः । असौ राजा आप्तं स्वकीयमपि अपराधिनमपराधवन्तं । मत्वर्थीयइनिः । मनुवाक्यानुसृतो मनुस्मृत्यनुसारी सन् शशास अदण्डयत् । अदण्डयान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकञ्चैव मच्छतीति स्मरन्यथायोग्यं दण्डंचकारेत्यर्थः ॥ १४ ॥

वचसा स जिगाय गीष्पतिं धनदं कोशबलेन रूपतः
मदनं क्षमया महीमिमां तनुशक्त्या मरुदात्मजं नृपः ॥ १५ ॥
नलरामयुधिष्ठिराः पुरा त्रियुगे वाडवकामपूरकाः
इह दानपतेरभावतो द्विजदैन्ये सति सोऽभवत्सुधीः ॥ १६ ॥
त्रिदिवेशतरुः समर्थितं वितरत्येष समर्थितं तथा
अधिकं च महीसुराय यन्नृपतिः कल्पतरोस्ततोधिकः ॥ १७ ॥
रामदास इति भूतले गतं ख्यातिमेतमुपसृत्य मारुतिम्
संप्रणम्य निजगाद हे गुरो मां कुरुष्व भवबंधवर्जितम् ॥ १८ ॥
भूपतिप्रवर कात्र दक्षिणा यन्मनोगतमहं ददामि तत्
पुत्रवत्सकललोकपालनं दक्षिणा मम तथेति सोऽब्रवीत् ॥ १९ ॥

अलौकिकान्गुणानस्याह । वचसेति । नृपेषूत्तमो नृपोत्तमः स शिवभूपो गीष्पतिं बृहस्पतिं । गीष्पति र्धिषणो गुरुरित्यमरः । वचसा वचनेन । धनदं कुबेरं कोशबलेन । कोशोऽस्त्रीकुड्मले खड्गे पिधानेऽथौघदिव्ययोरिति विश्वः । मदनं प्रसिद्धं रूपतो रूपेणेमां महीं क्षमया । मरुदात्मजं हनूमन्तमथवा भीमं तनुशक्त्या शरीरसंपत्या । जिगाय जितवान् । अर्थापमुपमा ॥ १५ ॥

अथास्यौदार्यमाह । नलरामेति । नलश्च रामश्च युधिष्ठिरश्च नलरामयुधिष्ठिराः पुरा पूर्वं त्रियुगे त्रयाणां युगानां समाहारस्त्रियुगं तस्मिन् कृतयुगादित्रये । पात्रादित्वात्डीबभावः । पद्वा । त्रियुगीवाडवकामपूरका इति पाठः साधीयान् । वाडवा ब्राह्मणाः । वाडवा विप्रब्राह्मणा इति वैजयन्ती । तेषां कामः इच्छा तां पूरयन्ति ते तथोक्ता आसन्निति शेषः । इहास्मिन् कलौ दानस्य धनत्यागस्य पतिः स्वामी तस्याभावतोऽभावाद्द्विजदैन्ये द्विजानां दीनत्वे सति सुधीः स शिवभूपोऽभवत् ॥ १६ ॥

त्रिदिवेश तरुरिति । त्रिदिवेशादेवाः । त्रिदिवेशादिवौकसइत्यमरः । तेषां तरुः कल्पवृक्षः समर्थितं प्रार्थितं वितरति ददात्येषनृपति र्यन्महीसुराय ब्राह्मणाय समर्थितं तथाधिकञ्च वितरति तत्तस्मात्कल्पतरोरधिकोस्तीति शेषः ॥ १७ ॥

अथास्यसद्गुरुप्रसादमाह । रामदासइति । स इति शेषः । रामदासइतिनाम्ना ख्यातिं प्रख्यातिंगतं मारुतिं हनूमन्तं । हनूमदवतारमित्यर्थः । उपसृत्य गत्वा संप्रणम्य नत्वा । हेगुरो मां भवः संसारस्तस्य यो बन्धस्तेन वर्जितं रहितं कुर्विति जगादोक्तवान् । आत्मतत्त्वोपदेशेन जीवन्मुक्तं विधास्यतीति बुध्द्यारामदासनामानं गुरुं शरणं ययाविति भावः ॥ १८ ॥

निवृत्तिमार्गप्रश्नार्थमुपागतं राजानं लोकोपकारार्थं प्रवृत्तिमार्गे वर्तयन् सद्गुरु र्भा-

आत्मतत्त्वमुपदिश्य सद्गुरुर्दुर्जनक्षयविधौ पटीयसीम्
शक्तिमस्य च तनौ निधाय तं स्वं गृहं गमयति स्म भूपतिम् ॥२०॥

गैरिकाक्तपटाच्छन्नं ध्वजं दत्तं प्रगृह्य सः ॥
यं यं देशं ययौ राजा स स देशो वशोऽभवत् ॥ २१ ॥

एकदा स जगदे महीपतिर्वत्सलेन जनकेन पुत्रकः
हे तनूज हरिभागमाहरन् जम्बुकः शिवमुपैति किं वद ॥ २२ ॥

षाबन्धेन स्ववशं विधत्ते । भूपतिप्रवरेति । हे भूपतिप्रवर राजश्रेष्ठ । अत्रोपदेशे का दक्षिणेति गुरुप्रश्नः । अहं यन्मनसि गतं तद्ददामीति राजोत्तरं । ददामीतिलडंतोच्चारणात् सद्य एव प्रयच्छामि नतु कालान्तरेइतिभावः । पुनश्च गुरोरुक्तिः पुत्रवदिति । सकलस्य लोकस्य जनस्य पालनं पुत्रवत्पुत्रेणतुल्यं । तेन तुल्यं क्रियाचेद्वतिरितिवतिः । मम दक्षिणा । यथाशास्त्रं प्रजापालनमेव मम दक्षिणा नान्येत्यर्थः । अत्र राजोत्तरमाह । तथेति तथास्तु इति स राजाब्रवीदुक्तवान् । गुर्वनुज्ञया प्रजापालने कृते गुरुप्रसादेन प्रजापालनपुण्येन च मम ज्ञानावाप्तिरपि स्यादिति मनसि निधाय गुरुवाक्यमङ्गीचकारेतिभावः ॥ १९ ॥

आत्मतत्त्वमिति । सन् साधुर्गुरू रामदासः । सन् सुधीः कोविदो बुध इत्यमरः । आत्मतत्त्वं ब्रह्मस्वरूपमुपदिश्य । यद्वा । आत्मनः स्वस्य तत्त्वं स्वरूपमुपदिश्य प्रकटय्यास्य राज्ञः शरीरे दुर्जनस्य क्षयो नाशस्तस्य विधिर्विधानं तत्र पटीयसीं पटुतरां । द्विवचनविभज्येत्यादिना ईयसुन् । शक्तिं निधाय संस्थाप्य भूपतिं राजानं स्वगृहं स्वकीयं गृहं गमयतिस्म प्रेषयामास । गतिबुद्धीत्यादिना भूपतेः कर्मत्वम् ॥२०॥

प्रासादिकध्वजप्राप्तिपूर्वकमेकेन दिग्विजयमाह । गैरिकाक्तेति । स राजा गैरिकया गिरिमृदा आक्तो रञ्जितो यः पटस्तेनासमन्ताच्छन्नं गुरुणेतिशेषः । दत्तं ध्वजं ध्वजदण्डं । यद्वा । राहोः शिर इतिवत् ज्ञेयं । प्रगृह्य यं यं देशं ययौ स स देशः । उभयत्रापि नित्यवीप्सयोरिति द्विर्वचनं । वशोऽधीनोऽभवत् । श्लोकसंज्ञं वृत्तं । पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । गुरु षष्ठं च सर्वेषामेतच्छ्लोकस्य लक्षणमिति लक्षणात् ॥ २१ ॥

एकदेति । एकस्मिन् काल एकदा वत्सलेन दयालुना । वत्सांसाभ्यां कामवले इतिलच्प्रत्ययः । जनकेन पित्रा स महीपतिः । भाविमहीपतित्वमादायेदं विशेषणं । पुत्रकः अनुकंपितः पुत्रः । अनुकम्पायां कन्प्रत्ययः । इति जगद उक्तः । गदेः कर्मणिलिट् । इति किं । हे तनूज हे पुत्र जंबुकः क्रोष्टा हरिभागं सिंहभागमाहरन् सन् शिवं कल्याणमुपैति किं वद ॥ २२ ॥

बालिशोऽसि बत किं शिशो गृहे नास्ति ते यदिह भूतले स्थितम्
वाजिनः पवनवेगजिज्जवाद् दन्तिनोऽपि हरिदन्तिसंमताः ॥ २३ ॥

दुष्ट एष यवनाधिपोऽस्त्यहं तं सदा परिसरामि दासवत् ॥
तत्कृपालवसुलब्धसंपदां पात्रतामुपगतोऽस्मि सांप्रतम् ॥ २४ ॥

जनकाज्ञापरः पुत्रः पत्नी च पतिदेवता
संपदापत्समं मित्रं त्रितयं दुर्लभं खलु ॥ २५ ॥

जमदग्निः कृते पुत्री त्रेतायां राघवः सुती
द्वापरे शंतनुः पुत्री तदन्ये नैव पुत्रिणः ॥ २६ ॥

ननु गजाश्वादिरानसंपदुपभोगेच्छयेदमारब्धं प्रारब्धवशादग्रे यत्स्यात्तद्भवतु किमुपालंभेनेत्यत आह बालिशोऽसीति । हे शिशो बत इति खेदे बालिशो मूर्खोऽसि । इह भूतले स्थितं यद्वस्तु तन्मे गृहे नास्ति किं । सर्वमप्यस्तीत्यर्थः । पवनो वायुस्तस्य वेगस्तं जयतीति पवनवेगजित् जवो वेगो येषां ते तथाभूता वाजिनो हरेरिन्द्रस्य दन्तिनो गजा ऐरावतादयस्तेषामपि संमता मान्या दन्तिनः । प्रशस्ता दन्ता येषां सन्ति ते दन्तिनो गजाः । प्रशंसायां इनिः । भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संबन्धेऽस्तिविवक्षायां भवन्ति मतुबादय इति । सन्तीतिशेषः ॥ २३ ॥

दुष्टइति । एष विजयपुरस्थो यवनाधिपो दुष्टोऽस्ति । अहं तं दासवत् दासेन तुल्यं परिसराम्यनुवर्ते । तस्य कृपाया लवो लेशमात्रस्तेन सुतरां लब्धाः प्राप्ता याः संपदस्तासां पात्रतां पात्रत्वं सांप्रतमधुना । एतर्हि संप्रतीदानींमधुना सांप्रतं तयेत्यमरः। उपगतः प्राप्तोऽस्मि । एतावत्कालपर्यन्तं बव्हायासेन तस्य कृपा संपादिता । अधुनैव संपदुपभोगकालः समायातस्तत्र त्वं विघ्नं माकुर्विति भावः ॥ २४ ॥

जनकेति । जनकस्य पितुर्या आज्ञा तस्यां पर आसक्तः । यद्वा । जनकाज्ञैव परा मुख्या यस्य स तथोक्तः पुत्रः । पतिरेव देवता यस्याः पतिदेवता पत्नीचेत्यपरं । संपदापदोः समं तुल्यं मित्रं। एतत्त्रितयं । त्रिशब्दादवयवे तयप्द्वित्रिभ्यांतयस्यायज्वेतिविकल्पात्तयपोऽयनादेशाभावः । दुर्लभं दुःप्रापं खलु निश्चयेन ॥ २५ ॥

जमदग्निरिति । कृते कृतयुगे जमदग्निः प्रसिद्धः पुत्री पुत्रवानासीदिति शेषः । त्रेतायां रघोर्गोत्रापत्यं राघवो दशरथः । अपत्येऽण् । सुती सुतवानासीत् । द्वापरे शान्तनुर्नाम राजा पुत्र्यासीत् । तेभ्योऽन्ये तदन्ये न पुत्रिणः । अतिशयितपुत्रवन्तो नैव । एतत्त्रितयभिन्नेषु पुत्रवत्त्वमस्ति परं प्रशस्तपुत्रवत्त्वं नास्तीतिभावः । प्रशंसायामिनिः ॥ २६ ॥

निजघान गुरोरनुज्ञया जननीं भ्रातृगणं च तत्क्षणे
जमदग्निसुतो यमालयं सकुलं राजचयं तथानयत् ॥ २७ ॥

सुरराजपुरीपुरःसरां गणनायां स्वपुरं रघूत्तमः
प्रविहाय ययौ स दण्डकं जनकस्यावशगः सलक्ष्मणः ॥ २८ ॥
अवगम्य पितुर्मनोगतं समुपेत्याशु स वेश्म तत्
अनुसृत्य जितेन्द्रियात्मतामनयत्सत्यवतीं सुव्रतः ॥ २९ ॥

मद्वचःकरणे वाल किं दुःखं वद तत्त्वतः
त्वद्धितार्थंब्रवीम्येतच्छ्रोतव्यं हितमिच्छता ॥ ३० ॥

त्रयाणां पुत्रवतां क्रमेण विवृणोति जघानेत्यादिना । निजघानेति । जमदग्निसुतः परशुरामो जननीं रेणुकां भ्रातृणां गणं च गुरोः पितुरनुज्ञया तत्क्षण आज्ञाक्षण एव निजघान हतवान् । मानसिकव्यभिचारदूषितां रेणुकां विलोक्य क्रुद्धेन जमदग्निना नियोजितो रामोऽकार्यमपि जननीवधं भ्रातृवधं च कृतवानित्यर्थः । तथा कुलेन सहितं सकुलं राजचयं राजवृन्दं यमालयमनयत् नीतवान् । हैहयैर्विच्छेदितशिरसं जमदग्निं दृष्ट्वा रोरूयमाणायां रेणुकायां रामो वनादागत्य क्रुद्धः सन् सकलान् हैहयानवधीदित्यर्थः ॥ २७ ॥

सुरराजेति । जनकस्य दशरथस्य याऽऽज्ञा तस्या वशं गच्छतीति तथोक्तः । लक्ष्मणेन सहितः सलक्ष्मणो रघुषूत्तमो रघूत्तमो रामो गणनायां । केनचित्कुत्रापिनोत्तमानां पुरीणां गणने क्रियमाण इत्यर्थः । सुरराजस्य इन्द्रस्य या पुरी तस्या पुरः अग्रे सरतीति तामरावत्यपेक्षया रमणीयामित्यर्थः । स्वपुरं स्वनगरीं प्रविहाय त्यक्त्वा दण्डकं दण्डकारण्यं राक्षसाक्रान्तमपीति भावः । ययौ जगाम ॥ २८

अवगम्येति । सुरस्येव व्रतं सत्यवक्तृत्वादिकं यस्य स सुव्रतो भीष्मः पितुः शान्तनोर्मनसि गतं मनोगतं वाञ्छितं दाशकन्यापरिणयनरूपं अवगम्य ज्ञात्वा । वाल्यपीति विकल्पान्मकारलोपाभावः । आशु शीघ्रं तद्दाशस्य कैवर्तस्य वेश्म गृहं । कैवर्तो दाशधीवरावित्यमरः । समुपेत्य गत्वा नितानि इन्द्रियाणि आत्मा मनश्च येन तस्य भावस्तत्ता तां । अनाद्यदन्तत्वादिन्द्रियशब्दस्य पूर्वनिपातः ब्रह्मचर्यमित्यर्थः । अनुसृत्य अङ्गीकृत्य । समानकर्तृकयोः पूर्वकाले इत्यत्र द्विवचनस्यानिवक्षितत्वात् धातुत्रितयादपि क्त्वाप्रत्ययः । स्नात्वा पीत्वा भुक्त्वा व्रजतीतिवत् । सत्यवतीं नाम दाशकन्यां शान्तनोर्विवाहार्थं अनयत् आनीतवान् । पित्रर्थं नैष्ठिकं ब्रह्मचर्यं स्वीकृतवानित्यर्थः ॥ २९ ॥

मद्वचइति । हे बाल मद्वचसः करणं क्रिया तत्र किं दुःखं । अस्तीति शेषः । त्वं तत्तत्वतो यथार्थ्येन वद । अहमेतत्पूर्वोक्तं तव हितं त्वद्धितं त्वद्धितायेति त्वद्धि-

निशम्य वाक्यं जनकस्य राजा नत्वा रहस्येतमुवाच वाचम्
उक्तं त्वया यद्वचनं दयालो हितावहं मे श्रुतिशास्त्रगामि ॥ ३१ ॥

तथापि किंचिद्विनिवेदयामि त्वत्प्रे समागत्य जगद्धितार्था
देवी भवानी निजगाद वाचं हे भूपते राज्यमिदं गृहाण ॥ ३२ ॥

दत्तं मया राज्यमिमेऽतिदुच्छा म्लेच्छा जनं मे परिपीडयन्ति
प्रजाप्रपीड्याप्यपतस्ते लयं प्रयास्यंति सदा जयस्ते ॥ ३३ ॥

युद्धं विजित्याखिलदुष्टवर्गं विप्रादिकान् पालय गाश्च राजन्
धनं च ते भूरि ददामि यत्र खनिष्यसीहास्य भवेद्विलाभः ॥ ३४ ॥

तार्यं ब्रवीमि वच्मि । हितं कल्याणं इच्छता त्वया श्रोतव्यं श्रुत्वा तथा कर्तव्यमित्यर्थः ॥ ३० ॥

निशम्येति । राजा शिबभूपो जनकस्य पितुर्वाक्यं निशम्य श्रुत्वा एतं पितरं रहस्येकान्ते नत्वा वाचमुवाचोक्तवान् । तामेवाह । हे दयालो । दयतेऽसौ दयालुस्तत्संबुद्धौ हे दयालो । रुहिगृहीत्यादिना दयतेरालुच् । श्रुतिर्वेदः शास्त्रं नीतिशास्त्रं तद्वच्छत्यनुसरति तयोक्तं । गमेर्णिनिः । यद्वचनमुक्तं तन्मे हितं आवहति करोतीति । हितावहमस्तीति शेषः ॥ ३१ ॥

ननु हितावहं चेत्तूष्णीं गृहे स्थीयतां यवनराज्यहरणोद्योगो न कर्तव्य इत्यत आह । तथापीति । तथाप्येवं सत्यपि किञ्चिद्गूढं विनिवेदयामि । तदेवाह । जगतो हितं तदेवार्थः प्रयोजनं यस्याः सा । अर्थोऽभिधेयैरैवस्तुप्रयोजननिवृत्तिष्वितिविश्वः । भवानी भवपत्नी देवी पार्वती मम स्वप्ने समागत्य वाक्यं जगाद । हे भूपत इदं राज्यं गृहाण इति ॥ ३२ ॥

ननु यवनाधिपतेः प्रबलस्य कथं राज्यं ग्राह्यमेतदत आह । दत्तमिति । इमे अतिदुच्छा म्लेच्छा मे जनं मे लोकं परिपीडयन्ति अतो मया तुभ्यं राज्यं दत्तं ननु प्रबलेषु म्लेच्छेषु जीवत्सु कथं ममराज्यप्राप्तिरित्यत आह । प्रजेति । ते म्लेच्छाः प्रजानां प्रकर्षेण या पीडा ततो भवमुत्पन्नं यत्पापं तस्माद्भयं नाशं प्रयास्यन्ति । सदा ते जयश्च स्यादितिशेषः ॥ ३३ ॥

युद्ध इति । हे राजन्नखिलानां दुष्टानां वर्गं समूहं युद्धे विजित्य विप्रा आदिर्येषां तान् वर्णान् गाश्च पालय । ननु युद्धसामग्रीं विना कथं प्रबलैः सह योद्धव्यं । युद्धसामग्री च धनं च विना न सिध्यतीत्यत आह । किञ्चाहं ते धनं ददामि चकाराद्युद्धसामग्रीं च । यत्र यस्यां भूमौ खनिष्यसि इहास्यां भूमौ खातभूमावित्यर्थः ।

---

१. 'एनम्' पा० मे० २. 'पूजय' पा० मे०

इत्थं समादिश्य जगाम देवी सत्प्रत्ययार्थं च खनामि यत्र
यथा लभेऽहं धनमेवमेतान् म्लेच्छान् यमप्राघुणिकान् करिष्ये ॥ ३५ ॥
पिता शिवस्यास्य वचो निशम्य जगाम हृष्टो विजयं पुरं सः
सभामुपेत्य प्रणनाम वीरो[3] म्लेच्छाधिनाथं बहुवीर्ययुक्तम् ॥ ३६ ॥
उच्चालितभ्रूः कुटिलीकृतास्यो म्लेच्छाधिपोवाचमुवाच वीरः
हे सभ्यवर्या वचनंममैतच्छ्रुत्वोत्तरं ब्रूत हितं च सत्यम् ॥ ३७ ॥

पितृणामिह सर्वेषां पितरौ द्वौ मतौ मम
जनकः पोषकश्चापि जननाद्भरणाद्वरः[4] ॥ ३८ ॥
जनकादधिकं मन्ये पितरं पोषणक्षमं
अत्रार्थे मद्वचो यूयं शृणुत प्रियदर्शनाः ॥ ३९ ॥

यद्वा । इह भूमौ यत्र यस्मिन् प्रदेशे खनिष्यसि तत्र तस्मिन् प्रदेशे इति योजनीयं । अस्य धनस्य लाभो भवेत् । हि निश्चयेन ॥ ३४ ॥

इत्यमिति । देवी इत्थं पूर्वोक्तप्रकरेण समादिश्य उक्त्वा जगाम अन्तर्हिताऽभूदित्यर्थः । अहं तस्य देवीवाक्यस्य प्रत्ययः अनुभवस्तदर्थं यत्र खनामि तत्र यथा धनं लभे प्राप्नोमि एवं एतान् म्लेच्छान् यमस्य प्राघुणिकानतिथीन् करिष्ये ॥ ३५ ॥

पिता शिवस्येति । स शिवस्य पिताऽस्य शिवस्य वचो निशम्य श्रुत्वा हृष्टः सन् विनयं विजयाख्यं पुरं जगाम । वीरः शिवपिता सभामुपेत्य गत्वा बहुभिर्वीर्यैर्युक्तं म्लेच्छानामधिनाथं प्रणनाम नमश्चक्रे ॥ ३६ ॥

उच्चालित भ्रूरिति । उच्चालिते भ्रुवौ येन स तथोक्तः । न कुटिलं अकुटिलं अकुटिलं कुटिलं संपद्यते तथा कृतं कुटिलीकृतमास्यं येन तथोक्तः । अभूत तद्भावे संपदकर्तरिच्विः । अस्य च्वाविति वं । वीरो म्लेच्छाधिपो वाचमुवाच । सभायां भवाः सभ्याः सभायायः स्तेषु वर्याः श्रेष्ठास्तत्संबुद्धौ हे सभ्यवर्या ममैतद्वचनं श्रुत्वा हितं सत्यं चोत्तरं ब्रूत । यद्वा । उभयोरपि हितं सत्यमुत्तरं कर्तव्यं ब्रूत ॥ ३७ ॥

पितृणामिति । इह अस्मिन् लोके सर्वेषां पञ्चानां पितृणां द्वौ पितरौ मम मतौ मान्यौ उत्कृष्टावित्यर्थः । पञ्च पितरस्तु । जनिता चोपनेता च यश्च विद्यां प्रयच्छति । अन्नदाता भयत्राता पञ्चैते पितरः स्मृता इति सङ्ग्रहे । द्वावाह । जनयतीति जनकः । जनयतेर्ण्वुल् । जननात्सकलपुरुषार्थसाधनीभूतदेहोत्पादनादित्यर्थः । पुष्णातीति पोषकश्च भरणाज्जीवदानादित्यर्थः । वरः श्रेष्ठः ॥ ३८ ॥

द्वयोरपि मध्ये पोषके श्रेष्ठत्वं प्रतिपादयति । जनकादिति । अहमिति शेषः ।

---

३. 'वीरम्' पा० भे० ४. 'वरौ' पा० भे०

भूमौ प्राणिगणः सर्वः कंदर्पाकृष्टमानसः
सुखार्थमेव रमते प्रायशो न सुतेच्छया ॥ ४० ॥
सुखार्थं रममाणोस्मिन् जायते जायया सुतः
जनकस्य तु नाप्वस्ति दुःखं सौख्यं पुनः पुनः ॥ ४१ ॥
धनार्जने महद्दुःखं रक्षणे च ततोऽधिकं
यस्मात्पुष्णाति तद्दत्वा पोषको [६]जनकाद्वरः ॥ ४२ ॥
तं मामयमनादृत्य कृतघ्नः पोषणक्षमं
मद्राज्यहरणे पुत्रमाज्ञाप्यात्र समागतः ॥ ४३ ॥
सभ्याः श्रुतं मद्वचनमत्र चोत्तरमुच्यतां
श्रुत्वा यवनवाक्यं तत्सभ्यानामेक उक्तवान् ॥ ४४ ॥

पोषणे क्षमं पितरं जनकादधिकं मन्ये । प्रियं दर्शनं येषां ते हे प्रियदर्शना भवत्स्वपि बहिः साधुत्वं प्रतिभाति अंतःकिमस्तीति न वेद्मीति भावः । अत्रार्थे पोषकस्याधिकत्वे यूयं मम वचः शृणुत ॥ ३९ ॥

भूमाविति । कन्दर्पेण कामेनाकृष्टं मानसं यस्य तथोक्तः सर्वप्राणिगणः । प्राणिग्रहणात्पक्षादयोऽपिग्राह्याः । प्रायशो बाहुल्येन । बव्हल्पार्थाच्छस् । कारकादन्यतरस्यामितिशस् । सुखार्थमेव सुखायेति सुखार्थं । रमते मिथुनीभवति सुतस्य या इच्छा तया न रमते ॥ ४० ॥

सुखार्थमिति । अस्मिन्नरे नायया पत्न्या । सहेत्यध्याहारं विनापि तद्योगे तृतीया । सुखार्थं रममाणे सति । लटः शानचि मुमागमः । सुतः पुत्रो जायत उत्पद्यते । अनिच्छयेति भावः । फलितमाह । जनकस्योत्पादकस्य तु अल्पमपि दुःखं नास्ति । पुनःपुनः सुखमेव सौख्यं । चतुर्वर्णादित्वात्स्वार्थेष्यञ् । भवतीतिशेषः ॥ ४१ ॥

धनार्जनइति । धनस्यार्जने संपादने महद्दुःखं क्लेशः । किञ्च रक्षणे ततोऽर्जनादधिकं दुःखं भवति । पोषकस्तद्धनं दत्त्वा यस्मात्पुष्णाति तस्माज्जनकाद्वरः श्रेष्टः ॥ ४२ ॥

तमिति । कृतं हन्ति इति कृतघ्नः । मूलविभुजादित्वात्कः । अयं पुरोवर्त्ती । इदमस्तु सन्निकृष्टमिति । पोषणक्षमं मामनादृत्य तिरस्कृत्य मद्राज्यस्य हरणे पुत्रमाज्ञाप्यात्र समागतः प्राप्तः ॥ ४३ ॥

सभ्याइति । हे सभ्या मद्वचनं श्रुतमवधारितमत्र मद्वचन उत्तरमुच्यतां वक्तव्यम् । सभ्यानां मध्य एकस्तत्पूर्वोक्तं यवनवाक्यं श्रुत्वोक्तवानुवाच ॥ ४४ ॥

---

५. 'सुतार्थतः' पा० भे० ६. 'जनकाधिकः' पा० भे०

अस्माकमुत्तरं मौनं यवनाधीशपालक
यमुद्दिश्य त्वया प्रोक्तं स एवोत्तरयत्विह ॥ ४५ ॥

शिवपिता निजगाद वचस्तदा करयुगं प्रतिबध्य तदुत्तरम्
यवनपालक रोषमपास्य मद्वचनमत्र शृणुष्व वदाम्यहम् ॥ ४६ ॥

पोष्यपोषकभावाख्यस्तरुः समधिरोपितः
त्वया सभालवालं यो वाक्कुठारश्छिनद्मि तं ॥ ४७ ॥

तव सपत्नचयः सह सेनया जलदनिस्वनयन्त्रततिं पुरः
परिविधाय यदेति तदापुरो ह्यहमपि प्रतियाम्यविशङ्कितः ॥ ४८ ॥

शिर इदं करगं प्रविकल्प्य यत् तव सपत्नसमूहहुताशनम्
झटिति संप्रविशामि ततस्त्वयं विनिमयस्तनुहाटकयोरिह ॥ ४९ ॥

अस्माकमिति । हे यवनाधीश हे पालक । यद्वा । यवनाधीशानां पालक । तव निग्रहानुग्रहसमर्थत्वादस्माकं च सेवकत्वात् उत्तरकरणं अयुक्तमितिभावः । त्वया यमुद्दिश्य यस्योद्देशेनोक्तं स एव इह त्वद्वचसि उत्तरयतु उत्तरं करोतु । उत्तरशब्दात् तत्करोतीत्यादिना णिच् ॥ ४५ ॥

शिवेति । तदा शिवपिता करयुगं पाणियुग्मं प्रतिबध्य तस्य यवनवाक्यस्योत्तरं निजगाद बभाषे । हे यवनपालक अहं अत्र त्वद्वचने वदामि रोषं कोपमपास्य त्यक्त्वा मद्वचनं शृणुष्व । द्रुतविलंबितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति लक्षणात् ॥ ४६ ॥

पोष्येति । त्वया यः पोष्यपोषकभाव आख्या यस्य स तयोक्तः । आख्यास्त्रे अभिधानं च नामधेयं च नाम चेत्यमरः । तरुर्वृक्षः सभैवालवालं समधिरोपितो स्थापितः । रुहः पोऽन्यतरस्यामिति पकारः । तं वाग्रेव कुठारो यस्य सोऽहं छिनद्मि । रूपकालङ्कारः । विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् । रूपकं तु त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिरिति चद्रालोके ॥ ४७ ॥

तवेति । तव सपत्नानां शत्रूनां । रिपुवैरिसपत्नारिद्विषद्वेषणदुर्हृद इत्यमरः । चयः समूहो जलदस्येवमेघस्येव निस्वनो येषां तानि यन्त्राणि । यन्त्रलक्षणं मूले एव चरमचमत्कारे स्पष्टमुक्तं । तेषां ततिं संघमग्रे पुरो विधाय सेनया सह यदा एति आगच्छति तदाऽहमपि विशेषेण शङ्का सञ्जाता यस्य स विशङ्कितः न विशङ्कितः अविशङ्कितः । तारकादित्वादितच् प्रत्ययः । प्रतियामि गच्छामि ॥ ४८ ॥

शिरइति । अहं इदं शिरः करगं करस्थितं प्रविकल्प्य मत्वा यत् तव सपत्नसमूह एव हुताशनः अग्निस्तं झटिति शीघ्रं प्रविशामि । ततस्तस्मात् अयं तनुहाटक-

शिवनामातिमूढोऽयं नैव सूनुर्मम प्रभो
जनकाज्ञापरः पुत्रो [७]यतोऽसौ नैव तादृशः ॥ ५० ॥

वीरान् दुर्विषहान् युक्तान् सन्नद्धानतिदुर्जयान्
संप्रेष्य बध्वा मूढं तमानयाचिरतः सखे ॥ ५१ ॥

समानीतेतस्मिन्नखिलजनतातापकरणे
रणेशूरेधीरे तव पुर इदं वच्मि वचनम्
द्विजांस्तृप्तानन्नैर्दधिघृतसितापायसयुतैः
करिष्येऽहं ख्यातान् दशशतशतं साम्बदयितः ॥ ५२ ॥

योः शरीरसुवर्णयोरिह संसाराऽऽपणे विनिमयोऽन्योन्यदानं ऋणिव्यवहार इतिः यावत् ॥ ४९ ॥

शिवेति । हे प्रभो मूढः शिवनामायं मम सूनुः पुत्रो नैव । यतो हेतो जनकाज्ञापरः पुत्रः । असौ तादृशो नैव ॥ ५० ॥

अग्रे कर्तव्यं स्वयमेवाह । वीरानिति । हे सखे हे मित्र । त्वद्धितावह एवाहमिति भावः । त्वं दुर्विषहान् दुर्धर्षान् युक्तान् एकचित्तान् अतिदुर्जयान् सन्नद्धान बद्धपरिकरान् वीरान् संप्रेष्य मूढं शिवं बध्वाऽचिरतः शीघ्रमानय ॥ ५१ ॥

स्ववचने सत्यत्वापादनार्थं ब्राह्मणभोजनं प्रतिजानीते । समानीत इति । सांबदयितः सांबो महादेवो दयितः प्रियो यस्य सांबभक्तोऽहं जनानां समूहो जनता अखिला संपूर्णा या जनता तस्यास्तापं करोतीति तापकरणः । कर्तरि ल्युट् । तस्मिन् अखिलजनतातापकरणे धर्तुं योग्ये इति भावः । यद्वा । अखिलजनतातापस्य करणे साधनीभूते । रणे संग्रामे अशूरे सुसाध्य इति भावः । यतोऽधीरे धैर्यरहिते तस्मिन् शिवे समानीते धृत्वा आनीते सति ख्यातान् प्रख्यातान् ज्ञानिन इति यावत् । दश च तानि शतानि सहस्रमित्यर्थः । तस्य शतं लक्षसंख्यान् द्विजान् विप्रान् दधि च सिता शर्करा पायसं पयोविकारस्तैर्युतैरन्नैस्तृप्तान् करिष्ये इति तव पुरो वच्मि प्रतिजाने । एवं यवनाधिपतोधार्यमुक्तं । शिवपित्रा यवनाधिपप्रतारणार्थं उक्तोऽर्थो व्याख्यातः । श्लेषेण निबद्धो वास्तवोऽर्थो व्याख्यायते । सांबदयितः सांब एव मयि कृपां करिष्यतीति भावः । अहं खिलोऽसंपूर्णा या जनता तस्यास्तापकः रणः संग्रामो यस्य तथा न भवतीति नखिलजनतातापकरणस्तस्मिन् । न अर्थस्य न शब्दस्य सुपूसुपेति समासः । अरणे रक्षके शूरे वीरे यद्वा रणे संग्रामे शूरे दुःसाध्ये इति भावः । यतो धीरे तस्मिन् शिवे मा आनीते सति न धृते सतीत्यर्थः । निषेधार्थो

७. 'पुत्रोयतोऽयम्' पा० भे०

इत्युक्तवंतं यवनेश्वरस्तं सत्कृत्य वस्त्रैः शिबिरं तदीयं
संप्रेष्य चित्ते सततं स वीरो व्यचिन्तयत् किं करणीयमत्र ॥ ५३ ॥

श्रीमान् शाहाभिधो राजा शिवतातस्तदा सुधीः
साम्बं समर्चयन्नित्यं तत्रैवासीद्दयानिधिः ॥ ५४ ॥ *

इतिश्रीशिवकाव्ये † पुरुषोत्तमपण्डितविरचिते प्रथमश्चमत्कारः ॥ १ ॥

॥ श्री ॥

ऋणमग्निर्गदः शत्रुरल्पमेतच्चतुष्टयम् ।
इति मत्वा सुखं शेते यो नरः स विषीदति § ॥ १ ॥

राज्ञा केनाप्युपायेन हन्तव्यो रिपुरल्पकः ॥
यक्ष्मेव परिपुष्टोऽसौ दुश्चिकित्स्यो हि जायते ॥ २ ॥

मा शब्दः । यद्वा । स प्रसिद्धो मानी मानवान् । अत इनि ठनाविति इनिः । अहं तस्मिन् शिवे इते गते कुत्रचिद्गते सतीत्यर्थः । शेषं पूर्ववत् । एतैर्दुष्टैर्मत्पुत्रो नधृतश्चेत् श्रीसांबप्रीत्यर्थं लक्षब्राह्मणान् भोजयिष्ये इतिभावः । श्लेषालङ्कारः । शिखरिणीवृत्तं । रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणीति लक्षणात् ॥ ५२ ॥

इतीति । स वीरो यवनेश्वरो । यद्वा । वीरैः सहितः सवीरो यवनेश्वर इति पूर्वोक्तप्रकारेण उक्तवन्तं तं शिवपितरं वस्त्रैः सत्कृत्य । आदरानादरयोः सदसतीतिसमासे ल्यपि तुगागमः । तस्येयं तदीयं वृद्धाच्छः । शिबिरं सेनानिवेशं प्रेष्य सम्यक् प्रस्थाप्य । अत्र शिवविषये किं करणीयं को विचारः कर्तव्य इति सततं निरन्तरं चित्ते व्यचिन्तयत् चिन्तितवान् ॥ ५३ ॥ ॥ ५४ ॥ इति श्रीशिवकाव्यव्याख्यायां स्वकृतायां काव्यप्रकाशिकायां प्रथमश्चमत्कारः ॥ १ ॥

अथ यवनाधिपस्य चिन्ताप्रकारपूर्वकं कर्तव्यार्थमाह । ऋणमिति । प्रशस्ता मेधा यस्य स मेधावी बुद्धिवान् । अस्मायामेधास्रजोविनिरिति विनिप्रत्ययः । वीरेषु राजतेऽसौ वीरराट् । क्विप् । विजयपुराधिपः । ऋणं प्रसिद्धं । अग्निः । गदो रोगः शत्रुरेतच्चतुष्टयं अल्पं इति मत्वा यो नरः सुखमक्लेशेन शेते निद्राति । एतदन्यतमप्राप्तप्रतीकारमकुर्वन् तिष्ठतीत्यर्थः । स विषीदति नश्यति । सदेःसीदादेशः । मुमूर्षति इति भावे आशंकायां सन् वक्तव्य इति सति अज्झनगमासनीति दीर्घे उत्वे द्वित्वम् ॥ १ ॥

राज्ञेति । राज्ञा जिगीषुणा अल्पको रिपुः केनाप्युपायेन सामादीनां मध्ये अ-

---

* अयं श्लोक एकस्मिन्नेव पुस्तके दृश्यते नान्यत्र । † 'ाख्ये कलिविलासे पु०' पा० भे० । § 'मुमूर्षति' पा० भे० ।

इत्थं विचिन्त्य मेधावी प्रातः सदसि वीरराट् ॥
वीरानाहूय सर्वान्स्वानिदं वचनमब्रवीत् ॥ ३ ॥
यदर्थं पूजिता यूयं धनभूषणवाहनैः ॥
वस्त्रादिभिश्च समयस्तस्यायं समुपस्थितः[1] ॥ ४ ॥
पण्डितं च वरं शूरं पूजयन्ति नृपाः[2] सदा ॥
सभायां रणभूमौ च जेतायमिति धीयुताः ॥ ५ ॥
तस्मिन्नुपागते काले वीरैः[3] पण्डितमान्यपि ॥
पराङ्मुखो यदि भवेद्धिगस्तु नटवेषिणम् ॥ ६ ॥
पाण्डित्यं चापि शूरत्वमपरीक्ष्य वृथास्य यः ॥
सर्वदार्चति तं जाल्मं भूमिपालात्मजं च धिक् ॥ ७ ॥

न्यतरेण हन्तव्यो मारणीयः । हन्तेः कर्मणि तव्यत् । हि यस्मादसौ यक्ष्मेव राजयक्ष्मेव परितः पुष्टो बद्धमूलः सन् दुःखेन चिकित्सितुमुन्मूलयितुं शक्यो दुश्चिकित्स्यो जायते भवति ॥ २ ॥

इत्थंविचिन्त्येति । इत्थं श्लोकद्वयोक्तप्रकारेण विचिन्त्य प्रातः । प्रातरित्यनेन रात्रौ नागरोगम्यते । सर्वान् वीरानाहूय इदं वक्ष्यमाणं वचनमब्रवीत् ॥ ३ ॥

यदर्थमिति । यूयं धनवाहनभूषणैर्वस्त्रादिभिश्च यस्मै कार्यायेति यदर्थं पूजिताः स्थ तस्य कार्यस्यायं समयः कालः समुपस्थितः प्राप्तः ॥ ४ ॥

पण्डितमिति । अयं पण्डितो वीरश्च सभायां रणभूमौ च जेता जयतीति जेता । कर्तरिवच् । इति या धीस्तया युता नृपाः । वरं श्रेष्ठं पण्डा बुद्धिः संजाता यस्य तं । तदस्य संजातमित्यादिना इतच् । पण्डितं विद्वांसं शूरं वीरं च सदा पूजयन्ति ॥ ५ ॥

तस्मिन्निति । वीरः आत्मानं पण्डितं मन्यतेऽसौ पण्डितमानी । आत्ममाने खश्चेति चकारान्णिनिः । तस्मिन् काले जयकाले प्राप्ते सति यदि पराङ्मुखं यस्य स तथोक्तः । भवेत्तर्हि नटस्य वेषो नटवेषः सौऽस्त्यस्य तं धिक् धिक्कारोऽस्तु । धिक् शब्दयोगे द्वितीया । उभसर्वतसोःकार्याधिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितांतेषु ततोऽन्यत्रापि दृश्यते ॥ ६ ॥

पण्डित्यमिति । यो भूपतिरस्य पण्डितस्य वीरस्य च पाण्डित्यं पण्डितस्य भावः पाण्डित्यं पण्डितत्वं । गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ् । वीरस्य भावो वीरत्वं । तस्यभावस्त्वतलाविति त्वः । अपरीक्ष्य अदृष्ट्वा तं पण्डितं वीरं च सर्वदा वृथा अर्चति पूजयति तं जाल्मं असमीक्ष्यकारिणं पूजयति । जाल्मोऽसमीक्ष्यकारी स्यात् इत्यमरः । भूमिपालस्य आत्मजं सूनुं च धिक् ॥ ७ ॥

---

१. 'समुपागतः' पा० मे० । २. 'नराः' पा० मे० । ३. 'शूरः' पा० मे० ।

विद्याशूरं दानशूरं रणशूरं च या सुतम् ॥
सूते सा पुत्रिणी नान्या पुत्रवत्यपि पुत्रिणी ॥ ८ ॥
किमत्र बहुनोक्तेन शृणुत प्रकृतं भटाः ॥
यो वीरसूसुतः सद्यः स एवायतु मेऽग्रतः ॥ ९ ॥
गृहीत्वा वीटिकामेतां गत्वा धृत्वा च तं शिवम् ‡ ॥
बध्वा बाहुयुगे पाशैरानयत्विह माद्रिपुम् ॥ १० ॥
इत्थं ब्रुवाणे यवनाधिपे ते चिन्ता-ज्वराक्रान्ततरा बभूवुः ॥
ततः सभायामुदतिष्ठदग्रे भटाग्रणीर्धर्मधुरंधराख्यः ॥ ११ ॥
कृतकार्यो भवेयं चेद्दर्शयिष्यामि वो मुखम् ॥
नोचेद्यास्यामि काकानां श्वेतानां वसतिं भटाः ॥ १२ ॥
इत्युक्त्वायुतसंख्याकवाजिसादिपुरःसरः ॥
यन्त्रैः पदातिभिर्युक्तो भेरीमुद्घोषयन्ययौ ॥ १३ ॥

विद्याशूरमिति । या अङ्गना विद्यायां शूरः तं वा दानशूरं वा रणशूरं वा सुतं पुत्रं सूते प्रसवतिसा स्त्री पुत्रिणी । अन्या पुत्रवत्यपि पुत्रिणी न ॥ ८ ॥

किमत्रेति । हे भटा अत्र शिवभूपहननविचारे बहुना उक्तेन किं न किंचिदित्यर्थः । प्रकृतं प्रस्तुतं शृणुत । या वीरं सूते सा वीरसूः तस्याः सुतः पुत्रः लोकोक्तिरियं स एव । सद्यः तत्कालं । सद्यःपरुदित्यनेन निपातनं । मे अग्रतः अग्रभागे सार्वविभक्तिकस्तसिः । आयातु ॥ ९ ॥

गृहीत्वेति । स एतां हस्ते धृतामिति भावः वीटिकां नागवल्लीदलनिर्मितां गृहीत्वा ततो गत्वा माद्रिपुं शिवं धृत्वा बाहुयुगे पाशैर्बध्वा आनयतु । विधौलोट् । सप्राण एव आनेय इतिभावः ॥ १० ॥

इत्थमिति । ते भटा यवनाधिपे अनेन प्रकारेण इत्थं । इदमस्थमुः । पूर्वोक्तप्रकारेण ब्रूतेऽसौ ब्रुवाणस्तस्मिन् सति चिन्तैव ज्वरस्तेन आक्रान्ततरा अभूवन् । ततस्तदनन्तरं धर्मधुरंधराख्यः भटाग्रणीः सभाया अग्रे अग्रदेशे उदतिष्ठत् उत्थितवान् ॥ ११ ॥

कृतकार्यइति । हे भटा अहमिति शेषः कृतं निष्पादितं कार्यं येन तथोक्तः । भवेयं चेत् वो युष्मान् मुखं दर्शयिष्यामि । दृशेश्चेति अप्यन्तावस्थायां कर्तुर्ण्यन्तावस्थायां कर्मत्वं । वैपरीत्ये प्रतिज्ञामाह । नो चेत् कृतकार्यत्वाभावश्चेत् श्वेतानां काकानां वसतिं यास्यामि गमिष्यामि । इयं लोकोक्तिः ॥ १२ ॥

इतीति । अयुतं दशसहस्राणि संख्या येषां ते अयुतसंख्याकाः । शेषाद्विभाषेतिकपि आपोन्यतरस्यामिति विकल्पाद्ध्रस्वाभावः । ते च ते वाजिसादिनः अ-

‡ 'रिपुम्' पा० भे० ।

राजदुर्गोपत्यकायां तस्थौ वर्षद्वयं सँ हि ॥
शिवभूपोऽधित्यकायामासीदानन्दसंयुतः ॥ १४ ॥

राजदुर्गशिखराद्युपागतैर्यन्त्रमुक्तगुरुगोलकैर्हताः ॥
धर्मधूर्वहभटा उपाययुः प्रायशो यमनिकेतनं परे ॥ १५ ॥

धान्यदार्वादिमार्गो मे रुद्धोऽनेन दुरात्मना ॥
किमत्र प्रतिकर्तव्यमिति राजा विचिन्तयन्[5] ॥ १६ ॥

रात्रावागत्य बहुभिर्भटैर्युद्धविशारदैः ॥
सुप्तेषु तस्य सर्वेषु शिरोऽवृश्चत्कृपाणवान्[6] ॥ १७ ॥

श्वारोहास्तेषां । पुरःसरति गच्छति इति तथोक्तः । यद्वा । अयुतसंख्याकवाजिसादिनः पुरःसरा यस्येति बहुव्रीहिः । यन्त्रैः पदातिभिस्तद्रक्षकैर्युक्तः स भेरीं दुन्दुभिं । भेरीस्त्री दुन्दुभिः पुमानित्यमरः । उद्घोषयन् सन् ययौ ॥ १३ ॥

राजदुर्गेति । स धर्मधुरंधरः राजदुर्गस्य राजदुर्गाख्यस्य पर्वतस्य उपत्यकायामासन्नभूमिकायां वर्षद्वयं तस्थौ हि निश्चियेन । अकर्मकधातुभिर्योगे देशः कालो भावो गंतव्योध्वा च कर्मसंज्ञक इत्यनेन वर्षद्वयमित्यस्य कर्मत्वं । शिवभूपः अधित्यकायामूर्ध्वभूमिकायां आनन्देन संयुत आसीत् । उपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधित्यकेत्युभयत्राप्यमरः ॥ १४ ॥

राजदुर्गेति । धर्मधूर्वहस्य धर्मधुरंधरस्य भटाः शिवभूपस्येति शेषः परे शत्रवः । अस्य परशब्दस्य सर्वनामता तु देशवाचकस्य परशब्दस्य शत्रौ औपचारिकः प्रयोगः । तदुक्तं मनोरमायां । देशवाचितया व्यवस्थाविषयेरेव परापरशब्दयोरुपचाराच्छत्रौ प्रतिवादिनि च प्रयोगः । राजदुर्गस्य शिखरात् सानुप्रदेशात् उपागतैः प्राप्तैः यन्त्रेभ्यो मुक्ता ये गुरुगोलकास्तैर्हताः सन्तः प्रायशो बाहुल्येन यमनिकेतनं यमगृहं उपाययुर्जग्मुः । अनवधानस्थिता यन्त्रगोलकाघातमृताः स्वर्गदौर्लभ्यात् यमगृहं बहवो गताः । केचित्तु युध्यमानाः स्वर्गमपि ययुरितिभावः ॥ १५ ॥

धान्यदार्वादीति । दुरात्मना अनेन धर्मधुरंधरेण धान्यं च दारूणि च आदियेषां तेषां मार्गः आनयनमार्गः रुद्धः अत्र प्रतिरोधविषये किं प्रतिकर्तव्यं का प्रतिक्रयाइति विशेषेण चिन्तयन् कृपाणः असिरस्यास्तीति कृपाणवान् राजा तस्य शिरः अवृश्चदिति द्वितीयश्लोकेनान्वयः १६ ॥

रात्राविति ॥ स शिवभूपो रात्रौ सर्वेषु सुप्तेषु सत्सु युद्धे विशारदैः कुशलैर्भटैः सहागत्य तस्य धर्मधुरंधरस्य शिरः अवृश्चत् छेदितवान् ॥ १७ ॥

---

१. 'सदा' पा० भे० । ५. 'व्यचिन्तयत्' पा० भे० । ६. 'कृपाणभृत्' पा० भे० ।

हतावशिष्टास्ते वीरा आगत्य यवनाय तत् ॥
कृतं सर्वं समाचख्युः शिवभूपतिसंभवं ॥ १८ ॥
न साहाय्यं न वा शौर्यं न कोशो न बहुज्ञता ॥
वृद्धेः क्षयस्य भूपानां दैवमेव हि कारणम् १९ ॥
इत्युत्वापि पुनः सोऽयं स्वीयमौर्ख्यं बलाधिकम् ॥
अब्दुल्लाख्यं यवनपमानीयोवाच चारदृक् ॥ २० ॥
सर्वेषु वीरेषु बलाधिकस्त्वं मतोऽसि मे वीरवराग्रगण्यः ॥
अतःस्वसेनासहितश्च यन्त्रैः प्रयाहि सार्धं शिवनामभूपम् ॥ २१ ॥

हतावशेषाइति । हतेभ्यः अवशिष्टा हतावशिष्टास्ते वीरा आगत्य शिवभूपतेः सकाशात् संभवं उत्पन्नं धर्मधुरंधरवधादिकं सर्वं वृत्तं यवनाय समाचख्युः कथयामासुः ॥ १८ ॥

एवं श्रुत्वा पराक्रमापेक्षया दैवस्य प्राबल्यं प्रतिपादयति । नेति । भूपानां राज्ञां वृद्धेः । सहायस्य भावः साहाय्यं सहायता । गुणवचनेत्यादिनाष्यञ् । कारणं न । शूरस्य भावः शौर्यं शूरत्वं कारणं न । कोशः अर्थराशिः । कोशोस्त्रीकुड्मलेखड्गपिधानेर्थौघदिव्ययो रितिशाश्वतः । कारणं न । बहुज्ञत्वं बहुत्वज्ञं कारणं न । किन्तु दैवमेव कारणं । दैवं दिष्टंभागधेयं हेतुर्नो कारणंबीजमित्युभयत्राप्यमरः । तथा क्षयस्य नसाहाय्यं सहायत्वाभावः न अर्थस्य न शब्दस्य सुप्सुपेतिसमासः । एवमग्रेऽपि वाइत्यथवा । अशौर्यमिति छेदः अशौर्यं शूरत्वाभावः वा न कोशः कोशाभावः वा न बहुज्ञता मूर्खत्वं कारणं न किन्तु दैवमेव कारणं हि निश्चयेन ॥ १९ ॥

इतीति । चार एवदृष्टिर्यस्य चारदृक् । तदुक्तं । गावः पश्यन्ति गन्धेन वेदैः पश्यंति वै द्विजाः । चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः । इति । चारद्वारा शिवभूपस्य बहुधा पराक्रमश्रवणाद्भीत इति भावः । सोऽयं विजयपुराधिपतिरिति पूर्वोक्तप्रकारेण उक्त्वापि दैवप्राबल्यं प्रतिपाद्यापि पुनर्दैवपरीक्षार्थं एव स्वस्य अयं स्वीयः तं । वृद्धाच्छः । वीरं बलेन अधिकं धुरंधरापेक्षयेत्यर्थः । अब्दुल्लाख्यमानीय उवाच उक्तवान् ॥ २० ॥

सर्वेष्विति । सर्वेषु वीरेषु मध्ये बलेनः शरीरशक्त्या अधिकः उत्कृष्टः असि । अतो वीरवरास्तेषां अग्रे गण्यतेऽसौ वीरवराग्रगण्यः । कर्मणियत् । यद्वा । धनगणं लब्ध्वा इति तद्धितो यत्प्रत्ययः । असि अतो मे मतो मान्योऽसि । मतिबुद्धिपूजार्थेभ्यश्च इति वर्तमानेक्तः । क्तस्यच वर्तमाने इति षष्ठी । अतः स्वसेनया सहितः सन् शिवनामभूपं प्रयाहि ॥ २१ ॥

---

७. 'हतावशेषाः' पा० मे० । ८. 'वृत्तं' पा० मे० । ९. 'वीरं' पा० मे० । १०. 'मतःसमे' पा० मे० ।

तथेति संभाष्य स वाजिसादिसहस्रयुक्तः पदगैश्चवीरैः ॥
यन्त्रैरुपेतो घनगर्जिताढ्यैः प्रकम्पयन् भूमितलं प्रतस्थे ॥ २२ ॥
यतो यतो याति ततस्ततोऽसौ विष्ट्या निगृह्णन् जनतां बलेन ॥
धनं तृणं काष्ठचयं च धान्यं हरन्प्रजानां[11] प्रययौ दुरात्मा ॥ २३ ॥
खट्वाशयानान्यवनान्विरक्तान् मद्येन मांसेन च पुष्टदेहान् ॥
वृत्तिं श्रितानाजगरीं नितांतं बह्वन्नभक्षान्मलमूत्रदिग्धान् ॥
साधून् स मत्वा दश तान्पुरस्तात्कृत्वाधिरूढान् द्विजवर्यबाहून् ॥
ययौ प्रजापीडनकृत्तरस्वी शिवप्रदेशं तरुसंघगुप्तम् ॥ *

सामैव पूर्वमचिरेण रिपौ प्रयोज्य-
मेवं विचिन्त्य यवनः स दयालुसंज्ञम् ॥
विप्रं स्वकार्यनिरतं रहिते जनेन
स्थाने जगाद वचनं वदतां वरिष्ठः ॥ २४ ॥
नानाविधैस्तरुवरैर्गिरिदुर्गमेत-
द्राच्छन्नमत्र पदगैः सततं स आस्ते ॥
यानं गजादिसहितस्य सुदुष्करं तद्
गत्वा त्वया स वचनैरनुनेय इत्थम् ॥ २५ ॥

तथेति । वाजिसादिनां सहस्राणि तैर्युक्तो वीरैः पदगैः । घनस्येव गर्जितं तेन आढ्यैर्यन्त्रैश्च उपेतः असौ यवनः तथेति तथास्तु इति संभाष्य उक्त्वा भूमितलं प्रकंपयन् सन् प्रतस्थे ॥ २२ ॥

यत इति । दुरात्मा दुष्टचित्तोऽसौ यतो यतो यस्मात् यस्मात् ग्रामात् याति अग्रे गच्छति ततस्ततो ग्रामात् । नित्यवीप्सयोरिति वीप्सायामुभयत्रापि द्वित्वं । प्रजानां धनं तृणं काष्ठचयं धान्यं च हरन् तद्वाहनार्थं जनतां जनसमूहं विष्ट्या [अमूल्यकर्मकरणे विष्टिरिति मुकुटः] निगृह्णन् पीडयन् सन् । गृह्णातेः शतरिश्नाभ्यस्तयोरात इत्यातोलोपः । ययौ ॥ २३ ॥

सामैवेति । वदतां वक्तृणां मध्ये वरिष्ठः श्रेष्ठः स यवनो रिपौ शत्रौ पूर्वं सामैव सान्त्वमेव अचिरेण शीघ्रं प्रयोज्यं इत्थं अनेन प्रकारेण विचार्य स्वस्य कार्ये निरतं दयालुसंज्ञं विप्रं जनेन रहिते स्थाने एकान्ते वचनं जगाद ॥ २४ ॥

नानेति । हे विप्रेति शेषः । एतत्पुरोवर्त्ति गिरिदुर्गं नानाविधैरनेकप्रकारैस्तरुवरैस्तरुश्रेष्ठराच्छन्नं व्याप्तं । स शिवभूपः अत्र गिरिदुर्गे सततं निरन्तरं आस्ते न कदाचित् बहिर्निर्गच्छतीति भावः । गजा आदिर्येषां ते गजादयस्तैः सहितस्य

---

११. 'जनानां' पा० भे० । * इदं युग्मं एकस्मिन्नेव पुस्तके दृश्यते नान्येषु ।

विजयाधिपतिर्वीरो गुणान् बहुविधांस्तव ॥
श्रुत्वा [12]सं तुष्टधीर्मेने त्वया संधिर्हितः [13]सह ॥ २६ ॥
तेन त्वत्संधिकामेन यवनो यो विसर्जितः ॥
स आगतोऽस्ति निकटे तद्वचःश्रुणु भूपते ॥ २७ ॥
नर्मदातीरमारभ्य रामनाथावधि त्वया ॥
राज्यं विधेयं सेनेयं मदीया स्यात्तवानुगा ॥ २८ ॥
इत्याज्ञा यवनेशस्य विजयाधिपतेस्त्वयि ॥
सार्वभौमाज्ञया काष्ठां दक्षिणामधितिष्ठतः ॥ २९ ॥
एकाकी त्वं पुरो याहि मयाप्यागम्यते तथा ॥
आवयोः संगमः प्रेष्ठो [14]भविता चिरतः सखे ॥ ३० ॥

मे यानं गमनं सुतरां दुष्करं तत्तस्मात् त्वया गत्वा स शिवभूप इत्थं वक्ष्यमाणप्रकारेण अनुनेयः प्रार्थनीयः ॥ २५ ॥

विजयाधिपतिरिति । वीरो विजयस्य पुरस्य अधिपतिस्तव बहुविधान् बहुप्रकारान् गुणान् श्रुत्वा । तुष्टा धीर्यस्य तथोक्तः सन् त्वया सह सन्धिर्मैत्री हितो युक्त इति मेने मन्यते स्म ॥ २६ ॥

तेनेति । तव सन्धिः त्वत्सन्धिस्तं कामयतेऽसौ तेन त्वत्सन्धिकामेन तेन विजयपुराधिपेन यो यवनो विसर्जितः प्रेषितः स निकटे समीपे आगतोऽस्ति । हे भूपते तद्वचः तद्वाक्यं श्रुणु ॥ २७ ॥

नर्मदेति । हे भूप त्वया नर्मदाया नद्यास्तीरमारभ्य रामनाथो रामेश्वरः सोऽवधिर्यथा तथा राज्यं विधेयं कर्तव्यं । इयं अधुना प्रेषिता सेना तव अनुगच्छतीति अनुगा स्यात् । कर्तृकर्मणोः कृतीति षष्ठी ॥ २८ ॥

इत्याज्ञेति । हे नृप सार्वभौमस्य इन्द्रप्रस्थाधिपस्याज्ञया दक्षिणां काष्ठां दिशं । दिशस्तुककुभः काष्ठा इत्यमरः । अधितिष्ठत आस्थितस्य सार्वभौमस्यापि संमतिरस्तीति भावः । अधिपूर्वात्स्थाधातोःशतरितिष्ठादेशः । अधिशीङ्स्यासां कर्मेतिकर्मत्वं । यवनेशस्य विजयपुराधिपतेः त्वयि त्वद्विषये इति पूर्वोक्तप्रकारेण आज्ञा अस्तीति शेषः ॥ २९ ॥

अवशिष्टं वक्तव्यांशमाह । एकीकीति । हे सखे त्वं पुरः अग्रभागे तकाकी असहायः । एकादाकिनिच्चासहायेइतिआकिनिच् । याहि आगच्छ । मयापि तथा एकाकिनैव आगम्यते । आवयोः नौ अतिशयेन प्रिय इतिप्रेष्ठः । प्रेयानप्रियशब्दादिष्टनिप्रियस्थिरेत्यादिनाप्रियशब्दस्यप्रादेशः । सङ्गमः समागमः अचिरतः शीघ्रं भविता ।

१२. ' ०त्वातितु० ' पा० भे०. । १३. ०धिर्धीयताम् ' पा० भे० । १४. ' प्रीत्या ' पा० भे० ।

इत्थं तथा भूमिदेव गत्वा तत्र सविस्तरम् ॥
चातुर्येण वचो ब्रूहि यथासौ मोहितोभवेत् ॥ ३१ ॥
संगमे भुजयोर्मध्ये धृत्वा पेष्टास्म्यहं रिपुम् ॥
इदं गुह्यं त्वयान्यत्र नैव वाच्यं कदाचन ॥ ३२ ॥
उक्त्वा तथेति गत्वासौ शिवभूपस्य सन्निधिम् ॥
सर्वं तद्वर्णयामास सङ्गमे भुजयोर्विना ॥ ३३ ॥
अत्रोत्तरं प्रवक्ष्याम इत्युक्त्वान्तर्गतो नृपः ॥
सर्वान्मन्त्रिण आहूय विप्रवाक्यमवर्णयत् ॥ ३४ ॥
सचिवसंमतिमाशु समेत्य तं तरुतलाश्रितमाश्रितपालकः ॥
[१५]समवदत्प्रजपंस्तमजं स्रजा करगया स्फटिकाक्षसमुत्थया ॥ ३५ ॥
अदृष्टं दृश्यते स्पष्टं विप्र मे सुफलप्रदम् ॥
सर्ववर्णगुरौ विप्रे त्वयि माध्यस्थ्यमत्र यत् ॥ ३६ ॥

अनद्यतने लुट् । श्व आगन्तव्यमिति भावः ॥ ३० ॥

इत्थमिति । हे भूमिदेव ब्राह्मण त्वं तत्र गिरिदुर्गे गत्वा इत्थं पूर्वोक्तं वचश्चातुर्येण सविस्तरं तथा ब्रूहि यथासौ राजा मोहितो भवेत् ॥ ३१ ॥

समागमानन्तरं कर्तव्यार्थमाह । सङ्गम इति । अहं सङ्गमे समागमे सति रिपुं राजानं भुजयोर्मध्ये धृत्वा पेष्टास्मि चूर्णयिष्यामि । त्वयेदं गुह्यं अन्यत्र नैव वाच्यं नैव वक्तव्यं न प्रकटितव्यमिति यावत् ॥ ३२ ॥

उक्त्वेति । असौ ब्राह्मणः तथेति तथास्तु इति उक्त्वा शिवभूपस्य सन्निधिं समीपप्रदेशं गत्वा सङ्गमे भुजयोरित्यर्धश्लोकार्थं विना तत्सर्वं पूर्वोक्तं वर्णयामास शशंस ॥ ३३ ॥

अत्रेति । नृपः अत्र त्वद्वचने उत्तरं प्रवक्ष्यामः कथयिष्यामः । सचिवाभिप्रायेणोत्तरदानार्थं बहुवचनं । इति उक्त्वा अन्तः गृहमध्यं गतः सन् सर्वान् मन्त्रिण आहूय विप्रवाक्यं अवर्णयत् ॥ ३४ ॥

सचिवेति । आश्रितानां पालकः स शिवः सचिवानां संमतिं समेत्य प्राप्य तरोः न्यग्रोधस्य तले श्रितं स्थितं । द्वितीयाश्रितेत्यादिनासमासः । करगया करस्थया स्फटिकाक्षेभ्यः स्फटिकमणिभ्य उत्थया उत्पन्नया स्रजा मालया अजं विष्णुं प्रकर्षेण जपन्तं भगवद्भक्तमित्यर्थः । तं ब्राह्मणं अवदत् उक्तवान् ॥ ३५ ॥

अदृष्टमिति । हे विप्र मे अदृष्टं दैवं सुफलं प्रददातीति सुफलप्रदं स्पष्टं असंदिग्धं दृश्यते भासतेइत्यर्थः । यद्यस्मात् हेतोः सर्ववर्णानां गुरौ विप्रे त्वयि अत्र अस्मिन् यवनसंगतिरूपे कार्ये मध्यस्थस्य कर्म माध्यस्थ्यं अस्तीति शेषः ॥ ३६ ॥

१५. 'तमवदत्' पा० भे० ।

ब्रह्मंस्तत्कपटं किंचिद्वर्तते यदि तद्वद ॥
अहं सराज्यस्त्वद्दासः सत्यमस्मि द्विजाधिप ॥ ३७ ॥
एवं वदति भूपाले द्विजोऽश्रुपरिपूरितः ॥
सर्वं शनैस्तत्कपटं कथयामास विस्तरात् ॥ ३८ ॥
राजा प्रोवाच हे विप्र तत्राप्यस्ति प्रतिक्रिया ॥
त्वमद्य गत्वा तं ब्रूहि भविता नौ समागमः ॥ ३९ ॥
इत्युक्त्वा तं नमस्कृत्य संपूज्य च धनादिभिः ॥
ययौ राजा दयालुश्च प्रायात्तं यवनाधिपम् ॥ ४० ॥
मनोनुकूलं सकलं कृतं त्वद्धितमिच्छता ॥
मयेति विप्रः प्रोवाच यवनोऽपि जहर्ष च ॥ ४१ ॥
पूजयित्वार्चितां देवीं देवैः सुकुसुमादिभिः ॥
राजाप्यचिन्तयच्चित्ते धौर्त्यमत्र हितावहम् ॥ ४२ ॥

ब्रह्मन्निति । हे ब्रह्मन् हे ब्राह्मण । ब्राह्मणपर्यायो ब्रह्मन् शब्दः । किंचित् तस्य यवनस्य कपटं तत्कपटं वर्तते यदि अस्ति चेत् तर्हि तत्कपटं वद । हे द्विजाधिप ब्राह्मणश्रेष्ठ अहं राज्येन सहितः सराज्यः त्वद्दासः अस्मि सत्यं ॥ ३७ ॥

एवमिति । द्विजः भूपाले राज्ञि एवं पूर्वोक्तप्रकारेण वदति सति अश्रुभिः नेत्रोदकैः परिपूरितः युक्तः सन् तस्य यवनस्य तत्सर्वं कपटं संगमे भुजयोरित्यर्धोक्तं शनैः विस्तरात् कथयामास ॥ ३८ ॥

राजेति । हे विप्र तत्रापि तस्मिन्नपि यवननिश्चितकर्मणि प्रतिक्रिया प्रतीकारः अस्ति अतश्चिन्ता न कर्तव्येतिभावः । त्वं अद्य अस्मिन् दिने गत्वा न तु दिनान्तरे इत्यर्थः । गत्वा नौ आवयोः सङ्गमो भविता इति ब्रूहि इति राजा शिवभूपः प्रोवाच उक्तवान् ॥ ३९ ॥

इतीति । राजा इति पूर्वोक्तप्रकारेण उक्त्वा तं विप्रं नमस्कृत्य धनादिभिः आदिशब्देन वस्त्रभूषणैः संपूज्य सम्यक् पूजयित्वा ययौ स्वगृहं प्रविष्ट इत्यर्थः । दयालुश्च दयालुरपि तं यवनाधिपं प्रायात् नगाम यातेर्लङ् ॥ ४० ॥

मन इति । त्वद्धितं इच्छता मया सर्वं संपूर्णं तत् त्वदुक्तं मनसः अनुकूलं मनोनुकूलं कृतं । त्वदुक्तप्रकारेण सर्वं चातुर्येण साधितमित्यर्थः । इति विप्रः प्रोवाच । यवनोऽपि जहर्ष हृष्टवान् ॥ ४१ ॥

पूजेति । राजापि देवैः अर्चितां पूजितां । संकटसमये इतिभावः । देवीं शोभनैः कुसुमादिभिः पूजयित्वा । स्वकार्यसिद्धावानुकूल्यार्थमित्यर्थः । अत्र शत्रौ धौर्त्यं धूर्ततं हितं भावहतीति हितावहं हितकरं इति चित्ते अचिन्तयत् ज्ञातवान् । देवी-

१६. 'वर्णयामास' पा० भे० । १७. 'प्रागात्तं' पा० भे० । १८. 'तत्सर्वं' पा० भे० ।

धूर्ते तु धौर्त्यं सुधिया विधेयं[१९] सदार्जवं कार्यकरं न शत्रौ ॥
ज्वरेण कट्वी रसना भवेच्चेद्धितावहा स्यात्कटुकी सिता न ॥ ४३॥
प्रतापदुर्गस्य पुरःप्रदेशे स्थलं सुविस्तीर्णमतीव रम्यं ॥
चकार भूपो यवनप्रियार्थं नानाविधैरास्तरणैरुपेतं[२०] ॥ ४४ ॥
उल्लोचसंघैरपि तोरणैश्च मुक्ताफलानां प्रकरैरुपेतम् ॥
सुधोपलिप्तामलराजगेहसमं स चक्रे पटवेश्म तत्र ॥ ४५ ॥
सैन्यं स्वकीयं सकलं विभूषावस्त्रैः समभ्यर्च्य स सैन्यपालम् ॥
रहस्यवोचद्यवने हतेऽत्र यन्त्रप्रणादो भविता प्रतापे ॥ ४६ ॥
यदा तदा दुर्जनसैन्यसंघं कक्षं शिखीवाशु नय त्वमन्तम् ॥
यदर्चितोऽसीह विभूषणाद्यैस्तस्यैष कालः समुपागतोऽस्ति॥ ४७ ॥

प्रसादात् इति भावः ॥ ४२ ॥

धूर्तइति । सुधिया सुबुद्धिना धूर्ते शत्रौ धौर्त्यं धूर्तत्वं सदा सर्वकालं न तु कदाचिदिति भावः । विधेयं कर्तव्यं । आर्जवं सरलता कार्यस्य करं कार्यकरं न भवतीति शेषः । आर्जवं हि कुटिलेषु न नीतिरिति कामन्दके । उक्तमर्थमर्थान्तरन्यासेन द्रढयति । रसना जिह्वा ज्वरेण कट्वी । ओतोगुणवचनादितिङीप् । भवेच्चेत्तर्हि कटुकी कटुरोहिणी हितावहा कटुत्वनाशनी स्यात् । सिता शर्करा न । पित्तज्वरे वक्त्रस्य कटुत्वं माधवनिदाने उक्तं । प्रलापो वक्त्रकटुतेति ॥ ४३ ॥

प्रतापेति । भूपः प्रतापस्य दुर्गस्य पुरःप्रदेशे अग्रभूमौ अधित्यकायामिति यावत् । सुतरां विस्तीर्णं प्रशस्तं नानाविधैः नानाप्रकारैः आस्तरणैः उपेतं युक्तं अत एव अतीव रम्यं रमणीयं स्थलं यवनस्य प्रियायेति यवनप्रियार्थं चकार कृतवान् ॥ ४४॥

उल्लोचेति । स शिवभूपः तत्र स्थले उल्लोचानां वितानानां संघैः समूहैः । अस्त्री वितानमुल्लोच इत्यमरः । उपेतं युक्तं । मुक्ताफलानां मौक्तिकानां प्रकरैः समूहैः उपलक्षितैः तोरणैर्बहिर्द्वारैः । तोरणोऽस्त्री बहिर्द्वारमित्यमरः । उपेतं सुधया चूर्णेन उप समंताल्लिप्तं अमलं यद्राजगेहं प्रासादः तेन समं तुल्यं पटवेश्म वस्त्रगृहं कृतवान् ॥ ४५ ॥

सैन्यमिति । स शिवभूपः सकलं संपूर्णं स्वस्येदं स्वकीयं । स्वशब्दादिदमर्थेछप्रत्यये कुगागमः । सैन्यं सेनां विभूषाश्च वस्त्राणि च तैः । अभ्यर्हितत्वात्विभूषाशब्दस्य पूर्वनिपातः । समभ्यर्च्य सम्यक् पूजयित्वा सैन्यंपालयतीति सैन्यपालस्तं सेनापतिं रहसि एकांते इत्याह । इति किं । अत्र वसनगृहे यवने हते सति यदा प्रतापदुर्गे यन्त्रस्य प्रणादः शब्दः भविता तदेत्युत्तरश्लोकेनान्वयः ॥ ४६ ॥

यदेति । तदा त्वं दुर्जनस्य सैन्यस्य संघं शिखी अग्निः कक्षमिव तृणमिव अन्तं

१९. 'प्रयोज्यं' पा० भे० । २०. अयंश्लोक क्वचिन्नदृश्यते ।

अहं त्वदीयोऽस्मि सराज्यकोशः[21] कालो बलीयान् कुटिलो ममायम्॥
शत्रुर्महान्भीमबलोऽहमल्पो दुर्गैव देवी शरणं न चान्यः ॥ ४८ ॥
तस्याः प्रसादादहमेनमद्य निहन्मि चिन्ता न हि काचिदत्र॥
तद्वाहिनीं त्वं शमयाशु वीर वीरैर्भटैः पातितवीरसंघैः ॥ ४९ ॥
इत्थं स सेनाधिपतिं प्रबोध्य हस्ताङ्गुलौ व्याघ्रनखं निबध्य ॥
वामे करे सूक्ष्मतरां च शस्त्रीं निधाय देवीं प्रणमन्प्रयातः ॥५०॥
हे देवि देववरवन्दितपादपीठे[22][23] सर्वाश्रिते[24] श्रितजनावनहेतुदेहे ॥
बद्धो मया परिकरो विनिहन्तुमेनं दुष्टं जगज्जननि तं सफलं कुरुष्व ॥५१॥

नाशं नय प्रापय । इदं सैन्यविनाशनं त्वयैवावश्यं कर्तव्यमिति सहेतुकं प्रतिपादयति । इह मदीये कुले यत् यस्मात् कार्यात् हेतोः विभूषणादैः अर्चितः पूजितोऽसि तत् कार्यस्य शत्रुहननरूपस्य अयं कालः समुपागतः प्राप्तोऽस्ति ॥ ४७ ॥

अहमिति । राज्यं च कोशश्च राज्यकोशौ ताभ्यां सहितः सराज्यकोशः अहं त्वदीयोऽस्मि । अस्मिन् रिपौ हते मदीयः अर्थराशिः मदीयं राज्यं मदीयः अयं देहोऽपि त्वदधीनः एव स्यादिति भावः । अयं वर्तमानः अतिशयेन बलीति बलीयान् दुर्धरः । द्विवचन विभज्येत्यादिना इयसुन् । मम मत्संबद्धः कालः कुटिलः विपरीतः दृश्यते इतिशेषः । कालवैपरीत्ये हेतुमाह । भीमं भयंकरं बलं शक्तिः सैन्यं वा यस्य तथोक्तः शत्रुर्महान् उच्चशरीरः । अहं अल्पशरीरोस्मि । दुर्गैव देवी शरणं रक्षणकर्त्री । शरणं गृहरक्षित्रोरितिविश्वः । अन्यो न च ॥ ४८ ॥

तस्याइति । अहं तस्या देव्याः प्रसादात् । एनं शत्रुं अद्य निहन्मि मारयामि । अत्र मारणविषये काचित् चिन्ता न । हीति निश्चये । हे वीर त्वं तस्य वाहिनीं सेनां ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूरित्यमरः । पातिताः वीरसंघाः यैस्तैर्वीरैः भटैश्च दर्शितपराक्रमाः वीराः संभावितपराक्रमाः भटास्तैः आशु शमय नाशय ॥ ४९ ॥

इत्यमिति । स शिवभूपः इत्थं पूर्वोक्तप्रकारेण सेनाधिपतिं प्रबोध्य हस्तस्य अङ्गुलौ व्याघ्रस्य नखं निधाय धृत्वा वामे करे सूक्ष्मतरां शस्त्रीं छुरिकां । स्याच्छस्त्रीचासिपुत्रीं च छुरिकाचासिधेनुकेत्यमरः । निधाय धृत्वा देवीं दुर्गां प्रणमन् नमस्कुर्वन् सन् प्रयातः गतः ॥ ५० ॥

एकेन देवीप्रार्थनामाह । हे देवीति । देववरैः इन्द्रादिभिः पूजितं पादपीठं यस्यास्तथोक्ते हे देवि । सर्वैः जनैः श्रिते सेविते । यद्वा । सर्वाश्रिता सर्वाश्रिता तत्संबुद्धौ हे सर्वाश्रिते । द्वितीयाश्रितेति समासः । या देवी सर्वभूतेषु विष्णुमायेतिशब्दिता इत्यादिनासर्वभूते स्थितत्वं मार्कण्डेयपुराणे देवीमाहात्म्ये प्रतिपादितं । श्रितजनस्य अवनं

---

२१. 'कोशौ' पा० भे० । २२. 'पूजित' पा० भे० । २३. 'पद्मे' पा० भे० । २४. 'सर्वाश्रिते' पा० भे० ।

नात्युच्चो नाति नीचः कमलदलनिभाक्षोऽतिपीनोन्नतांसो ॥
गौराङ्गो गूढजत्रुर्मनसि च जनयन्[२५]योषितां कामदेवम् ॥
निर्भीकः सिंहयानोऽरुणकरचरणः कण्ठभूषाधिभूषो
मृद्वंघ्र्यानद्धरक्ताजिनविहितपदत्राणकोऽसौ प्रतस्थे ॥ ५२ ॥
भटाग्रणीभ्यां रणदुर्जयाभ्यां सपट्टिशाभ्यां सहितो भटाभ्याम् ॥
ययौ नृपो धैर्यधरस्तरस्वी निजप्रपालो ललितांबरोऽसौ ॥ ५३ ॥
लोलालम्बितनीललोहितकचव्रातार्धमूर्धाधृता-
रक्तोष्णीषपटो नटोऽतिविततश्मश्रूणि संमार्जयन्[२६] ॥
उच्चैः स्थूलतरः सुकंचुकबृहद्भागेन भूमिं स्पृशन्
स्वान्सर्वान्यवनान्विहाय पुरतस्तूर्णं तथासौ ययौ ॥ ५४ ॥

रक्षणं तस्य हेतुः देहः अवतारो यस्यास्तयोक्तं । मया एनं दुष्टं हन्तुं परिकरः उपक्रमः । उपक्रमः परिकर इति हैमः । बद्धः कृतः । यद्वा । परिकरो नाम उत्तरीयेण दृढं कटिप्रदेशवेष्टनं तं अमुं परिकरं सफलं अमोघं कुरुष्व ॥ ५१ ॥

अथ यत्राकृतिस्तत्र गुणा वसन्तीति स्मरणादस्याकृतिवर्णनपुरःसरं प्रस्थानमाह । नेति । न अति अत्यन्तं उच्चः नात्युच्चः । न अर्थस्य न शब्दस्य सुप्सुपेति समासः । एवमग्रेऽपि । नअति अत्यन्तं नीचस्तयोक्तः । कमलस्य दले पत्रे ताभ्यां निभे तुल्ये अक्षिणी यस्य तयोक्तः । बहुव्रीहौ सक्थ्यक्ष्णोरित्यादिना समासान्तःषच् । अति अत्यन्तं पीनौ पुष्टौ अंसौ स्कन्धौ यस्य तयोक्तः । गौराणि अङ्गानि अवयवा यस्य तयोक्तः । करौ च चरणौ च करचरणं । आरक्तं करचरणं यस्य तयोक्तः । कण्ठभूषां अधिभूषयतीति कण्ठभूषाधिभूषः । मूलविभुजादित्वात्कः । अत एव योषितां मनसि कामदेवं विशेषेण जनयति विजनयन् । लटः शत्रादेशः । एतैर्विशेषणै राजचिन्हानि प्रदर्श्य प्रकृतो युक्तं पराक्रमप्रतिपादकं वेषमाह । निर्गता भीर्यस्मात् स निर्भीकः । शेषाद्विभाषेति कप् । भीशब्दस्य स्त्रीप्रत्ययान्तत्वाभावाद्ह्रस्वोन । सिंह इव यानं गमनं यस्य तयोक्तः । मृद्वोः अंघ्र्योः आ समन्तात्नद्धे धृते रक्तेन अजिनेन विहिते ये पदत्राणे उपानहौ ते येन तयोक्तः । समासान्तः कप् । असौ शिवः प्रतस्थे ॥ ५२ ॥

भटाग्रणीभ्यामिति । रणे संग्रामे दुर्जयाभ्यां अत एव भटेषु अग्रणीभ्यां श्रेष्ठाभ्यां पट्टिशाभ्यां सहिताभ्यां भटाभ्यां शूराभ्यां सहितो युक्तः । धैर्यस्य धरः । पचादित्वादच् । तरस्वी बलवान् अस्मायामेधास्रजोविनिः । निजान् प्रकर्षेण पालयति इति तयोक्तः । कर्मण्यण् । ललितानि अंबराणि यस्य स शिवभूपः अग्रे ययौ नगाम ॥ ५३ ॥

लोलेति । लोलाश्चंचलाः । लोलश्चलसतृष्णयोरितिविश्वः । आ समन्ताल्लंबिता

२५. 'विजयन्' पा० भे० । २६. 'संदर्शयन्' पा० भे० ।

सहस्रशः समागत्य प्रेक्षकाश्चेदमब्रुवन् ॥
अपर्वणि दिवा भूमौ शशिराहुसमागमः ॥ ५५ ॥
देवदेव जगन्नाथ भक्तानामभयङ्कर ॥
यदस्मदीयं सुकृतं तेन रक्ष नराधिपम् ॥ ५६ ॥
मत्तमातङ्गकलभयोर्योगो भवति यादृशः ॥
तादृशोऽयं द्वयोर्योगो न विद्मोऽग्रे कथं भवेत् ॥ ५७ ॥
पातिव्रत्यं यदस्माकमाजन्मपरिषेवितं ॥
तस्य पुण्येन भगवान्राजानंरक्षताद्धरिः ॥ ५८ ॥

नीलाः कृष्णा लोहिता आरक्ताः कचानां केशानां व्राताः समूहा यस्मिन् मूर्ध्नः अर्धं अर्धमूर्धा तस्मिन्। अर्धं नपुंसकमितिसमासः। परवल्लिंगद्वन्द्वतत्पुरुषयोरितिपरपदस्यैवलिंगं। आ समन्तात् धृतौ रक्तं उष्णीषं पटः उत्तरीयवस्त्रं च येन स तथोक्तः अत एव नटो नाम नटवेशवान्। विततानि श्मश्रूणि मुखरोमाणि संमार्जयन् स्पृशन् दुःसाध्योऽपि शत्रुः सुसाध्यत्वं गमित इति संतोषादिति भावः। उच्च उन्नतः अतिशयेन स्थूल इति स्थूलतरः। शोभनस्य कंचुकस्य बृहता भागेन प्रदेशेन भूमिं स्पृशन् असौ यवनः स्वान् स्वकीयान् सर्वान् यवनान् विहाय अपसार्य तूर्णं शीघ्रं पुरतः अग्रभागे तया शिवभूपागमनप्रकारेण एक एव इतिभावः। ययौ जगाम। शिवभूपोऽपि समानीतौ वीरौ परित्यज्यैव पुरोगत इति ज्ञेयम् ॥ ५४ ॥

अन्येप्रोचुः। मत्तेति ॥ मत्तो मातङ्गः करी कलभः करिशावकः तयोर्योगो यादृशः अननुरूपः भवति तादृशोऽयं द्वयोर्योगो नात इतिशेषः। अग्रे युद्धसमये कथं भवेत् तन्नाविद्मः न जानीमः ॥ ५५ ॥

सहस्रशइति। सहस्रशः बहुसहस्रसंख्याकाः। बहुल्पार्थादित्यादिनाशस्। प्रेक्षन्ते इति प्रेक्षकाः। कर्तरि ण्वुल् समागत्य इदं वक्ष्यमाणं अब्रुवन् अवोचन्। अपर्वणि पूर्णिमेतरतिथौ तत्रापि दिवा दिवसे तत्रापि भूमौ शशिनश्चन्द्रस्य राहोश्च समागमो दृश्यते इति शेषः ॥ ५६ ॥

देवेति। हे देवदेव हे जगन्नाथ हे भक्तानां अभयं करोतीति अभयंकर। मेघर्तिभयेषु कृञ इत्यनेन तदन्तात् अभयशब्दात् खार्चे मुमागमः। कर्तृकर्मणोः कृतीति षष्ठी। यदस्माकमिदं अस्मदीयं। वृद्धाच्छः। सुकृतं पुण्यं तेन नराधिपं रक्ष पालय ॥ वने रणे शत्रुजलाग्निमध्ये। महार्णवे पर्वतदुर्गभूमौ। सुप्तं प्रमत्तं विषमस्थितंवा। रक्षन्तिपुण्यानि पुराकृतानि ॥ इतिवचनादस्मिन् संकटे पुण्यमेव रक्षकं। राज्ञि पुण्यमस्ति नवेतिसंदिह्य स्वपुण्यदानेन राजरक्षणार्थं श्रीविष्णुं प्रार्थयामासुरित्यर्थः ॥ ५७ ॥

स्त्रियऊचुः। पातिव्रत्यमिति। अस्माकं यत् जन्म अभिव्याप्येति आजन्म जन्मप्रभृति परिषेवितं आचरितं। परिनिविभ्य इत्यादिना षत्वम्। पतिव्रतानां कर्म पातिव्रत्यं पति-

आलिङ्गनक्षण इभं मृगराडिवैनं
धृत्वा नृपस्य स शिरःप्रविधाय बाह्वोः ॥
तस्थौ नृपोऽपि बलवान्नखतोऽस्य कुक्षी
शक्त्याँ विभेद विशिखो ह्यवनौ पपात ॥ ५९ ॥
जीवाख्य वीरवरराट् त्वरया स तस्य
च्छित्त्वा शिरो नृपगिरिं प्रययौ नृपश्च ॥
यन्त्रप्रणादमधिगम्य शिवस्य वीराः
सर्वेऽपि योद्धुमुपजग्मुरमुष्य सेनाम् ॥ ६० ॥
हत्वा तं यवनं तस्य श्रियं हृत्वा नृपोत्तमः ।
गत्वा निजं राजगिरिमवसत् सुखमक्रमः† ॥ १ ॥
॥ इति श्री शिवकाव्ये पुरुषोत्तमपण्डितविरचिते द्वितीयश्चमत्कारः ॥

॥ श्रीगणेशायनमः ॥

शिवनृपस्य तु वीरवरास्तदा तुरगिणो रथिनो गजिनस्तथा
विविधहेतिविभूषितपाणयः प्रतिययुः सशराः सशरासनाः ॥ १ ॥

व्रताधर्मः । मृगवचनब्राह्मणादिभ्यइत्यादिनाकर्मार्थेष्यञ् । अस्तीतिशेषः । भगवान् हरिस्तस्यपातिव्रत्यस्यन पुण्येन राजानं रक्षतात् रक्षतु ॥ ५८ ॥

आलिंगनेति । स यवनो मृगराट् सिंह इभमिव आलिंगनस्य क्षणे समये एनं राजानं धृत्वा नृपस्य शिरः बाह्वोर्मध्ये प्रविधाय दृढं धृत्वा तस्थौ। बलवान् नृपोऽपि अस्य यवनस्य कुक्षौ कुक्षिप्रदेशौ । नखेनेति नखतः।सार्वविभक्तिकस्तसिः। व्याघ्रवन् खेनेत्यर्थः। शक्त्या च विभेद चिच्छेद । हि यस्मात् भेदनात्विगता शिखा यस्मात्स विशिखो यवनोऽपि अवनौ पपात पतितवान् ॥ ५९ ॥

जीवाख्यइति । जीव इति आख्या यस्य स जीवाख्यः वीरवरेषु राजतेऽसौ वीरवरराट् तस्य यवनस्य शिरः त्वरया छित्त्वा नृपगिरिं राजगिरिं प्रययौ । नृपश्च शिवभूपोपि प्रययौ॥ शिवस्य वीरा यन्त्रस्य प्रणादं प्रकृष्टं शब्दं पूर्वसंकेतितमित्यर्थः। अधिगम्य ज्ञात्वा अमुष्य यवनस्य सेनां योद्धुं उपजग्मुः ययुः ॥ ६० ॥

इतिश्रीशिवकाव्यव्याख्यायां काव्यप्रकाशिकायां स्वकृतायां द्वितीयश्चमत्कारः ॥

॥ श्रीगणेशायनमः ॥

शिवेति। तदा यन्त्रशब्दश्रवणक्षेण विविधाभिः हेतिभिः आयुधैः विभूषिताः पाणयो येषां ते तथोक्ताः । हेतिर्ज्वालाङ्कुशायुधे इत्यमरः । तथा सशराः सशरासनाः सधनुषः

---

२७. 'शक्त्या' पा० भे० । † अधिकोयं श्लोकःक्वचित्

पदचरा अपि यन्त्रपुरःसराः सुरविमाननिवेशनहर्षिताः
कवचिनो विविधायुधधारिणो रणविनिर्जितशत्रुचया ययुः ॥ २ ॥
यवनवर्यचमूपतयस्त्विदं चरमुखैरवगम्य सुविस्तरम्
भयविकम्पितपाणिपदादयोऽग्रिमविधावतिमन्दधियोऽभवन् ॥ ३ ॥
अयुतसंख्यतुरंगमसादिनः करिगता विशिखाधिपतेश्च ते
शकटवेशितयन्त्रततीः पुरः किल विधाय भटा अवतस्थिरे ॥ ४ ॥
उभयसैन्यसमुत्थितरेणुभिर्दशदिशो नितरां परिपूरिताः
दिनकरो जलदैरिव संवृतः समभवद् घटिकाद्वयमावृतः ॥ ५ ॥
करिवरैरसितैस्तुरगैः सितै रविकरोद्गतभैः करवालकैः
समरभूः सतडिद्घनसंवृताम्बररुचं सकलानुचकार सा ॥ ६ ॥

तुरगाः सन्ति येषां ते तुरगिणः अश्वारोहाः रथिनः रथारोहाः गजिनः गजारोहाः। मत्वर्थीय इनिः सर्वत्र । शिवनृपस्य वीरवराः वीरश्रेष्ठाः प्रतिययुः प्रतिजग्मुः ॥ १ ॥

पदेति । यन्त्राणि तोफाः पुरःसराः येषां ते तथोक्ताः । सुरविमानेषु निवेशनेन कर्त्रा हर्षिताः हर्षं प्रापिताः। अपुनरावर्तिन इति भावः। कवचिनःवर्मधारिणः विविधायुधानि धारयन्ति ते तथोक्ताः। रणे विनिर्जिताः शत्रुचयाः यैस्ते तथोक्ताः। पदाभ्यां चरन्ति ते पदचराः पदातयोऽपि । कृत्योहेतुताच्छील्यानुलोम्येष्वितिताच्छील्येद्योत्येटः प्रत्ययः। ययुः जग्मुः ॥ २ ॥

यवनेति । यवनवर्यस्य चमूपतयः सेनापतयस्तु इदं यवनाधिपहननं शिवनृपसेनागमनं च चरमुखैः दूतमुखैःसुविस्तरं यथा तथा अवगम्य ज्ञात्वा भयेन विकंपिताःपाणिपदादयःअवयवा येषां ते तथाभूताः सन्तः। अग्रेभवः अग्रिमः अग्रादिपश्चाड्डिमच्इति डिमच्प्रत्ययः। अग्रिमो यो विधिः तत्र अति अत्यन्तं मन्दधियः अभवन् ॥ ३ ॥

अयुतेति । अयुतं दशसहस्राणि संख्या येषां ते च ते तुरंगमसादिनश्च अयुतसंख्यतुरंगमसादिनः अश्वारोहाः करिगताश्च विशिखाधिपतेः ते भटाः शकटेषु वेशिताः स्थापिताः यन्त्रततीः यन्त्रसमूहान् पुरः विधाय कृत्वा अवतस्थिरे स्थिताः। समवप्रविभ्यस्थ इत्यात्मने पदं । इदानीं युद्धमेव वरं इति निश्चित्य युद्धोद्योगं चक्रुरिति भावः ॥ ४ ॥

उभयेति । दशदिशः उभये च ते सैन्ये च उभयसैन्ये ताभ्यां समुत्थिता ये रेणवः तैः कर्तृभिः नितरां अत्यंतं परितः पूरिताः कर्मणिक्तः। अतः तैः आवृतो व्याप्तो दिनकरः सूर्यः घटिकाद्वयं जलदैः मेघैः संवृत इवेत्युत्प्रेक्षा समभवत् जातः ॥ ५ ॥

करिवरैरिति । करिवरैः गजोत्तमैः असितैः कृष्णैः सितैः शुभ्रैश्च तुरंगमैः रवेः

---

१. 'यत्र' पा० भे० । २. 'सविस्तरं' पा० भे० । ३. 'पूरितः' पा० भे० ।

समरभूर्द्विरदादिभिरावृता सजलदाम्बरकान्तिमपाहरत्
गगनमप्यसकृद्रजसावृतं समहरत्किल भूमिभवां रुचम् ॥ ७ ॥
नरपतिः स्वयमेव रिपोश्चमूं न विनिहन्तुमगात्पतिवर्जिताम्
बुधमतो निजधर्मरतः सदा न हि महान् विजहाति महापथम् ॥ ८ ॥
यवनभूपतिसैनिकपालका विविधवाद्यविवादनतत्पराः
कवचिनो रथिनो ध्वजिनोऽखिला रणभुवि व्यसृजन् शरसंहतीः ॥ ९ ॥
जलदनिस्वनयन्त्रमुखोद्गता पृथुतरायसगोलकसंहतिः
नरपतेः पृतनां समकंपयन्मरुदिव प्रबलः कदलीततिम् ॥ १० ॥

सूर्यस्य कराः किरणाः । किरणोत्तमयूखांशुगभस्ति घृणिरश्मय इत्यमरः । तैः उत् ऊर्ध्वं गता भा प्रकाशो येषां तैः करवालकैः उपलक्षिता सकला संपूर्णा समरभूः संग्रामभूमिः तडिद्भिः विद्युद्भिः सहिता ये घना मेघाः तैः संवृतं अंबरं आकाशं तस्य रुचिं कान्तिं । स्युः प्रभा रुग् रुचिस्त्विड्वेत्यमरः । अनुचकार तद्वद्भौ इत्यर्थः ॥ ६ ॥

समरेति । द्वौ रदौ येषां ते द्विरदाः ते आदिर्येषां तैस्तुरगादिभिः आवृता व्याप्ता समरभूः सजलदं यदम्बरं आकाशं तस्य कान्तिं अपाहरत् हृतवती । गगनमपि भूम्या रजसा आवृतं व्याप्तं सत् भूमिभवां रुचं कान्तिं असकृत् वारंवारं समहरत् किल ॥ ७ ॥

नरपतिरिति । नरपतिः शिवभूपः पत्या भर्त्रा वर्जितां रहितां विधवामित्यर्थः रिपोः शत्रोः चमूं सेनां स्वयमेव विनिहन्तुं नागात् नागमत् । हि यस्मात् बुधानां पण्डितानां मतः मान्यः यतः सदा निजे स्वकीये धर्मे रतः अत एव महान् श्रेष्ठः महान्तं पन्थानं शिष्टमार्गं । ऋक्पूर्धूरित्यादिना समासान्तः । न विजहाति न त्यजति ॥ ८ ॥

यवनेति । कवचिनः कवचवन्तः ध्वजिनः ध्वजवन्तः रथिनः रथाधिरूढा इत्यर्थः सकलाः संपूर्णाः यवनस्य भूपतेः सैनिकाः सेनाचराः तेषां पालकाः सेनापतयः विविधानि वाद्यानि तेषां विशेषेण वादनं तस्मिन् तत्पराः आसक्ताः सन्तः रणभुवि समराङ्गणे शरसंहतीः बाणसमूहान् व्यसृजन् अमोचयन् । यवनसेनापतयः पूर्वं युद्धारंभं चक्रुरित्यर्थः । प्रायः युद्धारंभं प्रथमं कृतवतः पराजयो भवतीति ॥ ९ ॥

जलदेति । जलदनिस्वनानि मेघनिर्ह्रादानि यन्त्राणि तेषां मुखेभ्य उद्गता उत्पन्ना । यन्त्रलक्षणं मूले एव विशदीकृतं । पृथुतरा प्रथीयसी । द्विवचनेत्यादिना तरप् । अयसः लोहस्य इमे आयसाः । तस्येदमित्यण् । गोलकाः प्रसिद्धाः तेषां संहतिः नरपतेः शिवभूपस्य पृतनां सेनां । ध्वजिनीवाहिनीसेनापृतनानीकिनीचमूरित्यमरः । प्रबलः मरुत् वायुः कदलीनां रंभाणां ततिमिव समकंपयत् ॥ १० ॥

---

१. 'कदलिका बहुला इव मारुतः' पा० भे० ।

नरपतिध्वजिनीपतिपालकाः पुरत एकगणं विनिधाय ते
युगपदाविविशुर्द्विषतश्चमूं तुरगिणः सकला अपि सर्वतः ॥ ११ ॥
हरिखुोद्धतधूलिचयावृताः प्रचुरधूमपटैरपि संवृताः
यवनपास्तिमिरौघगता इव स्वपरलोकविवेकविवर्जिताः ॥ १२ ॥
योधा नृपस्य गजिनस्तुरगाधिरूढाः पद्मा अपि द्विषदनीकिनिकां समेत्य
वीरव्रजं गजसमूहमलं प्रमत्तं सिंहा इव प्ररुरुजुर्भयवार्धिमग्नम् ॥ १३ ॥
यवनसैन्यपतिः करिमस्तकोपरिगतः सशरः सशरासनः
सकलयन्त्रसमूहविमोक्षणे तदधिपान् सकलान् समचोदयत् ॥ १४ ॥
निःशिरखड्गकरवालकृपाणकुन्त-भल्लासिपट्टिशशिलाशितबाणपूगैः
यत्नैश्च तोमरपरश्वधशक्तिऋष्टि-चक्रैश्च उग्रपरान् शिवभूपयोधाः ॥ १५ ॥

नरपतेरिति । नरपतेः शिवभूपस्य या ध्वजिनी सेना तस्याः पतयस्तेषामपि पालकाः ते सकलाः तुरगिणः पुरतः अग्रे । आद्यादित्वात्तसिः । एकगणं एकं सेनासंघं विनिधाय स्थापयित्वा प्रलोभनार्थमिति भावः । सर्वतः सर्वप्रदेशैः युगपत् द्विषतः शत्रोः चमूं आविविशुः ॥ ११ ॥

ननु यवनपध्वजिनीपालेषु सुस्थेषु शिवभूपतिसेनापालानां कथं प्रवेशस्तत्राह हरीति । हरीणां अश्वानां ये खुराः । अर्कमर्कटमण्डूकविष्णुवासववायवः । तुरङ्गोंऽहसोतांशुयमाश्च हरयो दशेति । शफं क्लीबे खुरः पुमानित्यमरः । तैः उद्धता उत्क्षिप्ता या धूलिस्तस्याश्चयाः पुंजाः तैः आवृताः । प्रचुराः ये धूमाः यन्त्रमुखोद्गताः ते एव पटाः वस्त्राणि तैः संवृता आच्छादिता यवनपाः तिमिराणां अन्धकाराणां ओघः तं गता इव स्वे परेच ते लोकाश्चेतेषां विवेको विविच्य ग्रहणं तेन विवर्जिता अभूवन्निति शेषः ॥ १२ ॥

योधा इति । नृपस्य शिवभूपस्य गजिनो गजारोहाः तुरगाधिरूढाः पद्माः अपि योधाः द्विषतः अनीकिनिकां सेनां समेत्य प्राप्य भयमेव वार्धिः समुद्रः तस्मिन् मग्नं वीराणां व्रजं समूहं सिंहा अलं अत्यन्तं प्रमत्तं अनवधानं गजसमूहमिव ररुजुः पीडयामासुः ॥ १३ ॥

तदा यवनसेनापतेः कृत्यमाह । यवनेति । करिणः गजस्य मस्तको मूर्धा तदुपरिगतः सशरः सबाणः सशरासनः धन्वी यवनसैन्यस्य पतिः सकलानां यन्त्राणां समूहः तस्य विमोक्षणे मोचने सकलान् तदधिपान् यन्त्राधिपतीन् अचोदयत् प्रेरितवान् ॥ १४ ॥

अन्तःप्रविष्टशिवभूपसैनिककृत्यमाह । निरिति । शिवभूपस्य योधाः निर्गतः त्रिशद्भ्यः अङ्गुलिभ्यः निस्त्रिंशः खड्गः करवालःकृपाणः एते असय अवान्तरभेदाः । कुन्तः

---

८ 'भव' पा० भे० ।

ते बर्बरा अपि शका अपि पारसीका हूणाश्च तंगणगणाः सशिराशिखाश्च म्लेच्छा विघूर्णितदृशो मधुपानमत्ता नानायुधा युयुधिरे नरपस्य योधैः॥१६॥
मध्यान्हगे सवितरि प्रबभूव युद्धं भीरोर्भयोद्भवकरं बहुहर्षदं तत्
शूरव्रजस्य रुधिरौघपरिवृतास्ते रेजुः सपुष्पनिचया इव किंशुकौघाः॥१७॥
छिन्नेऽपि दक्षिणकरेऽन्यकरेण शत्रोर्दक्षं करं समलुनात्सहखड्गमेकः
अन्यः करद्वयविहीनकलेवरोऽपि दंतैर्भुजंगम इव व्यदशत् स्वशत्रुम्॥१८॥
विद्धोऽपि वक्षसि शरेण सपुंखमेको दृष्ट्वा विदश्य दशनच्छदमत्र रोषात्
छित्त्वा शिरो निजरिपोर्विमुमोच देहं हे शंकरेश भव सांब शिवेति जल्पन्
॥ १९ ॥

भल्लः असिः पट्टिशश्च शिलायां सिताः ये बाणपूगाश्च तैर्यन्त्रैः हस्तधृतैः बिन्दुखेति प्रसिद्धैः तोमराश्च परश्वधाश्च शक्तयश्च ऋष्टयश्च । ऋत्यक इति प्रकृतिभावः । यद्वा-रिष्टिरितिपाठः । तूष्णीं खड्गं तु निस्त्रिंशचन्द्रहासासिरिष्टयइत्यमरः । चक्राणि च तैः अपरान् शत्रूञ्जघ्नुः ॥ १५ ॥

यवनसेनापतीनां च कृत्यमाह । ते बर्बराइति । मधुनः मद्यस्य पानेन मत्ताः अत एव विशेषेण घूर्णिताः भ्रामिताः दृशः दृष्टयः यैस्ते नानाप्रकाराणि आयुधानि येषां ते बर्बराः अपि शकाः पारसीकाः हूणाः तंगगानां गणाश्च शिखाभिः सहिताः सशिखाः नास्ति शिखा येषां ते अशिखाश्च ते म्लेच्छाः म्लेच्छजातयः नरपस्य शिवभूपस्य योधैः भटैः । विनापि तद्योगे तृतीयेति तृतीया । युयुधिरे ॥ १६ ॥

मध्याह्नगे इति । भीरोः भयशीलस्य भयस्य उद्भवः उत्पत्तिः तस्य करोतीति करं । पचाद्यच् । शूरव्रजस्य शूरसंघस्य बहुहर्षं अतिसंतोषं ददातीति तथोक्तं तत् युद्धं सवितरि सूर्ये अह्नो मध्ये मध्याह्नः तं गच्छतीति मध्याह्नगः तस्मिन् सति । अ-हन् शब्दात् राजाहःसखिभ्यष्टच् इति टच् । अह्नोह्न एतेभ्य इति अह्नादेशः । रात्राह्नाहाः पुंसीति पुंल्लिंगत्वं । प्रबभूव । रुधिरौघेण परितः प्लुता व्याप्तास्ते वीराः पुष्पनिचयैः सहिताः सपुष्पनिचयाः किंशुकानां ओघा इव रेजुः शुशुभिरे ॥ १७ ॥

छिन्नेपीति । एकः वीरः दक्षिणकरे छिन्ने सत्यपि अन्यकरेण वामकरेण शत्रोः स्वहस्तच्छेतुः सहखड्गं खड्गेन सहेति सहखड्गः तं खड्गयुतं । तेन सहेति तुल्ययोगे इति समासः । वोपसर्जनस्यति विकल्पात् सादेशाभावः । दक्षं दक्षिणं करं हस्तं सम-लुनात् छेदितवान् । लुनातेः कर्तरि लङ् । अन्यः वीरः करयोः द्वयं तेन विहीनं कले-वरं यस्य सोऽपि भुजङ्गम इव सर्प इव स्वं स्वकीयं शत्रुं दन्तैः व्यदशात् दष्टवान् । भुजङ्गोपमया क्रोधबाहुल्यं गम्यते ॥ १८ ॥

विद्ध इति । एकः वीरः शरेण वक्षसि उरसि सपत्रं सपुंखं यथा तथा विद्धः सन्नपि

---

६. 'विशिखाः' पा० भे०.

छिन्नेऽपि मूर्धनि शिरो झटिति स्वशत्रोश्
छित्त्वासृजान्निजतनुं करवालपाणिः
गच्छामि नाकमसुनैनमतो नयामि
नोचेत्कृतघ्नतरता भवितेति चान्यः ॥ २० ॥
छित्त्वा करं करिवरं विनिपात्य भूमा-
वेकोयदा गजपतिं निजघान हंत ॥
अल्लेत्युदीर्य वचनं निपपात भूमौ
देहं मुमोच करिणा सह तत्क्षणेऽसौ ॥ २१ ॥
वीरौ धनुःप्रहरणौ युगपत्सपत्रा
कृत्वा परस्परमुभौ प्रविहाय देहौ ॥
एकं विमानमधिरुह्य दिवं प्रयातौ
दम्पाविवातिरुचिरौ समुपेत्य सख्यं ॥ २२ ॥

दशनच्छदं ओष्ठं दद्भिः दन्तैः। पाददन्तेति दन्तशब्दस्य ददादेशः। रोषात्विदश्च दष्ट्वा निजरिपोः वेद्धुः शिरः छित्वा हे शंकर हे ईश हे भव हे सांब हे शिव इति जल्पन् भाषमाणः सन् अत्र रणभूमौ देहं मुमोच। अन्तकाले शिवनामस्मरणादयं वीरः उत्तमां गतिं गत इति ज्ञेयं। तदुक्तं गीतासु ॥ अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरं। यः प्रयाति त्यजन् देहं स याति परमां गतिमिति ॥ रणभूमौ हतस्य शिवनामस्मरणाभावेऽपि उत्तमा गतिः नामस्मरणेतु उत्तमागतिरितिकिं वक्तव्यं। अयं च शिवस्मरणात् राज्ञो वीर इति ज्ञेयम् ॥ १९ ॥

छिन्नेऽपीति। करवालः कृपाणः पाणौ यस्येति तथोक्तः। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यावितिवचनात् पाणिशब्दस्य परनिपातः। अन्यः वीरः मूर्धनि शिरसि। छिन्नेऽपि सत्यपि अमुना शत्रुणा हेतुभूतेन नाकं स्वर्गं गच्छामि अतः हेतोः एनं शत्रुं नाकं नयामि नो चेत् कृतघ्नतरस्य भावः कृतघ्नतरता भविता इति हेतोः झटिति शीघ्रं स्वशिरश्छेदनक्षण एव स्वशत्रोः स्वशिरश्छेत्तुः शिरश्छित्वा निजतनुं स्वशरीरं असृजत् अत्यजत् ॥ २० ॥

छित्वेति। एकः वीरः करं शुण्डां छित्त्वा करिवरं गजश्रेष्ठं भूमौ विनिपात्य यदा गजपतिं गजारोहं जघान हतवान् तदा असौ गजारूढः हन्त इति खेदे अल्ल हे अंब इति मातरं संबोध्य। अंबार्थनद्योर्ह्रस्व इति ह्रस्वत्वं। सकटे हि मातरं स्मरन्ति सर्वे। यद्वा अल्ला इति यवनदेवतानाम। अयं यवन इति ज्ञेयं। उदीर्य उक्त्वा भूमौ गजादिति ज्ञेयं। निपपात असौ करिणा सह तत्क्षणे देहं मुमोच ॥ २१ ॥

वीराविति। धनुःप्रहरणं ययोः तौ धनुःप्रहरणौ उभौ वीरौ कर्तारौ परस्परं युगपत् एकसमयावच्छेदेन सपत्रान्कृत्वा सपुंखशरप्रवेशेन अतिव्यथितकरणेन। सपत्र-

शाक्तीक एक उरसि प्रतिरोपितं स्वे
बाणं विलोक्य रिपुणा पुरतः स्थितेन ॥
रोषान्वितोऽस्य हृदयं प्रविदार्य[1] शक्त्या
भित्त्वार्कमण्डलमसावपि निर्जगाम ॥ २३ ॥
कुन्तायुधौ तुरगिणौ समरांगणस्थौ
भित्त्वा परस्परमुभावपि मर्मदेशे ॥
वैरं कलेवरमपि प्रविहाय यातौ
स्वर्गं सुरोत्तमसमानवपुर्दधानौ ॥ २४ ॥
सपटिशः कञ्चन वारवाणी रणांगणं चर्मकरः समेत्य ॥
गजान्विशुण्डांस्तुरगान्वि तुण्डान्भटान्विमुण्डान्कृतवान्प्रचण्डान् ॥२५॥

निष्पत्रादतिव्यथनेसपत्रशब्दात्कर्त्रिअतिव्यथनेडाच् । देहौ प्रविहाय त्यक्त्वा दस्रौ अश्विनीकुमारावि सख्यं समुपेत्य अतिरुचिरौ सन्तौ दिव्यदेहावित्यर्थः । एकं विमानं अधिरुह्य दिवं प्रयातौ । यद्वा दस्रावि अतिरुचिरौसुन्दरदेहौ । देवमध्ये तयोरति रुचिरत्वं प्रसिद्धं । सख्यं उपेत्य विमानं अधिरुह्य दिवं स्वर्गं प्रयातौ ॥ २२ ॥

शाक्तीक इति । एकः अन्यः । एकोऽन्यार्थे प्रधाने चे प्रथमे कवले तथा । साधारणे समानेऽल्पे संख्यायांच प्रकथ्यत इति विश्वः । शक्तिः प्रहरणं यस्येति शाक्तीकः । शक्तियष्ट्योरिक् इति ईक्क् प्रत्ययः । पुरतः अग्रभागे स्थितेन रिपुणा स्वे स्वकीये उरसि प्रतिरोपितं बाणं विलोक्य रोषेण अन्वितः युक्तः सन् अस्य रिपोः हृदयं शक्त्या लोहमयेन आयुधविशेषेण लोके सांग इति प्रसिद्धेन प्रविदार्य ततः-अर्कमण्डलं भित्त्वा निर्जगाम । असौ रिपुरपि अर्कमण्डलं भित्त्वा निर्जगाम उत्तमां गतिं गत इत्यर्थः । रणे अभिमुखं हतः सूर्यमण्डलं भित्त्वा व्रजतीति पुराणेषु प्रसिद्धं ॥ द्वावेव पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च रणे चाभिमुखे हत इति ॥ २३ ॥

कुन्तायुधाविति । समरः संग्रामः तस्य अजिरं अंगणं तत्र तिष्ठतः तौ समराङ्गणस्थौ । आतोनुपसर्गे कः । कुन्तः आयुधं ययोस्तौ तुरगिणौ अश्वारोहौ उभावपि मर्मदेशे जीवस्थाने परस्परं भित्त्वा कलेवरं वैरं च प्रविहाय त्यक्त्वा सुरोत्तमौ देवश्रेष्ठौ ताभ्यां समानं वपुः दधाते तौ दधानौ सन्तौ स्वर्गं यातौ गतौ ॥ २४ ॥

सपटिश इति । पटिशेन सहितः सपटिशः वारवाणः कञ्चुकः सोऽस्यास्तीति वारवाणी । अति इनि ठनाविति इनि प्रत्ययः । कञ्चुको वारवाणोऽस्त्रीत्यमरः । चर्म करे यस्येति चर्मकरः रणस्य अङ्गणं उपेत्य गजान् विगता शुण्डा येभ्यस्ते विगत शुण्डास्तान् तुरगान् अश्वान् वितुण्डान् तुण्डरहितान् प्रचण्डान् कोपनान् ।

---

१. 'विदार' पा. भे०.

रक्तोक्षिता समरभूर्विजहार सायं
सूर्यप्रभाकलितवारिदसंघशोभाम् ॥
शान्तं रजोऽपि सकलं समगात्तदानीं
पङ्कत्वमत्र बत केचन शेरते स्म ॥ २६ ॥
दात्यूहगृध्रनिचया उपरि भ्रमन्तो
नैवालभन्त वसतिं कुर्हचित् समेताः ॥
मन्येऽपकीर्तिपटलं यवनाधिपस्य
शीर्षस्थितं भ्रमति तद्रसतेरभावात् ॥ २७ ॥
योधा विकोशकरवालकराः कराला-
स्तां कातरां यवनपध्वजिनीमकृन्तन् ॥
द्रौणिर्यथा निजसुतत्रियकृत्कृपाणी
शिष्टं व्यनीनशदलं बलमर्जुनस्य ॥ २८ ॥

चण्डस्त्वत्यन्तकोपन इत्यमरः । भटान् वीरान् विमुण्डान् छिन्नशिरस्कान् कृतवान् चकार ॥ २५ ॥

रक्तोक्षितेति । रक्तेन उक्षिता सिक्ता समरभूः संग्रामभूमिः सायं सन्ध्याकाले सूर्यप्रभया आकलितो यो वारिदसंघः मेघसमूहः तस्य शोभां विजहार हृतवती । सकलं रजोऽपि शान्तं सत् तदानीं पंकत्वं कर्दमत्वं समगात् अगच्छत् । अत्र पंके बत इति खेदे केचन वीराः शेरते स्म । भिन्नाङ्गत्वादन्यत्र गन्तुमशक्तत्वात्तत्रैव स्थिता इत्यर्थः ॥ २६ ॥

दात्यूह इति । समेता मिलिता दात्यूहाः काकाः गृध्राः प्रसिद्धास्तेषां निचयाः संघाः । गृध्रापेक्षया दात्यूहानां किंचिदभ्यर्हितत्वात् पूर्वनिपातः । यद्वा । दात्यूहाश्च गृध्रनिचयाश्चेति समासः । उपरि रणभूमेरूर्ध्वप्रदेशे भ्रमन्तः सन्तः कुहचित् कुत्रचित् वसतिं स्थितिं नैवालभन्त । लभेः कर्तरि लङ् । अत्र कविः उत्प्रेक्षते । यवनाधिपस्य अब्दुल्लाख्यस्य शीर्षे स्थितं तदपकीर्तिपटलं अयशोमण्डलं वसतेः स्थितेरभावात् भ्रमतीत्यहं मन्ये । शिवभूपेन पराजितस्य यवनाधिपस्य शिरसि अयशोमण्डलं तस्थौ । तस्मिन् मृते तु तत् कृष्णकाकगृध्रसंघमिषेण शिवभूपसेनापतिं सुखं वस्तुं स्थलं याचतीवेति भावः ॥ २७ ॥

योधा इति । विगताः कोशाः पिधानानि येषां ते विकोशाः । कोशोऽस्त्री कुड्मले खड्गेपिधानेऽर्थौघदिव्ययोरिति विश्वः ॥ करवालाः खड्गाः करेषु येषां ते तथा भूता अत एव करालाः भयंकराः योधाः भटाः । तां कातरां भीतां यवनपध्वजिनीं तथा अकृन्तन् अच्छिन्दन् । कृती च्छेदने अस्मात् लङ् मुचादित्वान्नुम् । तथा

८. 'कचिदप्य हो ते' पा० भे०

कंधरां समपहाय कं धरां प्राप्य संयति जहास कस्यचित् ॥
मां सदा नमयतः प्रपूर्तये दुर्भरस्य[10] जठरस्य किं पुरः ॥ २९ ॥
प्रेतव्राताचलोत्था रुधिरजलवहा हस्तिहस्तौघमीना
शुभ्राच्छोष्णीषफेना नरकरभुजगा केशजंबालयुक्ता[11] ॥
बालाल्यालीढवक्त्रावलिजलजचया चर्मकच्छा गजेंद्र-
ग्रावाघातप्रशब्दा समजनि तटिनी तां भुवं प्लावयन्ती ॥ ३० ॥

कथं । यथा निजः स्वकीयं सुहृन्मित्रं दुर्योधनः । अथ मित्रं सखा सुहृदित्यमरः । तस्य प्रियं इष्टं तत्करोतीति कृत् । कृञः क्विपि तुक् । कृपाणोऽस्यातीति कृपाणी । अदन्तान्मत्वर्थीय इनिः । द्रोणस्य अपत्यं द्रौणिः अश्वत्थामा । अत इञ् । अर्जुनस्य शिष्टं अवशिष्टं बलं सैन्यं व्यनीनशत् नाशितवान् । नश अदर्शने इति धातोः णिजन्तात् लुङि चङि द्वित्वं ॥ २८ ॥

कंधरामिति । कस्यचिद्वीरस्य कं शीरः । को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च । पावके च मयूरे च सुखशीर्षजलेषु कमिति विश्वः ॥ कन्धरां ग्रीवां अपहाय त्यक्त्वा । धरां पृथ्वीं प्राप्य । संयति संग्रामे जहास हासं चक्रे । हासाशयं विवृणोति । दुःखेन भ्रीयते तत् दुर्भरं तस्य दुर्भरस्य उदरस्य पूर्तये पूरणाय मां सदा निरन्तरं नमयतीति नमयन् तस्य नमयतः । नमयतेः शतृ प्रत्ययः । ते इति शेषः पुरः अग्रे किं । मम वियोगे तव जठरपूरणं कथं स्यात् इत्यर्थः ॥ २९ ॥

प्रेतव्रातेति । प्रेतानां व्रातः समूहः स एव अचलः पर्वतस्तस्मात् उत्था उत्पन्ना । तथा रुधिरं तदेव जलं तद्वहतीति तथोक्ता । हस्तिनां हस्ताः शुण्डास्तेषां ओघा एव मीना मत्स्या यस्यां सा । शुभ्राणि अच्छानि उष्णीषाणि शिरोवेष्टनानि तान्येव फेनो यस्याः सा । नराणां कराः पाणय एव भुजंगाः पंचफणाः सर्पा यस्यां सा । केशा एव जंबालं शैवालं तेन युक्ता । बालानां केशानां आलिः पंक्तिः तया आलीढानि व्याप्तानि वक्त्राणि मुखानि तेषां अवलिः पंक्तिः सैव जलजचयः कमलसंघो यस्यां सा । चर्माणि लोके ढालइति प्रसिद्धानि तान्येव कच्छाः कमठाः यस्यां सा । गजेन्द्राः करिश्रेष्ठास्त एव ग्रावाणः नदीमध्यवर्तिपाषाणास्तेषामाघातः आघट्टनं तेन प्रकृष्टः शब्दो यस्याः सा । तां रणभुवं प्लावयन्ती । प्लुगतावित्यस्माण्णिजन्तात् शतरि नुमि ङीप् । तटिनी नदी समजनि उत्पन्ना । जनी प्रादुर्भावे अस्माद्दैवादिकात् लुङि च्लेश्चिणितलोपः जनिवध्योश्चेति उपधावृद्ध्यभावः ॥ ३० ॥

---

९. 'किलानमयतः' पा० भे०.
१०. 'दुर्भरात्किमुदराद्वियोगतः' पा० भे० (?)
११. 'शैवाल' पा० भे०.

द्रुतां स्वसेनां प्रसमीक्ष्य वीरो जमालनामाऽभ्यपतत्तरस्वी ॥
सहस्रसंख्यैस्तुरगाधिरूढैः समन्वितः सैन्यपतिर्जयैषी ॥ ३१ ॥
स सांयुगीनः समराजिरस्थः सवारबाणः सतलः सतूणः ॥
सकार्मुकः सर्वभटैरुपेतः ससर्ज बाणान् समपर्वभाजः ॥ ३२ ॥
घनो यथा प्रावृषि वर्षधारा महीधरे वर्षति चातिमात्रम् ॥
तथा शरान् व्यात्तमुखान् भुजंगानिवासृजद्राजनियुक्तसैन्ये ॥ ३३ ॥
तदीययोधा अपि वाजिवाहाः कचाचितास्ताम्रमुखाः सुरापाः ॥
शरैश्च भल्लैः परिघैः कृपाणैरपीडयन् पार्थिवसैन्यमाजौ ॥ ३४ ॥
दिनावसाने नृपसैन्यनाथः खलीनलीनाननवाजिसादी ॥
कृपाणपाणिः सह योधसंघैः पुरोऽभियातो यवनाधिपस्य ॥ ३५ ॥

अथ उभयसेनाधिपतयोर्युद्धोपक्रममाह । द्रुतमिति । जयं इच्छति तच्छीलः जयैषी । सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः । तरस्वी वेगवान् । तरस्वी त्वरितो वेगी प्रजवो जवनो जव इत्यमरः । जमालनामा वीरः सेनापतिः स्वसेनां द्रुतां भयादपयातां प्रसमीक्ष्य । सहस्रं संख्या येषां तैः तुरगाधिरूढैः अश्वारोहैः समन्वितः युक्तः सन् अभ्यपतत् आगतवान् ॥ ३१ ॥

स इति । संयुगे रणे साधुः सांयुगीनः । प्रतिजनादिभ्यः खञ् इति प्रतिजनादिगणे संयुगशब्दस्य पाठात् खञ् । समरानिरे रणाङ्गणे तिष्ठतीति तयोक्तः । वारबाणेण कञ्चुकेन सहितः सवारबाणः । कञ्चुको वारबाणोऽस्त्रीत्यमरः । तलेन ज्याघातवारणेन सहितः सतलः । गोधे तले ज्याघातवारण इत्यमरः । तूणेन निषङ्गेण सहितः सतूणः । तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोरित्यमरः । कर्मणे प्रभवतीति कार्मुकं तेन सहितःसकार्मुकः । कर्मण उकञ् । सर्वैः अवशिष्टैः भटैः उपेतः स जमालनामा सेनापतिः । समानि पर्वाणि भजन्ति तान् बाणान् ससर्ज मुमोच ॥ ३२ ॥

घनइति । यथा घनः मेघः प्रावृषि वर्षाकाले महीधरे अतिमात्रं वर्षति तथा स शरान् । व्यात्तं मुखं यैस्तान् भुजङ्गान् इव । राज्ञा शिवेन नियुक्तं यत्सैन्यं तस्मिन् असृजत् विसृष्टवान् ॥ ३३ ॥

तदीयेति । कचैः आचिता व्याप्ताः ताम्राणि मुखानि येषां ते ताम्रमुखाः सुरां पिबन्ति ते सुरापाः । आतोनुपसर्गे क इति क प्रत्ययः । वाजिवाहाः तस्य इमे तदीयाः तदीयाश्च ते योधाश्च तदीययोधाः । वृद्धाच्छः । शरैः भल्लैः परिघैः कृपाणैः आजौ संग्रामे । पृथिव्या ईश्वरः पार्थिवः तस्य शिवभूपस्य । तस्येश्वर इत्यण् । सैन्यं अपीडयन् ॥ ३४ ॥

दिन इति । खलीनेन मुखरज्वा लोके लगामइति प्रसिद्धेन लीनं नम्रं आननं

तयोरभूद्युद्धमतीव घोरं ससैन्ययोः सादितवीरचम्वोः ॥
घटीद्वयं तीक्ष्णशरैरमोघैः खड्गैश्च भल्लैः करवालकैश्च ॥ ३६ ॥
गजाश्चमत्तास्तुरगाः क्रमेला वृषाश्च खड्गाभिहता निपेतुः ॥
नृणां शिरोभिः पतितैश्च देहैः समास्तृता भूरुधिरौघपूर्णा ॥ ३७ ॥
नृपस्य वीरैर्बहुधा विशीर्णा विदुद्रुवुस्ते यवनाःप्रभीताः ॥
तृणं दधुः केचन वक्त्रमध्ये भटाः प्रणेमुश्च तथैव केचित् ॥ ३८ ॥
गजं विशुण्डं विनिपात्य भूमौ जमालसंज्ञं बिभिदुः कृपाणैः ॥
नृपस्यवीराः स तु देहमाजौ निधाय* यातो दिवमेव वीरः ॥३९ ॥
हतावशिष्टा विदिशोदिशश्च ययुर्निशायां विनिधाय हेतीः ॥
मृगाऽ यथालक्ष्य भयाद्द्रवन्ति वृकांस्तथा भीतिविवर्णवक्त्राः॥४०॥

मुखं यस्य स च असौ वाजी अश्वःतेन सीदति गच्छतीति तथोक्तः । कृपाणः पाणौ यस्येति कृपाणपाणिः नृपस्य सैन्यनाथः सेनापतिः योधसंघैः सह । यवनाधिपस्य यवनसेनापतेः पुरः अग्रभागे । दिनस्य अवसानं समाप्तिः सन्ध्याकाले इत्यर्थः । अभियातः प्राप्तः ॥ ३५ ॥

तयोरिति । सैन्येन सहितौ ससैन्यौ तयोः ससैन्ययोः । वीराणां चमूः वीरचमूः सादिता वीरचमूर्याभ्यां तौ तयोः सेनाधिपयोः युद्धं अमोघैः सफलैः तीक्ष्णैः शरैः खड्गैः भल्लैः करवाला एव करवालकास्तैश्च घटीद्वयं अतीव अत्यन्तं घोरं दारुणं अभूत् ॥ ३६ ॥

गजा इति । मत्ताः गजास्तुरगाश्च क्रमेला उष्ट्राश्च वृषा यत्रनियुक्ताः खड्गैः अभिहताः सन्तः निपेतुः पतन्ति स्म । भूः नृणां पतितैः शिरोभिः देहैश्च समास्तृता अत एव रुधिरौघेण पूर्णा अभूत् ॥ ३७ ॥

नृपस्येति । नृपस्य शिवभूपस्य वीरैः बहुधा बहुप्रकारेण विशीर्णाः विखण्डिताः । शृ हिंसायामित्यस्मात् क्तप्रत्यये रदाभ्यामित्यादिना तकारस्य नकारः । अत एव भीताः यवना विदुद्रुवुः पलायनं चक्रुः । केचन भटा वक्त्रमध्ये तृणं दधुः । तथैव केचित्प्रणेमुः नमश्चक्रुः ॥ ३८ ॥

गजमिति । नृपस्य वीरा गजं विगता शुण्डा यथा स्यात्तथा भूमौ विनिपात्य जमालसंज्ञं कृपाणैः बिभिदुः विदारयामासुः । स तु जमालनामा आजौ देहं निधाय दिवमेव यातः समरादनिवर्तनादिति भावः ॥ ३९ ॥

हतावशेषा इति । हतेभ्यो ये अवशिष्टास्ते हेतीः आयुधानि रणभूमाविति शेषः विनिधाय निशायां रात्रौ सत्यां । निशा निशीथिनी रात्रिरित्यमरः । भीत्या भयेन

---

* 'निवेश्य' पा० भे०. १२. '०वशेषा' पा० भे०. § 'अजा' पा० भे०.

महाबलोऽब्दुल्लसुतस्तु वल्ली निबध्य चीराणि पदद्वये सः ॥
दुद्राव वृक्षैः पिहितं प्रदेशं दिनावसाने तिमिरप्रपूर्णम् ॥ ४१ ॥
पचिक्रियार्णोनयनादिकर्म-रता मनुष्या अपि भिक्षुका ये ॥
भिषग्वराः स्त्रीनिचयाश्च दीनाः शस्त्रैर्विहीना अपि तान्न जघ्नुः ॥४२॥
बभूव तद्भूमितलं पिशाच-पतेर्निवासेन समं तदानीम् ॥
उदूचुरेके शिवमामवेति हा तात हा बालसुतेति केचित् ॥ ४३ ॥
अनर्गलावाजिगजादिवाहा इतस्ततो बभ्रमुरार्तिभाजः ॥
नृपालसेनापतिसैनिकास्तन्नपाहरन् हृष्टतराः समेताः ॥ ४४ ॥
सदुंदुभिध्वाननिवेदितोद्यज्जयो ययौ बन्दिजनस्तुतश्रीः ॥
यशोवितानैर्विदिशो दिशश्च विपूरयन् राजगिरिं ससैन्यः ॥ ४५ ॥

विवर्णानि वक्त्राणि येषां ते तथा भूताः सन्तः विदिशो दिशश्च तथा ययुर्जग्मुर्यथा मृगा वृकानालक्ष्य दृष्ट्वा भयाद्द्रवन्ति ॥ ४० ॥

महेति । महत् बलं यस्येति महाबलः । आन्महत इत्यादिना आत्वं । अब्दुल्लस्य सुतः वल्ली पदयोः द्वये चीराणि वस्त्रखण्डानि निबध्य उपानदभावादिति भावः । दिनस्य अवसानं प्रदोषः तस्मिन् तिमिरेण अंधकारेण । तमिस्रं तिमिरं तम इत्यमरः । पूर्णं वृक्षैः पिहितं आच्छादितं प्रदेशं दुद्राव ॥ ४१ ॥

पचिक्रियेति । राजभटा इतिशेषः । पचिक्रिया पाककरणं अर्णसः उदकस्य नयनं प्रापणं । प्राथोऽर्णः सलिलं जलमित्यमरः । ते आदी येषां तानि कर्माणि तत्र नियुक्ता मनुष्या । ये च भिक्षन्ति ते भिक्षवः भिक्षव एव भिक्षुकाः । सनाशंसभिक्षउरिरिति कर्तरि उ प्रत्ययः ततः स्वार्थे कः । ये च भिषग्वरा वैद्या दीनाश्च स्त्रीनिचयाश्च शस्त्रैर्विहीना अपि ये तान् न जघ्नुः ॥ ४२ ॥

बभूवेति । तत् भूमितलं तदानीं तस्मिन् काले पिशाचपतेः शिवस्य निवासेन श्मशानेन तुल्यं बभूव । तत्र भूतले एके ज्ञानिनः हे शिव शंभो मां अव रक्ष उत्तमां गतिं देहीति प्रार्थयामासुरित्यर्थः । एके अज्ञा हा इति खेदे हा तात हे पितः एके हा बाल सुत अल्पवयस्क पुत्र । अल्पवयसस्तव कथं भरणं स्यादिति बुद्धेर्येति भावः । यद्वा । बालः सुतो यस्याः सा बालसुता स्त्री मेति केचित् उदूचुः उच्चैः बभाषिरे ॥ ४३ ॥

अनर्गला इति । नास्ति अर्गला बन्धनं येषां ते अनर्गलाः । तद्विष्कंभेऽर्गलं न ना इत्यमरः । आर्तिं पीडां भजन्ति ते आर्तिभाजः वाजिगजादयो वाहाः वाहनानि इतस्ततः रणभूमौ बभ्रमुः । शास्तृणामभावादिति भावः । नृपालस्य शिवभूपालस्य सेनापतेः सैनिकाः समेता मिलिता हृष्टतराः । स्वजयादिति भावः । तान् वाहान् अपाहरन् ॥ ४४ ॥

स इति । दुन्दुभेः भेर्याः । भेरी स्त्री दुन्दुभिः पुमानित्यमरः । तस्य ध्वानः

शिवोऽपि भूपो जयिनं तमारात् गतं समालिंग्य विभूषणाद्यैः ॥
गिरा च सत्कृत्य महीसुरेभ्यो धनं ददौ भूरितरं नरेन्द्रः ॥ ४६ ॥
शतं गजाः पञ्चसहस्रसंख्यतुरंगमास्तद्विगुणाः क्रमेलाः ॥
रथाः सहस्रं वसनानि भूषा मुक्ताफलानां प्रकराश्च यत्तत् ॥४७ ॥
रत्नानि हेम्नोऽपि च सप्तलक्षमुद्राः पुरस्तस्य निधाय तस्थौ ॥
भटाग्रणीः सादितशत्रुपक्षः स वाहिनीपो विनिबध्य पाणी ॥४८॥
नृपस्तु तत्सर्वमपि प्रगृह्य प्रत्यर्पयद्वीरभटाधिपाय ॥
जगाद चैतत् सकलं त्वयाद्य प्रदेयमेवं स्वभटप्रभुभ्यः ॥ ४९ ॥

शब्दः । ध्वनिध्वानरवस्वना इत्यमरः । तेन निवेदितः प्रख्यापितः उद्यन् जयो यस्य सः । बन्दिजनेन स्तुतिपाठकजनेन स्तुता श्रीर्जयश्रीर्यस्य सः । यशांस्येव वितानानि उल्लोचास्तैः दिशः विदिशश्च विपूरयन् ससैन्यः स नथुनामा सेनापतिः राजगिरि नाम पर्वतं शिवभूपाधिष्ठितं ययौ जगाम ॥ ४५ ॥

शिवोऽपीति । नर इन्द्र इव नरेन्द्रः । उपमितव्याघ्रादिभिरित्यादिना समासः । शिवोऽपि भूपः जयः अस्यास्तीति जयी तं जयिनं आरात्समीपे गतं प्राप्तं तं सेनापतिं समालिंग्य विभूषणाद्यैर्गिरा वाण्या च सत्कृत्य महीसुरेभ्यः ब्राह्मणेभ्यः भूरितरं प्रभूततरं धनं ददौ ॥ ४६ ॥

युग्मेन राज्ञे शत्रुसेनाधिगतगजाश्वादिसमर्पणमाह । शतमिति । अग्रं नयतीत्यग्रणीः । कर्तरि क्विप् । अग्रग्रामाभ्यां नयतेरिति णत्वं । भटेषु अग्रणीः श्रेष्ठः अत एव सादितः विनाशितः शत्रुपक्षो येन । वाहिनीं सेनां पाति इति वाहिनीपः सेनापतिः स नथुनामा शतं शतसंख्या गजाः पंचसहस्राणि संख्या येषां ते तुरङ्गमाः तद्विगुणिताः क्रमेलाः सहस्रमिता रथा वसनानि भूषाः भूषणानि मुक्ताफलानां प्रकराश्च इति यत् तत् सामान्ये नपुंसकं कर्म ॥ ४७ ॥

रत्नानीति । तथा रत्नानि हीरकादीनि हेम्नः सुवर्णस्यापि सप्तलक्षसंख्या मुद्रा होनइति लोके प्रसिद्धाः । चकाराद्रजतस्यापि मुद्राः । तस्य शिवभूपस्य पुरः निधाय पाणी हस्तौ विनिबध्य वस्त्रेणेति शेषः तस्थौ स्थितवान् ॥ ४८ ॥

नृप इति । नृपस्तु शिवभूपस्तु तत्सर्वं गजाश्वादिकं प्रगृह्य भटानां अधिनायः भटाधिनायः वीरश्चासौ भटाधिनायश्च वीरभटाधिनायस्तस्मै प्रत्यर्पयत् अर्पितवान् । त्वया अद्य अस्मिन् दिने न तु दिनान्तरे एतत्सकलं स्वे स्वकीया ये भटास्तेषां प्रभुभ्यः । एवं । मया यथा लोभं परित्यज्य तुभ्यं तथैव त्वयापीत्यर्थः प्रदेयं इति जगाद च ॥ ४९ ॥

---

१३. 'तत्रभटैकनाथे' । 'वीरवराधिपेस्मिन्' इति च वा पाठः.

प्रजाप्रपीडाकरशत्रुवर्गविनाश आरब्ध इतो मया यत् ॥
स्वप्ने समागत्य निशावसाने यदाहदेवी हर नीचवर्गम् ॥ ५० ॥
निशम्य वाक्यं नथुनामधेयस्तथा स चक्रे वरवीरनाथः ॥
भटा यथाभागमवाप्य सर्वे कृतज्ञतामस्य जगुः समेताः ॥ ५१ ॥
अतीव[15] भक्तो नरनाथनाथः समर्चनाँथं[16] जगतो जनन्याः ॥
विधाय शैलीं प्रतिमां शिवाया स वासयामास गिरौ प्रतापे ॥५२॥
विजयपुरपतिर्निशम्य वृत्तं समरभवं सकलं चरावलिभ्यः ॥
हृदयसरसिजे स कुन्तघातैरविरतविद्ध इवाभवत्तदानीम् ॥ ५३ ॥

वीरेभ्यः पारितोषकदाने हेतुमाह । प्रजेति । मया इतः अस्मादिति इतः अस्मादिवसात् अमुं दिवसमारभ्य इत्यर्थः । प्रजानां प्रपीडास्तासां कराः कारकाः । पचादित्वादच् । शत्रवस्तेषां वर्गः समूहः तस्य विनाशो यस्मात् आरब्धोऽस्ति । विनाशस्यापि हेतुमाह । यद्यस्मात्कारणात् देवी जगदंबिका निशाया रात्र्या अवसाने गोदोहनसमये इत्यर्थः । एतेन स्वप्नस्य झटिति प्रत्ययः स्यादितिभावः । स्वप्ने स्वप्नावस्थायां समागत्य । हे शिवेति शेषः नीचानां दुर्वृत्तानां वर्गं हर नाशय इत्याह वदति । ब्रूञ् व्यक्तायां वाचीत्यस्माल्लटि तिपि णलि आहादेशः । देव्याः पुनः पुनः प्रेरणादवश्यं कर्तव्ये दुर्जनक्षये सहायभूतवीरतोषार्थं सर्वमिदं तेभ्यो देयमिति भावः ॥ ५० ॥

निशम्येति । वराः श्रेष्ठा ये वीरास्तेषां नाथः स्वामी नथुरिति नामधेयं यस्येति नथुनामधेयः । आख्याह्वे अभिधानं च नामधेयं च नामचेत्यमरः । तथा शिवभूपोक्तप्रकारेण चक्रे कृतवान् । सर्वे भटा । भागं अनतिक्रम्येति यथाभागं । यथार्थेऽव्ययीभावः । अवाप्य प्राप्य अस्य नथुनाम्नः शिवभूपस्य च कृतं जानातीति कृतज्ञः तस्य भावः तत्ता तां समेता मिलिताः सन्तो जगुः वारंवारं सस्मरुरित्यर्थः ॥ ५१ ॥

अतीवेति । जगतः जनन्या अंबिकाया अतीव अत्यन्तं भक्तः । नराणां मनुष्याणां नाथाः स्वामिनस्तेषां नाथः शिवभूपः । शिवाया अंबिकायाः । शिवा भवानी रुद्राणीत्यमरः । सम्यक् अर्चनं पूजनं समर्चनं तदर्थं । शिलाया इयं शैली तां शिलामयीं । शिलाशब्दादिदमर्थेऽण् ढिढेति ङीप् । प्रतिमां प्रतिकृतिं विधाय कृत्वा प्रतापे प्रतापसंज्ञे गिरौ वासयामास स्थापयामास । वस निवासे इत्यस्मात् हेतुमण्णिचि अनेकाच्त्वादाम् प्रत्यये कृञ् चानुप्रयुज्यते लिटीति लिट्परः असधातोः प्रयोगः । स्थावरजङ्गमात्मके सकले जगति देवीवासमजानन् मूढः अब्दुल्लो यवनः विजयपुरात् पूर्वं निर्गत्य तुलजापुराख्यदेवीस्थानं आगत्य तत्रत्यां देवीप्रतिमां शिवभूपेऽति

१५. 'जगद्धितार्थां' पा० भे०. १५. 'श्रियोतिभक्तो' । १६ 'समर्हणार्थं' इति च पाठः. । १७. 'भिया' पा० भे०.

अब्दुल्लं निहतं तदीयतनयं यातं भयार्त्तं रणा-
च्छ्रुत्वा सा यवनाधिपस्य महिला हेला विसृज्याखिलाः ॥
पर्यङ्कादवरुह्य कुन्तलचयं प्रोन्मुच्य हा हन्त हा
राज्यं मग्नमिदं मदीयमधुनेत्येवं बभाषे वचः ॥ ५४ ॥
पुरपतिः पतितो भयवारिधौ किमधुनाधियुता जनताऽखिला॥
मम करिष्यति यास्यति चेच्छिवो बत शिवोऽप्यशिवो भवितेति सा॥
॥ ५५ ॥

इति श्रीशिवकाव्ये पुरुषोत्तमपण्डितविरचिते तृतीयश्चमत्कारः ॥

प्रसन्नां विस्फोट्य चूर्णं चकार । पुनश्च घरट्टैर्गोधूमचूर्णवत् अतिसूक्ष्मं विधाय शिवभूपेन सार्धं युद्धार्थमागतस्तद्दोषेणैव स मृतः ततः शिवभूपः स्ववासस्थानसमीपे एव गण्डक्याः शिलामानीय प्रतापदुर्गे तां देवीं स्थापयामासेति कथानुसंधेया ॥५२॥

विजयेति । विजयपुरस्य पतिः स समरभवं रणोत्पन्नं सकलं वृत्तं । चरन्ति ते चराः । पचाद्यच् । तेषां अवलयः पंक्तयस्ताभ्यः निशम्य श्रुत्वा हृदयसरसिजे हृत्कमले कुन्तघातैरविरतं निरन्तरं यथा तथा विद्ध इव । संततावितानिशमित्यमरः । तदानीं तस्मिन् काले अभवत् ॥ ५३ ॥

विजयपुराधिपतेः स्त्री सर्वं राज्यकृत्यं चकारातस्तयोक्तं द्वाभ्यामाह । अब्दुल्लेति । यवनाधिपस्य विजयपुराधिपस्य महिला स्त्री अब्दुल्लं निहतं श्रुत्वा भयार्तं तदीयं तनयं रणात् यातं च श्रुत्वा । अखिला हेला लीलाः । हेला लीला क्रिया चेष्टेत्यमरः । विसृज्य । पर्यंकात् अवरुह्य उत्तीर्य । कुन्तलानां चयं प्रकर्षेण उन्मुच्य । हा इति खेदे हन्त खेदे हा खेदे मदीयं इदं राज्यं अधुना अस्मिन् काले मग्नं इत्येवं वचः बभाषे उवाच ॥ ५४ ॥

पुनश्च यद्बभाष तदाह । पुरपतिरिति । पुरपतिः मम भर्ता भयमेव वारिधिस्तस्मिन् पतितः । अतः प्रजारक्षणासमर्थ इति भावः । शिवः शिवभूपः अधुना इदानीं यास्यति चेत् आधिना मनोव्यथया युता । पुंस्याधिर्मानसी व्यथेत्यमरः । अखिला संपूर्णा जनानां समूहो जनता किं करिष्यति । तस्याः रक्षणं कथं भवेदित्यर्थः । बत इतिखेदे । शिवोऽपि नाम्ना कर्मणा च मंगलोऽपि स शिवभूपः अस्माकं अशिवः अमंगलः दुःखप्रद इत्यर्थः भविता इति बभाषे इति पूर्वेणान्वयः ॥ ॥५५॥

इति श्री शिवकाव्यटीकायां प्रकाशिकाख्यायां स्वयकृतायां तृतीयश्चमत्कारः ॥ ३ ॥

राज्ञा न तुष्टेन कदापि भाव्यं तुष्टं नृपं यात्यपहाय लक्ष्मीः ॥
यात्रा मयातः सततं विधेया राज्यस्य रक्षा च कथं मम स्यात् ॥ १ ॥
इत्थं चिरं चिन्तयति प्रपेदे तत्रेति कृत्यं मनसा नृपालः ॥
सह्याद्रिसानुष्वखिलेषु दुर्ग-संघो विधेयः सुदृढो मयाद्य ॥ २ ॥
सद्यः समुत्थाय निजाधिवासाद्दुर्गात्स मूलेऽस्य विदार्य भूमिम् ॥
पाषाणचूर्णादि च दर्शयित्वा तत्कार्यकर्त्रे धनमप्यतोऽदात् ॥ ३ ॥
षष्ट्यन्वितं दुर्गशतत्रयं तत्सकारयामास चतुर्भिरब्दैः ॥
पाषाणचूर्णादि धनं च तत्तन्मूले निखार्यास्य च सिद्धयेऽदात् ॥ ४ ॥
यन्त्राणि तद्दोलकसंघराशीन् धनं च धान्यं तृणकाष्ठवृन्दम् ॥

राज्ञेति । राज्ञा भूपेन कदापि तुष्टेन न भाव्यं न भवितव्यं । तत्रत्वेऽनिष्टमाह । लक्ष्मीः तुष्टं नृपं अपहाय त्यक्त्वा याति गच्छति । तदुक्तं । असंतुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः । सलज्जा गणिका नष्टा निर्लज्जेव कुलाङ्गना ॥ अतः अस्माद्धेतोः मया सततं निरन्तरं । सततानारताश्रान्तसन्ततताविरतानिशमित्यमरः । यात्रा जैत्रयात्रा विधेया कार्या । यात्रायां च एकमनिष्टमस्तीति चिन्तयति । मम राज्यस्य । संपादितस्येत्यर्थः । रक्षा रक्षणं कथं स्यात् । शत्रूणां बाहुल्यात् इतिभावः ॥ १ ॥

इत्थमिति । तस्मिन्निति तत्र रात्रि । सप्तम्यास्त्रल् । मनसा चेतसा अनेन प्रकारेण इत्थं पूर्वश्लोकोक्तप्रकारेण चिरं चिरकालं चिन्तयति सति नृन् पालयतीति नृपालः राजा । कर्मण्यण् । इति वक्ष्यमाणप्रकारेण कृत्यं प्रपेदे प्रतिज्ञातवान् । इति किं । अखिलेषु संपूर्णेषु सह्याद्रेः सानुषु शिखरेषु । स्नुः प्रस्थः सानुरस्त्रियामित्यमरः ॥ सुतरां दृढः दुर्गसंघः विधेयः कार्यः ॥ २ ॥

सद्य इति । सः शिवभूपः सद्यः तत्कालं । सद्यः परुदित्यादिना निपातितः । निजस्य स्वस्य अधिवासात् वासस्थानात् दुर्गात् राजदुर्गादित्यर्थः । समुत्थाय निर्गत्य अस्य राजदुर्गस्य मूले भूमिं विदार्य खात्वा तस्य दुर्गस्य कार्यं प्राकारबन्धरूपं तस्य कर्त्रे शिल्पिने पाषाणाश्च चूर्णं च पाषाणचूर्णानि तानि आदिर्यस्य तत् द्रव्यं बंधनसामग्रीमिति यावत् दर्शयित्वा । अतः अस्मादेव गिरेःमूलादित्यर्थः धनमपि अदात् दत्तवान् ॥ दानार्थादस्माल्लुङि गातिस्थेत्यादिना सिचो लुक् ददातिरिह भाक्तः रजकाय वस्त्रं ददातीति वत् । यदाह भगवान्भाष्यकारः खण्डिकोपाध्यायः शिष्याय चपेटिकां ददाति ॥ ३ ॥

षष्टीति । शिवभूपः तत् लोके प्रसिद्धं षष्ट्या अन्वितं दुर्गाणां शतत्रयं षष्ट्यधिकत्रीणि शतानीत्यर्थः । पंक्तिविंशतीत्यादिना निपातितः षष्टिशब्दः । चतुर्भिः अब्दैः

१. 'मूलेषु खात्वा०' पा० भे० ।

सर्वेषु दुर्गेषु दशाब्दपूरं निवेशयामास स राजराजः ॥ ५ ॥
सर्वेषु दुर्गेषु स धीरवीरान्कुलेषु जातान्प्रथितान् रणेषु ॥
अचीकरद्वीरसमूहमुख्यां स्तांस्तान्धनं तोषकरं च दत्त्वा ॥ ६ ॥
एवं विधायाशु स वीरवर्यो मेने मयाद्यैव जितं हि राज्यम् ॥
दुर्गाणि धान्यादियुतानि कोशो मित्राण्यमात्याश्च यतः सहायाः ॥७॥
एकदाचिन्तयद्राजा जलदुर्गाणि कानिचित् ॥
समुद्रे सन्ति तत्रत्या बाधन्ते मत्प्रजा इमाः ॥ ८ ॥
तेषु दण्डः कथं हा स्यात्कथं रक्ष्याः प्रजा मया ॥
समुद्रे यदि दुर्गं स्यात्संसेत्स्यति तदाखिलम् ॥ ९ ॥

कारयामास कारितवान् । तस्य तस्य दुर्गस्य मूले निखाय खात्वा पाषाणचूर्णादि धनं च अस्य दुर्गसमूहस्य सिद्धये अदात् । तपःसामर्थ्यादिति भावः ॥ ४ ॥

यन्त्राणीति । राज्ञां राजा इति राजराजः । राजाहःसखिभ्यष्टच् । स शिवभूपः सर्वेषु दुर्गेषु यंत्राणि तोफासंज्ञानि तेषां यंत्रोपयुक्तानां गोलकानां संघानां राशीन् । पूरयति तर्पयति पालयति वा । पूरं पचाद्यच् । दशानांअब्दानां पूरं पूरकं । दशवर्षपर्यंतं वीररक्षणकरमित्यर्थः । धनं च धान्यं तृणकाष्ठानां वृन्दं समूहं निवेशयामास स्थापयामास ॥ ५ ॥

सर्वेष्विति । स शिवभूपः सर्वेषु दुर्गेषु धीरान् धैर्यवन्तः वीरान् शूरान् कुलेषु वीरकुलेषु जातान् रणेषु संग्रामेषु प्रस्थितान् प्रख्यातान् तान् तान् तत्तन्नामकान् तोषकरं धनं च दत्वा वीरसमूहमुख्यान् नायकान् । लोके हवालदार इतिप्रसिद्धान् । अचीकरत् कृतवान् । स्वार्थे णिजंतात् कृधातोर्लुङि चङि द्वित्वे रूपं ॥ ६ ॥

एवमिति । स वीरवर्यः एवं उक्तप्रकारेण विधाय कृत्वा मया अद्यैव अस्मिन्नेव दिने राज्यं जितं इति हि निश्चयेन मेने । यतः यस्माद्धेतोः धान्यादियुतानि दुर्गाणि कोशः अर्थराशिः मित्राणि । अमाभवा अमात्याः । सहार्यात् अव्ययादमाशब्दात्यप् । अमान्तिकसहार्ययोरित्यमरः । सहायाः सन्तीति शेषः ॥ ७ ॥

एवं सागरजलाद्बहिःस्थितशत्रुपीडापरिहारोपायं विधाय सागरमध्यस्थशत्रुपराजयसाधनं चिन्तयति । एकदेति । राजा एकस्मिन् काले एकदा इति अचिन्तयत् । इति किं । समुद्रे जलदुर्गाणि कानिचित् सन्ति तत्र भवास्तत्रत्याः । त्रलूप्रत्ययान्तस्य तद्धितश्चासर्वविभक्तिरित्यनेन अव्ययत्वात् भवार्थेत्यप् । इमाः मत्प्रजाः बाधन्ते पीडयन्ति ॥ ८ ॥

तेष्विति । तेषु शत्रुषु हा इति खेदे दण्डः शासनं कथं स्यात् मया प्रजाः कथं रक्ष्याः । समुद्रे यदि दुर्गं स्यात्तदा अखिलं प्रजारक्षणं संसेत्स्यति सिद्धं भवेत् ॥९॥

इत्थं विचिन्त्य मेधावी गतोऽसौ सागरं प्रति ॥
तत्र स्नात्वा चानशनो रात्रौ सुष्वाप तत्तटे ॥ १० ॥
अब्धिः पुरुषरूपेण रात्रावागत्य चाब्रवीत् ॥
राजराज जनानन्दकारिन्मम वचः शृणु ॥ ११ ॥
इतोऽविदूरेऽस्ति[2] महान्पर्वतो जलमध्यगः ॥
तस्योपरि त्वया दुर्गं विधेयं नातिविस्तृतम् ॥ १२ ॥
एकेन दिवसेन त्वं यदि दुर्गं विधास्यसि ॥
तर्हि ते[3] दर्शयिष्यामि पर्वतं नातिदूरतः ॥ १३ ॥
इत्युक्त्वाऽदर्शनं वार्धिर्गतो राजाप्यकारयत् ॥
शिल्पिनां स सहस्रैस्तु दुर्गं दृढतरं महत् ॥ १४ ॥
दृषत्संघोपरिदृषत्संघोऽयमिति चाङ्कितम् ॥
कृत्वा प्राकाररचनां नरपोऽगात्स सागरम् ॥ १५ ॥

इत्यमिति । मेधास्यास्तीति मेधावी बुद्धिमान् । अस्मायामेधास्रजो विनिरितिविनिः । राजा इत्थं उक्तप्रकारेण विचिन्त्य सागरं प्रति गतः तत्र सागरे स्नात्वा अनशनः उपोषितः तस्य सागरस्य तटे सुष्वाप ॥ १० ॥

अब्धिरिति । अब्धिः पुरुषरूपेण रात्रौ आगत्य तं उत्थाप्य च अब्रवीत् उक्तवान् । हे राजराज राजश्रेष्ठ जनानामानन्दं करोति तच्छील हे जनानन्दकारिन मम वचः शृणु ॥ ११ ॥

इतोइति । इतः त्वदधिष्ठितात् प्रदेशात् अविदूरे समीपे महादुर्गविधानोपयुक्तः जलमध्यगः पर्वतः अस्ति तस्य उपरि त्वया नातिविस्तृतं । नञर्थनशब्दस्य सुपूसुपोतिसमासः । दुर्गं विधेयं कर्तव्यं ॥ १२ ॥

राज्ञो लोके तपस्वित्वं प्रकटयितुं कार्यशैघ्र्यमुपदिशति । एकेनेति । त्वं एकेन दिवसेन यदि दुर्गं विधास्यसि तर्हि ते तुभ्यं नातिदूरतः समीपे एव पर्वतं दर्शयिष्यामि ॥ १३ ॥

इतीति । वार्धिः समुद्रः इति पूर्वोक्तप्रकारेण उक्त्वा अदर्शनं गतः पुरुषरूपं तिरोहितवानित्यर्थः । राजापि शिल्पिनां सहस्रैः दृढतरं महत् विस्तृतं तन्मालवणाख्यं दुर्गं अकारयत् कारितवान् ॥ १४ ॥

दुर्गविधानप्रकारमाह । दृषदिति । नरान् पातीति नरपः शिवभूपः । आतोनुपसर्गे कः । दृषतां पाषाणानां यः संघः तस्योपरि अयं दृषत्संघ इति अंकितां चिन्हितां प्राकारस्य रचनां निर्मितिं कृत्वा सागरं अगात् गतवान् । एकेन दिवसेनैव दुर्गं कुर्वित्युक्तमतः स राजा पूर्वं सागरतीरे पाषाणैः सुघटितैः प्राकाररचनां आ-

२. ' ०रेसुमहान् ' पा० भे० । ३. ' त्वां ' पा० भे० ।

नत्वा स प्रार्थयामास दर्शयाद्य महीधरम् ॥
एवं वदति राजेन्द्रे जलं तत्याज पर्वतम् ॥ १६ ॥
शिलोच्चये सुशीलोऽसावेकेनाह्नैव तद्व्यधात् ॥
उदितं सरसस्तस्मात्किमु पुष्करमद्भुतम् ॥ १७ ॥
अब्धिरच्छादयत्तूर्णं पर्वतं सर्वतस्ततः ॥
जलादुपरि तद्दुर्गं द्विहस्तं ददृशे जनैः[४] ॥ १८ ॥
गृहाणि रमणीयानि यन्त्रस्थापनभूमिकाः ॥
पश्चादकारयद्राजा जलयानसुसाधनः ॥ १९ ॥
सागरस्य जलेनात्र निर्वाहो लवणेन किम् ॥
तन्मालवणमित्याहुर्जलदुर्गं सुदुर्गमम् ॥ २० ॥

दावेकेन वर्षेण चकार सा च इयं पाषाणपंक्तिः प्रथमा तदुपरि इयं द्वितीया तदुपरि इयं तृतीयेत्यादिअंकैश्चिह्नितां कृत्वा अनन्तरं जलमध्यगते पर्वते तस्या निवेशनार्थं समुद्रमगादित्यर्थः ॥ १५ ॥

नत्वेति । असौ राजा तमितिशेषः नत्वा प्रणम्य महीधरं दर्शयेतिप्रार्थयामास । एवं राजेन्द्रे वदति सति जलं पर्वतं तत्याज पर्वतादपससारेत्यर्थः ॥ १६ ॥

शिलोच्चय इति । सुशीलः असौ राजा शिलोच्चये पर्वते एकेनैव अह्ना तद्दुर्गं व्यधात् कृतवान् । पूर्वं तीरे एकेन वर्षेण पाषाणघटना कृता पर्वतोपरिदुर्गं तु एकेनैवदिवसेन चकारेत्यर्थः । अतित्वरयोत्पादितत्वात् कमलत्वेनोत्प्रेक्षते । तस्मात् सरसः सरोवरात् । सागरस्य सरस्त्वं भगवता गीतासूक्तं । सरसामस्मिसागर इति । अद्भुतं पुष्करं कमलं उदितं किमु ॥ १७ ॥

अब्धिरिति । ततः दुर्गविधानानन्तरं अब्धिः तूर्णं शीघ्रं । सत्वरं चपलं तूर्णमित्यमरः । सर्वतः सर्वं प्रदेशं । सार्वविभक्तिस्तसिः । अच्छादयत् आच्छादितवान् । तद्दुर्गं जलस्य उपरि ऊर्ध्वभागे द्वौ हस्तौ प्रमाणं यस्येति द्विहस्तं ददृशे दृष्टं जनैरिति शेषः ॥ १८ ॥

गृहाणीति । जलयानानि नौकास्ता एव साधनं यस्य स राजा रमणीयानि गृहाणि यंत्रस्थापनभूमिकाश्च पश्चादकारयत् शिल्पिभिरिति शेषः ॥ १९ ॥

तस्य दुर्गस्य मालवणमिति संज्ञा विहिता तस्या निरुक्तिमाह । सागरस्येति । अत्र अस्मिन् दुर्गे सागरस्य जलेन निर्वाहः पाकसिद्धिः । लवणस्थाने जलमेव प्रक्षेप्यं अतः लवणेन किं नकिंचित्प्रयोजनमित्यर्थः । ततः तस्मात्कारणात् सुतरां दुर्गमं दुर्गं मालवणमिति आहुः । बुधा इति शेषः ॥ २० ॥

---

४. 'तदा' पा० भे० ।

तत्राप्येकं निजं कंचित्स्थापयित्वा ययौ सुधीः ॥
सप्तारदुर्गं सुमहत्कृष्णादक्षिणतीरगम् ॥ २१ ॥
तत्रैव कतिचित्कालान् जनताकार्यकृन्नृपः ॥
अवसद्राजधानी सा बभूव जनवल्लभा ॥ २२ ॥
कृतादिजाता अपि राजवर्या नलादयो मद्वशगा अभूवन् ॥
युगे मदीये निवसन्नृपोऽयं न मत्परश्चेद्वितापकीर्तिः ॥ २३ ॥
इत्थं कलौ चिन्तयति प्रपेदे गागाख्यविप्रो नरराजपार्श्वम् ॥
संयोज्य चैवाशिषमाह राजन्नहं त्वदीयः शुभचिन्तकोऽस्मि ॥ २४ ॥
यत्क्षात्रधर्मेऽभिरतोऽसि नित्यं तत्क्षत्रियस्त्वं खलु कर्मणासि ॥
तवात्र मौञ्जी विहिता विवाहो वेदोक्तमार्गेण तवान्वयेऽपि ॥ २५ ॥

तत्रेति । सुधीः स तत्रापि मालवणेऽपि एकं निजं आप्तं कंचित्स्थापयित्वा अधिकारिणं कृत्वेत्यर्थः । कृष्णाया दक्षिणे तीरे गच्छति वर्तते तत्तथोक्तं सुमहत् महत्तरं सप्तारदुर्गं लोके सातारा इति प्रसिद्धं दुर्गं ययौ जगाम ॥ २१ ॥

तत्रैवेति । जनानां समूहो जनता । ग्रामजनबन्धुसहायेभ्यस्तल् । तस्याः कार्यं तत्करोतीति कृत् । क्विप् तुक् । नृपः राजा तत्रैव सप्तारदुर्गे कतिचित्कालान् कानिचित् वर्षाणि । कालाध्वनोरत्यन्तसंयोगे द्वितीया । संवत्सरावयवत्वविवक्षया कालस्य बहुत्वं । अवसत् स्थितवान् । अतः सा जनवल्लभा जनप्रिया राजधानी बभूव जाता ॥ २२ ॥

राज्ञः परममुत्कर्षमसहमानः कलिश्चिन्तातुरो बभुवेत्याह । कृतादीति । कृतं कृतयुगं आदिर्ययोस्तयोस्त्रेताद्वापरयोः । त्रिषुयुगेष्वित्यर्थः । तद्गुणसंविज्ञानबहुव्रीहिरयं । जाता उत्पन्ना अपि राजवर्या राजश्रेष्ठा नलादयो मद्वशगा मदधीना मया आक्रांता इत्यर्थः । ममेदं मदीयं कलियुगं तस्मिन् । वृद्धाच्छः । अयं नृपः शिवाख्यः मत्परः मदधीनः न चेत् ममेत्यध्याहारः अपकीर्तिः भविता ॥ २३ ॥

इत्यमिति । कलौ कलियुगाभिधाने देवे इत्यं पूर्वोक्तप्रकारेण चिंतयति सति गागाख्यः विप्रः काशीस्थः नरराजस्य पार्श्वं पार्श्वदेशं प्रपेदे प्राप्तवान् । किंच आशिषं आशीर्वादं संयोज्य चिरंजीवेत्यादि आशीर्वादं दत्वा हे राजन् अहं त्वदीयः त्वदाश्रितः अतः शुभस्य कल्याणस्य चिंतकः । ण्वुलि अकादेशः । अस्मीत्याह ॥ २४ ॥

यदिति । त्वं यद्यस्मात् क्षतात् त्रायते इति क्षत्रं क्षत्रियजातिः तस्यायं क्षात्रो धर्मः तस्मिन् अभिरतः असि तस्मात्कर्मणा क्षत्रियोऽसि न जात्येति भावः । अतः

---

५. 'सप्तारि०' पा० भे० । ६. 'मासान्' पा० भे० । ७. 'येन जिताः स्वकीर्त्या' पा० भे० । ८. 'युगे कलावत्र सतो विजिग्ये । नृपानयं चित्रतरं न चैतत्' पा० भे० । ९. 'गच्छति वै' पा० भे० । १०. 'नरराजराजं' पा० भे० । ११. 'कर्मणापि' पा० भे० ।

राजाप्यतितुष्टो[12] नरयानमध्ये द्विजं समारोप्य सहैव निन्ये ॥
मञ्चिन्तितं यत्सकलं तथेति कलिः प्रहर्षं परमं जगाम[13] ॥ २६ ॥
तदोपनीतो[14] गुरुणा नृपोसौ समेखलः साजिनकः सदण्डः ॥
विहाय मौञ्जीं विधिना स्वकाले[15] पाणिग्रहं चापि चकार वध्वाः ॥ २७ ॥
धनाधीशाः कृता येन धनधीशसमा अपि ॥
वैरिणो वैरिणश्चक्रे स च रंकसमान् समान्[16] ॥
स्वधर्ममनुतिष्ठन्यश्चकार जनपालनम् ॥
कलिना भिन्नधी राजा जजाप त्रिपदीमसौ[17] ॥ २८ ॥
सावित्रीं जपतस्तस्य कियद्भिर्दिवसैर्धनम् ॥
अन्तर्हितं भूमिगतं तावताभूत्कलिः कृती ॥ २९ ॥

अस्मिन् कलौ तव मौंजी उपनयनं विवाहश्च वेदे उक्तो यो धर्मस्तेन विहिता विहितश्चेतिलिंगव्यत्ययेन योज्यं । इतःपरं तवान्वयेऽपि वंशेऽपि भविष्यतीति शेषः । विद्वानपि गागाभट्टः कलिभिन्नमतिः सन् राज्ञः कृपां संपादयितुं शास्त्रविरुद्धं बभाषे इति भावः ॥ २५ ॥

राजेति । राजा अतितुष्टः सन् द्विजं गागाख्यं नरयानमध्ये शिबिकायां समारोप्य स्वेन सहैव एनमिति शेषः निन्ये । कलिः मञ्चिंतितं यत् तत्सकलं तथा मञ्चिंतितानुरूपमिति परमं प्रहर्षं जगाम प्राप्तवान् ॥ २६ ॥

तदेति । तदा मौंज्युक्ते काले गुरुणा गागाभट्टेन उपनीतः अत एव समेखलः मौंजीयुक्त साजनिकः सदण्डः असौ नृपः स्वकाले समावर्तनोक्ते काले मौंजीं मेखलां विधिना यथाशास्त्रं विहाय उत्सृज्य वध्वाः पाणिग्रहं विवाहं चकार कृतवान् वेदोक्तमार्गेणेतिभावः ॥ २७ ॥

स्वधर्ममिति । यः राजा स्वजातिधर्मं अनुतिष्ठन् आचरन् सन् जनपालनं चकार सः असौ कलिना हेतुभूतेन भिन्ना विपरीता बुद्धिर्यस्यतथा सन् त्रिपदीं गायत्रीं जजाप ॥ २८ ॥

अकार्यकरणस्य सद्यः फलमाह । सावित्रीति । तस्य राज्ञः सावित्रीं जपतः सावित्रीजपाद्धेतोः भूमिगतं धनं कियद्भिः दिवसैः अंतर्हितं अदृश्यमभूत् इत्यर्थः । कलिः तावतैव धनाच्छादनेनैव कृती कृतकृत्यः अभूत् ॥ २९ ॥

---

१२. 'राजापि' पा० भे० । १३. 'निकेतनं स्व सुरराजवेश्मसमानमानंदितसर्वलोकः' पा० भे० । १४. 'तथोपनीतो' पा० भे० । १५. 'स काले' पा० भे० । १६. अयं अधिकः श्लोकः क्वचित् दृश्यते । १७. "पालनं तस्य तच्चक्रे देवी देववरार्चिता" पा० भे० ।

स राजराजो जितशत्रुसेनः पतिः प्रजानां नयविद्दयालुः ॥
शचीपतिश्रीः श्रितकल्पवल्ली दिल्लीपतिं जेतुमसौ प्रतस्थे ॥ ३० ॥
रेवामरे वांछितदां नमात्र स्नाहीति सर्वे जगदुश्च सस्नुः ॥
पितॄन्[१९] प्रतर्प्य द्विजदेवताश्च नौकाशतैस्तां प्रविलंघ्य जग्मुः ॥ ३१ ॥
अतीत्य रेवामपि यान्तमग्रे निशम्य दिल्लीपतिराबभाषे ॥
अल्लेत्यभीक्ष्णं विगतान्यवाचः सल्ला विधेयो न विरोधकालः ॥ ३२ ॥

एवं दक्षिणां दिशं जित्वा तत्र दुर्गविधानादि विधायोत्तरां दिशं जेतुं ययावित्याह। स राजराज इत्यादिना। स इति। अथ राजराजः राजाहः सखिभ्यष्टच्। जिता शत्रुसेना येन। नयं नीतिशास्त्रं वेत्तीति नयवित्। अतएव प्रजानां जनानां पतिः पालकः। प्रजास्यात्संततौ जन इत्यमरः। दयतेऽसौ दयालुः। स्पृहिगृहीत्यादिना कर्तरि आलुच्। एभिस्त्रिभिर्विशेषणैर्देशान्तरेऽपि प्रजापीडकत्वाभावः सूचितः। शच्या इन्द्राण्याः पतिः इन्द्रस्तस्य श्रीरिव श्रीर्यस्य। तथोक्तः अतः श्रितानां कल्पवल्ली कल्पवृक्षः। मुक्तानां परमागतिरितिवत् स्त्रीलिंगस्य विशेषणत्वं। असौ राजा दिल्लीपतिं सार्वभौमं जेतुं प्रतस्थे। समवप्रविभ्यःस्थ इत्यात्मने पदं। श्रितकल्पवल्लीति दिल्लच्याः विशेषणं। यद्वाश्रितकल्पवल्लीति दिल्लीपतेर्विशेषणं ॥ ३० ॥

स्वनिवासान्नर्मदापर्यन्तं देशे आक्रान्ते महता हर्षेण युता वीराः परस्परं संबोध्योचुः। रेवामिति। अरे इति अतिहर्षात्सावज्ञं संबोधने। वांछितं ददातीति वांछितदा तां रेवां नमस्कुरु अत्र अस्यां स्नाहि स्नानं कुरु इति सर्वे वीराः परस्परं जगदुः सस्नुश्च। स्नानमात्रेणैहिकपारलौकिकवांछितदा इयं नर्मदा इति बाह्योर्थः। अस्यामुत्तीर्णायां बहुलेप्सितधनवस्त्रादिलाभः स्यादत इयं वांछितदेति गूढाशयः। द्विजाश्च देवताश्च द्विजदेवताः अल्पाच्त्वात् द्विजशब्दस्यपूर्वनिपातः। देवान् ततः द्विजान् सनकादीन् ततः पितॄन् सन्तर्प्य। नौकाशतैस्तां प्रविलंघ्य उत्तीर्य जग्मुः ॥ ३१ ॥

अतीत्येति। दिल्लीपतिः इन्द्रप्रस्थाधिपः अस्मिन् काले इन्द्रप्रस्थस्य दिल्लीति संज्ञयैव प्रसिद्धत्वाद्दिल्लीति पदस्य श्लोके निवेशः। रेवां नर्मदां अतीत्य अतिक्रम्य यान्तं शिवभूपं निशम्य श्रुत्वा। विगता अन्या वाचा वाग्यस्मात् स विगतान्यवाचः सन्। भागुरिमतेन हलंतस्याप्यबंतत्वं। अल्ला इति अभीक्ष्णं बभाषे पौनःपुन्येन स्वदेवं सस्मारेत्यर्थः। यद्वा। अल्ल इति मातृस्मरणं। लोके हि अति संकटे मातरं स्मरन्तीति प्रसिद्धं। सल्ला साम विधेयः कर्तव्यः। यवनभाषया सल्ला इति साम नाम। यद्वा। सन्तं लाति रक्षतीति सल्ला। विच्धातूनां अनेकार्थत्वाद्रक्षणार्थत्वं। विरोधस्य कालः न इति अभीक्ष्णं पौनःपुन्येन बभाषे उक्तवान् ॥ ३२ ॥

---

१८. 'ºमथ' पा० मे०। १९. 'संतर्प्य पितॄन्' पा० मे०।

ततश्च संमन्त्र्य सुमन्त्रियुक्तैः[20] सेनापतिं पातितवीरसेनम् ॥
वीरैः सहस्रैः परिवारितं तं संप्रेषयामास स सार्वभौमः ॥ ३३ ॥
युद्धं तयोर्दारुणमत्र शश्वत्समाहमाखण्डललोकदायि ॥
बभूव सेना यवनेश्वरस्य कृन्तालोकं प्रति निर्जगाम ॥ ३४ ॥
सेनापतिर्निर्जितसर्वसेनो[21] जगाम दिल्लीं त्रिचतुर्भिरश्वैः ॥
अकीर्तिभारं शिरसा वहन्सन्नधोमुखः खिन्नतरः कृपाणी ॥ ३५ ॥
सा राजधानीजनता भयेन विलीनसर्वाभरणा कुवासाः ॥
उन्निद्रदृष्टिर्विगतान्नपाना भवेत्कथं हेति जगाद चोच्चैः[22] ॥ ३६ ॥

तत इति । किंच ततः तदनंतरं स इन्द्रप्रस्थाधिपः मंत्रयन्ति ते मंत्रिणः शोभनाश्च ते मंत्रिणश्च सुमंत्रिणस्तैर्युक्तःसन् । संमन्त्र्य विचार्य पातिता वीरसेना येन तं सहस्रैः बहुसहस्रैः वीरैः परिवारितं तं सेनापतिं संप्रेषयामास ॥ ३३ ॥

युद्धमिति । अत्र नर्मदातीरे तयो राजसेनापत्योः दारुणं आखण्डलस्य लोकः तं ददातीति आखण्डललोकदायि । णिनि प्रत्यये युगागमः । युद्धं सप्तानां अह्नां समाहारः सप्ताहः तं सप्तदिनं । समासान्ते टचि टिलोपे रात्राह्नाहाः पुंसीति पुंस्त्वं अनन्तरत्वात्परत्वाल्लिंगतापवादोप्ययं परत्वात् समाहारनपुंसकतां बाधते । कालाध्वनोरत्यन्तसंयोगे इति द्वितीया । शश्वत् निरंतरं बभूव । यवनेश्वरस्य सेना कृतान्तस्य यमस्य लोकं प्रति जगाम गतवती । शिवभूपवीरा युद्धे अभिमुखं हतत्वादाखण्डललोकं ययुः । यवनेश्वरवीरास्तु तथात्वाभावाद्यमलोकं जग्मुरिति सर्वमविरुद्धम् ॥३४॥

सेनापतिरिति । निर्जिता सर्वे सेना यस्य सनिर्जितसर्वसेनः अत एव अकीर्तिभारं शिरसा वहन् अत एव अधोमुखः अतएव खिन्नतरः कृपाणी कृपाणमात्रमवशिष्टमित्यर्थः । सन् सुधीरपि । सन् सुधीः कोविदो बुध इत्यमरः । सेनापतिः दिल्लीं त्रयश्चत्वारो वा त्रिचत्वारस्तैस्त्रिचतुर्भिः । संख्ययाव्ययासन्नेत्यादिनासमासः बहुव्रीहौ संख्येये इत्यादिना समासान्तस्तु न अनित्यत्वात् । यद्वा । नायं बहुव्रीहिः । त्रयश्च चत्वारश्च त्रिचत्वारः सप्तेत्यर्थः तैः अश्वैः जगाम ॥ ३५ ॥

सेति । सा राजधानीजनता इन्द्रप्रस्थजनसमूहः भयेन विलीनानि सर्वाभरणानि यस्याः सा कुत्सितानि मलिनानि वासांसि यस्याः सा उद्गता निद्रा यस्याः सा उन्निद्रा दृष्टि र्यस्याः सा विगतं अन्नं पानं च यस्याः सा तथोक्ता अभवत् । इतिशेषः । किंच सा हा इति खेदे कथं भवेत् इति उच्चैः उच्चस्वरेण जगाद उवाच ॥ ३६ ॥

---

२०. 'सार्धं' पा० भे० । २१. 'वीरसेनो' पा० भे० । २२. 'जगादहोच्चैः' पा० भे० ।

पुनश्च समन्त्र्य निजं प्रधानं भटाग्रगण्यं प्रथितं जनेषु ॥
संप्रेषयामास शकैः स हूणैस्ताम्रैः सुवीरैर्दरदाश्मकैश्च ॥ ३७ ॥
इतिश्रीपुरुषोत्तमकविविरचिते शिवकाव्ये चतुर्थश्चमत्कारः ॥

शास्ता[1] नाम्नान्वर्थनामा प्रतस्थे दिल्लीपालप्रेषितो धैर्यसिंधुः ॥
कर्षन् सेनावारिधिं दंतिकच्छं वाजिव्रातापूरितं वीरमत्स्यम् ॥ १ ॥
तोफाभिर्नृप्राणहिंसोदिताभिर्हिंसार्थाभिर्भीमशब्दार्तिदाभिः ॥
युक्तो वीरैः कुंतखड्गादिहस्तैश्चापैस्तूणैरन्वितैरन्वितश्च ॥ २ ॥
वाजिस्थैस्तैः कुंजरस्थैश्च यंत्रैरुष्ट्रारूढैर्वीरवर्यप्रगुप्तैः ॥
युक्तो धन्वी बाणसंघं दधानः पृष्ठे खड्गं चर्म वर्मादधानः ॥ ३ ॥

पुनश्चेति । स पुनश्च पुनरपि संमन्त्र्य सम्यक् विचार्य्य भटेषु अग्रगण्यं श्रेष्ठं अतः जनेषु प्रथितं प्रख्यातं शकैः हूणैः ताम्रैः सुवीरैः दरदैः अश्मकैश्च संप्रेषयामास । शकादयो यवनजातिभेदाः ॥ ३७ ॥

इतिश्रीशिवकाव्यव्याख्यायां प्रकाशिकाख्यायां स्वकृतायां चतुर्थश्चमत्कारः ॥

पुनश्चेत्यादिना निजं प्रधानं प्रेषयामासेत्युक्तं तस्यैव प्रस्थानमाह शास्तेति। दिल्लीपालेन प्रेषितः धैर्यस्य धीरत्वस्य । कर्मणि ष्यञ् । सिंधुः समुद्रः प्रशस्तौ दंतौ येषां ते दंतिनः गजाः । प्रशंसायां अत इनि ठनाविति इनिः । ते कच्छाः कमठाः यस्मिन् तं । वाजिनां अश्वानां व्राताः समूहास्त एव आपः उदकानि तैः पूरितं । वीरा एव मत्स्याः यस्मिन् तं । सेनैव वारिधिः समुद्रः तं कर्षन् । अन्वर्थं यथार्थं नाम यस्य । नाम्ना शास्ता प्रधानवर्यः लोके शास्तिखान इति प्रसिद्धः । शासेरौणादिकस्तृच्निपातनादिडभावः । प्रतस्थे प्रस्थितवान् ॥ १ ॥

तस्य प्रयाणमाह त्रिभिः श्लोकैः तोफाभिरित्यादिभिः । नृणां मनुष्याणां प्राणास्तेषां हिंसा तस्यै उदिताभिः । हिंसैव अर्थो अवयवार्थो यासां ताभिः । भीमेन शब्देन आर्तिं पीडां ददाति यास्ताभिः तोफाभिः लोके प्रसिद्धाभिः । भौवादिकात् हिंसार्थात् तुफधातोः पचाद्यचिरूपं युक्तं । कुंत खड्गादयो हस्तेषु येषां तैः चापैः धनुर्भिः तूणैः निषंगैः । तूणीपासंगतूणीरनिषंगा इषुधिर्द्वयोरित्यमरः । अन्वितैः युक्तैः अन्वितः युक्तः ॥ २ ॥

वाजिस्थैरिति । वाजिषु अश्वेषु तिष्ठंति तैः प्रसिद्धैः । सुपिस्थ इति कप्रत्ययः । कुंजरस्थैः गजारूढैः उष्ट्रारूढैश्च वीरवर्यैः प्रगुप्तैः रक्षितैः यंत्रैः युक्तः । धन्वी धनुष्मान् । धन्वी धनुष्मान् धानुष्क इत्यमरः । पृष्ठे खड्गं चर्म च आदधानः । वर्म कवचं च आदधानः ॥ ३ ॥

---

१. 'नाम्ना शास्ता' पा० भे० । २ 'बल्हश्वांभः' पा० भे० ।

अक्षौहिण्या सेनया संपरीतस्त्रिंशत्कोटीः स्वर्णमुद्राः प्रगृह्य ॥
भास्वंतं तं छादयंश्छादितारः शास्ता यातो वाहनोत्थै रजोभिः ॥४॥
दिल्लीपालस्याग्रतो यः प्रतिज्ञां चक्रे हत्वा नैव यास्यामि भूपम् ॥
सोऽयं राहुर्भानुमन्तं शिवं तं मत्तो यातो म्लेच्छनाथाधिनाथः ॥ ५ ॥
उल्लंघ्याद्रिं विंध्यमायांतमेनं श्रुत्वा राजा चिंतयन्मंत्रिवृद्धैः ॥
किं वा कार्यं सागरोऽयं प्रयाति कुल्याया मे संस्थितिः स्यात्कथं हा॥६॥
केचित्प्रोचुः संधिरेतेन कार्यो भेदो वाऽपि श्रेयसो हेतुरत्र ॥
वार्ता कार्या नैव युद्धस्य तेन युद्धं शस्तं कार्यमेवेति वीराः ॥ ७ ॥

अक्षौहिण्येति । अक्षौहिणीसंख्यया सेनया संपरीतः युक्तः । अक्षौहिणीप्रमाणं तु । एको रथो गजश्चैको नराः पंच पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ १ ॥ पत्तिं तु त्रिगुणामेकं विदुः सेनामुखं बुधाः । त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥ २ ॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः । स्मृतास्तिस्रस्तुवाहिन्यः पृतनेति विचक्षणैः ॥ ३ ॥ चमूस्तु पृतनास्तिस्रश्चम्वस्तिस्रस्तु नीकिनी । अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥ ४ ॥ एवमेवामरेपि । वाहनोत्थैः रजोभिः तं प्रसिद्धं भास्वंतं सूर्यं छादयन् छादिताः आशाः दिशो येन सः । आशाश्च हरितश्च ता इत्यमरः । शास्ता तन्नामकः वीरः त्रिंशत्कोटीः स्वर्ण मुद्राः लोके होन इति प्रसिद्धाः प्रगृह्य यातः प्राप्तः इति त्रयाणामन्वयः । विशेषकमिदम् ॥ ४ ॥

दिल्लीति । यः शास्ता दिल्लीपालस्याग्रे भूपं शिवं अहत्वा नैवयास्यामि हत्वैव यास्यामीत्यर्थः इतिप्रतिज्ञांचक्रे । भूपं हत्वा नैव यास्यामि किंतु अहत्वैव यास्यामीति वास्तवोर्थः । मत्तः मद्येन । म्लेच्छनायानां आधिनाथः राहुः राहुसदृशः सः अयं शास्ता भानुमंतं भानुसदृशं तं भूपं यातः ययौ ॥ ५ ॥

उल्लंघ्येति । राजा शिवभूपः विन्ध्यं विन्ध्यसंज्ञं आद्रिं उल्लंघ्य आयान्तं आगच्छन्तं । आङ् पूर्वाद्याधातोर्लटि शत्रादेशः । एनं शास्तृसंज्ञं श्रुत्वा मंत्रिवृद्धैः सह इत्यचिंतयत् । इति किं । अयं शत्रुः सागरः सागरसदृशः प्रयाति अतः किं वा कार्यं विकल्पे वा शब्दः । वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये इति विश्वः । कुल्यायाः कृत्रिमसरित्सदृशस्य मे संस्थितिः कथं स्यात् । हा इतिखेदे । कुल्यास्यात्कृत्रिमासरिदित्यमरः । कुल्यासागरशब्दौ सिंहो देवदत्त इतिवत् तत्सदृशे लक्षणया । एवं पूर्व श्लोकेपि ॥ ६ ॥

केचिदिति । केचिन्नीतिशास्त्रज्ञाः अशूराः एतेन आगतेन सह । विनापि तद्योगं तृतीया । संधिर्मैत्री वा भेदः परपक्षगानां धनदानेन वशीकरणं कार्यः कर्तव्यः । अत्र शत्रुविषये अपि शब्दात् उभयमपि श्रेयसः कल्याणस्य हेतुः कारणं इति

तस्मिंश्चिंताशरिराशौ निमग्ने देवी दुर्गा देहमस्याविवेश ॥
वाचं सोच्चैराह हे वीरवर्य चिंता कार्या नैव युद्धं विधेयम् ॥ ८ ॥
देवीवाचं पत्रिकायां विलिख्य सुस्थायास्मै दर्शयामासुरेनाम् ॥
पत्रीमेकें राजवर्योऽपि दृष्ट्वा हृष्टो युद्धासक्तबुद्धिर्बभूव ॥ ९ ॥
श्रुत्वा पुण्यग्राममेत्य स्थितं तं राजा वीरैः राजदुर्गादगम्यात् ॥
सन्नद्धैः स्वैर्वाजिभ्यहैरशेषैः पद्भैश्चागात्तं सहस्रप्रसंख्यैः ॥ १० ॥
अश्वारोहान्स्थापयित्वा स चारात् पद्भैः शूरैर्युक्त एकः समेत्य ॥
वासोभित्तीः सप्त खड्गेन भित्त्वा वीराग्र्योऽहन् रक्षकान् षंढसंज्ञान्॥११॥
राजा स्त्रीणां संहतिं शस्त्रजीवां दूरात्कृत्वा प्राविशत्तत्समीपम् ॥
नारीमध्ये वर्तमानः स नग्नो राजानं तं कालकल्पं ददर्श ॥ १२ ॥

प्रोचुः । तेन सह युद्धस्य वार्ता न कार्या इति मध्यमा ऊचुः । वीरास्तु तेन सह युद्धं शस्तं युद्धमेव कार्यमेवेति सावधारणं ऊचुः वदंति स्म ॥ ७ ॥

तस्मिन्निति । तस्मिन् शिवभूपे चिंतावारिराशौ चिंतासमुद्रे मग्ने सति । मंत्रिणां वचनस्य नानाविधत्वेनानिश्चयादिति भावः । दुर्गादेवी अस्य नृपस्य देहं आविवेश विशति स्म । सा देवी उच्चैः उच्चस्वरेण इति वाचं आह । इति किं । हे वीरवर्य वीरश्रेष्ठ चिंता न कार्या युद्धमेव विधेयं ॥ ८ ॥

देवीति । एके मुख्याः । एकोन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पसंख्यायां च प्रयुज्यते इति विश्वः । देवीवाचं दुर्गावाक्यं शिवभूपमुखादुद्गतां पत्रिकायां विलिख्य सुस्थाय देहभानं गताय अस्मै राज्ञे एनां लिखितां पत्रीं दर्शयामासुः । राजवर्योपि तां दृष्ट्वा हृष्टः सन् युद्धासक्तबुद्धिर्बभूव ॥ ९ ॥

श्रुत्वेति । राजा शिवः पुण्यग्रामं एत्य आगत्य । आङ् पूर्वादिण् धातोः क्त्वायां ल्यप् । स्थितं तं शत्रुं श्रुत्वा अगम्यात् दुरधिगमात् राजदुर्गात् वीरैः सन्नद्धैश्च स्वैः स्वकीयैरंतरंगैरिति यावत् अशेषैः समग्रैः वाजिनः अश्वाः वाहाः वाहनानि येषां तैः अश्वारोहैः किंच सहस्रप्रसंख्यैः पद्भैः पदातिभिः सहेति शेषः । तं शत्रुं अगात् ॥१०॥

अश्वेति । वीरेषु अग्रयः श्रेष्ठः । अग्रायत । एकः मुख्यः स राजा अश्वारोहान् आरात् शत्रुशिबिरात् दूरत एव । आरादूरसमीपयोरित्यमरः । स्थापयित्वा शूरैः पद्भैः युक्तः सन् शत्रुशिबिरं समेत्य सप्तसंख्याः वासोभित्तीः वस्त्रभित्तीः लोके बाड इति प्रसिद्धाः खड्गेन भित्त्वा विदार्य । तदंतर्वर्तिनः षंढसंज्ञान् रक्षकान् लोके खोजे इतिप्रसिद्धान् । अंतःपुरसमीपे षंढा एव रक्षका यवनैर्निधीयन्ते इति प्रसिद्धं । अहन् हतवान् । हंतेर्लङ् ॥ ११ ॥

राजेति । राजा शिवः शस्त्रैः जीवतीति शस्त्रजीवा तां स्त्रीणां संहतिं दूरात्

३ 'सुस्थं भूप' पा० भे० । ४ 'एतां' पा० भे० । ५ 'स्ते' ।

उत्थायातिव्रीडितो भीतभीतो गत्वा तूर्णं स्त्रीसमाजं स तस्थौ ॥
भीतं दीनं शस्त्रहीनं स्थितं तं स्त्रीणां मध्ये नो जघानातिधीरः ॥१३॥
राजा च्छित्त्वा दक्षहस्तांगुलीर्वै तिस्रस्तस्य प्राद्रवत्तन्निकेतात् ॥
सैन्ये तस्मिन् सर्वलोकेतभीते ध्वांतव्याप्ते व्याकुले दिग्विमूढे ॥१४॥
यक्षः किं वा राक्षसो वाऽपि किं वा सिंहो व्याघ्रः प्राणिहा को नु यातः ॥
नैशेनालं ध्वांतपुंजेन रुद्धाः वीराः सर्वे तर्कयामासुरित्थम् ॥ १५ ॥
एवं वीरः शासनं संविधाय गत्वा स्वीयं सैन्यमेनेन युक्तः ॥
तस्थौ राजा राजदुर्गे सुखेन म्लेच्छाधीशो भीतभीतो बभूव ॥ १६ ॥

दूरप्रदेशे कृत्वा । स्त्रीहननस्यायुक्तत्वात् । भयेनैव दूरमपसार्येत्यर्थः । तत्समीपं शत्रुसमीपदेशं प्राविशत् प्रविष्टवान् । नारीणां मध्ये मध्यदेशे वर्तमानः नग्नः । कामाक्रान्तत्वात् । स शत्रुः । यद्वा नग्नाभिः सहितः सनग्नः नग्नस्त्रीयुतः । तं राजानं कालकल्पं ईषदसमाप्तः कालः कालकल्पः तं यमतुल्यं । ईषदसमाप्ताविति आदिना कल्पप् प्रत्ययः । कालोदंडधरः श्राद्धदेव इत्यमरः । ददर्श दृष्टवान् । राज्ञस्तपोबलेनेति भावः ॥ १२ ॥

उत्थायेति । अति अत्यन्तं व्रीडितः लज्जितः राज्ञा स्वस्य निरवधिस्त्रैणत्वावलोकनादिति भावः । भीतात् भीतः भीतभीतः अतिभीत इत्यर्थः । यद्वा भियः इतः रहितः भीतः शिवभूपः तस्माद्भीतः सः यवनः उत्थाय स्त्रीसमाजं स्त्रीसंघं अन्यत्र वर्तमानं तूर्णं शीघ्रं गत्वा तस्थौ । स्त्रीवेषं धृत्वा स्त्रीसमाजे लीन इति भावः । अतिधीरः राजा भीतं अतः दीनं अतः स्त्रीणां मध्ये स्थितं तं यवनं नो जघान न हतवान् । एतादृशस्य हनने दोषश्रवणादिति भावः ॥ १३ ॥

अस्य शत्रोः प्रत्यहं स्वपराक्रमस्मृत्यर्थं तदधिपस्य सार्वभौमस्यापि स्वपराक्रमज्ञापनार्थं राज्ञा कृतं कृत्यमाह राजेति । ध्वांतेन तमसा व्याप्ते अतः दिक्षु विषये विमूढे अज्ञे अतः व्याकुले तत्कालोचितकर्तव्यतानभिज्ञे तस्मिन् सैन्ये तस्यां सेनायां वर्तमाने सर्वलोके सर्ववीरसमूहे भीते सति । यद्वा सेनायां समवेतः सैन्यः तस्मिन् सर्वलोके इति योजनीयं । सेनाया वा इतिण्यः । राजा तस्य शत्रोः तिस्रः दक्षहस्तांगुलीः छित्त्वा तन्निकेतात् शत्रुशिबिरात् प्राद्रवत् तूर्णमपासरत् ॥ १४ ॥

यक्ष इति । निशायां भवं नैशं तेन रात्रिभवेन । निशा निशीथिनी रात्रिरित्यमरः । निशाप्रदोषाभ्यां चेत्यण् । ध्वांतपुंजेन तमःस्तोमेन अलं अत्यर्थं रुद्धाः सर्वे वीराः यक्षः देवजातिः वा प्राणिनो हंतीति प्राणिहा राक्षसः यातः किंवा सिंहः व्याघ्रो वा यातो नु इत्थं अनेन प्रकारेण तर्कयामासुः ॥ १५ ॥

एवमिति । वीरः राजा एवं पूर्वोक्तप्रकारेण शासनमंगुलीच्छेदलक्षणं संविधाय

---

६. 'वीरः' पा० भे० । ७ 'प्रागमत्' पा० भे० । ८ 'ेभेतेन' पा० भे० ।

प्रातःसर्वे वीरसंघाः समेत्य रात्रौ किं वा जातमित्थं तमूचुः ॥
म्लेच्छो हस्तं दर्शयित्वा तदीयं वृत्तं सर्वं वर्णयामास तत्र ॥ १७ ॥
अद्य श्वो वा मच्छिरोऽसौ निकृत्य गंता स्थेयं नैव तस्मान् मयात्र ॥
जीव जंतुर्भद्रसंघं भुनक्ति देहो नायं लभ्यते सर्वदात्र ॥ १८ ॥
श्रुत्वा वाक्यं तस्य वीरास्तमूचुर्नैवं वाच्यं वीरवर्यैः कदापि ॥
जित्वा शत्रुं भूमिसौख्यं लभंते मृत्वा वा ते स्वर्गसौख्यं विचित्रं ॥१९॥
तेषां वाक्यं म्लेच्छनाथोऽवधार्य मत्वा शत्रून्[9] भेदितान् तेन राज्ञा ॥
निश्चक्राम प्राणसंरक्षणेच्छुः केशव्याजान्मूर्ध्न्यं कीर्तिं वहन् सन् ॥२०॥

स्वीयं सैन्यं दूरात्स्थापितं गत्वा एनेन सैन्येन । अन्वादेशे एनादेशः । युक्तः सन् राजदुर्गे सुखेन आनंदेन । प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया । तस्थौ स्थितवान् । म्लेच्छाधीशः भीतभीतः अतिभीत इत्यर्थः बभूव । भीतभीत इदं व्याख्यातं ॥ १६ ॥

प्रातरिति । सर्वे वीरसंघाः प्रातः प्रातःकाले समेत्य आगत्य रात्रौ किं वा जातं । वा विकल्पे । इत्थं तं यवनं ऊचुः पपृच्छुः । म्लेच्छः हस्तं दर्शयित्वा तस्येदं तदीयं । त्यदादीनि चेति वृद्धसंज्ञायां च्छः । सर्वं वृत्तं तेभ्यः वीरेभ्यः वर्णयामास कथयामास । क्रियया यमभिप्रैतीति संप्रदानत्वं ॥ १७ ॥

राजवृत्तं निवेद्याग्रे कर्तव्यमाह अद्येति । असौ राजा अद्य अस्मिन् दिवसे । सद्य इत्यादिना निपातितः । यद्वा श्वः उत्तरदिने । अव्ययमिदं । मच्छिरः मदीयं शीर्षं निकृत्य च्छित्वा गंता । अनद्यतने लुट् । अद्य गमिष्यति वा श्वः गंतेति योजनीयं । तस्माद्धेतोरियात्र न स्थेयं न स्थातव्यं । यतः जंतुः प्राणी जीवन् सन् भद्रसंघं कल्याणपरंपरां भुनक्ति । जन्मांतरे मनुष्यदेहस्य दौर्लभ्यमाह । अत्र अस्मिन् लोके सर्वद । सर्वकालं अयं देहः मनुष्यदेहः न लभ्यते न प्राप्यते तस्मादयं यत्नेन रक्षणीय इतिभावः ॥ १८ ॥

श्रुत्वेति वीराः तस्य यवनस्य वाक्यं श्रुत्वा तं इत्यूचुः । इति किं । वीरवर्यैः कदापि एवं न वाच्यं यतः ते वीराः शत्रुं जित्वा सुखमेव सौख्यं भूम्याः सौख्यं भूमिसौख्यं । चतुर्वर्णादित्वात्स्वार्थेष्यञ् । लभंते प्राप्नुवन्ति । वा पक्षांतरे पराजये मृत्वा प्राणान् परित्यज्य विचित्रं भूमिसौख्यादधिकं स्वर्गसौख्यं लभंते । उभयत्रापि सौख्यमेवेति न भेतव्यमितिभावः ॥ १९ ॥

तेषामिति । प्राणानां संरक्षणं प्राणसंरक्षणं तदिच्छतीति प्राणसंरक्षणेच्छुः म्लेच्छनाथः तेषां वीराणां वाक्यं अवधार्य श्रुत्वा यद्वा अवधार्य तिरस्कृत्य तेन राज्ञा शिवेन सर्वान् भेदितान् वशीकृतान् मत्वा । स्वप्रतिकूलवचनत्वादिति भावः ।

---

९ 'तेषु' पा० भे० । १० 'हिभुंक्ते' पा० भे० । ११. 'सर्वान्' पा० भे० ।

दिल्लीपालस्तं समायांतमाराद् दूतैरग्रैराह हे क्लीबनाथ ॥
द्रष्टव्यं ते नैव वक्त्रं मया तत्तै हित्वा सैन्यं गच्छ गेहं स्वकीयम्॥२१॥
शास्तेत्थं ते स्थापितं नाम पित्रा व्यर्थं जातं शासितोऽसीह राज्ञा ॥
लोके तस्माच्छासिताख्यां लभस्व नोज्झेदर्थं नाम तेऽमुं कदापि॥२२॥
धीरो वीरो दारितारातिवर्गः स्वर्गो हस्ते यस्य शौर्यव्रतस्य ॥
अंतःशत्रून्यो विजिग्ये सचासीत् सेनाधीशः सार्वभौमस्य वीरः॥२३॥
सिंहं नाम्ना तं जयादिं बभाषे दिल्लीपालो वीरवर्यः सभायाम् ॥
मत्पूर्वैर्यत्संचितं कीर्तिजालं सर्वं तद्धा नाशितं शासितेन ॥ २४ ॥
वासो भूषा रत्नराशिश्चमुक्ताः स्वर्णं ग्रामा दंतिनो वाजिनोऽपि ॥
यद्यद्वीर्योचितं तत्तदौदां कालः प्राप्तस्तस्य दानस्य वीर ॥ २५ ॥

मूर्ध्नि केशानां व्याजात् मिषात् अकीर्तिं वहन् सन् निश्चक्राम निर्जगाम । दिल्ली-मिति शेषः ॥ २० ॥

दिल्लीति । दिल्लीपालः सार्वभौमः आरात् स्वसमीपे आयान्तं तं यवनं आग्रे-दूतैः इत्याह । इति किं । हे क्लीबानां नपुंसकानां नाथ अत्यशूरवर्य मया ते वक्त्रं नैव द्रष्टव्यं । तस्मात्सैन्यं मदीयं हित्वा स्वकीयं गेहं गृहं गच्छ याहि ॥ २१ ॥

शास्तेति । किंच ते पित्रा शास्तेति स्थापितं नाम व्यर्थं विगतः अस्मात् अर्थः तत् व्यर्थं जातं । हि यस्माद्राज्ञा शिक्षेन त्वं शासितः असि । त्वत्पित्रा पराक्रममदृष्ट्वैव नाम स्थापितम् अहं तु पराक्रमं दृष्ट्वा नाम करोमीत्याह । तस्माद्धेतोः शासिताख्यां लभस्व प्राप्नुहि । ते नाम अमुं अर्थं अवयवार्थं कदापि नोज्झेत् न त्यजेत् । इति क्रुधा शशापेति भावः । शास्ते रौणादिके कर्तरि तृचि निपातनान्नेट्-निष्ठांतस्य तु उदितोवेति वेट् ॥ २२ ॥

चमत्कारसमाप्तिपर्यंतं द्वितीयमितिहासमाह धीर इति । किंच । शौर्यमेव व्रतं यस्य तथोक्तस्य । यस्य हस्ते स्वर्गः । यः अंतःशत्रून् कामादीन् विजिग्ये जितवान् । विपराभ्यां जेरितितङ् । धीरः वीरः अतः दारितारातिवर्गः सार्वभौमस्य मान्यः सः सेनाधीशः आसीत् ॥ २३ ॥

सिंहमिति । वीरवर्यः वीरश्रेष्ठः दिल्लीपालः । जयशब्दः आदिर्यस्य तं सिंहं जयसिंहमित्यर्थः । सभायां बभाषे जगाद भाषणमेवाह । मम पूर्वे मत्पूर्वे तैः मत्पू-र्वजैः यत्कीर्तिजालं कीर्तिसंघः संचितं संगृहीतं तत्सर्वं शासितेन नाशितं । हा इति खेदे ॥ २४ ॥

वास इति । वासो वस्त्रं । जात्येकवचनं । वासांसीत्यर्थः । भूषाः भूषणानि रत्नराशिः

१२ 'हि' पा० भे० । १३ 'चान्यः' पा० भे० । १४ 'ोजातं' पा० भे० । १५ 'ोतत्प्रदत्तं' पा० भे० ।

देशः सर्वो दाक्षिणो दाक्षिणेन तेनाक्रांतः शत्रुणा मे शिवेन ॥
उल्लंघ्याद्रिं विंध्यमप्यागतश्चेत् किं वा कार्यं ब्रूहि हे वीरवर्य ॥ २६ ॥
श्रुत्वा वाचं सार्वभौमस्य वीरः सिंहो नाम्ना तं जयादिर्बभाषे ॥
चिंता कार्या नैव बध्वा रिपुं ते यद्यानेष्ये तर्हि मे स्यात्सुजन्म ॥२७॥

उक्त्वा प्रणम्य च शिखारहिताधिनाथं
सैन्येन सागरसमेन ययौ स साधं ॥
हूणैश्च तंगणगणैः शकपारसीकैः
सेनाधिपोऽपि समगात्सहितो दलेलः ॥ २८ ॥
भानुं पदाहतरजस्ततिभिर्विलुंपन्
यंत्रैः पयोदरवजिद्ध्वनिभिः परीतः ॥
वादित्रगीतनिनदैः पटहप्रणादै-
र्भेरीरवैरपि मनः सुखयन् ययौ सः ॥ २९ ॥

हीरादिरत्नसमूहः मुक्ताः मुक्ताफलानि स्वर्णं सुवर्णं ग्रामाः प्रसिद्धाः दंतिनो गजाः वाजिनोऽश्वाः अपि वीरैर्यद्याचितं तत्तत् । उभयत्र नित्यवीप्सयोरिति द्वित्वं । आदां अयच्छम् । आङ् पूर्वाद्दातेर्लुङ् । हे वीर तस्य दानस्य कालः फलकालः प्राप्तः॥२५॥

देश इति । दाक्षिणेन कुशलेन दुःसाध्येनेतिभावः । तेन मे शत्रुणा शिवेन दाक्षिणः मे देशः सर्वोपि आक्रांतः । विंध्यं अद्रिं उल्लंघ्य आगतश्चेत्किं वा कार्यं हे वीरसिंह ब्रूहि ॥२६॥

श्रुत्वेति । नाम्ना जयादिः जयशब्दादिः सिंहः जयसिंहः वीरः सार्वभौमस्य दिल्लीपालस्य वाक्यं श्रुत्वा तं सार्वभौमं बभाषे । चिंता नैव कार्या ते रिपुं बध्वा यदि आनेष्ये तर्हि मे सुजन्म शोभनं जन्म स्यात् ॥ २७ ॥

उक्त्वेति । सः शिखया शिरःस्थितया रहितानां नाथः तं सार्वभौमं इति पूर्वोक्तप्रकारेण उक्त्वा प्रणम्य च सागरसमेन सैन्येन सार्धं ययौ । दलेलः दलेलसंज्ञः सेनाधिपोपि हूणैः तंगणगणैः शकाश्च पारसीकाश्च शकपारसीकाः तैः सहितः सन् ययौ ॥ २८ ॥

भानुमिति । जयसिंहः पदैश्चरणैः आहतानां ताडितानां रजसां ततिभिः समूहैः भानुं सूर्यं विलुंपन् आच्छादयन् । शेमुचादीनामिति नुम् । पयोदाः मेघास्तेषां रवं शब्दं जयतीति जित् ध्वनिः शब्दो येषां तैः यंत्रैः तोफाभिः परीतः युक्तः । वादित्राणां गीतस्य च निनदैः पटहानां वाद्यविशेषाणां प्रणादैः । उपसर्गादसमासेत्यादिना णत्वं । भेरीणां दुंदुभीनां रवैः शब्दैः । भेरी स्त्री दुंदुभिः पुमानित्यरः । मनश्चित्तं सुखयन् प्रहर्षयन् सन् ययौ जगाम ॥ २९ ॥

---

१६. 'सिंह' पा० भे० ।

रेवातटं समधिगम्य जयादिसिंहः
चित्ते व्यचिंतयदिदं शिवभूपतेस्तु ॥
देहं प्रविश्य गिरिजा वदतीदमद्य
राजन् कुरुष्व न च तज्जननी जनस्य ॥ ३० ॥
वश्यः कथं स भविता मम तद्विधेया
देवी मयाऽपि वशगेति विचिंत्य चित्ते ॥
आमंत्रयद्विजगणान्[16] सकलागमज्ञान्
शुद्धान् जितेंद्रियगणानयुतानि पंच ॥ ३१ ॥
कुंडानि मंडपचयांश्च विधाय तत्र
विप्रव्रजैः समयजत्त्रिजगद्विधात्रीं ॥
शष्कुल्यपूपघृतपूरासिताघृतैस्तान्
लड्डूकंमंडकपयोभिरतर्पयत्सः ॥ ३२ ॥
मासत्रयेण गिरिजा जयसिंहनाम्नः
स्वप्ने समेत्य निजगाद वचः स्फुटं सा ॥
हे वीर ते मनसि यत्सकलं भवेत्तत्
तुष्टाऽस्मि ते यजनतो द्विजभक्तितश्च ॥ ३३ ॥

रेवेति । जयादिसिंहः रेवातटं नर्मदातीरं समधिगम्य प्राप्य इदं चित्ते व्यचिंयत् । चिंचिंतवान् । चिंतनमेवाह । जनस्य जननी मयापि प्रार्थिता चेन्मद्धितमपि वक्ष्यतीति भावः । गिरिजा देवी शिवभूपतेस्तु देहं प्रविश्य हे राजन् इदं कुरुष्व तत् न इति वदति ॥ ३० ॥

वश्य इति । स मम वशंगतः वश्यः अधीनः वशंगत इति यत् कथं भविता देवी समाश्रयात्साध्य इति भावः । तत् तस्मात् कारणात् देवी मयापि वशगा विधेया कार्या इति विचिंत्य सकलागमाः सकलशास्त्राणि तानि जानंति तान् सकलागमज्ञान् । आगमः शास्त्रमाम्नाय इत्यमरः । शुद्धान् ज्ञात्वा आचारेण च जितः इंद्रियचयो यैस्तान् पंच आयुतानि पंचाशत्सहस्रसंख्यान् द्विजचयान् आमंत्रयत् । अनुष्ठानार्थमितिभावः ॥ ३१ ॥

कुंडानीति । सः जयसिंहः कुंडानि मंडपगणांश्च कुंडार्काद्युक्तप्रकारेण तत्र रेवातटे त्रयाणां जगतां विधात्रीं देवीं विप्रव्रजैः समयजत् । किंच तान् विप्रव्रजान् शष्कुल्यश्च अपूपाश्च घृतपूराश्च सिता च घृतं च तैः लड्डूकाश्च मंडकाश्च पयश्च तैः अतर्पयत् ॥ ३२ ॥

मासेति । गिरिजा पार्वती शिवशक्तिः मासत्रयेण जयसिंहनाम्नः स्वप्ने स्वप्नावस्था-

---

१७ 'ंतेश्च' पा० भे० । १८ 'ंजचयान्' पा० भे० ।

प्रातर्द्विजान् स सकलान् प्रतिपूज्य तेभ्यः
कोटित्रयं धनमदादतिहृष्टचित्तः ॥
विप्रा अपि स्वगृहमेव ततः प्रजग्मुः
सिंहः शिवाभिमुखमेव जगाम वीरः ॥ ३४ ॥
राजा समागतमिमं स निशम्य दूतै-
राहूय मंत्रिनिचयानिदमाह शत्रुः ॥
आयाति सिंह इव विंध्यगिरिं विलंघ्य
किं युक्तमत्र[१९] वदताद्य विचार्य्य सर्वे ॥ ३५ ॥
सामैव युक्तमिति तत्र ततस्तमूचुः
केचिन्नचेति च परे जगदुश्च भेदम् ॥
राजाब्रवीदिह तु युद्धमतिप्रशस्तं
युद्धं विना नहि भवेद्वशगः परोऽयम् ॥ ३६ ॥
यातोस्त्यनेन सह दुर्जनसंघमुख्यो
नाम्ना दलेल इति यः प्रथितः पृथिव्याम् ॥

यां समेत्य स्फुटं स्पष्टं निजगाद । भाषणमेवाह । हे वीर ते यजनतः यजनाद्धेतोः द्विजभक्तितश्च । पंचम्यास्तसिल् । तुष्टा अस्मि । अतः ते मनसि यत्तत् सकलं भवेत् । शिवभूपः प्रबलोपि त्वदधीनो भवेदिति भावः ॥ ३३ ॥

प्रातरिति । अतिहृष्टं चित्तं यस्य सः वीरः जयसिंहः सकलान् द्विजान् प्रतिपूज्य तेभ्यः कोटीनां त्रयं कोटित्रयं । त्रिशब्दात्तयपोयच् । धनं अदात् दत्तवान् ततस्तदनंतरं विप्राः अपि स्वगृहं स्वकीयं गृहं एव प्रजग्मुः । स्वेप्सितादधिकतरधनलाभादन्यत्र धनार्जनेच्छाभावादितिभावः । सिंहः जयसिंहः । विनापिप्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्य इति पूर्वपदस्य लोपः सत्यभामेति वत् । शिवस्य नृपस्य अभिमुखमेव संमुखमेव देवीवचनेन कार्यनिश्चयादिति भावः । जगाम । यथा सिंहः शिवायाः क्रोष्ट्र्याः अभिमुखं याति तथा । देवीवरेण जयसिंहः सिंहः शिवभूपः शिवा बभूवेति गूढाशयः ॥ ३४ ॥

राजेति । सः राजा शिवभूपः दूतैः समागतं इमं निशम्य मंत्रिनिचयान् आहूय इदं वाक्यं आह । शत्रुः जयसिंहः सिंह इव विंध्यगिरिं विलंघ्य आयाति अतः अत्र अस्मिन् संकटे किं युक्तं तद्विचार्य्य सर्वे वदत ब्रूत । विध्यर्थे लोट् ॥ ३५ ॥

सामेति । साम प्रेमपरं वाक्यं भेदं परजनाकृष्टिं । साम प्रेमपरं वाक्यं दानं चार्थविसर्जनं । भेदः परजनाकृष्टिर्निग्रहः परपीडनं । अन्यत्स्पष्टं ॥ ३६ ॥

सामदानभेदैर्जयसिंहो वश्यो न भवेदित्यत्र तस्य पारतन्त्र्यमाह । यात इति । दु-

१९ '०क्तमद्य' पा० भे० ।

दिल्लीपतेः स तु सखा जयसिंहराजं-
[20]स्तस्याज्ञया चरति तद्भविता न वश्यः ॥ ३७ ॥
युद्धं विधेयमधुना विजयोऽजयो वा
स्याच्चेन्ममोभयमपीह हितं प्रधान ॥
जाते जये जगति राज्यमहं करिष्ये
नो चेदमर्त्यवनिताभवसौख्यभाक्स्याम् ॥ ३८ ॥
एवं वदंतमवदज्जननी जनस्य
[21]ह्यंतर्हिता शिव शिशो वचनं शृणुष्व ॥
युद्धं त्वमद्य कुरु मा जयसिंहनाम्ना
सार्धं प्रयाहि यवनाधिपराजधानीम् ॥ ३९ ॥
कालस्तवास्ति कुटिलः खलु[22] तत्र रक्षां
कारागृहे निवसतः सततं करिष्ये ॥

र्जनसंघेषु मुख्यः अतिदुर्जन इत्यर्थः दलेल इति नाम्ना प्रथितः प्रसिद्धः यः अनेन जयसिंहेन सह यातोस्ति स तु दिल्लीपतेः सखा मित्रं अस्ति। अथ मित्रं सखा सुहृदित्यमरः । जयसिंहराजः तस्य दलेलस्य आज्ञया चरति तत्तस्मात् स जयसिंहः वश्यः न भविता ॥ ३७ ॥

स्वमतमाह युद्धमिति । हे प्रधान अस्मिन् काले इति अधुना युद्धं विधेयं अत्र अस्मिन् युद्धे जयो वापजयः पराजयः स्यात् चेन्मम उभयमपि इह अस्मिन् समये हितं इष्टं । उभयस्यापि हितत्वं विवृणोति । अहं जये जाते जगति अस्मिन् लोके राज्यं करिष्ये नो चेत् पराजये सतीतिभावः अमर्त्यवनिताभ्यः देवांगनाभ्यः उत्पन्नं यत्सौख्यं सुखमेव सौख्यं । चतुर्वर्णादित्वात्स्वार्थेष्यञ् । तद्भजतीति भाक् स्यां भवेयम् ॥ ३८ ॥

इत्थं युद्धे एव कृतनिश्चयं राजानं देवी प्राह एवमिति । जनस्य सर्वलोकस्य जननी माता अंबिका तु अंतर्हिता सति आकाशवाण्येति भावः । हे शिव शिशो हे बाल । स्वस्यातिवत्सलत्वद्योतनार्थं शिशो इति संबुद्धिः । त्वं वचनं शृणुष्व । अद्य अस्मिन् समये युद्धं मा कुरु । करोतेर्लोट् यद्यपि माङ्योगे सर्व लकारापवादेनलुङ् भाव्यं तथापि नायमाङ्निषेधार्थो मा शब्द इति न दोषः । युद्धकर्तव्यताभावमुपादिश्य कर्तव्यार्थमाह । जयसिंहनाम्ना साकं सार्धं । साकं सार्धं समं सहेत्यमरः । यवनाधिपराजधानीं दिल्लीं प्रयाहि ॥ ३९ ॥

युद्धाकरणे हेतुमाह कालइति । तव त्वत्संबंधी कालः समयः कुटिलः प्रतिकूलः

---

२० 'ंहनामा' पा० भे० । २१. 'त्वं' पा० भे० । २२ 'यदि' पा० भे० ।

श्रुत्वा वचो नरपतिः प्रणनाम देवीं
चित्ते निधाय वचनं त्रिजगज्जनन्याः ॥ ४० ॥
सिंहः पुरंदरगिरेर्निकटे ससैन्यः
स्थित्वाऽप्तदूतमिदमाह चराशु गच्छ ॥
राज्ञोतिवल्लभतमं[23] कमपि द्विजं त्वं
मत्पार्श्वमानय तथेति ययौ तमुक्त्वा ॥ ४१ ॥
गत्वा नृपं स जयसिंहवचो बभाषे
राजाऽपि तुष्ट इदमाह चरार्द्ध[24] तिष्ठ ॥
श्वो गम्यतामिति चरं प्रतिवाक्यमुक्त्वा
विद्वद्वरं स रघुनाथमुवाच वाचम् ॥ ४२ ॥
याहि त्वया हि जयसिंहमहन्यमुष्मिं-
स्त्वं सेनया सह सहेमविभूषणानि ॥
दत्त्वोपदां पदमिदं पुनरेहि हारान्
मौक्तान् गजांश्च तुरगान् वसनानि विद्वन् ॥ ४३ ॥

अस्ति खलु निश्चयेनः । अतः युद्धं न कर्तव्यमिति भावः । तत्र दिल्लध्यां कारागृहे निवसतः तव रक्षां रक्षणं सततं निरंतरं करिष्ये । नरपतिः शिवनृपः त्रिजगज्जनन्याः वचनं चित्ते निधाय प्रणनाम नमश्चकार । कारागृहे निवसतः इति विशेषणेन कारागृहे यवनाधिपत्वं कियत्कालं स्थापयिष्यतीति सूचितं ॥ ४० ॥

सिंह इति । सेनैव सैन्यं । चतुर्वर्णादित्वात्स्वार्थेष्यञ् । सैन्येन युक्तः सिंहो जयसिंहः पुरंदरगिरेः पुरंदराख्यदुर्गस्य निकटे समीपप्रदेशे अधित्यकायामितियावत् । स्थित्वा आप्तं स्वसमीपं प्राप्तं दूतं इदमाह । इदं किं । चरतीति चरः । पचाद्यच् । हे चर हे दूत अद्य आसन् दिने न तु दिनांतरे इत्यर्थः गच्छ । राज्ञः शिव भूपस्य अति अत्यंतं वल्लभः अतिवल्लभः अतिशयेन अतिवल्लभः अतिवल्लभतमः तं अत्यंतरंगमित्यर्थः । अतिशायने तमपित्यादिना तमप् । कमपि द्विजं ब्राह्मणं । ननु अन्यजातीयमितिभावः । मत्पार्श्वं मदीयपार्श्वदेशं आनय । नयतेर्द्विकर्मकत्वात्पार्श्वस्य कर्मत्वं । सः चरः तं जयसिंहं तथेति तथास्तु इति ययौ जगाम ॥ ४१ ॥

गत्वेति । सः दूतः नृपं शिवं गत्वा जयसिंहस्य वचः बभाषे उक्तवान् । तुष्टः तोषवान् दूतस्य संध्यर्थमागतत्वादिति भावः । राजापि इदमाह । हे चर दूत अद्य तिष्ठ श्वः गम्यतां गंतव्यं इति चरं प्रति वाक्यं उक्त्वा विद्वद्वरं रघुनाथनामानं पंडितं उवाच ॥ ४२ ॥

याहीति । हे विद्वन् त्वं अमुष्मिन् अहनि त्वया स्वकीयया सेनया सह हि निश्चयेन

२३ 'तरं' पा० भे० । २४ 'ात्र' पा० भे० ।

सिंहोऽपि तं समुपयातमसौ निरीक्ष्य
सत्कृत्य विप्रवरमुत्तमभूषणाद्यैः ॥
वाचा तथा मधुरया सहितश्च तेन
गत्वा रहस्यवितथं वचनं जगाद ॥ ४४ ॥
नैवोचितो बलयुता सह वैरभावो
नाशं करोति स हि हीनबलस्य जंतोः ॥
हे भूमिदेव मृगराजबलिं पुरःस्थं
स्यात्किं सुखी परिहरन्निह जंबुकादिः ॥ ४५ ॥
आक्रांतमेतदखिलं यवनाधिपस्य
भूमंडलं किमु सुखी भविता नृपोऽसौ ॥
राज्यं यदीच्छति नृपः सहि तर्हि तं त्वं
गत्वानयाद्य मम सन्निधिमाशभक्तम् ॥ ४६ ॥

न तु तां विनेति भावः । जयसिंह याहि गच्छ । हेम्ना सुवर्णेन सहितानि सहेमानि सहेमानि च तानि विभूषणानि च सहेमविभूषणानि । प्रथममग्रतः स्थापनार्थं हेम मुद्राः लोके मोहरा इति प्रतिद्धाः अलंकाराश्च । यद्वा सहेमानः सालंकाराः वयः पक्षिणः शुकसारिकादयः भूः पृथिव्याः जाड्येन नयनासंभवात् इयं संपादिता पृथ्वी तव इति वक्तव्यमितिभावः । पृथ्वी भूः उषणानि मरीचानि सहेमानि च तानि विभूषणानि च सहेमविभूषणानि । यद्वा सहेमानः सालंकाराः वयः भूषणानि च तानि मुक्तानां इमे मौक्ताः तान् हारान् मुक्ताफलहारान् । इदमर्थे अण् । विभूषणग्रहणेन एव मुक्ताफलहारग्रहणे पुनर्हारग्रहणं ब्राह्मणवशिष्ठन्यायेन । गजान् वसनानि च तुरगांश्च उपदां उपायनं । उपायनमुपग्राह्यमुपहारस्तयोपदेत्यमरः । दत्त्वा-इदं पदं स्थानं दुर्गं इति यावत् पुनः एहि ॥ ४३ ॥

सिंह इति । असौ सिंहोपि जयसिंहोपि तं विप्रवरं रघुनाथं समुपयातं निरीक्ष्य अवलोक्य उत्तमैः विभूषणाद्यैः सत्कृत्य तया मधुरया वाचा च सत्कृत्य तेन रघुनाथेन सहितः सन् रहसि गत्वा अवितथं सत्यं वचनं जगाद ॥ ४४ ॥

नैवेति । हे भूमिदेव बलवता सैन्यवता यद्वा निग्रहानुग्रहशक्तिमता यद्वा लोकोत्तरशरीरशक्तिमता सह वैरभावः वैरोत्पादनं नैव उचितः हि यस्मात् सः वैरभावः हीनबलस्य जंतोः प्राणिनः नाशं करोति । अमुमर्थं दृष्टांतेन द्रढयति । पुरः तिष्ठति इति पुरस्थः तं अग्रगतं । सुपिस्थ इति कप्रत्ययः । मृगराजबलिं सिंहभागं परिहरन् जंबुकादिः इह अस्मिन् लोके सुखमस्यास्तीति सुखी । अत इनिठनाविति इनिः । स्यात्किं नेति भावः ॥ ४५ ॥

आक्रांतमेतदिति । एतत्सकलं अखिलं भूमंडलं दक्षिणो देशः यतः आक्रांतं

यूयं वयं च सकला जगदीशभक्ता
युष्मद्धितं यदिह[25] तत्तु ममाऽपि विप्र ॥
नैवान्यथा मम वचो भविता कदापि
त्वत्पादपद्म शपथो द्विजदेवदेव ॥ ४७ ॥
वाचं निशम्य जयसिंहभवां स विप्रो
राज्ञे तदीयवचनं सकलं शशंस ॥
राजाऽपि चित्तमवगम्य तदीयमाशु
सेनान्वितः प्रतिययौ जयसिंहदेशम् ॥ ४८ ॥
सिंहः समागतममुं चरतोऽवगम्य[26]
गत्वा पुरो नृपवरस्य करं स्वहस्ते ॥
धृत्वाऽलिलिंग निजदंतिनि सन्निवेश्य
सेनानिवेशमनयन्निजमेव भूपम् ॥ ४९ ॥
तत्सिंहराजवरसंगतिपूर्वमेव
यातो दलेलयवनस्तु पुरंदराख्यम् ॥

ध्याप्तं । उदितोवेति विकल्पाादडिभावः । ततस्तस्मात् असौ नृपः सुखी सुखवान् भविता किमु वितर्के । सः यदि राज्यं इच्छति तर्हि त्वं गत्वा ईशभक्तं राजानं मम संनिधिं समीपप्रदेशं आनय हि निश्चयेन ॥ ४६ ॥

यूयमिति । यूयं वयं च सकलाः जगदीशस्य सांबस्य भक्ताः । अतः युष्मद्धितं यत् तत् हे विप्र ममापि हितं मम वचः कदापि अन्यथा न भविता । एवमुक्तेऽपि सर्वं प्रतारकं वचनमिति संशयः स्यात् इति शपथं करोति हे द्विजदेव देव त्वत्पादपद्म शपथः अस्ति ॥ ४७ ॥

वाचमिति । सः विप्रः रघुनाथः जयसिंहभवां वाचं निशम्य सकलं तदीयवचनं जयसिंहवचनं राज्ञे शिवाय शशंस । राजापि तदीयं तस्य जयसिंहस्य इदं तदीयं चित्तं अवगम्य ज्ञात्वा अकपटमिति ज्ञात्वेत्यर्थः । आशु शीघ्रं सेनान्वितः सन् जयसिंहदेशं ययौ ॥ ४८ ॥

सिंह इति । सिंहः जयसिंहः समागतं अमुं राजानं चरतः चरादितिचरतः चारमुखेनेत्यर्थः समागतं अवगम्य पुरः स्वशिबिरात् अग्रे गत्वा नृपवरस्य करं स्वहस्ते धृत्वा अतिप्रेम्णेति भावः आलिलिंग आलिंगितवान् । भूपं निजदंतिनि सन्निवेश्य निजमेव सेनानिवेशं शिविरं अनयत् ॥ ४९ ॥

तादिति । दलेलयवनः सचासौ सिंहः च तत्सिंहः जयसिंहः राजवरश्च तत्सिंहराज

---

२५ 'तदिह' पा० भे० । २६. 'निशम्य' पा० भे० ।

289

दुर्गं विजेतुमतिवीरनरैश्च यंत्रै-
र्दंतिव्रजैस्तुरगपंक्तिभिरन्वितः सन् ॥ ५० ॥
दुर्गं रुरोध पृतनापतिभिः समंताद्-
यंत्रोद्भवायसचलद्गुरुगोलकानाम् ॥
वृष्टिं चकार गिरिमूर्ध्वगता भटास्तु
क्षुब्धा बभूवुरितरत्रगतौ न शेकुः ॥ ५१ ॥
वर्षासु मेघ इव वर्षति पर्वतेस्मिन्
नाम्ना मुरारिरिति राजनियोजितो यः ॥
कायस्थजो दशशतप्रमितैः स पद्भैः ॥
शूरैर्वृतोऽवतरति स्म कृपाणपाणिः ॥ ५२ ॥
वीरो युयोध तुमुलं सह पत्तिसंघै-
र्निस्त्रिंशखड्गशरतोमरऋष्टिभल्लैः ॥
पादाहतं रज उपेत्य रविं रुरोध
पंकत्वमाप रुधिरौघपरिप्लुतं सत् ॥ ५३ ॥

वरौ तयोः संगतिः समागमः तस्मात्पुरैवपूर्वमेव । यद्वा सा चासौ सिंहराजवरसंगतिश्चेति । अतीव वीरैः नरैः यंत्रैः दंतिव्रजैः तुरगपंक्तिभिश्च अन्वितः सहितः सन् पुरंदराख्यं दुर्गं विजेतुं यातः ॥ ५० ॥

दुर्गमिति । दलेलयवनः । पृतनापतिभिः सेनापतिभिः । पुरंदराख्यं दुर्गं समंतात् परितः रुरोध । यंत्राणि तोफाःतेभ्यःउद्भवाः उत्थिताः अयस इमे आयसाः लौहाः चलंतश्चंचलाः गुरवः महांतः गोलकास्तेषां वृष्टिं चकार । गिरिमूर्ध्वगताः गिरिशिखरगताः भटास्तु क्षुब्धाः बभूवुः इतरत्र स्थले गंतुं न शेकुः न समर्थाः बभूवुः ॥ ५१ ॥

वर्षा इति । अस्मिन् दलेलनाम्नि वर्षासु वर्षाकाले मेघ इव । यद्वा वर्षाणां सुमेघः शोभनमेघः वर्षासंबंधी मेघ इव । स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्समा इत्यमरः । पर्वते पुरंदरे वर्षति सति वृष्टिं कुर्वाणे सति कायस्थात् जातः कायस्थजः परभू इति दक्षिणे प्रसिद्धः नाम्ना मुरारिरिति यः राजनियोजितः शिवभूपनियोजितः आसीदितिशेषः कृपाणः खड्गः पाणौ यस्य सः दशशतप्रमितैः सहस्रसंख्यैः शूरैः पद्भैः वृतः सन् अवतरति स्म ॥ ५२ ॥

वीर इति । वीरः मुरारिः निर्गतास्त्रिंशद्भ्योंगुलिभ्य इति निस्त्रिंशः त्रिंशदंगुलाधिकप्रमाणः खड्गभेदः खड्गस्तस्यैवावांतरभेदः । यद्वा निस्त्रिंशो यः खड्गः शराः बाणाः तोमराः आयुधविशेषाः । ऋषयश्चऋत्यक इति प्रकृतिभावः । ब्रह्मऋ-

अश्वाः क्रमेलनिचया अपि दंतिसंघाः
संच्छिन्नहस्तपदपुच्छमुखाः प्रपेतुः ॥
काकाश्च गृध्रवृकजंबुककोणपाद्या
मोदं परं समुपजग्मुरसृक्प्रपानाः ॥ ५४ ॥
केचित्पलायनपराः प्रययुश्च भीताः
केचित्तृणं स्ववदने निदधुर्भृशार्ताः ॥
स्वीयान् पलायनपरान्यवनो विलोक्य
तानाह हे यवनपाः किमिदं विचित्रम् ॥ ५५ ॥
सर्वे वयं यवनजातिभवा महांतः
शूरा धनुःप्रहरणा विदिता जगत्याम् ॥
युक्तं पलायनमिदं भवतां किमेतत्
द्रक्ष्यंति नैव वदनं भवतां सुदाराः ॥ ५६ ॥

षीणामिति वत् । भल्लाश्च तैः उपलक्षितैः पत्तिसंघैः पदातिसंघैः सह तुमुलं संकुलं युयोध । पादाहतं रजः उपेत्य गत्वा रविं रुरोध तद्रजः रुधिरौघपरिप्लुतं सत् पंकत्वं कर्दमत्वं आप ॥ ५३ ॥

अश्वा इति । अश्वाः क्रमेलनिचयाः उष्ट्रसंघा गजसमूहाश्च हस्ताश्च पदानि च मुखानिच पुच्छानि च हस्तपदपुच्छमुखं संच्छिन्नं हस्तपदपुच्छमुखं येषां ते तथाभूताः संतः प्रपेतुः पतंति स्म । काकाः गृध्राश्च वृकाश्च जंबुकाश्च कोणपाः राक्षसाश्च आद्या येषां ते गृध्रवृकजंबुककोणपाद्याः । राक्षसः कोणपः क्रव्यात् इत्यमरः । असृजः रक्तस्य प्रकृष्टं पानं प्राशनं येषां ते असृक्प्रपानाः रक्तपाः परं उत्कृष्टं मोदं हर्षं समुपजग्मुः प्रापुः । यद्वा असृक्प्रपा नः इति ह्रस्वपाठः नः अस्माकं असृक्प्रपा रक्तपानीयशाला इयमिति परं मोदं समुपजग्मुः ॥ ५४ ॥

केचिदिति । भीताः अत एव पलायनमेव परं आश्रयो येषां ते तथोक्ताः केचित् प्रययुः अपसस्रुः । भृशं अत्यंतं आर्ताः पीडिताः । अतिवेलभृशात्यर्थातिमात्रोद्वाढानिर्भरमित्यमरः । केचित्स्ववदने स्वमुखे तृणं दधुः । यवनः दलेलः तान् स्वीयान् स्वकीयान् पलायनपरान् विलोक्य हे यवनपाः इदं विचित्रं आश्चर्यं इत्याह ॥ ५५ ॥

आश्चर्यमेवोपपादयति । सर्वे इति । सर्वे वयं यवनानां जातयस्ताभ्यः भवाः सुसमुत्पन्नाः अत एव शूराः अत एव महांतः श्रेष्ठाः धनुःप्रहरणाः धानुष्काः जगत्यां पृथिव्यां विदिताः प्रसिद्धाः । जगती विष्टपे मह्यां वास्तुच्छंदविशेषयोरिति विश्वः । स्म इतिशेषः । इदं पलायनं भवतां युक्तं किं नेतिभावः । किं च सुदाराः शोभनाः स्त्रियः । दाराः पुंसि च भूम्न्येवेत्यमरः । भवतामेतद्वदनं न द्रक्ष्यंति नावलोकयिष्यन्ति ॥५६॥

वृत्तिर्विलेखनममुष्य मुरारिनाम्नः
कायस्थकस्य[27] स विहाय निजां मृगेंद्रः ॥
दंतिव्रजानिव पुरः समुपैति यूयं
वीरा अपीह विमुखा अपयाथ वो धिक् ॥ ५७ ॥
एवं वदत्यभयदे यवनाधिपेऽस्मिन्
खड्गं प्रगृह्य च पुरः प्रविधाय चर्म ॥
वीरो मुरारिरखिलैः पदगैः स साकं
योद्धुं ययौ यवनपस्य पुरःप्रदेशम् ॥ ५८ ॥
हत्वा पदातिनिचयान्स्वपुरःप्रयातं
दृष्ट्वा दलेलयवनश्चकितो बभूव ॥
स्वान्संहतान्भटगणांन्पुरतो विधाय
सार्धं युयोध रिपुणा पुरतः स्थितेन ॥ ५९ ॥
तद्युद्धमुल्बणमभूत्सशिखाशिखानां
मध्याह्नगे सवितरि प्रचलत्कृपाणं ॥
वीरा असृक्प्रसृतिभिः सहिता वसंते
ते किंशुका सकुसुमा इव राजिरेत्र ॥ ६० ॥

वृत्तिरिति । अमुष्य कायस्थकस्य । संज्ञायांकन् । मुरारिनाम्नः विलेखनं वृत्तिः उपजीवनं । वृत्तिर्वेतनजीवने इति विश्वः । अस्तीति शेषः । सः मुरारिः निजां वृत्तिं विहाय मृगेंद्रः सिंहः दंतिव्रजानिव पुरः समुपैति प्राप्नोति यूयं विमुखाः संतः अपयाथ अतः वः धिक् अस्तु । उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितांतेषु ततोन्यत्रापि दृश्यते इति ॥ ५७ ॥

एवमिति । अभयदे तस्मिन् दलेले एवं पूर्वोक्तप्रकारेण वदति सति सः वीरः मुरारिः खड्गं प्रगृह्य चर्म पुरश्च प्रविधाय अखिलैः पदगैः साकं सार्धं । साकं सार्धं समं सहेत्यमरः । यवनाधिपस्य पुरः प्रदेशं योद्धुं ययौ जगाम ॥ ५८ ॥

हत्वेति । दलेलयवनः पदातिनिचयान् पद्मसंघान् हत्वा स्वपुरः प्रयातं आगतं मुरारिं दृष्ट्वा चकितः आश्चर्यवान् बभूव । स्वान् स्वीयान् संहतान् संघीभूतान् भटगणान् पुरतः अग्रतः विधाय कृत्वा पुरतः अग्रभागे स्थितेन रिपुणा सार्धं युयोध । चक्षिङोऽङित्करणाज्ञापकात् अनुदात्तेत्वलक्षणमात्मनेपदमनित्यमितिपरस्मै पदं ॥ ५९ ॥

तदिति । सशिखाश्च अशिखाश्च सशिखाशिखाः तेषां तत् उल्बणं घोरं प्रचलतः कृपाणाः यस्मिन् तत् प्रचलत्कृपाणं युद्धं । प्रचलत्कृपाणमिति क्रियाविशेषणं

---

२७ '०स्थजस्य' पा० भे० । २८ 'चयान्' पा० भे० ।

संच्छिन्नपाणिपदका भुवि शेरते स्म
केचिद्विदष्टदशनच्छदमीयुरग्रे ॥
आलिंग्य भूमिमपरे रुरुदुः परे तु
क्रुद्धा विशालकरवालकराः प्रजघ्नुः ॥ ६१ ॥
एवं सहस्रमितवीरवरा मुरारेः
क्षीणा दलेलयवनस्य तथा प्रहीणाः ॥
सज्ये शरं धनुषि वीरवरो निधाय
तस्थौ मुरारिरपि खड्गकरोऽवतस्थे ॥ ६२ ॥
तं खड्गपाणिमवदद्यवनो मुरारिं
खड्गं विहाय शरणं व्रज जीवदं माम् ॥
देवः शरण्य इह एव इतीरयित्वा
तस्याग्रतः समसरत्करवालपाणिः ॥ ६३ ॥

वा । सवितरि सूर्ये मध्याह्नगे । अह्नो मध्यो मध्याह्नः । तं गच्छतीति मध्याह्नगस्त स्मिन् सति । अह्नोह्न एतेभ्य इति अह्नादेशः । रात्राह्नाहाः पुंसीति पुंस्त्वं । बभूव । असृजां रक्तानां प्रवाहैः सहिताः ते वीराः अत्र युद्धभूमौ वसंते सकुसुमाः सपुष्पाः किंशुका इव पलाशा इव रेजिरे शुशुभिरे । अत इत्यनुवर्तमानेपि फणां च सप्तानामिति विधानसामर्थ्यात् एत्वाभ्यासलोपौ ॥ ६० ॥

संच्छिन्नेति । पाणयश्च पदानि च पाणिपदं संच्छिन्नं पाणिपदं येषां ते संच्छिन्नपाणिपदकाः । शेषाद्विभाषेति समासांतः कप् । यद्वा पाणिपदस्य संबंधि कं सुखं संच्छिन्नं पाणिपदकं येषां ते तथोक्ताः । यद्वा पाणयश्च पदानिच कं शिरश्च पाणिपदकं येषां ते केचिद्वीराः भुवि रणभूमौ शेरते स्म पेतुरित्यर्थः । केचित् विदष्टः दशनच्छदः ओष्ठो यथा तथा अग्रे ईयुः जग्मुः । अपरे भूमिमालिंग्य रुरुदुः परे तु क्रुद्धाः अत एव विशालाः करवालाः करेषु येषां ते विशालकरवालकराः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्याविति करशब्दस्य परनिपातः । यद्वा विशालाः करवालाः येषु ते विशालकरवालाः तथा भूताः करा येषां ते विशालकरवालकराः संतः प्रजघ्नुः प्रहारं कृतवन्तः ॥ ६१ ॥

एवमिति । मुरारेः एवं सहस्रमिताः सहस्रसंख्याः वीरवराः वीरश्रेष्ठाः क्षीणाः क्षयं प्राप्ताः । क्षियोदीर्घादिति निष्ठातस्य नकारः । तथा तेन प्रकारेण दलेलयवनस्य वीरवराः प्रहीणाः नष्टाः । ओदितश्चेति तस्य नः । वीरवरः दलेलः ज्यया सहितं सज्यं तस्मिन् सज्ये । मौर्वी ज्या सिंजिनी गुण इत्यमरः । धनुषि शरं निधाय कृत्वा तस्थौ । अवशिष्टमेकं मुरारिं हंतुमिति भावः ॥ ६२ ॥

तमिति । यवनः खड्गपाणिं तं मुरारिं खड्गं विहाय जीवं जीवनं ददातीति जी-

बाणेन तस्य हृदयं यवनो बिभेद
तीक्ष्णेन सोऽपि शिवशंकर पाहि मेति[२९] ॥
उक्त्वाशु कश्यपजमंडलमेव[३०] भित्त्वा
यातो दिवं दिविजकीर्तितकीर्तिमालः ॥ ६४ ॥
गत्वा ततः स यवनो गिरिदुर्गमस्य
द्वारि स्थितैः सह युयोध धनुर्धराग्र्यः ॥
तानाह मोघमरणं न हि युक्तमत्र
यातो मुरारिरविता भवतां पतिः सः ॥ ६५ ॥
ते प्राहुरेहि शिवभूपगृहे मुरारि-
तुल्यास्ततः समधिका इह सन्ति नूनम् ॥

वदः तं प्राणरक्षकमित्यर्थः । यद्वा नीवं द्यति खंडयतीति जीवदः तं प्राणापहारकमित्यर्थः । मां शरणं व्रज इत्यवदत् । करवालपाणिः सः मुरारिः एषः हृदयवर्ती देवः शंकरः शरण्यः शरणे साधुः शरण्यः । तत्र साधुरितियत्प्रत्ययः । इति ईरयित्वा उक्त्वा तस्य अग्रतः समीपप्रदेशे समसरत् । इदानीं मरणमेव वरमिति निश्चित्य पुर एव ससारेत्यर्थः ॥ ६३ ॥

बाणेनेति । यवनः दलेलः तस्य मुरारेः हृदयं तीक्ष्णेन बाणेन बिभेद विददार । दिविजाताः दिविजाः तैः देवैः कश्यपाज्जातः कश्यपजः । अन्येष्वपि दृश्यत इति डः । कीर्तिता कीर्तिमाला यस्य तथोक्तः । सप्तम्यां जनेर्डः । प्रावृट् शरत्कालदिवां जे इति सप्तम्या अलुक् । सोपि मुरारिरपि हे शंकर हे शिव मा मां पाहि रक्ष अस्माद्दुःखादिति भावः । यद्वा बाणव्यथामपनीयैतच्छरीरं मा रक्ष स्वर्गमेव नयेत्युक्त्वा कश्यपजः सूर्यः तस्य मंडलमेव भित्त्वा दिवं स्वर्गं यातः ॥ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ । परिव्राड्योगयुक्तश्च रणे चाभिमुखे हत इति स्मरणात् ॥ ६४ ॥

गत्वेति । धरांति ते धराः धनुषः धराः धनुर्धरास्तेषां अग्र्यः श्रेष्ठः सः यवनः गिरिदुर्गं पुरंदरं गत्वा अस्य पुरंदरस्य द्वारि द्वारे स्थितैः सह युयोध । यद्वा गिरीणां मध्ये दुर्गमस्य दुःप्रवेशस्य पुरंदरस्य द्वारं इति विभक्तिव्यत्ययेन द्वितीया । गत्वा द्वारि स्थितैः सहेति वा योजना । सः तान् मोघमरणं निष्फलमरणं न युक्तं मुरारिवन्न किंचित्साध्यामिति भावः । हि यस्माद्भवतां पतिः स्वामी अविता रक्षकः सः मुरारिः यातः मृत इत्याह ॥ ६५ ॥

ते प्राहुरिति । एहि युद्धार्थं आगच्छ शिवभूपगृहे इह अस्मिन् दुर्गे मुरारि-

---

२९ "मामवेति" पा० मे० । ३० "०मेव" पा० मे० ।

तद्वृत्तजातमखिलं स निशम्य्[१] दूतै
राजा जगाद जयसिंहमिदं वचः सः ॥ ६६ ॥
सर्वेऽपि दुर्गनिचया मयि संति सोऽहं
यस्मात्त्वदीय इह युद्धमतो न युक्तम् ॥
आनीय तं यवनपं सह तेन सख्यं
स्याच्चेद्वरं यदि नहीदमहं व्रजामि ॥ ६७ ॥
इत्थं निशम्य वचनं स तथा विधाय
भ्रात्रा निजेन यवनेन च सार्धमेतम् ॥
दिल्लीपतेरगमयद्गृहमेष राजा
संचिंतयन् त्दिदं वचः प्रययौ शिवायाः ॥ ६८ ॥
राजानमागतममुं स निशम्य तूर्णं
सत्कृत्य भूषणवरैर्वसनैर्वचोभिः ॥
राजोपभोगसहितं भवनं विशालं
पुत्रेण सार्धमधिवासयति स्म भूपम् ॥ ६९ ॥

तुल्याः ततः समधिका अपि अनेकाः सन्ति त्वया एकः मुरारिर्दृष्टः तादृशाः ततोऽधिकाः वा बहवः सन्ति अतो दुर्गं इदं तवासाध्यमिति भावः । स राजा शिवः तद्वृत्तजातं वृत्तसमूहं । जातं जात्योघजन्मसु इति विश्वः । दूतैः चरैः विनिशम्य श्रुत्वा जयसिंहं इदं वचः वक्ष्यमाणं वचनं जगाद ॥ ६६ ॥

सर्वे इति । सर्वेऽपि दुर्गनिचयाः यस्मिन् मयि सोहं त्वदीयः त्वदधीनः अतः इह अस्मिन् काले युद्धं न युक्तं । दुर्गाधिपतेः मम त्वदधीनत्वात् दुर्गाण्यपि त्वदधीनानीति युद्धं व्यर्थं इति भावः । तं यवनपं दलेलं आनीय तेन सार्धं सख्यं चेत् वरं मनाक् । वैवाद्वते वरः श्रेष्ठे त्रिषु क्लीवं मनाक् प्रिये इत्यमरः । यदि इदं सख्यं न भवेत्तर्हि अहं अधुनैव व्रजामि गच्छामि । पुरंदरं गिरिं गत्वा तं यवनं हनिष्यामि इति भावः ॥ ६७ ॥

इत्यमिति । सः जयसिंहः इत्थं पूर्वोक्तप्रकारं वचनं निशम्य तथा विधाय परस्परस्य सत्कारपूर्वकं सख्यं कृत्वेत्यर्थः । निजेन अनुजेन सार्धं यवनेन दलेलाख्येन च सार्धं एनं राजानं दिल्लीपतेः गृहं अगमयत् प्रेषितवान् । गतिबुद्धीत्यादीना अण्यंतावस्थायां कर्तुर्ण्यंतावस्थायां कर्मत्वं । राजापि शिवोऽपि शिवायाः देव्याः वचः पूर्वोक्तं हृदि विचिंतयन् सन् प्रययौ जगाम ॥ ६८ ॥

राजानं इति । सः दिल्लीश्वरः अमुं राजानं आगतं निशम्य भूषणवरैः वसनैः

---

१ "विनिशम्य" पा० भे० ।

कश्चित्तदीययवनो यवनाधिपेंद्रं
प्रत्यब्रवीद्रहसि नायमहो मनुष्यः ॥
यक्षोऽथवा किमिह राक्षस एष जातो
नोपेक्ष्य एष भवता क्षणमप्यधीश ॥ ७० ॥
श्रुत्वा तदीयवचनं तुरगाधिवाहान्
वीरान् पदातिनिचयानयुतप्रसंख्यान् ॥
संप्रेष्य राजभवनं सकलं रुरोध
वातोऽपि यन्नविशति स्म विना ह्यनुज्ञाम् ॥ ७१ ॥
रुद्धं निरीक्ष्य नृपतिः स्वसुतेन सार्ध-
मात्मानमेष चतुरो धृतिमान् बुधोऽपि ॥
चिंतापयोनिधिनिमग्नमना बभूव
देवीपदांबुजसमर्चनतत्परोऽभूत् ॥ ७२ ॥

वस्त्रैः वचोभिश्च तूर्णं शीघ्रं । सत्वरं चपलं तूर्णमित्यमरः । सत्कृत्य भूपं विशालं विस्तीर्णं राज्ञां उपभोगाः तैः सहितं भवनं गृहं पुत्रेण शंभुना सार्धं अधिवासयतिस्म स्थापयामास । उपान्वध्याङ्वस इति गृहस्य कर्मत्वं ॥ ६९ ॥

कश्चिदिति । कश्चित् तस्याऽयं तदीयः स चासौ यवनश्च तदीययवनः यवनाधिपेंद्रं रहसि एकांते इति प्रत्यब्रवीत् । इति किं । हे अधीश । अहो इत्याश्चर्ये । अयं शिवः मनुष्यः न किंतु इह अस्मिन् लोके जातः एषः यक्षः अथवा राक्षसः न मनुष्यः इत्यर्थः । अतः एषः शिवः भवता क्षणमपि नोपेक्ष्यः उपेक्षायामाहितं स्यादिति भावः ॥ ७० ॥

श्रुत्वेति । सः दिल्लीश्वरः तदीयवचनं श्रुत्वा अयुतप्रसंख्या येषां तान् वीरान् तुरगाधिवाहान् पदातिनिचयांश्च संप्रेष्य सकलं राजभवनं रुरोध । वातोऽपि वायुरपि अनुज्ञां विना यत् न विशति स्म । मनुष्यस्य का कथेति भावः ॥ ७१ ॥

रुद्धमिति । चतुरः धृतिमान् धैर्यवान् । धृतिर्योगांतरे धैर्ये धारणाध्वरतुष्टिष्विति विश्वः । बुधोऽपि ज्ञानवानपि एषः राजा स्वसुतेन शंभुना सार्धं आत्मानं रुद्धं निरीक्ष्य चिंतैव पयोनिधिः समुद्रः तस्मिन् निमग्नं मनो यस्य तया भूतो बभूव । अतः देव्यायाः शिवायाः पदांबुजं पदकमलं तस्य सम्यक् अर्चनं पूजनं तत्र तत्परः आसक्तः अभूत् । यद्वा दीव्यतीति देवी द्योतमाना ईः लक्ष्मीः । लक्ष्मीरीकार उच्यते इति एकाक्षरकोशः । वैष्णवी शक्तिरिति यावत् । तस्याः पदांबुजसमर्चनतत्परः । यद्वा देवी भवानी पदं यस्य स देवीपदो गणेशः अंबुजः चंद्रः तयोः समर्चनं पूजनं तत्र तत्परः संकष्टचतुर्थीव्रताचरणं चकारेत्यर्थः यद्वा देव्याः पदे देवीपदे स्थानभूतौ हरिहरौ तयोः अंबुजैः समर्चने तत्परः । यद्वा सम्यक् अर्चयंति

यातेषु षट्सु दिवसेषु निशांतकाले
स्वप्ने समेत्य जननी जगतो जगाद ॥
चिंतां स्वमत्र कुरु मातिभयादितस्त्वां
नेष्ये त्वदीयवसतिं नृपते प्रयत्नात् ॥ ७३ ॥
इत्थं निशम्य वचनं नृपतिः प्रतुष्टो
देवीप्रयोजितमनाः सुदृढान् करंडान्
वंशोद्भवानुषसि सत्वरमानयित्वा
जंबीरदाडिमरसालफलान्यधात्सः ॥ ७४ ॥
आपूर्य रक्षकसमक्षमसौ ततस्तान्
अप्रेषयद्यवनपाधिपमंत्रिगेहम् ॥
ते रक्षकाः प्रतिदिनं तु करंडकांस्तान्
उद्घाट्य तानि ददृशुर्न कदाचिदेते ॥ ७५ ॥
कृत्वा चिरं प्रतिदिनं व्रतमेतदादौ
राजैकदा स्वशयने नरमेकमाप्तम् ॥

ते समर्चकाः ब्राह्मणाः । कर्तरि ल्युट् । देवीपदांबुजस्य समर्चनाः देवीपदांबुजसमर्चनाः तेषु तत्परः आसक्तः ब्राह्मणद्वारा लक्षचंडयादि चकारेत्यर्थः ॥ ७२ ॥

यातेष्विति । जगतः जननी अंबिका षट्सु दिवसेषु यातेषु निशांतकाले प्रातःकालसमये गोदोहनकाले इति यावत् । अनेन स्वप्नस्य सद्यः फलं भविष्यतीती सूचितं । स्वप्ने स्वप्नावस्थायां समेत्य हे नृपते त्वं अत्र प्रतिबंधविषये चिंतां मा कुरु व्याख्यातं पूर्वमिदं । अति भयात् इतः अस्मात् कारागृहात् त्वदीयवसतिं प्रयत्नात् त्वां नेष्ये । दुहादित्वाद्द्विकर्मकत्वं क्षिप्रवचने लृट् ॥ ७३ ॥

इत्यमिति । देव्या प्रयोजितं मनो यस्य तथोक्तः नृपतिः राजा इत्थं पूर्वोक्तप्रकारेण वचनं निशम्य श्रुत्वा प्रतुष्टः सन् उषसि प्रातःकाले सुदृढान् वंशोद्भवान् त्वक्सारोद्भवान् करंडान् सत्वरं आनयित्वा आनाय्य तत्र तेषु जंबीराणि च दाडिमानि च सालफलानि च तानि अधात् निहितवान् ॥ ७४ ॥

आपूर्येति । असौ तान् करंडान् रक्षकाणां समक्षं । प्रतिपरसमनुभ्योक्ष्ण इति टच् । आपूर्य यवनाधिपमंत्रिगेहं अप्रेषयत् । ते रक्षकास्तु तान् करंडकान् प्रतिदिनं उद्घाट्य तानि फलानि ददृशुः दृष्टवंतः । कदाचित् एते रक्षकाः न ददृशुः ॥ ७५ ॥

कृत्वेति । राजा आदौ प्रथमं एतत् करंडप्रेषणरूपं व्रतं चिरं चिरकालं दिने दिने इति प्रतिदिनं । यथार्थे अव्ययीभावः । कृत्वा एकस्मिन् काले एकदा । सर्वैकान्य

३२ "०मद्य" पा० भे० ।

297

स्वैर्भूषणैश्च वसनैरपि शाययित्वा[३३]
यातः करंडपिहितः सहितः सुतेन[३४] ॥ ७६ ॥
गत्वातिदूरतरमेष निशावसाने
वाराणसीं प्रतिययौ नृपतिः पदातिः
मार्गे व्रजन् यवनजातिभवः फकीरः[३५]
संदृश्यते स्म यवनाधिपवीरसंघैः ॥ ७७ ॥
दिल्लीश्वरोऽपि नृपतिं प्रगतं निशम्य
स्वापं विहाय निशि जागरणैकभक्तिः ॥
धानुष्कवीरनिचयान् परितो विधाय
पर्यंकगः शिवशिवेति जजाप नित्यम् ॥ ७८ ॥
लक्षद्वयं तदनुगास्तुरगिप्रवीराः
याता दिशासु सकलासु विमार्गणार्थम् ॥
अध्वन्यमुं नरपतिं ददृशुश्चरा ये
ते मेनिरे क्षपणकं च विरक्तमन्ये ॥ ७९ ॥

किं यत्तदः काले दा इति दा प्रत्ययः । स्वैः स्वकीयैः भूषणैः उपलक्षितं एकं आप्तं दूतं स्वशयने स्वशय्यायां शाययित्वा प्रास्वाप्य । रक्षकप्रतारणार्थमिति भावः । करंडपिहितः करंडांतःस्थितः सुतेन शंभुना करंडपिहितेन सहितः यातः गतः ॥ ७६ ॥

गत्वेति । एषः नृपतिः राजा निशावसाने प्रातः अतिदूरं गत्वा पदातिरेव वाराणसीं काशीं प्रति ययौ । यवनाधिपवीरसंघैः शोधार्थं गतैः मार्गे व्रजन् गच्छन् सः यवनजातिसमुद्भवः फकीरः लोके प्रसिद्धः संदृश्यते स्म ददृशे ॥ ७७ ॥

दिल्लीति । नृपतिं शिवं कारागारादपि प्रगतं निशम्य स्वापं विहाय निशि जागरणे एव भक्तिर्यस्य तथोक्तः सः दिल्लीश्वरोऽपि धनुः प्रहरणं येषां ते धानुष्काः धानुष्काश्च ते वीरनिचयाश्च तान् । प्रहरणार्थे ठकि उसंतत्वात्कः । परितः समंतात् । समंततस्तु परितः सर्वतो विष्वगित्यपीत्यमरः । विधाय कृत्वा पर्यंकगः शय्यास्थः सन् शिवशिवेति नित्यं जजाप । यवनस्य भगवन्नामोच्चरणं अयुक्तमपि स चकारेति विरोधः शिवेति शत्रुनामोच्चारणमिति परिहारः कारागारान्निर्गत्य अत्रैवांतर्हितः सन् कदाचित् रात्रावागत्य मम शिरश्छेत्स्यतीति भयाज्जजागारेति भावः ॥ ७८ ॥

लक्षद्वयमिति । तदनुगाः दिल्लीपालानुगाः लक्षद्वयं द्विलक्षसंख्याः तुरगिणः अश्वारोहाः तेषां प्रवीराः सकलासु दिशासु दिक्षु । भागुरिमते आबंतोप्ययं शब्दः ।

३३ "भूषयित्वा" पा० भे० । ३४ "चतेन" पा० भे० । ३५ "भवो विरक्तः" पा० भे० ।

वाराणसीं स समुपेत्य शिवाख्यवीरः
स्थित्वा दिनानि कतिचित्सरितां वरां ताम् ॥
संपूज्य वस्त्रमणिभूषणकंकणाद्यैः
स्तुत्वा ययौ स निजदेशमहीनसत्वः ॥ ८० ॥
श्रीविष्णुप्रपदोद्भवे भवजटाजूटोच्चसौधोत्तमा-
रिंगत्तुंगतरंगसंगसुभगे भागीरथि श्रीमति ॥
आलंबादविलंबतोंब तव यं चक्रेऽहमंहश्चयम्
तं त्वं नाशय जाह्नवि प्रशमय श्रद्धां सुतादिष्वपि ॥ ८१ ॥

विमार्गणार्थं याताः गताः ये नराः अमुं राजानं अध्वनि ददृशुः ते एनं क्षपणकं मेनिरे अन्ये विरक्तं सन्यासिनं मेनिरे तपोबलादितिभावः ॥ ७९ ॥

वाराणसीमिति । सः शिवाख्यः वीरः वरं च तत् अनश्च वरानः श्रेष्ठं उदकं तस्य अदूरे भवा वाराणसी तां । अदूरभवश्चेत्यणि ङीप् । समुपेत्य गत्वा कतिचित् दिनानि स्थित्वा तां सरद्वरां भागीरथीं वस्त्रमणिकंकणाद्यैः संपूज्य स्तुत्वा च निजं देशं दक्षिणदेशं ययौ । किं भूतः । सः अहीनसत्वः न हीनं अहीनं अहीनं सत्वं बलं यस्य । यद्वा नहीनः अहीनः प्रबलः तस्मिन् सत्वं बलं यस्य । यद्वा अहीनां इनः श्रेष्ठः शेषस्तस्येव बलं यस्य । यद्वा अहिश्च इनश्च अहीनौ शेषसूर्यौ तयोरिव सत्वं बलं यस्य । अन्येष्वेवं अर्थाः ऊह्याः ॥ ८० ॥

भागीरथीं स्तुत्वा निजं देशं ययावित्युक्तं तं स्तवमाह । श्रीरिति । श्रिया युक्तः विष्णुः श्रीविष्णुः । शाकपार्थिवादित्वात्समासः । तस्य प्रपदं पादाग्रं । पादाग्रं प्रपदं प्रोक्तमित्यमरः । तस्मात् उद्भवा उत्पन्ना तत् संबुद्धौ हे श्रीविष्णुप्रपदोद्भवे । अनेन सर्वा नद्यः पर्वतसंभवाः अस्यास्तु सकलदेवगुरोः विष्णोः उद्भूतत्वात्सर्वाभ्यो नदीभ्यः श्रेष्ठयमुक्तं । अन्यच्च श्रैष्ठ्ये कारणमाह । भवेति । भवः शिवः । व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिरित्यमरः । तस्य जटाजूटः कपर्दः । कपर्दोऽस्य जटाजूट इत्यमरः । स एव उच्चं सौधं सुधया लिप्तं गृहं तस्मिन् उत्तमाः श्रेष्ठाः । यद्वा सौधेषु उत्तमं सौधोत्तमं जटाजूटस्य सौधसाम्यं धावल्यात् विशालत्वाच्च तस्मिन् आसमंताद्रिंगंतः संचरंतस्तुंगाः उच्चाः ये तरंगाः वीचयः तेषां भंगाः रचनाः तैः सुभगे शोभने । श्रीमति । मतुबंतात् ङीप् । हे भागीरथि भगीरथादागते । तत् आगत इत्यण् ङीप्च । अतिपुण्यसूर्यवंशोद्भवभगीरथद्वारागमनमपि श्रैष्ठ्ये कारणं । अहं तवालंबात् आश्रयात् अविलंबतः शीघ्रं हे अंब मातः । अंबार्यनद्यो ह्रस्व इति ह्रस्वत्वं । अनेन अपराधक्षमत्वं त्वय्यस्तीति सूचितं । लोके हि मातरः पुत्रापराधं सहंते । यं अंहश्चयं पापसंघं चक्रे कृतवानस्मि । उत्तमैकवचनं ।

३६ "०भंग" पा० भे० ।

गंगेऽगानि विमुंचति त्वयि नरो यः सोऽगहीनद्विष-
द्रूपं वांगविहीनपुत्रतनुतां प्राप्नोति वांछासमम् ॥
मातस्तेऽवतरात्पुरा भुवि नराः पापं न चक्रुर्धिया
निर्भीका अधुना चरंति सततं पापौंघहे पातकम् ॥ ८२ ॥
कीर्तिर्भाति भगीरथस्य नृपतेर्लोकत्रये विस्तृता
किंवायं ध्वज एव नाकमखिलं व्याप्यागतो भूतलम् ॥
मालांभोजमयी विराट्सुरपतेः कंठस्थिता लंबते
ब्रह्मांडं तु विभिद्य विस्तृततनुर्यातः सहस्राननः ॥ ८३ ॥

अस्मिन् पापे कृते एतत्परिहारक्षमा भागीरथी वर्तते का भीतिरिति बुध्द्या कृतमित्यर्थः । हे नाह्नवि जह्नुकन्ये तं त्वं नाशय सुतादिषु श्रद्धां भक्तिं च नाशय तेषां त्वद्वियोगहेतुत्वादिति भावः ॥ ८१ ॥

गंगे इति । हे गंगे यः नरः त्वयि अंगानि शरीरावयवान् विमुंचति सः अंगहीनः कामः तस्य द्विषन् शत्रुः शिवः तस्य रूपं वा अंगहीनः कामः सः पुत्रो यस्य अंगहीनपुत्रः विष्णुः तस्य तनुतां शरीरत्वं वांछया समं यथा स्यात्तथा प्राप्नोति शरीरे विरागं प्राप्ते न स्वस्मिन् शरीरं प्रक्षिप्तं तस्य पुनः शरीरस्य सारूप्यदानमयुक्तं शिवकेशवौ सर्वेश्वरौ अतस्तयोरेवसारूप्यं देयं तौ तु सशरीरौ तयोः शत्रुपुत्रयोरनंगत्वात् अनंगशत्रुरनंगपुत्र इति नाम्नाप्रसिद्धयोः तयोरेव साम्यं नामैकदेशे अनंगत्वं दृष्ट्वा ददासीति भावः । हे मातः नराः ते अवतरात् पुरा भूमावागमनात् पूर्वं धिया बुद्धया बुद्धिपूर्वं इत्यर्थः पापं न चक्रुः आयासं विना पापपरिहारकस्थलाभावादिति भावः । पापे कृते तत्परिहारः कृच्छ्रचांद्रायणादिना कर्तव्यः स तु शरीरायाससाध्यः प्रत्याम्नायेन कर्तव्यः चेद्द्रव्यसंपदपेक्षा अतः पापमेव बुध्द्या न चक्रुः । अबुध्द्या जातं चेत्प्रायश्चित्तेन परिहारं चक्रुः । अधुना अस्मिन् काले निर्भीकाः संतः हे क्लेशापहे यमदंडक्लेशापहे । अपेच क्लेशतमसोरिति डप्रत्ययः । पातकं सततं चरंति अनायासेन स्नानमात्रेणैव सर्वं पातकपरिहारसंभवादिति भावः ॥ ८२ ॥

कीर्तिरिति । इयं भागीरथी भगीरथस्य तत्संज्ञस्य नृपतेः कीर्तिर्यशः भाति शोभते किं इतिउत्प्रेक्षा ॥ मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः ॥ अत्रारूचिं मत्वा प्रकारांतरेण उत्प्रेक्षते । यद्वा तस्यैव एषः ध्वजः शुभ्रपटवान् अखिलं नाकं व्याप्य भूतलं आगतः । यद्वा विराट्सुरपतेः कंठस्थिता अंभोजमयी शुभ्रकमलमयी माला लंबते । विराट्पुरुषस्य महत्त्वं अंभोजान्यपि महत्तराणि मालाऽपि महत्तरेति यादृशो यक्षस्तादृशो बलिरितिन्यायेन

---

३७ "क्लेशापहे" पा० भे० ।

हे जन्होस्तनये नयेन विनयेनाचारतो येऽन्विताः
स्वे स्वे कर्मणि निष्ठिताश्च सततं कुर्वंति यज्ञादिकान् ॥
ते स्वर्गं प्रति यांति ये तु बहुशः पापं सदा कुर्वते
स्नानेनैव सकृज्जले तव नराः संयांत्यमर्त्यालयम् ॥ ८४ ॥
कीनाशस्य गृहे पुरा समभवच्चारस्य कोलाहलो
व्याप्ता भूर्दुरितव्रजैर्वयमिहात्यल्पास्तवानुव्रताः ॥
त्वं चायाः स यदा तदैव सकलः कोलाहलोऽस्तं गतो
नारक्योपि भुवः क्वचित्क्वचिदलं रिक्ता अभूवन् क्षणात् ॥ ८५ ॥

हे देवि देववरवंदितपादपद्मे
पद्मोद्भवांजलिजलादुपपन्नदेहे ॥

बोध्यं । किंच एकांसस्थो मालाभागः उत्तरीयेणाच्छन्नः इतरांसस्थो दृश्यते इति च ज्ञेयं । यद्वा विस्तृता तनुर्यस्येति विस्तृततनुः सहस्राननः शेषः ब्रह्मांडं उपरि विभिद्य अधः यातः नु । शेषस्य शुभ्रत्वात् सहस्राननत्वात् एतस्याः अपि तथात्वात् साम्यं । किंच नदी उद्गमस्थले लघुतरा अग्रे गुरुरिति शेषस्य पुच्छे लघुत्वं अग्रे गुरुत्वं इति पूर्वोत्प्रेक्षापेक्षया इयं अतिसुंदरोत्प्रेक्षा ॥ ८३ ॥

हे जन्होरिति । हे जन्होः तनये कन्ये नयेन नीत्या विनयेन नम्रतया आचारेणेति आचारतः । सार्वविभक्तिकस्तसिः । अन्विताः युक्ताः आचारवंतः । युताः इतिपाठः साधीयान् । स्वे स्वकर्मणि सततं निष्ठिताः अत्यंतं स्थिताः ये नराः । ब्राह्मणाः यज्ञादिकान् धर्मान् कुर्वंति ते स्वर्गं प्रति यांति । तव तु एतद्विलक्षण एव महिमेत्याह । ये तु सदा सर्वकालं बहुशः बहुवारं । बव्हल्पाच्छसकारकादित्यादिनाशस् । पापं कुर्वते तव जले सकृदेकवारमेव न तु बहुवारमित्यर्थः । स्नानेनैव न तु यज्ञादिना । अमर्त्यस्य विष्णोः आलयं वैकुंठं यांति अतस्तव लोकोत्तरं सामर्थ्यमिति भावः ॥ ८४ ॥

कीनाशस्येति । पुरा पूर्वं त्वदवतरणात्प्रागित्यर्थः । कीनाशस्य यमस्य गृहे चरंति ते चराः चराणां समूहश्चारं तस्य चारस्य दूतसमूहस्य । चरेष्ट इति ठप्रत्यये समूहार्थेऽण् । दुरितमस्ति येषां ते दुरितिनः । अंहो दुरितदुष्कृतमित्यमरः । अत इनिः । तेषां व्रजैः समूहैः भूः पृथ्वी । भूर्भूमिरचलाऽनंतेत्यमरः । व्याप्ता इह यमगृहे तव अनुव्रताः सेवकाः वयं अत्यल्पाः इति कोलाहलः कलकलः अभूत् । पापकृतां बाहुल्यात्तत्सेवकानामस्माकमल्पत्वात् स्वामिकार्यं न घटते इति दंडान् परित्यज्य तस्थुरित्यर्थः । किंच त्वं यदा अयाः यदा भूलोकं प्राप्तासि । यातेर्लङः सिप् । तदैव प्राप्तिकाल एव सः दूतकृतः कोलाहलः अस्तंगतः । नरकाणां इमाः नारक्यः नरकसंबंधिन्यः भुवः क्वचित् क्वचित् अलं अत्यंतं रिक्ताः अभूवन् । नरकस्थवंशजैस्त्वयि स्नानतर्पणादि कृत्वा स्वपूर्वजाः उद्धृताः इति नरकभूमयो रिक्ताः जाताः इत्यर्थः ॥ ८५ ॥

देहं मदीयामिममंबुनि[३८] ते विलीनं
कुर्याश्च येन जनितो रहितो भवेयं ॥ ८६ ॥
स्वत्प्राप्तेरिह हेतवः क्षितितले ह्याद्यो मखः सागरो
भास्वद्वंशभवा भगीरथमुखा भूपालसंघास्[३९]तथा ॥
श्रीमद्वामनपादपंकजमतो रुद्रस्य मूर्धेति ते
संतु प्राणिषु पापकारिषु दया मुख्यं निमित्तं तव ॥ ८७ ॥
यतंते मुक्त्यर्थं बहुजनिशतैर्ज्ञानिनिचया
भवत्येषां कश्चिज्जनिमरणहीनो नरवरः ॥
त्वदंके यः शेते खलु जननि देहस्य विरतौ
रतः पापव्रातेऽपि च भवति सद्यो हरिरयम् ॥ ८८ ॥
ते वाजिसादिनिचया बहुधा विमृश्य
दिल्लीपतिं प्रतिसमेत्य नृपो नहीति ॥
ऊचुस्तदा यवनपोपि[४०] भयाभिभूतो
रात्रं दिवं त्वदि विचिन्तयति स्म भूपम् ॥ ८९ ॥

हे देवीति । हे देवि देववरैः वंदितं पादपद्मं यस्यास्तत्संबुद्धौ । पद्मोद्भवो ब्रह्मा तस्य अंजलिजलात् उपपन्नदेहे प्राप्तोद्भवे इदं मदीयं देहं ते अंबुनि विलीनं लयं गतं कुरु । येन देहस्य जनेरिति जनितः जननात् रहितः मुक्तः भवेयं स्याम् ॥ ८६ ॥

त्वत्प्राप्तेरिति । इह अस्मिन् क्षितितले त्वत्प्राप्तेः त्वदागमनस्य सगरस्यायं सागरः मखः यज्ञः आद्यः प्रथमः हेतुः । सगरेणाश्वरक्षार्थं योजिताः षष्टिसहस्रपुत्राः कपिलदृष्टिपातेन भस्मीभूताः तदुद्धारार्थं भागीरथ्याः आनयनं प्रथमो हेतुरित्यर्थः । भास्वद्वंशे सूर्यवंशे भवाः भगीरथमुखाः भूपालसंघाः द्वितीयो हेतुः । तथा श्रीमद्वामनपादपंकजं तृतीयो हेतुः । वामनपादपंकजेन ब्रह्मांडे भेदिते तद्रंध्रद्वारा अवतरणात् । अथो अनंतरं रुद्रस्य मूर्धा आधारभूतत्वात् । इति ते पूर्वोक्ताः हेतवः संतु । मन्मते तु पापं कुर्वंति ते पापकारिणः तेषु दया मुख्यं निमित्तं । लोके प्रसिद्धानीतराणि गौणानीति भावः ॥ ८७ ॥

यतंते इति । ज्ञानिनां ज्ञानवतां निचयाः बहुजनिशतैः अनेकजन्मशतैः मुक्त्यर्थं यतंते तेषां यत्नवतां ज्ञानिनां मध्ये कश्चिन्नरवरः नरश्रेष्ठः जनिमरणहीनः भवति तदुक्तं गीतासु । मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः इति । हे जननि देहस्य विरतौ समाप्तौ मरणकाले इति यावत् यः त्वदंके त्वदुत्संगे शेते सः सद्यः देहत्यागक्षणे एव हरिः विष्णुः भवति ॥ ८८ ॥

प्रासंगिकं समाप्य प्रकृतमाह । ते इति । ते दिल्लीपतिप्रेषिताः वाजिसादिनिचयाः

३८ "०यममुमंबुनि" पा० भे० । ३९ "०वर्याः" पा० भे० । ४० "०पोति०" पा० भे० ।

भूपाधिपः स्वगिरिदुर्गमुपेत्य युक्तः शो
कैश्चित्पदातिभिरथो जननीं प्रणम्य।
तुष्टः सुरद्रुम इव व्यतरद्धनादि
वस्त्राणि भूषणगणान् द्विजदेवताभ्यः ॥ ९० ॥
वीरो निजं जनपदं नृपतिः स रक्षं
स्तस्थौ चिरं गिरिवरे सहितः प्रवीरैः ॥
कालः कलावपि तृतीययुगेन तुल्य-
स्तत्राभवन्निवसतां सततं जनानां[41] ॥ ९१ ॥
राजदुर्गेऽथ सप्तारे वसन् रेवातटावधि
प्रजा अपालयद्राजा पिता पुत्रानिवौरसान् ॥ ९
आनंदनामवर्षे रसनवशरभूमिते शके याते
अभिषिच्य राजदुर्गे सिंहासनगं नृपं द्विजश्चक्रे ॥ ९३ ॥

बहुधा बहुप्रकारेण विमृश्य राजानं संशोध्य दिल्लीपतिं प्रतिसमेत्य नृपः [illegible] न नास्ति हीति निश्चये इति ऊचुः । तदा यवनपः अतिभयाभिभूतः सन् [illegible]दिवं अहोरात्रं । अचतुरेत्यादिना निपातः । भूपं शिवं हृदि विचिंतयति स्म । [illegible]क्ष-द्वयमितैर्वाजिसादिभिरनुगतोऽपि यतो न दृष्टोऽसावतः अस्यामेव राजधान्यां क्वचि-द्गूढः स्थितः सन् रात्रावागत्य मां हनिष्यतीति चिंतातुरोभूदित्यर्थः ॥ ८९ ॥

भूप इति । अतो अनंतरं कैश्चित् पदातिभिर्युक्तः भूपाधिपः सः शिवः गिरि-दुर्गं उपेत्य जननीं मातरं प्रणम्य तुष्टः सन् । यवनप्रतिबंधान्मुक्तत्वादिति भावः । सुरद्रुम इव कल्पद्रुम इव इच्छितमित्यर्थः । धनादि आदिशब्देन धान्यादीनां संग्रहः । वस्त्राणि भूषणगणान् द्विजा एवदेवताः ताभ्यः । यद्वा द्विजाश्च देवताश्च द्विजदेवताः ताभ्यः देवताः अत्र देवालयस्थाः प्रतिमा ग्राह्याः । व्यतरत् दत्तवान् ॥ ९० ॥

वीर इति । वीरः अत एव प्रवीरैः सहितः सः नृपतिः निजं स्वकीयं जनपदं दक्षिणदेशं रक्षन् सन् गिरिवरे राजदुर्गे चिरं तस्थौ । कलावपि कलियुगेऽपि तत्र दक्षिणदेशे निवसतां जनानां कालः तृतीययुगतुल्यः द्वापरेण समः अभवत् । सर्वेऽपि आनंदयुता आसन् इति भावः ॥ ९१ ॥

राजेति । राजा राजदुर्गे अथ सप्तारे वसन् सन् प्रजाः पिता औरसान् पुत्रानिव नर्मदायाः तटं अवधिः यथा स्यात्तथा अपालयत् पालितवान् ॥ ९२ ॥

आनंद इति । द्विजः गागाभट्टः रसाः षट् नव प्रसिद्धाः शराः पंच भूरेका ए-भिर्मिते शके १५९६ याते प्राप्ते । वर्तमाने क्तः । आनंदनामवर्षे राजदुर्गे नृपं अभिषिच्य राज्याभिषेकं कृत्वा सिंहासनगं सिंहासनस्थं चक्रे कृतवान् । अत्रेदं

---

४१ "प्रजानां" पा० भे० ।

द्वौ पुत्रावस्य जज्ञाते ज्येष्ठः शंभुर्नृपोत्तमः
कनीयानभवद्योऽसौ राजाराम इतीरितः ॥ ९४ ॥
वारणाया उत्तरस्या दिशो राज्यमदात्प्रभुः
शंभवे दक्षिणस्यास्तु राजारामाय दत्तवान् ॥ ९५ ॥
यौवराज्यं ददौ राजा विद्वद्वाजसनेयिने
द्विजाय देवीभक्ताय दयादिगुणशालिने ॥ ९६ ॥
अष्टावपि प्रधानान्स चक्रे कार्यधुरंधरान्
आज्ञापरान्[42] वरान्दयालून्विजितेंद्रियान् ॥ ९७ ॥
शिव[illegible]ायादो नागपूराधिपोऽभवत्
वं[illegible]र्भान् प्राच्यांश्च पालयन्नवसत्सुखम् ॥ ९८ ॥

बोध्यं । [illegible]ः शिवं उक्तवान् उदयपुरास्थितक्षत्रियाणामेकः क्षत्रियो दक्षिणं देशं आगत[illegible] तत्कुलोत्पन्नस्त्वमिति क्षत्रियोऽसि क्षत्रियधर्मांस्त्यक्त्वा शूद्रधर्मानाचरसि अतः प्रायश्चित्तं दत्त्वा त्वां पुनः क्षत्रियं करिष्यामीत्युक्त्वा प्रायश्चित्तं दत्त्वा अभिषिच्य सिंहासनमध्यवेशयत् छत्रचामरादि च दत्तवान् । मया तु शिवकुलोत्पन्नानामाधुनिकानां राज्ञां शूद्रधर्मान् विलोक्य शूद्रः सन् त्रिपदीं जजापेति पूर्वभुक्तमित्यविरोधः ॥ ९३ ॥

द्वाविति । अस्य शिवभूपस्य द्वौ पुत्रौ जज्ञाते बभुवतुः तावाह । नृपोत्तमः राजश्रेष्ठः अतिशयेन प्रशस्यः इति ज्येष्ठः पुत्रः शंभुः आसीत् इति शेषः । प्रशस्यशब्दादिष्ठनि ज्यादेशः । यः अतिशयेन अल्पः इति कनीयान् कनिष्ठः पुत्रः । अल्पशब्दादीयसुनि कनादेशः । अभवत् सः असौ राजाराम इति ईरितः उक्तः ॥ ९४ ॥

वारणाया इति । प्रभुः निग्रहानुग्रहसमर्थः सः शिवः वारणायाः वारणाख्यायाः नद्याः उत्तरस्याः दिशः राज्यं शंभवे ज्येष्ठाय अदात् तस्य ज्येष्ठत्वात् राज्यस्याऽपि महत्त्वादिति भावः । वारणायाः दक्षिणस्याः दिशस्तु राज्यं कनिष्ठाय राजारामाय दत्तवान् ॥ ९५ ॥

यौवराज्यमिति । राजा शिवः युवा चासौ राजा च युवराजः तस्य भावः यौवराज्यं युवराजत्वं । ब्राह्मणादित्वात् ष्यञ् । विद्वांश्चासौ वाजसनेयी च तस्मै विद्वद्वाजसनेयिने देवीभक्ताय दयादिगुणशालिने द्विजाय ब्राह्मणाय ददौ ॥ ९६ ॥

अष्टाविति । सः कार्यधुरंधरान् आज्ञायां परान् आसक्तान्नतु प्रतिकूलान् वीरेषु वरान् श्रेष्ठान् दयालून् दयावतः । प्रजानां अपीडकान् विजितेंद्रियान् अष्टौ अष्टसंख्यान् प्रधानान् अमात्यसचिवादीन् । प्रधानशब्दस्य संज्ञापरत्वात् पुंस्त्वं । चक्रे कृतवान् ॥ ९७ ॥

---

४२ "प्रधानादीन्" पा० भे० ।

सिंहासनगतो राजा वर्षषट्कमपालयत्
प्रजा अथ दिवं यातो मधौ पंचदशीदिने ॥ ९९ ॥
॥ इति श्रीशिवकाव्ये पुरुषोत्तमकविकृते पञ्चमश्चमत्कारः ॥

दिवमिते जनके जगतीपतिर्जनितहर्षभरः सततं नृषु ॥
मदनदेवसमानवपुः प्रभुः प्रथितकीर्तिरपालयदुर्वराम् ॥ १ ॥
अवति शंभुनृपे न धनागमो न जलदो जलदो न वसुन्धरा ॥
फलति धान्यचयो न च मद्गृहे न मनसापि जगाद जनस्त्विदम् ॥ २ ॥
द्विजकुलं सकलं सकलं सदा परिररक्ष [illegible] रक्षरपोषकः ॥
वितरणं तरणिप्रभवस्यतद्-वितरणेन [illegible] जिगाय सः ॥ ३ ॥

शिवेति । शिवभूपस्य दायं अत्तीति दायादः [illegible] अविभुज्यादित्वात्कः । नागपूरस्य अधिपः स्वामी अभवत् । शिवभूपेनैव स्थापि [illegible] इत्यर्थः । सः वंगान् वंगसंज्ञान् विदर्भान् विदर्भसंज्ञान् प्राच्यांश्च देशान् । द्युप्रागपागुदक् प्रतीचो यत् इति यत्प्रत्ययः । पालयन् सन् सुखं यथा तथा अवसत् स्थितवान् ॥ ९८ ॥

सिंहासन इति । सिंहासनं गतः सिंहासनगतः सिंहासनस्थितः । राजा वर्षाणां षट्कं षट् वर्षाणि प्रजाः अपालयत् । अथ मधौ चैत्रे पंचदशीदिने पौर्णमास्यां दिवं स्वर्गं यातः गतः शक्रस्तु सिंहासनोपवेशनशकात् षष्ठात् परः सप्तमो विज्ञेयः ॥ ९९ ॥ इति श्री शिवकाव्यव्याख्यायां काव्यप्रकाशिकायां स्वयं कृतायां पंचमश्चमत्कारः ॥

अथ शिवपुत्रस्य शंभुनृपस्य चरित्रं विवक्षुरादौ तं दशभिः श्लोकैर्वर्णयति । दिवमिति । नृषु मनुष्येषु सततं निरंतरं जनितः हर्षस्य भरो येन तथोक्तः । मदनदेवेन समानं वपुर्यस्य प्रभुः निग्रहानुग्रहसमर्थः प्रथिता कीर्तिर्यस्य जगत्याः पतिः जगतीपतिः शंभुः जनके शिवे दिवं स्वर्गं इते गते सति उर्वरां भूमिं । उर्वरा सर्वसस्याढ्येत्यमरः । अस्य सर्वापि भूमिः सर्वसस्याढ्या नान्येति ज्ञापनार्थं भूविशेषग्रहणं । अपालयत् ॥ १ ॥

अवतीति । जनः लोकः शंभुनृपे अवति सति रक्षति सति । धनस्य आगमः प्राप्तिर्न । जलदो मेघः जलं ददातीति जलदः न । वसुंधरा भूमिः न फलति अतः मद्गृहे धान्यचयः न । इदं पूर्वोक्तं सर्वं मनसापि न जगाद । सर्वं धनादि गृहे गृहे परिपूर्णमासीदित्यर्थः ॥ २ ॥

द्विजकुलमिति । सः कलाभिः सहितं सकलं गुणयुक्तं द्विजानां ब्राह्मणानां कुलं परिररक्ष रक्षितवान् निरक्षराणां अविदुषां पोषकः निरक्षरपोषकः आसीदितिशेषः । विदुषो ब्राह्मणानीप्सितं ददौ अविदुषः अन्नवस्त्रमात्रं ददावित्यर्थः । तरणेः सूर्यात्

305

न विधवा विधवाऽऽस नितंबिनी न च ममार कुमारनरः क्वचित् ॥
नहि धनं निधनं भविता ममे-त्यवति नैवमुवाच नृपे जनः ॥ ४ ॥
परिजनः शिवसूनुमसूनिव प्रियतमान्समवेक्ष्य रिरक्षिषुं ॥
शिवकृतं परिपालनमात्मनः किमपि केऽपि कदापि न सस्मरुः ॥ ५ ॥
प्रकृतयः कृतयोऽस्य महत्तमा इति विलोक्य महामुदमाययुः ॥
बुधजना अथ तस्य गुणज्ञतां समधिगम्य ननन्दुरुपर्यपि ॥ ६ ॥

प्रभवः उत्पन्नः तरणिप्रभवः कर्णः तस्य तत् प्रसिद्धं वितरणं दानं निजेन वितरेण दानेन जिगाय । कर्णापेक्षया अधिकमस्य दातृत्वमासीदित्यर्थः ॥ ३ ॥

नेति । नृपे शिवभूपे अवति सति रक्षति सति विधवा गतभर्तृका नितंबिनी स्त्री विशिष्टाः धवाः यस्याः सा विधवा व्यभिचारिणी नास न बभूव । यद्वा नितंबिनी स्त्री विधवा गतभर्तृका नास न बभूव । किंच नितंबिनी सभर्तृका स्त्री विधवा व्यभिचारिणी नास न बभूव । असगतिदीप्त्यादानेष्विति भौवादिकस्येदं रूपं अ-ल्लुग्विकरणत्वादस्तेर्भूभावोन । क्वचित्स्थले कुमारनरः बालपुरुषः न ममार न म्रियते स्म । म्रियतेर्लुङ्लिङोश्चेति तङ् नात्र । तथा जनः धनं नास्ति हि निश्च-येन मम निधनं मृतिर्भविता अन्नाभावादित्यर्थः एवं नोवाच । सर्वस्यापि गृहे धनं पूर्णमासीदित्यर्थः । नृपे अवतीति सर्वत्र संबंधः ॥ ४ ॥

परिजन इति । परिजनः आश्रितजनः शिवसूनुं शंभुं आत्मनः स्वान् । न लोके-ति निषेधात् षष्ठी न । आत्मन इदं आवर्त्यते तच्च प्रथमं द्वितीयांतं अग्रे षष्ठ्यंतं । आत्मनः स्वस्य प्रियतमान् असूनिव रक्षितुं इच्छति रिरक्षिषति रिरक्षिषतीति रिरक्षिषुः तं । रक्षतेः सन्नंतादुप्रत्ययः । समवलोक्य शिवेन कृतं शिवकृतं आत्मनः स्वस्य परिपालनं किमपि किंचिदपि कदापि कस्मिन्नपि काले न सस्मार । इति वचनव्यत्ययेन व्या-ख्येयं । आस्तां परिजनस्य कथा । केपि न सस्मरुः शिवकृतं परिपालनमित्यादि सर्वं पुनः योज्यं ॥ ५ ॥

प्रकृतय इति । प्रकृतयः प्रधानसंज्ञा राजकार्यकराः । प्रधानं प्रकृतिः स्त्रियामि-त्यमरः । अस्य शंभोः कृतयः क्रियाः अतिशयेन महत्यः इति महत्तमाः लोकोत्तराः । तसिलादिष्वाकृत्वसुच इति पुंवद्भावः । इति विलोक्य महामुदं महांतं हर्षं । मुत्प्रीतिः प्रमदो हर्ष इत्यमरः । आन्महत इत्यादिना महत आत्वं । आययुः प्रापुः । अथ अनन्तरं बुधजनाः पंडितजनाः तस्य शंभुनृपस्य गुणज्ञतां समधिगम्य ननंदुः । उपरि ऊर्ध्वं वर्तमाना इति शेषः । बुधजनाः देवजना अपि तस्य गुणज्ञतां समधिगम्य ननंदुः यथाशास्त्रं राज्यं करिष्यतीति तुष्टा इत्यर्थः ॥ ६ ॥

परिणयं नयविद्विदधे निजं व्रतनिबन्धनपूर्वमपूर्ववत् ॥
युवतिरप्यसकृत्पतिदेवता तमनुकूलमपूजयदीश्वरम् ॥ ७ ॥
सलिलजातदलायतलोचनो नववयाः पृथुदीर्घभुजोऽसलः ॥
कमलकोमलपादतलो नृपैः कनकगौरतनुर्विततालकैः ॥ ८ ॥
पतिपरोत्तमदारमनस्यपि स्मरसुखं जनयन्निजदर्शनात् ॥
विजयते जितशत्रुपरंपरो हरिहरार्चनलब्धमनोरथः ॥ ९ ॥
रणेसमागतवीरवरानसौ जयति शूरनराधिपपालकः ॥
किमधुनेह विधेयमितिप्रभु-र्हृदि विचिन्तयति स्म नृपाधिपः ॥१०॥

परिणयमिति । नयं नीतिं वेत्तीति नयवित् सः शंभुः निजं स्वकीयं मौंजीबंधन-पूर्वं यस्य तं परिणयं विवाहं मौंजीपूर्वकं विवाहमित्यर्थः । पूर्वैः पूर्वजैः तुल्यं पूर्ववत् न पूर्ववत् अपूर्ववत् अतिसंपद्वरयुक्तत्वात् पूर्वजापेक्षया आधिक्येनेति भावः । विदधे चक्रे । पतिदेवता पतिव्रता युवतिरपि स्त्री अपि अनुकूलं ईश्वरं ईश्वरबुध्येति भावः तं शंभुं असकृत् निरंतरं अपूजयत् ॥ ७ ॥

अथ युग्मेन तद्रूपं वर्णयति । सलिलेति । सलिलं जलं तत्र जातं सलिलजातं कमलं तस्य दलं पत्रं तद्वत् आयते विस्तृते लोचने यस्येति तथोक्तः । नवं तरुणं वयो यस्येति नववयाः । पृथू स्थूलौ दीर्घौ भुजौ यस्येति तथोक्तः । असलः बलवान् । वत्सांसाभ्यां कामबले इति लप्रत्ययः । कमले इव कोमले पादतले यस्य तथोक्तः । कनकमिव गौरा तनुर्यस्य । विमलाः स्वच्छाः अलकाः यस्य तथोक्तः । नृपः विजयते इत्युत्तरेणान्वयः ॥ ८ ॥

पतिपरेति । पतिरेवपरः श्रेष्ठः येषां ते पतिपरा अत एव उत्तमा ये दाराः स्त्रियः । दाराः पुंसि च भूम्न्येवेत्यमरः । तेषामपि मनसि निजस्य स्वस्य दर्शनात्स्मरस्य कामस्य सुखं जनयन् उत्पादयन् अतिसुंदर इत्यर्थः । जिता शत्रुपरंपरा येन सः । हरिहरयोः विष्णुशिवयोः अर्चनेन लब्धा मनोरथाः येन सः नृपः विजयते सर्वोत्कर्षेण वर्तते । वर्तमानसामीप्ये वर्तमानाद्वेति लट् ॥ ९ ॥

रणेति । नृपाणां मांडलिकानां भूपानां अधिपः सार्वभौमः दिल्लीपतिः इति हृदि विचिंतयति स्म । इति किं । शूराः ये नराधिपाः सेनापतयः तेषां पालकः । अजेय इत्यर्थः । असौ शंभुनृपः रणे समागताः ये वीरवरास्तान् जयति अभिभवति । जि-जि अभिभवे इत्यस्यरूपं न तु जि जये इत्यस्य तस्य अकर्मकत्वात् । अधुना इदानीं इह अस्मिन् शत्रौ विषये किं विधेयं कर्तव्यं ॥ १० ॥

---

१ 'ेमपूर्वकृत' पा० भे० । २ 'ेपादसमोकवि:' पा० भे० । ३ 'ेविमलालकः' पा० भे० । ४ 'युधि' पा० भे० ।

शक्रप्रस्थाधिनाथः शिवनृपतिसुतं शक्रतुल्यं विदित्वा
वीरानाहूय सर्वान् व्रजत शिवसुतं सङ्गरे सर्वथा तम् ॥
जित्वा धृत्वाऽथ बद्ध्वा नयत मम समीपप्रदेशं प्रयत्नाद्-
इत्यूचे वाक्यमेतेऽप्यवनतशिरसः प्रस्थिता अंतकाशाम्* ॥ ११ ॥
ये ये वीराः खड्गहस्ताः प्रवृत्ता योद्धुं तांस्तानिन्द्रलोकं निनाय ॥
ये ये वीराः पृष्ठतः संप्रजग्मुः प्रस्थं तांस्तानिन्द्रपूर्वं स निन्ये ॥१२॥
इन्द्रप्रस्थनिवासास्ते जग्मुरिन्द्रनिवेशनम् ॥
श्रुत्वा तुतोष यवनः शुशोच च ततः परम् ॥ १३ ॥
औरंगजबो निजपुरस्थितसर्बलोकं
भक्तं हरस्य विनिवेदयति स्म दूतैः ॥

शक्रेति । शक्रप्रस्थस्य इंद्रप्रस्थस्य अधिनायः सार्वभौमः शिवनृपतिसुतं शक्रतुल्यं इंद्रतुल्यं विदित्वा ज्ञात्वा सर्वान् वीरान् आहूय शिवसुतं शंभुं व्रजत गच्छत संगरे संग्रामे सर्वथा सर्वप्रकारेण तं शंभुं जित्वा अभिभूय धृत्वा अथ बध्वा मम समीपप्रदेशं प्रयत्नात् आनयत इति वाक्यं ऊचे । एते वीरा अपि अवनताशिरसः संतः कृतप्रणामा इत्यर्थः । अंतकस्य यमस्य आशां दिशं दक्षिणां दिशं प्रस्थिताः । शंभुनृपाधिष्ठितामित्यर्थः । अपुनरावर्तनाद्यमदिक्प्रस्थानमेव चक्रुरिति वास्तवोऽर्थः ॥ ११ ॥

ये ये इति । सः ये ये वीराः खड्गानि हस्तेषु येषां ते खड्गहस्ताः संतः योद्धुं प्रवृत्ताः तांस्तान् इंद्रलोकं स्वर्गं निनाय अगमयत् । ये ये वीराः पृष्ठतः पृष्ठदेशे संप्रजग्मुः रणभूमेर्भयादपसृता इत्यर्थः तान् तान् इंद्रः इंद्रशब्दः पूर्वः यस्य तत् प्रस्थं इंद्रप्रस्थमित्यर्थः । निन्ये नीतवान् । अतिभीतत्वान्मध्ये नैव तस्थुरित्यर्थः ॥ १२ ॥

इंद्रेति । इंद्रप्रस्थनिवासाः ते वीराः इंद्रनिवेशनं जग्मुः इति वाक्यं श्रुत्वा तुतोष ततः परं तदनंतरं शुशोच च । इंद्रस्य इंद्रशब्दस्य निवेशनं स्थितिर्यस्मिन् तत् इंद्रनिवेशनं इंद्रप्रस्थं जग्मुः ययुः । ये गत्यर्थास्तेप्राप्त्यर्था इति धात्वर्थविचारपूर्वकं वाक्यार्थं कृत्वा स्वकीया वीराः सर्वे कुशलिन इंद्रप्रस्थमागता इति बुद्ध्या तुतोष । ततः परं वार्ताहारिभिः निविशंते यदिति निवेशनं इंद्रस्य निवेशनं इंद्रनिवेशनं इंद्रपुरं । कृत्यल्युटो बहुलमितिल्युट् । जग्मुः । समरे प्राणांस्त्यक्त्वा स्वर्गं ययुरिति पदार्थपूर्वकं वाक्यार्थं विधाय बोधितः सन् शोकं चकारेतिभावः । यद्वा इंद्रनिवेशनं जग्मुरिति वाक्यं श्रुत्वा स्वर्गं जग्मुरिति शीघ्रोपस्थितिकं अर्थमादाय मदीयवीराः संग्रामे पराक्रमं कृत्वा स्वकीयकीर्तिं विस्तार्य्य प्राणांस्त्यक्त्वा स्वर्गं गताः न भयादपसृताः । जयपराजयावीश्वराधीनाविति तुतोष । एतादृशाः वीराः मदर्थे स्त्रीपुत्रादिकानपहाय रणे मृता इति दुःखेन शुशोचेति भावः ॥ १३ ॥

औरंगेति । औरंगजबसंज्ञः सार्वभौमः निजपुरस्थितं हरस्य सांबस्य भक्तं

* "पितृपाशाम्" इति मूले वर्तते

शंभोः शिवादपरमेव गृहाण नाम
यद्यस्ति ते हरनुतौ परमोऽभिलाषः ॥ १४ ॥
तन्नामभल्लमुखदीर्णतरं मदीयम्
स्वांतं प्रपीडयति मां यदि कश्चन स्यात् ॥
दुष्टस्य तस्य मतिभेदकरो द्विजो वा
शूद्रोऽपि चेत्स मम वल्लभतामुपेयात् ॥ १५ ॥
ग्रामान्गजान्रथवरांस्तुरगान्धनं यो
दास्यामि मद्रिपुमसुं वशमानयेत ॥
सत्यं ब्रवीमि किमतः परमस्य देयम्
राज्यं सदेहमखिलं विनिवेदितं मे ॥ १६ ॥
चिन्ताज्वरेण शिथिलीकृतसर्वगात्रो
निद्राविहीननयनो भयवार्धिमग्नः ॥

सर्वलोकं दूतैः करणैः इदं विनिवेदयति स्म आज्ञापयामास । इदं किं । हे हरभक्तेति शेषः । ते तव हरस्य सांबस्य नुतौ परमः अभिलाषः अस्ति चेत्तर्हि शंभोः शंभुरित्यानुपूर्वीकात् च परं शिव इत्यानुपूर्वीकात् हरनाम्नः अन्यत् नाम सांबेत्यादि गृहाण ॥ १४ ॥

शंभुशिवाभिधाऽग्रहणे हेतुमाह तन्नामेति । तेच्च ते नामनी च तन्नामनी ते एव भल्लौ बाणविशेषौ तयोः मुखं तेन दीर्णतरं तयोक्त मदीयं स्वांतं हृदयं । स्वांतं ह्रन्मानसं मन इत्यमरः । मां प्रपीडयति व्यथयति अतस्तन्नाम न ग्राह्यमितिभावः । यदि कश्चन कश्चित् द्विजः ब्राह्मणः क्षत्रियः वैश्यः वा शूद्रोऽपि दुष्टस्य तस्य शंभोः करोतीतिकरः । पंचाद्यच् । मतिभेदस्य करः स्यात् तर्हि सः पूर्वोक्तः मम वल्लभतां प्रियत्वं उपेयात् प्राप्नुयात् ॥ १५ ॥

लुब्धस्य दानं विना वशीकरणाभावाद्दानं प्रतिजानीते । ग्रामानिति । यः मत्शं आधीनं अमुं मद्रिपुं आनयेत मत्समीपे इतिशेषः । यद्वा यः अमुं मद्रिपुं वशं आनयेत आधीनं कुर्यात् तस्मै इतिशेषः । ग्रामान् गजान् रथवरान् तुरगान् धनं च दास्यामि । पुनरप्याह अस्य मत्कार्यकर्तुर्मे राज्यं देहेन सहितं सदेहं यथा स्यात्तथा । यद्वा सदेहमिति राज्यविशेषणं विनिवेदितं अर्पितं । सकलराज्यसहितोऽहं तदधीनोस्मीत्यर्थः । नेदं भाषणं प्रतारकमित्याह । सत्यं ब्रवीमि न मिथ्येत्यर्थः । अतः परं तस्य किं देयमस्ति न किंचिदित्यर्थः ॥ १६ ॥

चिंतेति । चिंताया: ज्वरः तेन । यद्वा चिंतैवज्वरः तेन कर्त्रा शिथिलीकृतानि सर्वगात्राणि यस्य तथोक्तः अतएव निद्रया विहीने नयने यस्य तथोक्तः यतः भयमेव वार्धिः समुद्रः तस्मिन् निमग्नः स यवनः खादन् भक्षं जक्षत् व्रजन् गच्छन्

खादन्व्रजन्स च पिबन्निवसन् विशंश्च
शंभुं मनस्यविरतं यवनो जजाप ॥ १७ ॥
तोयं बिना सरसिजं रहिता प्रियेण
योषा गदेन च तनुर्मिहिरो दिनान्ते ॥
गेही कुटुम्बसहितो रहितो धनेन
दिल्लीश्वरोऽपि स बभूव यथा तथासौ ॥ १८ ॥
चिन्ता चितेते यमले भगिन्यौ मन्ये द्वयोर्यत्खलु वर्णसाम्यम् ॥
सालङ्कृतेः श्रेष्ठतमा बभूव चिन्ता न चान्या मृतदाहहेतुः ॥ १९ ॥
नृपः प्रजापालनकृद्यशस्वी विदीर्णवीरो भविता कथं मे ॥
वश्यः सदेत्थं प्रविचारयन्सन् कलिः कृशोऽभूद्यवनाधिपश्च ॥ २० ॥
देवीभक्तो गौडदेशीयविप्रः कञ्जी नाम्ना मन्त्रविद्भूर्तराजः ॥
श्रुत्वा वाक्यं सार्वभौमस्य लोकाद्दिल्लीं प्रायाच्छिष्यसंघैरुपेतः ॥ २१ ॥

उदकमद्यादि पिबन् निवसन् विशन् गृहादि शंभुं हरं मनसि अविरतं जजाप । यवनः शंभुं हरं जजापेतिविरोधः । शंभुं राजानमितिपरिहारः ॥ १७ ॥

तोयमिति । सरसि जातं सरसिजं कमलं । सप्तम्यांजनेर्डः । तत्पुरुषे कृति बहुलमित्यलुक् । तोयं उदकं विना । प्रियेण भर्त्रा विरहिता योषा । तनुः शरीरं गदेन रोगेण । मिहिरः सूर्यः । मिहिरारुणपूषणा इत्यमरः । दिनांते सायंकाले । कुटुंबसहितः धनेन रहितः गेही गृहवान् यथा भवति तथा असौ दिल्लीश्वरोपि बभूव दीनवदृश्य इत्यर्थः ॥ १८ ॥

कविराह । चितेति । चिंता उद्वेगः चिता प्रसिद्धा एते द्वे यमले सहजे भगिन्यौ इत्यहं मन्ये । यत् तद्वयोः चिताचितयोः वर्णयोः अक्षरयोः अन्यत्रवर्णयोः देहगतकांत्योः साम्यं समत्वं अस्तीतिशेषः । द्वयोर्मध्ये ज्येष्ठत्वं कस्या इत्यत आह । चिंता अलं अत्यर्थं कृतेः करणात् सजीवदाहरूपायाः क्रियाया इत्यर्थः । अतिशयेन श्रेष्ठा इति श्रेष्ठतमा बभूव । यद्वा अलंकृतेः अलंकारात् मूर्धगताद्विदुरूपात् हेतोः श्रेष्ठतमा । अन्या चिता श्रेष्ठतमा न यतः मृतस्य प्रेतस्य दाहे हेतुः ॥ १९ ॥

नृपइति । कलिः यवनाधिपश्च प्रजानां पालनं करोतीति प्रजापालनकृत् अतः यशस्वी कीर्तिमान् । अस्मायामेधास्रजो विनिरिति विनिः । विदीर्णाः वीराः येन सः तयोक्तः सः नृपः शिवः मे वशः आधीनः कथं भविता इत्यं सदा सर्वकालं प्रविचारयन् कलिः यवनाधिपश्च कृशः अभूत् ॥ २० ॥

देवीभक्त इति । देव्याः भक्तः देवीभक्तः । कलौ चंडीविनायकाविति स्मरणात्क्षिप्रं

५ 'भूपं' पा० भे० । ६ '०तंहिजयोजजाप' पा० भे० ७ 'रामाभिधोऽपि' पा० भे० ८ 'राजा' पा० भे० । ९ '०कात्प्रायादिल्लीशि०' '०कादिल्लीमागाच्छिष्य०' इति वा पा० भे०।

स सार्वभौमं प्रति वाक्यमाह युद्धं विना तं स्ववशं विधास्ये॥
चिन्ता विधेयाल्पतरापि नात्र पीयूषसत्त्वे मृतिभीर्भवेत्किम्॥ २२ ॥
किमस्त्यगाधं त्वयि विप्रवर्ये याहि त्वमद्यैव स शंभुभूपः ॥
वश्यो विधेयो मम शत्रुरित्थं दिल्लीपतिस्तं वचनं बभाषे ॥ २३ ॥
व्रजन्स कुंभं जलपूर्णमादौ ददर्श विप्रः कलियोजितोऽसौ ॥
मेने जितं राजवरं जगाम सप्तारदुर्गं प्रति हृष्टचित्तः ॥ २४ ॥
द्विजवरः समुपेत्य निवेशनं नरपतेरुपनीतमहोपदः ॥
सुखमुवास मनःप्रियसत्कथाः स कथयन्सदसि प्रियवादिनः ॥ २५ ॥

कार्यकरत्वं सूचितं । मन्त्रान् वेत्तीति मन्त्रवित् धूर्तानां राजेति धूर्तराजः । राजाहः सखिभ्यष्टच् । नाम्ना कञ्जी कञ्जोसंज्ञः गौडदेशे भवः गौडदेशीयः । वृद्धाच्छः । सचासौ विप्रश्च गौडदेशीयविप्रः सर्वस्याः भूमेः ईश्वरः सार्वभौमः तस्य सार्वभौमस्य यवनाधिपस्य ईप्सितं दाने शक्तस्येति भावः । वाक्यं ग्रामादिदानरूपं लोकात् श्रुत्वा शिष्यसंघैः उपेतः सन् दिल्लीं प्रायात् आगतवान् ॥ २१ ॥

स इति । सः कञ्जी सार्वभौमं प्रति इति वाक्यं आह वदति । ब्रूञो लटि तिपि णलि आहादेशः । इति किं । युद्धं विना तं शंभुं स्वयशं स्वाधीनं विधास्ये करिष्ये । अत्र रिपुविषये अल्पतरापि अत्यल्पापि । तसिलादिष्वाकृत्वसुच इतिपुंवद्भावः । चिंता न विधेया न कार्या यतः पीयूषस्य अमृतस्य सत्वे मृतिभीः मरणभीतिः भवेत् किं । नेत्यर्थः ॥ २२ ॥

किमिति । विप्रश्रेष्ठे त्वयि सति किं अगाधं दुस्तरं किं न किंचिदित्यर्थः । अतः त्वं अद्यैव याहि गच्छ न तु विलंबेनेति भावः । मम शत्रुः सः शंभुभूपः वशः आधीनः विधेयः इति दिल्लीपतिः तं वचनं बभाषे उक्तवान् ॥ २३ ॥

व्रजन्निति । कलिना योजितः प्रेरितः असौ कञ्जी व्रजन् सन् आदौ प्रथममेव निर्गमक्षणे इति यावत् । जलेन पूर्णं कुंभं ददर्श । असौ कञ्जी राजवरं जितं मेने । शुभशकुनस्य दर्शनादिति भावः । तदुक्तं मुहूर्तमार्तंडे । वस्त्रालंकरणानि पूर्णकलशास्तुर्यध्वनिः पुत्रवान् इति । हृष्टं चित्तं यस्य स हृष्टचित्तः सन् सप्तारदुर्गं प्रति जगाम ॥ २४ ॥

द्विजवर इति । नरपतेः शंभुभूपस्य निवेशनं गृहं उपेत्य गत्वा उपनीता प्रत्यर्पिता महती उपदा उपायनं येन तयोक्तः । उपायनमुपप्राह्यमुपहारस्तथोपदेत्यमरः । द्विजवरः सः कञ्जी प्रियं वदतीति प्रियवादी तस्य भूपस्य । सुप्यजादौणिनिस्ताच्छील्ये इति णिनिः । सदसि सभायां मनसः प्रियाः अतएव सतीः उत्तमाः कथाः कथयन्

१० 'ोयाकिमपि त्वयान' पा० भे० । ११ 'ोधद्विजदेवदेवे' पा० भे० । १२ 'गंतव्यम०' पा० भे० । १३ 'ोमुराजः' पा० भे० ।

स दिवसैर्दशभिर्द्विगुणैरमुं वशगतं विदधे कलिकार्यकृत् ॥
मणिमहौषधिमन्त्रधरो नरः स्ववशमातनुते फणिनं यथा ॥ २६ ॥
वदनतो वचनं निजगाद यद्द्विजपतिः शिरसाँ तदुवाह सः ॥
निज पुरातनमन्त्रिगणे चिरादविगतबुद्धिरभूद्गतसौहृदः ॥ २७ ॥
परिजना अपि ते बहुधा नृपं विविधनीतिपुरःसरमब्रुवन् ॥
नरपतेर्ज्वरितस्य सितेवतत् कटुतरं प्रबभूव हितं वचः ॥ २८ ॥
स सकलान्महितान्स्वहितान्भटान् कुलपरंपरयाऽथ समागतान् ॥
अगमयद्गतवेतनकान्गृहान् निजनिजान्प्रियकृद्रिपुमन्त्रिणः ॥ २९ ॥

सन् सुखं उवास वसति स्म । द्रुतविलंबितं वृत्तं । द्रुतविलंबितमाह नभौभराविति लक्षणात् ॥ २५ ॥

स इति । कलिकार्यकृत् सः द्वौ गुणौ आवृत्ती येषां ते द्विगुणास्तैर्द्विगुणैः । गुणस्त्वावृत्तिशब्दादि चेंद्रियामुख्यतंतुष्विति विश्वः । दशभिः विंशतिर्दिनैरित्यर्थः । अमुं शंभुं वशं आधीनं तथा विदधे । तथा कथं यथा धरतीतिधरः । पचाद्यच् । प्रणयश्च महोषधयश्च मन्त्राश्च तेषां धरः धर्ता फणिनं सर्पं स्वस्य वशः स्ववशः तं आतनुते कुरुते ॥ २६ ॥

वदनत इति । द्विजवरः कञ्जी वदनेनेति वदनतः । सार्वविभक्तिकस्तसिल् । यद्वचनं निजगाद सः शंभुः तद्वचनं शिरसा उवाह वहति स्म । वचि स्वपीत्यादिना अभ्यासस्य संप्रसारणं । विगता बुद्धिर्यस्य स विगतबुद्धिः भ्रांतबुद्धिः सः निजः स्वकीयः यः पुरा भवः पुरातनः प्राचीनः । सायं चिरमित्यादिना टयुप्रत्यये बुडागमः टुटःप्रागनादेशः अनद्यतने लङिति निर्देशात् । मंत्रिगणस्तस्मिन् विषये गतं सौहृदं प्रेमा यस्य सः गतसौहृदः अभूत् ॥ २७ ॥

परिजना इति । ते तदीयाः परिजना अपि नृपं विविधा या नीतिः सा पुरःसरा यया स्यात्तया बहुधा बहुप्रकारेण अब्रुवन् अवोचन् । तद्धितं वचः नरपतेः शंभु-नृपस्य ज्वरितस्य ज्वरवतः सितेव शर्करेव कटुतरं बभूव ॥ २८ ॥

स इति । रिपोः दिल्लीपतेः मंत्रिणः कञ्जीनाम्नः प्रियं करोतीति प्रियकृत् सः शंभुः स्वस्य हितान् अतः महितान् पूजितान् यतः कुलपरंपरया समागतान् प्राप्तान् नतु नवीनानिति भावः । गतं दत्तं वेतनं येषां तान् भटान् वीरान् निजनिजान् गृहान् गृहाणि । गृहाःपुंसिचभूम्नेवेत्यमरः । अगमयत् गतिबुद्धीत्यादिना द्विकर्मकत्वं ॥ २९ ॥

---

१२ 'सहसा' पा० भे० १५. '०द्द्विजम०' पा० भे० ।

प्रतिनिधिप्रमुखा अपि मंत्रिणो निजगृहे हरिमेव समर्चयन् ॥
भवतु बुद्धिरमुष्य मनस्विनो रिपुविनाशकरीति निरन्तरम् ॥ ३० ॥
तटवतीतटगः सुदृढस्तरुर्जलजवैः सपदं शिथिलीकृतः ॥
पवनवेगमयं समवेक्षते इति स वेदयति स्म नराधिपम् ॥ ३१ ॥
यवनपः सहितश्चतुरङ्गया पृतनयोत्तमवीरपुरःसरः ॥
शिवसुताश्रितदिक्पथमन्वगाद्विविधवाद्यजघोषविनन्दितः ॥ ३२ ॥

प्रतिनिधीति । प्रतिनिधिः युवराजः प्रमुखो येषां ते प्रतिनिधिप्रमुखाः अपि मंत्रिणः निंदितं मनो यस्येति मनस्वी तस्य मनस्विनः दुर्वृत्तस्येत्यर्थः । अस्मायामेधास्रजो विनिरिति निंदायां विनिः । अमुष्य शंभुनृपस्य बुद्धिः रिपोः विनाशः तं करोतीति रिपुविनाशकरी भवतु इति हेतोः निजे गृहे हरिमेव निरंतरं समर्चयन् अपूजयन् ॥ ३० ॥

एवं शंभुभूपं वशं विधाय सार्वभौमविज्ञापनप्रकारमाह । तटवतीति । सः कञ्जी नृपाणां राज्ञां अधिपं स्वामिनं सार्वभौमं तटवती तटिनी नदीति यावत्तस्याः तटं तीरं तद्वच्छतीति तथोक्तः कृष्णातीरे वर्तमान इत्यर्थः । सुतरां दृढः बद्धमूल इत्यर्थः । जलस्य जवैः वेगैः पदैः मूलैः सहितं यथा स्यात्तथा सपदं समूलं शिथिलीकृतः अयं तरुर्वृक्षः पवनस्य वायोः वेगं समवेक्षते इच्छति । अविवक्षायां संधिर्न तदुक्तं कौमुद्यां दीक्षितैः । वाक्ये तु साविवक्षामपेक्षते इति । अत एव हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतं इत्यादि प्रयोगाः संगच्छंते । इति अमुं प्रकारं वेदयति स्म ज्ञापयामास । लिटापदो लट् । अत्र अप्रस्तुतस्य तटिनीतीरगतस्य तरोः समूलशिथिलीकरणबोधेन प्रस्तुतस्य शंभुनृपस्य वशीकरणबोधनादप्रस्तुतप्रशंसालंकारः । तदुक्तं कुवलयानंदे चंद्रालोककारिकास्थं वचनं । अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया । एकः कृती शकुंतेषु योन्यच्छक्राय याचते ॥ ३१ ॥

अथ सार्वभौमस्य यानं त्रिभिराह । यवनपेति । चत्वारि अंगानि रथवाजिगज पदातिरूपाणि यस्यास्तया पृतनया सेनया सहितः । उत्तमाः ये वीराः ते पुरःसरा यस्य तथोक्तः । विविधाः अनेकप्रकाराः ये वाद्यनघोषाः वाद्योद्भवाः शब्दाः तैः विशेषेण नंदितः तोषितः । यवनान् पातीति यवनपः यवनाधिपः सार्वभौमः । आतोनुपसर्गे कः । शिवसुतेन शंभुना आश्रिता या दिक् दक्षिणादिक् तस्याः पंथा इति शिवसुताश्रितदिक्पथः तं । पुंवत्कर्मधारयइत्यादिना पुंवद्भावः । ऋक्पूरित्यादिना समासांतः । अन्वगात् अगमत् ॥ ३२ ॥

---

१६ 'समवेक्षते' पा० भे० ।

ससलिलान्कलशान्पुर आगतान् पतिमतीर्युवतीर्जयसूचकान् ॥
अकलयच्छकुनान्त्रिविधानसौ विविधदेशपगीतमहोदयः ॥ ३३ ॥
पथि नृपैरुपनीतमहार्हणो विविधदेशततीरयमत्यगात् ॥
सुरनदीप्रमुखा अपि निम्नगा यवनराट् स च भीमरथीमगात् ॥३४॥
यवनपाधिपतिं समुपागतं प्रथितभीमरथीतटवर्तिनि ॥
स हि तुलापुरनाम्नि पुरोत्तमे नृपमबोधयदाशु तदा द्विजः ॥ ३५ ॥
यवनपस्य गुणाननुवर्णयन् सदसि तत्तनुजा गुणवर्णने ॥
प्रवृते नृपमानसहद्द्विजस्तदनुगामिजने श्रवणोत्सुके ॥ ३६ ॥

ससलिलानिति । विविधाः अनेके ये देशाः तान् पांति ते विविधदेशपाः राजानः तैर्गीतः स्तुतः महान् उदयो यस्य तथोक्तः । अनेन सार्वभौमत्वं स्वदेशपालकत्वं च सूचितं । सः सार्वभौमः पुरः अग्रे न तु दूरे आगतान् प्राप्तान् नतु बुध्या आनीतान् ससलिलान् सोदकान् नतु रिक्तान् कलशान् तद्रूपान् पतिमतीः सभर्तृकाः नतु विधवाः युवतीः तरुणीः नतुवृद्धाः तद्रूपान् जयस्य सूचकान् शकुनान् अकलयत् गणितवान् । अयं प्रथमः शकुनः अयं द्वितीयः इति गणनां चकारेत्यर्थः । लिंगसंख्या विभेदेपि विशेषणविशेष्यता । विभक्तिः पुनरेकैव विशेषणविशेष्ययोरिति विशेषणविशेष्यता ॥ ३३ ॥

पथीति । नृपैः राजभिः पथि मार्गे उपनीतं प्रत्यर्पितं महत् अर्हणं यस्मै तथोक्तः अयं सार्वभौमः विविधदेशानां ततीः परंपराः सुरनदीप्रमुखाः भागीरथीप्रमुखाः निम्नगाः अपि अत्यगात् अतिक्रान्तवान् । सः यवनराट् चक्रारात् सेना च भीमः भयंकरः लोकविलक्षणः रथोस्यास्तीति भीमरथः सांबः । रथः क्षोणी यंता शतधृतिरेंद्रो धनुरथो । रथांगे चंद्रार्कौ रथचरणपाणिः शर इति महिम्नादिषु वर्णितः रथो ज्ञेयः । भीमरथाज्जाता भीमरथीनाम नदी तां । पुंयोगादाख्यायामिति ङीष् । जन्यजनकभावोपि पुंयोग इति मनोरमायामुक्तं । तथा हि योगश्चेह दंपतिभाव एवेत्येके वस्तुतस्तु संकोचे मानाभावात् जन्यजनकभावोऽपि एतेन देवकी व्याख्याता । अगात् प्राप्तः ॥ ३४ ॥

यवनेति । सः कञ्जी नृपं शंभुं भीमरथ्याः तटे वर्तमाने तुलापुरनाम्नि पुरोत्तमे स्थितमितिशेषः । समुपागतं प्राप्तं यवनपानां अधिपतिं स्वामिनं अबोधयत् विज्ञापितवान् । गतिबुद्धीत्यादिना द्विकर्मकत्वं ॥ ३५ ॥

यवनपस्येति । नृपस्य शंभोः मानसं हरतीति नृपमानसहृत् द्विजः कञ्जी तं नृपं अनुगच्छतीति तदनुगामी तस्मिन् जने श्रवणोत्सुके सति सदसि सभायां

---

१७ 'निवेशने' पा० भे० । १८ 'णोन्मुखे' पा० भे० ।

नरपतेऽत्र कलौ न मया श्रुता न च तया सदृशी युवतीक्षिता ॥
रतिरियं मदनस्य सती किमु प्रियजनुः परितः समवेक्षते ॥ ३७ ॥
मदनवत्तवमूर्तिरहो इयं त्वमसि तत्सदृशो वयसा नृप ॥
गुणगणैरपि संपदतीव ते मम मता युवयोरिह योजना ॥ ३८ ॥
केशैर्या चमरीं दृशा मृगसतीं हीरान्द्विजैर्याऽजयत् ॥
बिम्बं चोष्ठपुटेन पूर्णशशिनं वक्त्रेण वाण्या पिकम् ॥
वक्षोजप्रभया सुवर्णकलशौ चांपेयमङ्गैर्यथो
द्दष्टान्तेन विहीनमूरुयुगलं भासा च सौदामनीम् ॥ ३९ ॥
भ्राम्यद्भ्रूधनुषि प्रयोजितचलद्दृग्बाणपातं नरे
यस्मिन्सा विदधाति मूर्च्छिततरः सद्यः स सञ्जायते ॥

यवनपस्य सार्वभौमस्य गुणान् अनुवर्णयन् सन् तस्य यवनपस्य या तनुजा तस्याः गुणानां वर्णने प्रववृते प्रवृत्तः ॥ ३६ ॥

वर्णनप्रकारमाह । नरपते इति । हे नरपते मया अत्र अस्मिन् कलौ कलियुगे तया सार्वभौमकन्यया सदृशी तुल्या युवती तरुणी । शत्रंताद्युवशब्दात्ङीप् । नेक्षिता न दृष्टा न श्रुता च । इयं मदनस्य सती रतिः परितः आसमंतात् प्रियस्य शिवेन दग्धस्य जनुः जन्म । जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः । समवेक्षते पश्यति किमु ॥ ३७ ॥

मदनेति । अहो इत्याश्चर्ये । ओदिति प्रकृतिभावः । इयं तव मूर्तिः देहः मदनेन तुल्यः मदनवत् अस्तीति शेषः । हे नृप त्वं वयसा गुणगणैरपि तया सदृशः तत्सदृशः तत्तुल्यः असि । ते संपत् अतीव अत्यंतं अतः अस्मिन् काले युवयोः योजना दांपत्यभावः मम मता इष्टा ॥ ३८ ॥

तस्याः रूपं युग्मेन वर्णयति । केशैरिति । या केशैश्चमरीं दृशा दृष्ट्या मृगसतीं हरिणीं द्विजैः दंतैः हीरान् ओष्ठपुटेन बिंबं बिंबफलं वक्त्रेण पूर्णं शशिनं पूर्णं चंद्रं वाण्या पिकं कोकिलं वक्षोजयोः प्रभया सुवर्णकलशौ अंगैः चांपेयं चंपापुष्पं भासा देहकांत्या सौदामनीं विद्युतं । तडित्सौदामनी विद्युदित्यमरः । अजयत् ऊर्वोः युगं दृष्टांतेन विहीनं अस्तीति शेषः ॥ ३९ ॥

भ्राम्यदिति । सा कन्या भ्राम्यंत्यौ ये भ्रुवौ ते एव धनुषी तयोः प्रयोजितौ चलंतौ चंचलौ यौ दृग्बाणौ तयोः पातं यस्मिन् विदधाति करोति सः नरः सद्यः तत्कालं मूर्च्छिततरः संजायते भवति । सा अंतः अंतःपुरे नित्यं सततं निरंतरं तिष्ठति इदं अंतःपुरावस्थानं तस्याः युक्तं हि निश्चयेन नो चेत् अन्यथा उक्तवैपरीत्ये इति

१९ 'चामरतोमुखेन' पा० भे० । २० 'वाण्यातथाकोकिलम्' पा० भे० । २१ '०जद्वयतः' पा० भे० । २२ 'चंपासुमंचांगतः' पा० भे० ।

सान्तस्तिष्ठति नित्यमेव सततं युक्तं हि तस्या इदम्
नो चेत्सा युवती हनिष्यति नरान्हञ्चाणपातैर्बहून् ॥ ४० ॥
रूपेण कान्त्या वयसा गुणैश्च संपद्भिरैः सा सदृशी मता ते ॥
किंत्वत्र किञ्चित्प्रतिबन्धकारि जात्यन्तरं तत्र न मेऽस्त्युपायः ॥४१॥
अस्त्वाशु तां ते किल दर्शयामि तद्दर्शनं दुर्लभमत्र जन्तोः ॥
तस्याः पिता राजवराधिनाथः प्रेक्ष्यस्त्रयेत्थं मम चित्तवृत्तिः ॥ ४२ ॥
दृष्ट्वा तं यवनपतिं सभानिविष्टं
वस्त्रान्तःपिहितकरः प्रणम्य तिष्ठेत् ॥
तेनोक्ते समुपविशेति चासितव्यम्
मार्गोऽयं यवनपतेः समागतस्य ॥ ४३ ॥
श्रुत्वेत्थं द्विजवच आशुकोपभूपः
प्राहेदं मम किमिहास्ति तेन कृत्यम् ॥

यावत् । सा युवती तरुणी । शत्रंतोयं शब्दः । बहून् नरान् तरुणान् हञ्चाणपातैः हनिष्यति मारयिष्यति ॥ ४० ॥

रूपेणेति । रूपेण कांत्या वयसा संपद्भिरैश्च सदृशी तुल्या सा ते मता मान्या अस्तीति शेषः । अतो विवाहाय योग्येति भावः । किंतु अत्र विवाहे अन्या जातिरिति जात्यंतरं भिन्नजातित्वं किंचित्प्रतिबंधं करोतीति प्रतिबंधकारि अस्ति तत्र मे उपायः नास्ति ॥ ४१ ॥

अस्त्विति । अस्तु विवाहाभावोस्तु । तां तरुणीं ते तुभ्यं दर्शयामि । अत्र अस्मिन् लोके तद्दर्शनं तंतोः प्राणिनः दुर्लभं अतः सा द्रष्टव्येति भावः । किंच तस्याः पिता राजवराः राजश्रेष्ठाः तेषां अधिनाथः स्वामी सार्वभौमः त्वया प्रेक्ष्यः द्रष्टव्यः इत्थं मम चित्तवृत्तिः अस्ति ॥ ४२ ॥

तद्दर्शनकाले कर्तव्यं उपदिशति । दृष्ट्वेति । वस्त्रस्य अंतः प्रांतः । अंतः प्रांतेति-के नाशे स्वरूपे च मनोहरे इति विश्वः । तेन पिहितौ आच्छादितौ करौ येन सः तथाभूतः सभायां निविष्टं स्थितं तं यवनपतिं दृष्ट्वा प्रणम्य तिष्ठेत् उपवेशानुज्ञा पर्यंतमित्यर्थः । तेन प्रभुणा समुपविश आस्यतां इति उक्ते सति आसितव्यं स्थेयं । यवनपतेः समागतस्य अयं मार्गः संप्रदायः । प्रहर्षणीवृत्तं । म्नौभ्रौगस्त्रिदशयतिः प्रहर्षणीयं इतिलक्षणात् ॥ ४३ ॥

श्रुत्वेति । आशु शीघ्रं कोपोस्यास्तीति आशुकोपः भूपः इत्थं पूर्वोक्तप्रकारेण द्विजस्य कञ्जीमाम्नः वचः श्रुत्वा इदं आह । इदं किं । तेन यवनेन मम इह अस्मिन्लोके किं कृत्यं कार्यं अस्ति न किमपीत्यर्थः । ननु तत्कन्यायाः दर्शनमेव

२३ 'तत्र' पा० भे० । २४ 'दृश्यः' पा० भे० । २५ 'समागतस्य' पा० भे० ।

तत्कन्या गुणगणसंयुतापि किं मे
शूद्रे किं पचति वरान्नमत्ति विप्रः ॥ ४४ ॥
तातं वा गुरुमगुरुं नमामि विप्रम्
नान्यं तं दिविजमृते धरैकनाथम् ॥
एवं मे व्रतमिह तस्य भङ्ग ईष-
स्याद्येत्किं द्विज भविता न वेद्मि सद्यः ॥ ४५ ॥
कञ्जी तं नरवरमाह हे नरेंद्र
भङ्गस्ते न हि भविता व्रतस्य किंचित् ॥
सत्यं मे वचनमिदं न कापि चिन्ता
द्रष्टव्यो यवनपतिस्त्वया सकन्यः ॥ ४६ ॥
यास्यामि द्विज वचनात्तवेति विप्रः
श्रुत्वागाद्यवनवराधिपाधिवासम् ॥

महत्कृत्यमित्यत आह । तस्य कन्या गुणगणसंयुतापि मे किं न किंचिदित्यर्थः । तस्याः हीनजातित्वान्ममोपयोगो नास्तीत्यर्थः । तथा हि शूद्रे वरान्नं श्रेष्ठान्नं पचति सति । कर्तृकर्मणोः कृतीति षष्ठ्यां प्राप्तायां न लोकेति निषेधात्कर्मत्वं । विप्रः ब्राह्मणः अत्ति भक्षयति किं । नेत्यर्थः ॥ ४४ ॥

तातमिति । अहमितिशेषः । तातं पितरं वा इत्यथवा गुरुं विद्वांसं अथवा अगुरुं अविद्वांसं विप्रं नमामि । अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुरिति भगवद्वचनादिति श्रुतिश्चात्र प्रमाणं नमोमहद्भ्य इत्यादि । धरतीति धरः कैलासः । पचाद्यच् । तस्य एकनाथः शिवः तं दिविजं ऋते देवं विना । सप्तम्यांजनेर्ङिः । प्रावृट्शरत्कालदिवां जे इत्यलुक् । यद्यपि पाणिनिमते ऋतेशब्दयोगे द्वितीया नास्ति तथापि ऋतयोगे द्वितीयापीति व्याकरणांतसूत्रात्साधुत्वं अत एव फलति पुरुषाराधनमृते इत्यादि प्रयोगाः संगच्छंते । अन्यं न नमामि का कथा यवनस्येति भावः । यद्वा धरैकनाथं ऋते शिवं विना अन्यं दिविजं देवं न नमामि का कथा इतरस्येतिभावः । एवं मे व्रतं तस्य व्रतस्य ईषत् स्वल्पोपि भंगः स्याद्येत् हे द्विज सद्यः किं भविता तन्न वेद्मि कोपावेशेन यवनं हनिष्यामि वा त्वां हनिष्यामि वा यवनो मां हनिष्यतीति किमपि न जाने इत्यर्थः ॥ ४५ ॥

कञ्जीति । हे नरेंद्र ते व्रतस्य इतराप्रणमनरूपस्य भंगः किंचित् अल्पोपि न भविता इदं मे वचनं सत्यं न तु प्रतारकं । अतः कापि चिंता नास्ति । अतः त्वया यवनपतिः सकन्यः द्रष्टव्यः इति कञ्जी तं नरवरं शंभुभूपं आह ब्रूते ॥ ४६ ॥

यास्यामीति । हे द्विज तव वचनात् वचनं श्रुत्वा यास्यामि त्वदीये वचने भारं दत्त्वेत्यर्थः । ल्यब्लोपेपंचमी । विप्रः कञ्जी इति अनेन प्रकारेण श्रुत्वा यवनवरा-

तद्वृत्तं निखिलमुवाच तत्पुरस्ता-
द्विप्रोऽसौ श्रवणपरे जने तदीये ॥ ४७ ॥
सन्नत्यां नृपतिदुराग्रहं च तस्मै
संवर्ण्य क्षणमवसत्स्वयं स तूष्णीम् ॥
वाक्यं तद्द्विजमुखनिर्गतं निशम्य
प्रावोचद्यवनवराधिपस्तदानीम् ॥ ४८ ॥
सन्नत्यामपि विहिता मया न सेत्थम्
योगोऽयं प्रणिधिनराधिगम्य एकः ॥
आस्ते तं किल विदधामि याहि दुष्टम्
शंभुं तं मम निकटे समानयाशु ॥ ४९ ॥
इत्थं तं वचनमुदीरयन्तमुच्चै
विप्रोऽसौ यवनपते समानयिष्ये ॥
तं शंभुं तव पुर इत्युदीर्य विप्र-
स्तत्कन्या निवसतिमेत्य वाचमाह ॥ ५० ॥
राजास्ते गुणगणसंयुतो बलिष्ठ-
स्तेजस्वी मदन इव स्वरूपशाली ॥

धिपस्य सार्वभौमस्य अधिवासं ययौ । असौ कब्जी तदीये यवनाधिपजने श्रवणपरे सति तत्पुरस्तात् तदग्रे निखिलं संपूर्णं तस्य नृपस्य वृत्तांतं उवाच राजवशीकरणादिकं सर्ववृत्तमकथयदित्यर्थः ॥ ४७ ॥

सन्नत्यामिति । सः कब्जी सन्नत्यां सम्यक् नमस्कारे विषये नृपतेः शंभोर्यो दुराग्रहः तं तस्मै यवनेशाय संवर्ण्य कथयित्वा स्वयं तूष्णीं अवसत् । यवनपतिः तद्द्विजमुखनिर्गतं वाक्यं निशम्य श्रुत्वा तदानीं तस्मिन् काले वचः प्रावोचत् ॥ ४८ ॥

सन्नत्यामपीति । सन्नत्यामपि सम्यक् प्रणामे कृते सत्यपीत्यर्थः । मया सा सन्नतिः न विहिता इति इत्थं प्रणिधिनरैः गूढपुरुषैः अधिगम्यः ज्ञेयः । प्रणिधिर्गूढपुरुष इत्यमरः । एकः योगः आस्ते तं योगं विदधामि करोमि अतः आशु याहि गच्छ दुष्टं दुर्वृत्तं तं मम निकटे समानय ॥ ४९ ॥

इत्थमिति । असौ विप्रः इत्थं अनेन प्रकारेण वचनं उदीरयंतं तं सार्वभौमं हे यवनपते तं शंभुं तव पुरः समानयिष्ये इति उच्चे जगाद । विप्रः इति उदीर्य इ क्त्वा तत्कन्यानिवसतिं एत्य आगत्य वाचं वाक्यमाह ॥ ५० ॥

राजेति । गुणानां गणः तेन संयुतः अतिशयेन बली इति बलिष्ठः शरीरसंपत्तिमान् अनेन रतिक्षमत्वं सूचितं । अतिशायने तमबिष्ठनाविति इष्ठन् प्रत्ययः । प्रशस्तं

२६ '०न्तमाह' पा० भे० । २७ '०चमूचे,' पा० भे० । २८ 'राजासौ' पा० भे०

तत्तुल्यः पुरुषचये मया सुरूपो
नैवान्यः पुरुषवरः कदापि दृष्टः ॥ ५१ ॥
कञ्जीत्थं वचनमुदीर्य धूर्तवर्यः
सप्तारं प्रति स ययौ पुनश्च विप्रः ॥
सा कन्या नृपतिगुणाननुस्मरन्ती
तच्चिन्तास्मरशरदीर्णमानसासीत् ॥ ५२ ॥
औरङ्गजवो राजसमागमार्थं चकार रम्यं वसतिस्थलं सः ॥
वस्त्रैरनर्घ्यैरुपवेष्टितं तत्प्रवेशमार्गं सुलघुं चकार ॥ ५३ ॥
राजापि कञ्जीसहितोऽल्पसेनो द्रष्टुं ययौ तं नरनाथनाथम् ॥
उपेत्य सैन्यं पटवेश्म दीर्घमुच्चैश्च तद्द्वारमदर्शि सूक्ष्मम् ॥ ५४ ॥
व्यचिन्तयद्विप्रमृते शिरो मे नतं न कस्यापि पुरो व्रतं मे ॥
इदं न नश्येदिह तद्विधेयं विचिन्त्य चेत्थं स विवेश वेश्म ॥ ५५ ॥

तेजः अस्यास्तीति तेजस्वी । अस्मायामेधास्रजो विनिरितिविनिः । स्वरूपेण शालते-ऽसौ रूपशाली । सुप्यजातौ णिनिस्ताच्छील्ये इतीणिनिः । राजा मदनः इव आस्ते वर्तते । मया पुरुषचये पुरुषसंघे तत्तुल्यः सुरूपः अन्यः पुरुषवरः कदापि न दृष्टः ॥ ५१ ॥

कञ्जीति । धूर्तवर्यः विप्रः ब्राह्मणः सः कञ्जी इत्थं वचनं उदीर्य पुनश्च सप्तारं प्रति ययौ । सा कन्या यवनाधिपकन्या नृपतिगुणान् अनुस्मरंती सती । स्मरतेर्लटः-शत्रादेशेऽङीपिनुमागमः । तस्य राज्ञः चिंता चिंतनं तेन उत्पन्नो यः स्मरः तस्य शरैः दीर्णं मानसं यस्याः तथा भूता आसीत् ॥ ५२ ॥

औरंगजव इति । औरंगजबसंज्ञः सार्वभौमः राजसमागमार्थं अनर्घ्यैः बहुमूल्यैः वस्त्रैः उपवेष्टितं समंताद्व्याप्तं अतएव रम्यं वसतेः वासस्य स्थलं कार । तस्य वसति स्थानस्य प्रवेशमार्गं सुलघुं अति ह्रस्वं चकार । उपजाति त्तं । अनंतरोदीरिति-लक्ष्मभाजौ पादौ यदीया उपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु स्मरंति जातिष्विदमेव नामेति लक्षणात् ॥ ५३ ॥

राजेति । अल्पा सेना यस्येत्यल्पसेनः राजापि कञ्जीसहितः सन् तं नरनाथं सार्वभौमं द्रष्टुं ययौ । तेनेतिशेषः । सैन्यं उ य दीर्घं उच्चं च इति अपरं तस्य द्वारं सूक्ष्मं अति लघु अदर्शि दृष्टं । दृशेः क णिलुङिच्लेश्चिणिलुक् ॥ ५४ ॥

व्यचिंतयदिति । सः राजा मे शिरः विप्रं ऋते ब्राह्मणं विना कस्यापि पुरः न नतं इदं मे व्रतं न नश्येत् इह अस्मिन् स्थले तया विधेयं कर्तव्यं इति विचिन्त्य वेश्म पटवेश्म विवेश ॥ ५५ ॥

पादौ पुरस्तात्प्रविधाय पश्चात्स्वयं विनिर्गत्य पुरः स तस्य ॥
कन्या सखीभिः सहितां ददर्श सा चापि मध्यादपसार्य वासः ॥ ५६ ॥
परस्परं वीक्ष्य समन्वभावि[२१] ताभ्यां सुखं यन्मदनोऽस्य साक्षी ॥
गत्वा तदग्रे यवनाधिपस्य पुरः सभायामुपविष्ट एकः ॥ ५७ ॥
अत्युद्धतं चाकृतसन्नतिं तमुवाच कस्ते परिपालकोऽत्र ॥
ममाहमेवेति तमाह राजा दिल्लीपतिः क्रुद्धतरो बभूव ॥ ५८ ॥
स्थित्वा स तूष्णीमशनस्य काले राजानमाहात्र नृपोपभुंक्ष्व ॥
विचार्य राजा क्षणमेनमूचे तत्कालयुक्तं वचनं कठोरम् ॥ ५९ ॥
कन्यां त्वदीयां यदि दास्यसीह पात्रे त्वदीयेऽपि विचारहीनः ॥
भोक्ष्ये स्वजातेरथ राज्यतश्च भ्रष्टोऽपि ते कन्यकया समेतः ॥ ६० ॥

प्रवेशप्रकारमाह । पादाविति । सः राजा पुरस्तात् पूर्वस्मिन् क्षणे । दिक्शब्देभ्यइत्यादिनापूर्वशब्दात्कालवाचकात्सप्तम्यंतात् अस्तातिप्रत्ययेपूर्वस्यपुरादेशः । पादौ चरणौ पुरः अग्रभागे प्रविधाय स्थापयित्वा पश्चात् अनंतरं स्वयं विनिर्गत्य अवशिष्टं शरीरांशं द्वाराद्बहिः कृत्येत्यर्थः । तस्य यवनाधिपस्य कन्यां पुर इत्यस्यावृत्तिः पुरः अग्रभागे पुरः प्रथमं सखीभिः सहितां कन्यां ददर्श । सा कन्यापि मध्यात् मध्यप्रदेशात् वासः जवनिकामपसार्य निष्काश्य तमितिशेषः । राजानं ददर्श ॥ ५६ ॥

परस्परेति । द्वाभ्यां राजयवनकन्याभ्यां परस्परं अन्योन्यं वीक्ष्य यत्सुखं समन्वभावि अनुभूतं । समनुपूर्वाद्भवतेः कर्मणि लुङि च्लेश्चिणि लुक् । अस्य सुखस्य साक्षी मदनः नान्यः इत्यर्थः । परस्परस्य सकामावलोकनं नान्येन ज्ञातमितिभावः । तस्याः कन्यकायाः अग्रे तदग्रे गत्वा यवनाधिपस्य सभायां यवनाधिपस्य पुरः अग्रभागे एकः उपविष्टः ॥ ५७ ॥

अतीति । यवनाधिप इतिशेषः । अत्युद्धतं अत एव अकृतसन्नतिं तं राजानं अत्र अस्मिन् काले ते कः परिपालकः अस्तीत्युवाच । राजा मम पालकः अहमेव इति तं आह नान्य इत्यर्थः । दिल्लीपतिः क्रुद्धतरः अतिशयेन क्रुद्धः बभूव । अतिकठोरभाषणश्रवणादितिभावः ॥ ५८ ॥

स्थित्वेति । सः यवनाधिपः तूष्णीं स्थित्वा अशनस्य भोजनस्य काले हे नृप अत्र मदीये पात्रे भुंक्ष्व इत्याह । राजा क्षणं विचार्य एनं तत्काले युक्तं कठोरं वचनं ऊचे उक्तवान् ॥ ५९ ॥

कन्यामिति । स्वजातेः अथ [illegible] भ्रष्टोपि अहं इति शेषः । त्वदीयां कन्यां यदि

२१ '०स्परान्वीक्षणतोन्व०' पा० भे० ।

लाभं परं चेतसि मन्यमानः स्थास्यामि ते वेश्मनि सर्वकालम् ॥
इत्युक्तवन्तं नृपतिं विधाय काराग्रहेऽसौ निशि सोऽपि शिश्ये ॥ ६१ ॥
ततो नृपेन्द्रो निजदेहकारागृहाद्विमुक्तः समभूत्स मानी ॥
कन्या तदीया विललाप बाला हाहेति चोच्चैर्व्यथितान्तरात्मा ॥ ६२ ॥
श्रुत्वा पितोवाच विशोकहेतुर्न दृश्यते दुर्जनघातनं तु ॥
सन्तोषहेतुर्न च खेदहेतुर्विरुद्धमत्राचरितं तवेदम् ॥ ६३ ॥
कन्या ब्रवीद्गुह्यमहं प्रवच्मि भर्ता समे चेतसि संवृतोऽभूत् ॥[३०]
मनो हि हेतुः किल कृत्यजाते भर्तारमन्यं न वृणे नरेन्द्र ॥ ६४ ॥

दास्यसि तर्हि इह अस्मिन् त्वदीयेपि अतिनीचस्यापीतिभावः । पात्रे ते कन्यकया समेतः युक्तः सन् भोक्ष्ये । भुजोनवने इत्यात्मने पदं ॥ ६० ॥

लाभमिति । चेतसि परं उत्कृष्टं लाभं त्वत्कन्यासंगमरूपं मन्यमानः अहं ते वेश्मनि सर्वकालं स्थास्यामि । असौ यवनेशः इति पूर्वोक्तं उक्तवन्तं नृपतिं काराग्रहे विधाय निशि निशायां सः अपि यवनपः अपि शिश्ये सुप्तवान् । शेतेर्लिट् आत्मनेपदंच ॥ ६१ ॥

तत इति । ततस्तदनंतरं मानी मानवान् स नृपेंद्रः शंभुः निजः स्वकीयो यो देहः स एव कारागृहं तस्माद्विमुक्तोऽभूत् देहंतत्याजेत्यर्थः । किंच तस्य यवनस्य इयं तदीया कन्या व्यथितः अंतरात्मा मनो यस्याः सा तथा सती हा हा इति हाहाशब्दं उच्चार्येत्यर्थः । विललाप रुरोद ॥ ६२ ॥

श्रुत्वेति । पिता यवनाधिपः श्रुत्वा कन्याविलापमित्यर्थः । विशेषेण शोकः विशोकः तस्य हेतुर्न दृश्यते यतः दुर्जनघातनं संतोषहेतुः खेदहेतुर्न एवं सति अत्र दुर्जनविषये तव इदं आचरितं विलापरूपं विरुद्धं अयुक्तमित्यर्थः । इति उवाच नगाद ॥ ६३ ॥

कन्येति । कन्या इत्यब्रवीत् । इति किं हे नरेंद्र अहं गुह्यं प्रवच्मि वदामि । गुह्यं कथयति । चेतसीति । चेतसि संवृतः वृतः सः शंभुर्मे भर्ता अभूत् आसीत् । अतः विलपामीतिभावः । ननु साक्षात्पाणिग्रहणे वृत्तेपि सप्तपदीविधानात्पूर्वं वरमरणे अन्यो वरोवरणीयः इति शास्त्रानुज्ञा अयं तु मानसिको विवाहः संपन्नः अतोन्यवरणे न किंचिद्बाधकमतो न रोदितव्यमित्यत आह मन इति । खिलं संपूर्णं यत्कृत्यजातं कार्यजातिः तस्मिन् खिलकृत्यजाते । जातं जात्योधजन्मसु इति विश्वः । मनः हेतुः कारणं अतः नारदेन विवाहात्पाक् बोधितापि सावित्री अल्पायुषं सत्यवंतं मनसा वृतमेव वव्रे इति भावः । अतः अन्यं भर्तारं न वृणे । वृङ्संभक्ताविति धातोरिट्त्वे श्राभ्यस्तयोरात इत्यात्वलोपः ॥ ६४ ॥

३० 'प्रातः समानीय विहिंसकांस्तै-रुत्पाट्य नेत्रेऽस्य नृपं जघान' पा० भे० ।

सनिश्चयाया निजकन्यकायाः प्रतोषहेतुं नृपशंभुसूनुम् ॥
उत्सङ्ग आधाय तया च तेन समन्वितोऽसौ विचचार भूमौ ॥ ६५ ॥
सिंहासनगतः शंभुर्वर्षाष्टकमपालयत् ॥
जगतीं जगतीनाथो जगन्नाथपदाश्रयः ॥ ६६ ॥
खभूमिरसभूमिते (१६१०) वहति शालिवाहे शके ॥
तुलापुरपुरे नृपः स किलफाल्गुनामातिथौ ॥
सुरासुरपतिं हरिं मनसि धारयन्नन्वगा- ॥
दिवं दिविजसंस्तुतः स्तुतकथः कथावारिधिः ॥ ६७ ॥
राजारामोऽरातिवर्गप्रहर्त्ता कर्ता काम्यानेकयज्ञक्रियाणाम् ॥
शास्ता भूमेर्दीनसंघस्य भर्त्ता धर्त्ता भूते राजते राजसूनुः ॥ *
॥ इति श्रीशिवकाव्ये पुरुषोत्तमकविकृते षष्ठश्चमत्कारः ॥

सनिश्चया इति या। असौ सार्वभौमः प्रकर्षेण तोषः प्रतोषस्तस्य हेतुं नृपं शंभोः सूनुं शाहुं। सूनुः पुत्रेऽनुजे खाविति विश्वः। निश्चयेन निग्रहेण अद्य भर्त्रकरण-रूपेण सहिता सनिश्चया तस्याः निजकन्यकायाः उत्संगे अंके आधाय पुत्रत्वेन समर्प्येत्यर्थः। तया कन्यया तेन दौहित्रेण शाहुना च समन्वितः सन् भूमौ विचचार ॥ ६५ ॥

सिंहासनेति। सिंहासनगतः राज्याभिषिक्तः इत्यर्थः। सः शंभुः वर्षाणां अष्टकं अष्टवर्षाणि जगतीं पृथ्वीं। जगती विष्टपे मह्यां वास्तुछंदविशेषयोरिति विश्वः। अपालयत्। जगन्नाथस्य श्रीसांबस्य ये पदे चरणौ ते एव आश्रयो यस्य असहाय इत्यर्थः ॥ ६६ ॥

खेति। दिविजैः देवैः संस्तुतः धैर्यादिगुणयुक्त इति वर्णितः। भूमौ स्तुताः गीताः कथाः प्रबंधाः यस्य तथोक्तः। प्रबंधकल्पनाकथेत्यमरः। कथानां गोष्ठीनां वारिधिः समुद्रः अपारकीर्तिरित्यर्थः। सः नृपः शंभुः सुरासुराणां पतिं हरिं मनसि धारयन् सन् प्रारब्धवशाद्दुर्मरणे प्राप्ते तत्काले। अंतकाले च मामेव स्मरन् मुक्त्वा कलेवरं। यः प्रयाति त्यजन् देहं स याति परमां गतिमिति भगवद्वचनं स्मृत्वा तमेव स्मरन्निति भावः। खं शून्यं भूमिरेका रसाः षट् भूरेका अंकानां वामतो गतिरिति दशाधिकषोडशशतानि तन्मिते शालिवाहनशके वहति सति वर्तमाने सति फाल्गुनस्य या अमा अमावास्या तस्यां तिथौ तुलापुरसंज्ञकात्पुरात् दिवं स्वर्गं। सुरलोको द्यो दिवौ द्वे इत्यमरः। अन्वगात्। पृथ्वीवृत्तं। जसौजसवलावसुग्रहयति-श्चपृथ्वीगुरुरितिलक्षणात् ॥ ६७ ॥

॥ इति श्री शिवकाव्यव्याख्यायां स्वयंकृतायां काव्यप्रकाशिकायां षष्ठश्चमत्कारः ॥

---

१ 'भर्ता स मे मेमनसा वृतोऽभूत्' पा० भे०। * अयं श्लोकः क्वचिदधिको दृश्यते.

शंभोरंभोनिधेर्जज्ञे शाहुर्बाहुजवंदितः ॥
इंदुरिंदीवराक्षोऽयं प्रणमंति शिशुं प्रजाः ॥ १ ॥
वेदशून्यरसचंद्रसंमिते शालिवाहनशके नृपोऽभवत् ॥
दुंदुभौ दिविजदुंदुभिध्वनौ भूतले च सति दुंदुभिध्वनौ ॥ २ ॥
उच्चगे खचरपंचके सुधीर्हर्षयन्सकललोकसंहतिम्
बाडवेषु निरतेषु पूजने शीतलाद्रितनुजापतेः सदा ॥
बाल एव निजरूपसंपदा लोकयितृजनमानसं नृपः
भाषणेन च कलेन चाहरल्लीलया विविधवल्गुवाक्यया ॥ ३ ॥
बालकः प्रववृधेऽमरांघ्रिपः पित्रोः पालनजलप्रसेकभाक् ॥

अथ शम्भुसूनोः शाहोः चरित्रं विवक्षुः तत्रादौ तज्जन्म द्वाभ्यामाह । शंभोरिति । प्रजाः जनाः । प्रजा स्यात्संततौ जने इत्यमरः । शिशुं बालं अन्यत्र नवोदितं यं प्रणमन्ति नमस्यन्ति । इंदीवरे इव अक्षिणी यस्येति इंदीवराक्षः बाहुजैः क्षत्रियैः वंदितः सः अयं शाहुः शाहुनामा नृपः इंदुः शंभोः शंभुनृपात् अंभोनिधेः समुद्रात् जज्ञे उत्पन्नः । रूपकालंकारः ॥ १ ॥

वेदेति । वेदशून्यरसचंद्रसंमिते [१६०४] चतुरधिकषोडशशतमिते शालिवाहनशके दुंदुभौ संवत्सरे दिविजानां देवानां दुंदुभिध्वनौ भूतले च दुंदुभिध्वनौ सति नृपः अभवत् । यदीयजन्मकाले स्वर्गे भुवि च तत्र तत्र मांडलिकराजगृहे परमहर्षात् दुंदुभिध्वनिरभवत् इत्यर्थः ॥ २ ॥

बाल एवेति । बालः एव शिशुरपि । अप्यर्थे एवकारः अव्ययानामनेकार्थत्वात् । नृपः शाहुः निजरूपसंपदा कलेन अव्यक्तमधुरेण भाषणेन विविधानि वल्गूनि रमणीयानि वाक्यानि यस्यां तया लीलया च लोकयितारः दर्शनकर्तारो ये जनास्तेषां मानसं चित्तं । यद्वा ओष्ठ्ययुक्तः पाठः। लोकांप्पितृजनांञ्जनकसंबंधिनो जनाश्च तेषां मानसं अहरत् हृतवान् ॥ ३ ॥

बालक इति । पित्रोः जनकजनन्योः यत्पालनं तदेव जलं तस्य यः प्रसेकः सेचनं तद्भजतीति तयोक्तः बालकः शाहुः स एव अमरांघ्रिपः कल्पतरुः ववृधे । दंपती

---

१ 'शंभुतः सममवदयानिधिः शाहुनामनृपतिर्गुणालयः ॥
दुंदुभौ दिविजदुंदुभिध्वनौ भूतले च सति दुंदुभिध्वनौ ॥ १ ॥'
क्वचिदनेन श्लोकेन प्रारभ्यते ।

२ '०पोत्तमः' पा० भे० । ३ 'दीपतो विहितदीपवत्समो रूपतो गुणगणैश्च शंभुना' पा० भेदः । ४ क्वचिदधिकोऽयं श्लोकः । ५ '०पतोहरल्लोक०' पा० भे० । ६ '०धेर्निरंतरम्' पा० भे० । * अस्मिन्चरणेपितृशब्दस्य 'तृ' अक्षरस्यद्विर्त्वं कल्पित्वा 'पि' अक्षराय गुरुत्वं दत्तं तत्प्रामादिकं

दंपती द्विगुणतां परस्परे प्रीतिमापतुरमुष्य जन्मना ॥ ४ ॥
पंचहायनमपालयत्पिता बालकं सकललोकपालकम् ॥
तत्पितर्युपरते समानयद्बालकं यवनपो निजगृहान् ॥ ५ ॥
शत्रुपुत्रमपि बीततातकं हीनकर्मनिरतोप्यपालयत् ॥
कन्यकातनयमानतं न तं सत्क्षणं क्षणमपि व्यवासयत् ॥ ६ ॥
प्रीतिरत्र ववृधे तदा तयोः कन्यकायवनयोर्नृपात्मजे ॥
सोऽपि कीर इव भाषितैर्यतस्तं च तां च नितरामतोषयत् ॥ ७ ॥
औरसादपि सुताद्नृपात्मजे प्रीतिरस्य समजायताधिका ॥
रम्यवाक्यरचनासमुद्भवत्तोषतुष्टहृदयस्य सर्वदा ॥ ८ ॥

स्त्रीपुंसौ । जायाशब्दस्य दंभावो निपात्यते । अमुष्य बालकस्य जन्मना परस्परे अन्योन्ये द्विगुणितां प्रीतिं आपतुः ॥ ४ ॥

पंचेति । पिता शंभुः सकलस्य लोकस्य भूलोकस्य पालकं बालकं शाहुं पंचानां हायनानां समाहारः पंचहायनं पंचसंवत्सरपर्यंतं । हायनोऽस्त्री शरत्समा इत्यमरः । कालाध्वनोरत्यंतसंयोगे इति द्वितीया । पात्रादित्वात् ङीप् न । अपालयत् । यवनपः तत्पितरि शंभौ उपरते सति बालकं शाहुं निजगृहान् स्वगृहं समानयत् । गृहाः पुंसि च भूम्न्येवेत्यमरः । दुहादित्वात् द्विकर्मत्वम् ॥ ५ ॥

शत्रुपुत्रेति । हीनं नीचं हिंसारूपं कर्म तस्मिन् निरतोपि सः यवनाधिपः बीतः नष्टः मृत इति यावत् । तातः पिता यस्येति बीततातकः तं । समासांतः कः । यद्वा तातस्य कं तातकं बीतं गतं तातकं पितृसुखं यस्मात्तं बीततातकं । सुखशीर्षजलेषु कमिति विश्वः । शत्रोः शंभोः पुत्रं अपि तं शाहुं अपालयत् अरक्षत् । आनतं नम्रं सन् उत्तमः क्षणः येन तं कन्यकातनयं क्षणमपि न व्यवासयत् न दूरीचकार । वसनिवासे इत्यस्माण्णिजंताल्लङ् ॥ ६ ॥

प्रीतिरिति । तदा तस्मिन् काले तयोः कन्यकायवनयोः अत्र अस्मिन् नृपात्मजे शाहौ विषये प्रीतिः प्रेमा ववृधे । यतः यस्मात् कारणात् सोऽपि शाहुरपि कीर इव शुकः इव भाषितैः तं यवनाधीशं चात् तदनुगान् तां कन्यकां चात् तत्सखीः नितरां अतोषयत् ॥ ७ ॥

औरसादिति । रम्याणि यानि वाक्यानि तेषां या रचना तस्याः समुद्भवन् यस्तोषः तेन तुष्टं हृदयं यस्य तथोक्तस्य अस्य यवनाधीशस्य प्रीतिः नृपात्मजे शाहौ उरसि जातः औरसः तस्मात् औरसात् पुत्रात् अधिका सर्वदा न तु कदाचित् समजायत अभवत् ॥ ८ ॥

---

७ 'सदा' पा० भे० । ८ 'तस्य' पा० भे० ।

यं यमेष विषयं ययौ युतः सेनयैनमपि नीतवान्समम् ॥
छत्रचामरमुखाखिलर्द्धिभिर्भूषितं विविधभूषणैरपि ॥ ९ ॥
मत्तदंतितुरगव्रजः पुरः सूतमागधरवोपि चाभवत् ॥
पृष्ठतो विविधवीरसंहतिस्तस्य शंभुसुतशाहुभूपतेः ॥ १० ॥
केचिदाहुरयमस्य चात्मजः कन्यकातनय इत्यपि क्वचित् ॥
शंभुनामनृपतेः सुतोह्ययं नान्य इत्थमपरे विवेकिनः ॥ ११ ॥
यद्यदेष नगरं ययौ प्रभुस्तत्र तत्र विशिखोऽरुणन्नृपान् ॥
देवता अपि पुरे पुरे स्थिताः स्फोटयन्नथ ययौ स पंढरीम् ॥ १२ ॥
विट्ठलस्य परिचारकास्तदा देवतागलगतां सुमालिकाम् ॥
नारिकेलमपि तस्य ते पुरः स्थापयंत इदमूचिरे द्विजाः ॥ १३ ॥

यंयमिति । एषः यवनाधिपः सेनया युतः सन् यं यं विषयं देशं ययौ तं तमि तिशेषः । छत्रं च चामरं च छत्रचामरे ते मुखं मुख्ये यासां ताः अखिलर्द्धयः सक लसंपदस्ताभिः विविधभूषणैरपि भूषितं एनमपि शाहुमपि साकं सार्धं । साकं सार्धं समं सहेत्यमरः । नीतवान् ॥ ९ ॥

मत्तेति । मत्ताः दंतिनो गजाः तुरगाश्च तेषां व्रजः सूताः मागधाश्च तेषां रवोपि तस्य शंभुसुतशाहुभूपतेः पुरः अभवत् । पृष्ठतः पृष्ठभागे विविधवीराणां संहतिः अभवत् ॥ १० ॥

केचिदिति । केचित्पुरुषाः अयं बालः अस्य यवनाधिपस्य आत्मजः पुत्रः इ-त्याहुः । किंच केचित् कन्यकातनय इत्यप्याहुः । अपरे अन्ये विवेकिनः शंभुनाम-नृपतेः अयं सुतः हि निश्चयेन नान्य इत्थं आहुः ॥ ११ ॥

यद्यदिति । प्रभुः निग्रहानुग्रहसमर्थः एषः विशिखः यवनेशः यद्यन्नगरं ययौ तत्र तत्र नगरे नृपान् राज्ञः प्रतिकूलानित्यर्थः । अरुणत् रुरोध । अथ सः पुरे पुरे स्थिताः देवताः प्रतिमाः स्फोटयन् विदारयन् सन् पंढरीं दक्षिणदेशे प्रसिद्धां नगरीं ययौ ॥ १२ ॥

विट्ठलस्येति । तदा यवनाधिपागमनसमये ते प्रसिद्धाः द्विजाः ब्राह्मणाः विट्ठलस्य देवस्य परिचारकाः सेवकाः देवतायाः विट्ठलसंज्ञायाः गलः कंठस्तत्र गतां विद्यमानां शोभना माला सुमाला सुमालैव सुमालिका तां । स्वार्थेकप्रत्ययेकृतेटापिप्रत्ययस्या-त्कात्पूर्वस्येति इत्वं । यद्वा सुमानां पुष्पाणां आलिकां पंक्तिं मालामित्यर्थः । कुसुमं सुम-मित्यमरः । समामित्यपपाठः । नारिकेलस्य फलमपि तस्य यवनाधिपस्य पुरः अग्रे प्रसादार्थं स्थापयन्तः संतः इदं वक्ष्यमाणं ऊचिरे बभाषिरे ॥ १३ ॥

---

१. 'यत्रयत्रसजगामसंयुतः' १०. 'यत्रयत्रसजगामराजराट्' पा० भे० ।

विष्णुरत्र भगवान् घनप्रभो रक्ष्य एष भवता दयावता ॥
माल्यगं कुटिलकुंतलं स वै संविलोक्य समुवाच तान्द्विजान् ॥ १३ ॥
विट्ठलस्य शिरसीह कुंतलाः संति किं वदत भो द्विजास्तदा ॥
कश्चन स्मृतहरिं नमन्[11] जगौ संति विट्ठलशिरस्यहो कचाः ॥ १५ ॥
इत्युक्तवंतं विप्रं तं यवनः प्रत्यभाषत
एवं चेत्तर्हि तं देवं मां प्रदर्शय सत्वरम् ॥ १६ ॥
ओमित्युक्त्वा ततः शीघ्रं देवालयमगाद्द्विजः
साष्टांगं प्रणिपत्याह सत्यं कुरु वचो मम ॥ १७ ॥
प्रासादं समुपेत्यासौ देवदेवस्य मस्तके ॥
ददर्श कुंतलान्दृष्ट्वा लंबमानान्घनान्बहून् ॥ १८ ॥
यवनः सत्वरं प्रागाद्देवालयमतंद्रितः ॥
ददर्श देवदेवस्य मस्तके कुन्तलान्बहून् ॥ १ ॥
द्विपालबद्धान्कुटिलाञ्शीलान्दीर्घान्घनांस्तथा ॥
उष्णीषं शिरसस्तस्य समुद्धृत्य प्रदर्शितान् ॥ २ ॥ *
अतितुष्टः स यवनः साष्टांगं प्रणनाम तम् ॥
भूषणानि च वासांसि विट्ठलाय ददौ मुदा ॥ १९ ॥
ब्राह्मणेभ्यो धनं भूरि वस्त्राणि च तथा ददौ ॥
दीनांधकृपणेभ्योऽपि ददौ वासोधनानिच ॥ २० ॥

विष्णुरिति । दयास्यास्तीति दयावान् तेन दयावता भवता अत्र शिलामये देहे घन इव प्रभा अस्यास्तीति घनप्रभः भगवान् षड्गुणैश्वर्यसंपन्नः अस्ति इति शेषः । अतः एषः शिलादेहः रक्ष्यः रक्षणीयः । शिलादेहस्य भंगे एनं त्यक्त्वा भगवान् गमिष्यतीति प्रार्थयामासुरितिभावः । सः यवनाधिपः माल्यगं मालागतं । माला माल्यं सौमनस्यं कंठे गुण अधीरण इत्यमरः । कुटिलः वक्रः कुंतलः केशः तं विलोक्य तान् द्विजान् इत्युवाच ॥ १४ ॥

विट्ठलस्येति । भो द्विजाः इह अस्मिन् काले विट्ठलस्य शिरसि कुंतलाः संति किं वदत । तदा कश्चन द्विजः स्मृतस्तत्कालं संकटपरिहारार्थं मनसि चिंतितः तं हरिं नमन् सन् मद्वाक्यं सत्यं कुर्विति प्रार्थयन्नित्यर्थः । विट्ठलस्य शिरसि अहो इत्याश्चर्ये कचाः संतीति जगौ ॥ १५ ॥

इत्युक्तवंतमितिस्पष्टम् ॥ १६ ॥ ओमिति ॥ १७ ॥ प्रासादमिति ॥ १८ ॥ अतितुष्टइति ॥ १९ ॥ ब्राह्मणेभ्यइति ॥ २० ॥

---

११. '०मन्नमन्। वाक्यमाह इतिमस्तके कचाः' पा० भे० । * इदं श्लोकद्वयं कचिदधिकं दृश्यते ।

विप्रानपृच्छद्देवस्य कट्यां हस्तौ कुतो द्विजाः ॥
लिंगं च मस्तके कस्मादत्र चोत्तरमुच्यताम् ॥ २१ ॥
तत्रोत्तरं तदा प्रोचुः स्वस्वबुध्यनुसारतः ॥
उत्प्रेक्षया स्वपद्यानि भूषयंतो द्विजोत्तमाः ॥ २२ ॥
मत्पादपंकजपरागरसातिलुब्ध-
चेता नरः सकलभूतसुहृत्तमो यः ॥
देवो भवांबुधिरयं जघनप्रमाण-
स्तस्येति वेदयति किं स नितंबपाणिः ॥ २३ ॥
यद्वा कलिंदतनयाधिकरम्यभीमा-
तीरं विलोक्य समगाद्भगवान् पुरस्तात् ॥
गोपेष्वपि प्रतिगतेषु जलप्रमाण-
माख्यापयन्निव हरिर्हि नितंबपाणिः ॥ २४ ॥

विप्रानिति । द्विजाः देवस्य विष्टलस्य कट्यां कटिप्रदेशे हस्तौ कुतः मस्तकेच लिंगं कुत इत्यपृच्छत् । अन्यस्य कस्यापि देवस्य कटिप्रदेशे हस्तौ न दृष्टौ किं च विष्णुप्रतिकृतेरेतस्याः शीर्ष्णि शिवलिंगं कुतइत्यपृच्छदित्यर्थः । तेषु तूष्णीं भूतले स्थितेषु पुनराह । अत्र मत्प्रश्ने उत्तरं उच्यतां वक्तव्यं तूष्णींभावः न युक्त इत्यर्थः ॥ २१ ॥

तत्रेति । द्विजोत्तमाः तदा स्वस्वपद्यानि उत्प्रेक्षया उत्प्रेक्षालंकारेण । उत्प्रेक्षा-लक्षणं कुवलयानंदे । संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे इति । अलंकारलक्षणं तु शब्दार्थवृत्तिमनोहरसन्निवेशत्वं अलं-कारत्वं । स्वस्वबुद्धेः अनुसारो अनुसरणं तेन भूषयन्तः सन्तः तत्र प्रश्ने उत्तरं प्रोचुः ॥ २२ ॥

मदिति । सः प्रसिद्धः देवः विष्टलः । मम यत्पादपंकजं तस्य यः परागः मक-रन्दः तस्य यः रसः तस्मिन् लुब्धं सक्तं चेतश्चित्तं यस्य तथोक्तः । सकलस्य भू-तस्य प्राणिमात्रस्य सुहृत्तमः यः नरः तस्य अयं भवांबुधिः । जघनं प्रमाणं यस्येति जघनप्रमाणः कटिप्रमाणः सुतर इत्यर्थः । इति नितंबपाणिः सन् वेदयति किं इत्युत्प्रेक्षा । मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिव-शब्दोपि तादृशः इति । एवं अग्रेऽपि ज्ञेयम् ॥ २३ ॥

यद्वेति । यद्वा पक्षान्तरे भगवान् विष्टलः कलिन्दस्य पर्वतस्य या तनया कन्या यमुना तदपेक्षया अधिकं रम्या या भीमा तस्याः तीरं विलोक्य यमुनापेक्षया भीमायाः रम्यत्वात्तत्तीरस्याप्यतिरम्यत्वं ज्ञात्वेत्यर्थः । पुरस्तात् पूर्वं समगात् । गोपेष्वपि पश्चात्

यद्वा जरासुतजये मथुरां विहाय
यातः प्रवर्षणगिरिं सहितो बलेन ॥
दीप्तात्ततो झटिति यत्प्रससार भैमं
श्रांतस्ततं तत इदं नु नितंबपाणिः ॥ २५ ॥
यद्वा विहाय तनयान् विनयोपपन्नान्
रम्या अपि प्रियतमाः सुजना भजंतः ॥
तिष्ठंत्यनुक्रममिमे बहवोऽयमेकः
श्रांतोऽपि तिष्ठति ततो नु नितंबपाणिः ॥ २६ ॥
यद्वा विधाय सकला अपि तोकलीलाः
संभ्रामणाख्यकुतुकं च विधातुमीशः ॥
गोपान्स्वकूर्परविलग्नकरान्विधाय
देवो विहर्तुमिव सैष नितंबपाणिः ॥ २७ ॥

प्रतिगतेषु अनुगतेषु विठ्ठलस्य परतीरे स्थितत्वात् मध्ये जलं कियदिति गोपालानां संशये जलप्रमाणं आख्यापयन्निव । हरिः नितंबपाणिः । अस्तीतिशेषः ॥ २४ ॥

यद्वेति । यद्वा हरिः बलेन संकर्षणेन सहितः सन् जरासुतस्य जरासंधस्य जये सति स्वस्य पराजये सति स्वपराजयस्तु लीलामात्रं । मथुरां विहाय प्रवर्षणगिरिं प्रवर्षणाख्यं पर्वतं यातः गतः । जरासंधेन पर्वतारूढयोस्तयोः प्राग्निदीपिते दीप्तात्ततस्तस्मात्पर्वतात् झटिति शीघ्रं भीमायाः इदं भैमं । तस्येदमित्यण् इदं । तटं प्रससार ततस्तस्मात् श्रान्तत्वात् नितंबपाणिः । अस्तीतिशेषः । लोके हि दूरदेशगमनेन श्रान्तत्वात् कट्यां करं निधाय गच्छन्तीति प्रसिद्धं । अत्र श्रीमद्भागवतस्था कथानुसंधेया ॥ २५ ॥

यद्वेति । बहवः इमे सुजनाः साधवः विनयेन नीत्या उपपन्नान् तनयान् रम्याः रमणीयाः प्रियतमा अपि विहाय अनादृत्य भजन्तः सन्तः अनुक्रमं तिष्ठन्ति । एतस्य भजने प्रहरपर्यंतं जाने अनेन कर्तव्यं मध्ये व्यवधानेन न भाव्यं इति नियमं कृत्वा देवालये तिष्ठन्ति । अयं तु विठ्ठलः एकः असहायः अतः श्रांतोपि तिष्ठति । अन्यथा स्त्रीपुत्राननादृत्य तिष्ठतां भजकानामनादरः स्यादितिभावः । ततस्तस्मान्नितंबपाणिर्नु नु वितर्के । नु पृच्छायां वितर्केचेत्यमरः ॥ २६ ॥

यद्वेति । स एषः ईशः सकला अपि तोकलीलाः बालक्रीडाः विधाय कृत्वा संभ्रामणाख्यकुतुकं बालेषु प्रसिद्धां लीलां विधातुं कर्तुं गोपान् स्वकूर्परविलग्नकरान् विधाय विहर्तुमिव क्रीडितुमिव नितंबपाणिरस्ति ॥ २७ ॥ [मोचिलोपे चेदिति सस्यसोर्लोपः]

---

१२. 'विहाय' पा० भे० ।

यद्वा वृकासुरभयाद्विरिशे स्वधाम
प्राप्ते प्रतारणवशादिति तं बभाषे ॥
दत्तो वरः कटिकराग्रनिवेशरूपो
मह्यं तथेति किमु सैष नितंबपाणिः ॥ २८ ॥
यद्वा विहृत्य यमुनापुलिनेऽतिरम्ये
गोपीष्वहंकृतिमलासु तिरोहितः सन् ॥
स्कंधं यया सह ययावधिरोहणार्थ-
मस्याः सुखेन किमु सैष नितंबपाणिः ॥ २९ ॥
यद्वा चिरं जनकरूपनिजातिसेवा
भक्त्या समेत्य भगवान्परितुष्ट ईशः ॥
तं पुंडरीकमवदद्वृणु सर्वकामा-
नित्याग्रहे श्रमवशाच्च नितंबपाणिः ॥ ३० ॥
अन्यांगनाकुचतटीगतकुंकुमाक्तं
वक्षो विलोक्य सरुषि प्रियराधिकायाम् ॥

यद्वेति । सः एषः । [सोचिलोपेचेदिति सस्यसोर्लोपः] विष्णुः वृकासुरभयात् गिरिशे सांबे स्वधाम वैकुंठं प्राप्ते सति तथा तेन प्रकारेण त्वदीयवरप्रदानप्रकारेणेत्यर्थः । कट्यां कराग्रयोर्निवेशः कटिकराग्रनिवेशः स एव रूपं लक्षणं यस्य स कटिकराग्रनिवेशरूपः वरः मह्यं दत्तः इति प्रतारणवशात् तं बकासुरं बभाषे । कट्यां करौ स्थापयित्वा बभाषे इति हेतोः नितंबपाणिरस्ति । त्वया यथा अनुष्ठानं कृतं तथा मयाप्येतस्यानुष्ठानं कृतं मह्यं वरो दत्तः यस्य कट्यां करौ निधाय पश्यामि अहं न मृतः तथा त्वमपि प्रत्ययार्थं स्वस्यैव शिरसि पूर्वं करौ निधेहि न मरिष्यसि एतस्य पिशाचपतेर्मिथ्यावादित्वात् इति प्रतारणार्थं नितंबपाणिरित्यर्थः ॥ २८ ॥

यद्वेति । स एषः विष्णुः कृष्णावतारे अतिरम्ये यमुनापुलिने विहृत्य गोपीषु अहंकृतिः अहंकारः स एव मलो यासां तास्तथा भूतासु सतीषु । यया सह ययौ यां गृहीत्वा ययावित्यर्थः । अस्याः सुखेन स्कंधं अधिरोहणार्थं नितंबपाणिः किं । इयमपि भागवतीया कथानुसंधेया ॥ २९ ॥

यद्वेति । भगवान् ईशः चिरं चिरकालं जनकरूपस्य निजस्य स्वस्य अतिसेवा तद्रूपा या भक्तिस्तया परितुष्टः सन् । ईश्वरस्य जनकहृदये स्थितत्वे प्रमाणं गीतासु अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यं च भूतानामंत एव चेति । तं पुण्डरीकं सर्वकामान् वृणु इत्यवदत् । तस्य न वृणोमीत्याग्रहे श्रमवशात् नितंबपाणिः । एवं कटिपाणित्वमुत्प्रेक्ष्य मस्तके लिंगमुत्प्रेक्षते ॥ ३० ॥

329

तप्तो वियोगदहनेन नु चंद्रचूडं
गंगाधरं हरिरयं शिरसा बिभर्ति ॥ ३१ ॥
यद्वा स्मरोद्भटपिशाचनिपीडितात्मा
गोपांगना अपि सतीः कुलटां च भुक्त्वा ॥
पत्नीश्चकार बहुशो न तथापि मुक्तः
कामांतकं हरिरयं शिरसा बिभर्ति ॥ ३२ ॥
यद्वा स्वदर्शनसमागतमीश्वरं तं
गंतुं पुनर्निजगृहं त्वरयंतमीशम् ॥
भैमाज्जलात्स्वयमयं प्रणयेन शीघ्र-
मुत्तारयन्निव हरं शिरसा बिभर्ति ॥ ३३ ॥
यद्वाशुतोषगिरिजापतिभौमलिंग-
पूजां विधाय महतीमतिभक्तियुक्तः ॥
उत्सर्जनार्थमिव भैमजलेऽतिरम्ये
लिंगं स्वयं हरिरयं शिरसा बिभर्ति ॥ ३४ ॥

अन्येति । अयं हरिः अन्या या अंगना युवती तस्याः कुचतटीगतं यत्कुंकुमं तेन आक्तं चिन्हितं यद्वक्षः उरःस्थलं तद्विलोक्य प्रिया चासौ राधिका च प्रियराधिका तस्यां प्रियराधिकायां रुषा रोषेण सहिता सरुट् तस्यां सरुषि सत्यां वियोगः विरहः राधासंबंधीत्यर्थः स एव दहनः अग्निः तेन तप्तः सन् तापशांत्यर्थं गंगाधरं चंद्रचूडं शिरसा बिभर्ति । अधिकरणस्य करणत्वविवक्षया तृतीया । उत्प्रेक्षापरिकरयोः संसृष्टिः । अलंकारः परिकरः साभिप्राये विशेषणे । सुधांशुकलितोत्तंसस्तापं हरतु वः शिव इति लक्षणात् ॥ ३१ ॥

यद्वेति । अयं हरिः विद्वलः । स्मरः कामः । कामः पंचशरः स्मरः इत्यमरः । स एव उद्भटः क्रूरः पिशाचः तेन निपीडितः आत्मा मनो यस्य तथा भूतः सन् । सतीः पतिव्रताः गोपानां अंगनाः भुक्त्वा कुलटां कुब्जां च भुक्त्वा कामशांत्यभावे बहुशः शताधिकषोडशसहस्रसंख्याः पत्नीः चकार । तथापि तेनेतिशेषः । न मुक्तः न त्यक्तः । अतः कामस्य अंतकं सांबं शिरसा बिभर्ति । अत्रापि उत्प्रेक्षापरिकरयोः संसृष्टिः ॥ ३२ ॥

यद्वेति । अयं हरिः स्वदर्शनाय समागतः स्वदर्शनसमागतः तं प्रसिद्धं पुनर्निज-गृहं गन्तुं त्वरयंतं त्वरां कुर्वंतं ईशं ऐश्वर्यसंपन्नं हरं सांबं भैमात् भीमायाः इदं भैमं तस्मात् अतिभयंकरादित्यर्थः । जलात् स्वयमेव नतु अन्येन प्रणयेन प्रीत्या शीघ्रं सत्वरं उत्तारयन्निवेत्युत्प्रेक्षा । शिरसा बिभर्ति ॥ ३३ ॥

यद्वेति । अयं हरिः अतिभक्तियुक्तः सन् महतीं श्रेष्ठां । आशु शीघ्रं तोषो यस्येति

यद्वा शिवं शिवरतं च सदा द्विषंति
ये वैष्णवाः स्मृतिशतैरपि बोध्यमानाः ॥
भेदो ममास्य च नहीति विबोधनार्थं
मन्ये हरं हरिरयं शिरसा बिभर्ति ॥ ३५ ॥
यद्वा मदीयभजनादपरं न किंचिद्
विन्दंति ये भवजलं कटिदघ्नमेषाम् ॥
आवेदयन् शपथपूर्वमयं नु देवो
गंगाधरं हरिरयं शिरसा बिभर्ति ॥ ३६ ॥
यद्वा निजेक्षणसमागतभक्तसंघै-
रापूरितेऽखिलगृहे सकलत्रपुत्रे ॥
शंभौ समागतवति स्थितिभूम्यभावात्
प्रीत्या हरं हरिरयं शिरसा बिभर्ति ॥ ३७ ॥
यद्वा विवाहविहिते निखिलेऽपि वृत्ते
वध्वाः प्रवेशसमये स्वकुलप्रचारम् ॥

आशुतोषः स चासौ गिरिजापतिश्च आशुतोषगिरिजापतिः । तस्य यद्धैमं पार्थिवं लिंगं तस्य पूजां विधाय कृत्वा । अतिरम्ये भैमजले उत्सर्जनार्थमिव स्वयं लिंगं शिरसा बिभर्ति ॥ ३४ ॥

यद्वेति । स्मृतिशतैः अपि शब्दात् श्रुतिभिः बोध्यमानाः ये केचन वैष्णवाः शिवं सांबं शिवरतं शिवभक्तं सदा द्विषन्ति । मम अस्य शिवस्य* भेदः न नास्ति इति हीति निश्चयेन तेषां विबोधनार्थं हरं शिरसा बिभर्ति इति अहं मन्ये । इत्युत्प्रेक्षा ॥ ३५ ॥

यद्वेति । अयं देवः मदीयभजनात् अपरं किंचिदपि ये न विंदंति तेषां भवजलं कटिप्रमाणं कटिदघ्नं । प्रमाणे द्वयसच् दघ्नञ् मात्रच इति दघ्नञ् प्रत्ययः । इति शपथपूर्वं आवेदयन् कथयन् सन् इमं गंगाधरं शिरसा बिभर्ति नु । अत्रापि उत्प्रेक्षा परिकरयोः संसृष्टिः ॥ ३६ ॥

यद्वेति । अयं हरिः आषाढ्यां निजेक्षणाय निजावलोकनाय समागताः ये भक्त-संघास्तैः अखिलगृहे अखिलदेवालये आवृते व्याप्ते सति । कलत्रपुत्राभ्यां पार्वतीगणेशाभ्यां सहितः सकलत्रपुत्रः तस्मिन् शंभौ समागतवति सति । स्थितेः अवस्थानस्य या भूमिः तस्याः अभावात् प्रीत्या हरं शिरसा बिभर्ति ॥ ३७ ॥

यद्वेति । अयं हरिः निखिले संपूर्णे विवाहे पार्वतीपाणिग्रहणे विहितं अवश्यं कर्त-

---

१३. 'केचन' पा० भे० । * 'विष्णोश्च' इति मूलग्रंथे वर्तते तत् प्रामादिकम् ।

संनर्तनाख्यमपि कर्तुमिमं शिवाख्यं
पौत्रं ध्रुवं हरिरयं शिरसा बिभर्ति ॥ ३८ ॥
ब्राह्मणोक्तं वचः श्रुत्वा संतुष्टतरमानसः
ययावग्रे स यवनो नृसिंहपुरमुत्तमम् ॥ ३९ ॥
ततोऽसौ यवनाधीशो नीराभीमरथीगतम् ॥
नृसिंहादिपुरं यातः प्रतिमास्फोटनोद्यतः ॥ ४० ॥
वृश्चिकोरगसंकाशान् कीटान् प्राणापहारकान् ॥
देवालयाद्विनिर्यातान् दृष्ट्वाग्रे प्रययौ बहून् ॥ ४१ ॥
सांबादीनां यत्र यत्र सान्निध्यं प्रतिमासु हि ॥
देवतानां स तास्तास्तु प्रणम्याग्रे ययौ खलः ॥ ४२ ॥
शंभौ दिवमिते शाहौ यवनेन समं गते
राजाराम भूमिमिमामपालयदधीश्वरः ॥ ४३ ॥
ततस्तस्य सुतो नाम्ना शिवो राजाभवत्किल
सोऽपि भूमिमिमां सर्वां पूर्ववत्समपालयत् ॥ ४४ ॥
यवनाधिपवारिदागतप्रियतावारिचयोक्षितश्चिरम् ॥
नरनाथतनूद्भवस्तरुर्ववृधे तत्तनयांकभूगतः ॥ ४५ ॥
सविवाहमकारयच्छिवोस्तनुजायाः किल तस्य बंधुभिः ॥
अतुलांबररत्नभूषणं गजवाजिप्रभृति प्रदाय च ॥ ४६ ॥

व्यं तस्मिन् वृत्ते जाते । वध्वाः पार्वत्याः प्रवेशो गृहप्रवेशस्तस्य यः समयः तस्मिन् स्वकुलस्य यः प्रचारः आचारः तं संनर्तनाख्यमपि कर्तुं इमं शिवया पार्वत्या आदृतं पौत्रं सांबं शिरसा बिभर्ति ध्रुवं । दाक्षिणात्यास्तु विवाहे वृत्ते वधूप्रवेशकाले वधूवरौ कटयोर्गृहीत्वा स्वकुलदेवतानामग्रहणपूर्वकं नृत्यंतीति प्रसिद्धं । तदत्रानुसंधेयं । विष्णोः सांबः पौत्रस्तु भागवते । विष्णोः पुत्रो ब्रह्मा तस्य पुत्रः सांब इति तृतीयस्कंधे स्पष्टम् ॥ ३८ ॥ ब्राह्मणोक्तमिति ॥ ३९ ॥ ततोसाविति ॥ ४० ॥ वृश्चिकेति स्पष्टम् ॥ ४१ ॥ सांबादीनामिति ॥ ४२ ॥ ननु शंभौ दिवं गते शाहौ च यवनाधीशेन नीते दक्षिणदिग्राज्यं केनाकारीत्यत्राह द्वाभ्याम् । शंभाविति । राजाराम इत्येकं पदं संज्ञात्वात् सुपोधातुप्रातिपदिकयोरितिसुबलुक् न ॥ ४३ ॥ ततस्तस्येति ॥ ४४ ॥ पुनश्चप्रासंगिकं समाप्य शाहोरेव चरित्रमाह तत्रादौरूपकेण वर्णयति ।

यवनेति ॥ ४५ ॥ स इति । सः यवनाधीशः अंबराणि वस्त्राणि रत्नानि माणिक्यादीनि भूषणानि सुवर्णानिर्मितानि तेषां समाहारः अंबररत्नभूषणं अतुलं अनुपमं

१४. 'हरं' पा० भे० । १५. 'बीक्ष्याग्रे' पा० भे० । १६. 'खलः' पा० भे० । १७. 'जगामैवं' पा० भे० ।

यवनं तस्य कन्यां च रमयन्स नृपात्मजः
अष्टादशसमास्तस्य निकटे निवसत्सुधीः ॥ ४७ ॥
एकदा यवनाधीशो मनसाऽचिंतयत्प्रभुः ॥
शंभुर्मया घातितोऽयं तत्सुतो मे सुतासुतः ॥ ४८ ॥
अष्टादशाब्दौ वर्षाणि स्थितो मामनुरंजयन् ॥
कृतज्ञेन मया तस्मिन् दया कार्या दयावता ॥ ४९ ॥
इत्थं विचिंत्य स्वामात्यं सभामागत्य चाब्रवीत् ॥
शंभुसूनुं सपत्नीकं समानय ममाग्रतः ॥ ५० ॥
अमात्यः शाद्दुमाहेदं याहि भार्यायुतोऽचिरात् ॥
यवनाधिपतिः श्रीमान् सभायामधुना स्थितः ॥ ५१ ॥
इत्थं वदति दुष्प्रज्ञे यवनाधीशमंत्रिणि ॥
शाहोरमात्याः सर्वेऽपि तर्कयामासुरत्र ते ॥ ५२ ॥
असूर्यंपश्यदारोऽयं राजा मातामहस्य हि ॥
आज्ञा तु तादृशी तत्र का विधेया प्रतिक्रिया ॥ ५३ ॥
शाद्दुर्दासीसुतां नाम्ना विरूपां रूपशालिनीम् ॥
भूषयामास भूषाभिर्वसनैरतुलैस्तदा ॥ ५४ ॥
शुशुभे सा शुभाचारा शुभभूषणभूषिता
रूपशीलगुणौदार्यैः सहजैः सद्गुणैर्वृता ॥*
तया स साकं यवनाधिपस्य सभामुपेत्य प्रणनाम तस्य ॥
पुरः स तस्थौ यवनेश्वरोऽपि तन्मंत्रिणं प्राह सुधीः सशंकः ॥ ५५ ॥
इयमेव वधूरमुष्य मंत्रिन्निति दिल्लीपतिराह तं त्रिवारम् ॥
इयमेव सती नृपस्य चेत्थं नृपमंत्री निजगाद चानुवेलम् ॥ ५६ ॥
अस्या भुवस्तुरीयांशस्तुभ्यं दत्तो मयाऽधुना ॥
तत्पत्राणि समुद्राणि गृहाण जगतीपते ॥ ५७ ॥
मम दौहित्रतां प्राप्तः स्वीयादृष्टवशादसि ॥
राजमुद्रार्पितेयं ते तां गृहीत्वा गृहं व्रज ॥ ५८ ॥

यत् अंबररत्नभूषणं अतुलांबररत्नभूषणं गजाः वाजिनः प्रभृति मुख्याः यस्येति गजवाजिप्रभृति । सामान्ये नपुंसकं । प्रदाय दत्वा । तनुजायाः शिशोः शाहोः इत्यर्थः । तस्य बन्धुभिः बन्धुवर्गैः करणैः विवाहं अकारयत् । किलेति संभावनायाम् ॥ ४६ ॥
यवनेत्यादिसर्गस्य चरमश्लोकपर्यंतं सुगमम् ।

---

१८. 'रंजयन्स' पा० भे० । १९. 'आनीय वाससी तस्यै भूषणानि महांति च' पा० भे० । * अयं श्लोकः क्वचिदधिकोद्दश्यते ।

इत्युक्त्वा यवनाधीशो मुद्रां पत्राणि तत्पटे ॥
निधाय दंपती प्राह युवां राज्यं करिष्यथः ॥ ५९ ॥
स तं प्रणम्य सस्त्रीकस्तत्कन्याया गृहं ययौ ॥
नमस्कृत्य तदा तां तु जातं सर्वमवर्णयत् ॥ ६० ॥
सोवाच नृपते सर्वं मयैव विहितं हि तत् ॥
निजं देशमितो गच्छ वाहिनीसहितो नृप ॥ ६१ ॥
पंथानस्ते शिवाः संतु रक्षितास्त्वां हरिः स्वयम् ॥
इत्थं वदंत्यास्तस्यास्तु नेत्राभ्यामगमज्जलम् ॥ ६२ ॥
दानं विहीनं विफलं जलेन वदंति सर्वे मुनयस्ततः सा ॥
नेत्रोदकुंभद्वयवारिधारामवासृजच्छाहुनृपे सुपात्रे ॥ ६३ ॥
यामीति राजा निजगाद यत्सा तदुत्तरं नैव शशाक दातुम् ॥
वत्सं विना गौर्हरिणी निजेन बालेन हीनेव बभूव सा तु ॥ ६४ ॥
पुनःपुनर्नमस्कृत्य मातरं नृपतिस्तदा ॥
अश्रुपूरितनेत्रः सन् ययौ निजनिकेतनम् ॥ ६५ ॥
वादित्रभेरीमुखवाद्यघोषैः समन्वितो मागधबंदिशब्दैः ॥
गजैस्तुरंगैः पुरतः प्रयाते रथैश्च सार्धं प्रययौ ततः सः ॥ ६६ ॥
अतीत्य देशान्विविधान्नदीश्च गिरीन्निजं देशमियाय भूपः ॥
सर्वोऽपि लोकश्चिरदृष्टमेनं द्रष्टुं ययौ तोषसमन्वितः सन् ॥ ६७ ॥
तौराभिधा सा युवती पितुर्या भ्रातुः समायांतमवेक्ष्य दूतैः ॥
लोभाभिभूता गिरिदुर्गसंस्था शौंडुर्नृपो नायमिति ह्यवोचत् ॥ ६८ ॥
योद्धुं प्रवृत्ता च ततः स शाहुः किमद्य कर्तव्यमिति प्रदध्यौ ॥
तदैव बल्लाल इति प्रसिद्धः श्रीवर्धनस्थः समगाद्भूपेंद्रम् ॥ ६९ ॥
विहाय भूपं स तु चंद्रसेनं समागतः सद्गुणभूषणाढ्यः ॥
संगम्य राजानमवोचदेतच्चिंता न कार्या किमपीह राजन् ॥ ७० ॥
नारायणो महाबुद्धिर्लेखने कुशलः शुचिः ॥

पितुर्भ्रातुः पितृव्यस्य । राजारामस्येति यावत् ॥ युवती पत्नी ॥ ६८ ॥
इतः परं मुख्य प्रधान पूर्वजस्य बल्लालस्य समागमे कारणमाह योद्धुमिति ।
अथ मंत्रिसंज्ञस्य प्रधानस्यापि संगतौ कारणमाह नारायणमिति ।

---

२०. 'नेत्रेऽश्रुपरिपूरिते' पा० भे० । २१. 'सप्तर्षिसंस्था' पा० भे० । २२. 'शाहुर्नखेत्थं निजगाद वाचं' पा० भे० । २३. '०नद्यामनिवासकारी' पा० भे० । २४. 'ययौ विहायाशु स चन्द्रसेनं नृपं द्विजातिः किल कोंकणस्थः' ॥ पा० भे० । २५. '०चदेव चि०' पा० भे० ।

रामसूनुः कोंकणस्थो वाडवप्रवरोस्त्ययम् ॥ ७१ ॥
अहं चायं गमिष्यावो राजकार्यं भवेत्क्षणात् ॥
इत्युक्त्वा राजशार्दूलं सप्तारं[25] तौ समीयतुः ॥ ७२ ॥
तारायाः पुरतः सर्वं वर्णयामासतुश्चिरम्
तारापि तं शंभुसुतं विज्ञाय प्रबलं जगौ[26] ॥
बल्लालद्विज राजानं सत्वरं तं समानय
बालेनानेन विप्रेंद्र तारितं राज्यमुत्तमम् ॥ ७३ ॥
तारावाक्यं तु तत् सर्वं भूपालं प्रति सोऽवदत्[27] ॥
शाहुराजापि सप्तारमागत्यापालयन्महीम् ॥ ७४ ॥
सर्वजिच्छरादि सर्वजिन्नृपो नंदपाणिरसभूमिते (१६२९) शके
आसनं जनकसेवितं द्विजैरास्थितो विहितमूर्धसेचनः ॥ ७५ ॥
इति श्रीशिवकाव्ये पुरुषोत्तमपण्डितविरचिते सप्तमश्चमत्कारः ॥

शाहूराजा सर्वलोकप्रपालो बालः सन् योऽतोषयत्सार्वभौमम् ॥
भौमाः कामाः कामितास्तस्य चाग्रे तस्थुः सर्वे सर्वदा सर्वदस्य ॥ १ ॥
क्रोधाच्चक्रे नैव वक्रं कदापि वक्रं शक्रं यो विजिग्ये नयेन ॥
जेता शत्रोर्विप्रचेतोगतार्थं भूमौ राजा पूरयन्नाविरासीत् ॥ २ ॥
नोक्ता वाणी तेन नारीगणेऽपि मिथ्या नोक्ता क्वापि दीना तथैव ॥
सर्वे भूपाः सद्गुणाकृष्टचित्ताः पादद्वंद्वं नित्यमानर्चुरस्य ॥ ३ ॥

इति श्रीशिवकाव्यव्याख्यायां स्वयं कृतायां सप्तश्चमत्कारः ॥ ७ ॥

शाहुरिति । सर्वलोकं भूलोकं प्रपालयतीति सर्वलोकप्रपालः शाहुः शाहुसंज्ञः यः राजा बालः सन् बाल्यावस्थायामित्यर्थः । सर्वस्याः भूमेः ईश्वरः सार्वभौमः तं दिल्लीपतिं । तस्येश्वर इत्यण् । अतोषयत् । सर्वं ददातीति सर्वदः तस्य शाहोः चात् तदाश्रितानां अग्रे । भूमौ भवाः भौमाः कामिताः इच्छिताः कामाः मनोरथाः सर्वदा न तु कदाचित् तस्थुः । अनायासेनैव सकलां संपत्तिं लेभे इत्यर्थः ॥ १ ॥

क्रोधादिति । यः क्रोधात् कोपात् हेतोः वक्रं मुखं वक्रं नैव चक्रे । यः नयेन नीत्या शक्रं स्वर्गाधिपं विजिग्ये जितवान् । विपराभ्यां जेरिति तङ् । शत्रोः जेता । कर्तृकर्मणोः कृतीति षष्ठी । सः शाहुः विप्राणां चेतोगतो योऽर्थः तं पूरयन् सन् भूमौ आविरासीत् । कल्पवृक्ष इवेति भावः ॥ २ ॥

नेति । तेन राज्ञा वाणी वाक् नारीगणेऽपि स्त्रीसमूहेऽपि अपि शब्दात् परि-

---

२६. 'सप्तर्षि द्वौ' पा० भे० । २७. 'तथा' पा० भे० । २८. 'तारायावाक्यमाकर्ण्य शाहुमागत्य तज्जगौ' ॥ पा० भे० । १. '०स्तत्पुरस्तात्तस्थुः' पा० भे० ।

वर्णाः सर्वे स्वस्वधर्मे नियुक्ता योगक्षेमं राजतो लब्धवंतः ॥
पुत्रैः पौत्रैर्धान्यवासःसुवर्णैस्तैराढ्यास्ते तस्य राज्ये ननंदुः ॥ ४ ॥
पूर्वं ये ये मृण्मयैर्दारवैश्च तुंबीपात्रैरन्नपानादि चक्रुः ॥
ते ते तस्मिन् राज्ञि सर्वेऽपि ताम्रै रौक्मैः पात्रै राजतैः पैत्तलैश्च ॥ ५ ॥
दारिद्र्याद्या कुंतले दीपपात्रे भाज्यां पुत्रे भर्तरि स्नेहहीना ॥
नारी सर्वा स्नेहपूरा वृता सा जाता तस्मिन् राजनि श्रीनिकेते ॥ ६ ॥
पूर्वं लोका माषमात्रं द्विमाषं स्वर्णं बध्वाः कंठदेशे निधाय ॥
चक्रुः स्वीयं ये विवाहं स्नुषाणां तेषां मुक्ता भारभूता तभूवुः ॥ ७ ॥

हासकयास्वपि मिथ्या नोक्ता । तथैव क्वापि दीना वाणी नोक्ता । किंच सर्वे भूपाः मांडलिकाः सद्भिः गुणैराकृष्टं चित्तं येषां ते तथा भूताः सन्तः अस्य राज्ञः पादद्वंद्वं आनर्चुः ॥ ३ ॥

वर्णा इति । राज्ञ इति राजतः । पञ्चम्याः तसिल् । योगश्च क्षेमं च योगक्षेमे अनयोः समाहारः योगक्षेमं । अलब्धप्रापणं योगः लब्धरक्षणं क्षेमं । तल्लब्धमन्तः अत एव स्वस्वधर्मे नियुक्ताः सर्वे वर्णाः ब्राह्मणादयः पुत्रैः पौत्रैः धान्यवासः सुवर्णैः रत्नैः हीरकादिभिः आढ्याः सन्तः तस्य शाहोः राज्ये ननन्दुः ॥ ४ ॥

पूर्वमिति । ये ये लोकाः पूर्वं शाहुराज्यात् पूर्वं इत्यर्थः । मृदो विकारो मृण्मयानि तैः । यरोऽनुनासिकेऽनुनासिको वेत्यनुनासिके ऋवर्णान्नस्य णत्वं वाच्यमिति णत्वम् । दारुणः इमानि दारवाणि तैः । तस्येदमित्यण् । तुंबिपात्रैः अलाबूपात्रैः अन्नपानादि चक्रुः । ते ते सर्वेऽपि तस्मिन् शाहौ राज्ञि सति रौक्मैः सौवर्णैः राजतैः रौप्यैः पैत्तलैश्च पात्रैः अन्नपानादि चक्रुः । अतिसंपद्भराक्रान्ताः बभूवुरित्यर्थः ॥ ५ ॥

दारिद्र्यादिति । या नारी दारिद्र्यात् कुंतले केशे । जातावेकवचनं । केशेषु विषये इत्यर्थः । दीपपात्रे भाज्यां शाके पुत्रे भर्तरि च स्नेहेन तैलेन अन्यत्र स्नेहेन प्रीत्या च हीना रहिता आसीत् इति शेषः । सा सर्वा नारी श्रीनिकेते श्री निवासे तस्मिन् राजनि सति स्नेहयोः तैलप्रीत्योः यः पूरस्तेन आवृता व्याप्ता जाता । यस्याः नार्याः निर्धनत्वात् केशसंस्कारार्थं दीपार्थं शाकसंस्कारार्थं च तैलं नासीत् तथा पुत्रभर्त्रोरकिंचित्करत्वादन्नवस्त्राद्यपिदातुमसमर्थत्वात् तयोरप्रीतिरासीत् सा नारी केशसंस्कारार्थं सुगंधितैलपूरयुता तथा भर्तृपुत्रयोः धनयुतयोः अतिप्रीतियुता आसीदित्यर्थः ॥ ६ ॥

पूर्वमिति । ये लोकाः जनाः । लोकस्तु भुवने जने इति विश्वः । पूर्वं शाहुराज्यात् पूर्वं बध्वाः कंठदेशे माषप्रमाणं माषमात्रं स्वर्णं मंगलसूत्रं । प्रमाणे द्वयसज्नित्यादिना

२. 'यस्य' पा० भे० ।

विद्वद्भार्या गेहजं यद्घरट्टं नित्यं धान्यं सर्वदा संजजक्ष ॥
तस्मिन् राज्ञि श्रीयुताया गृहिण्या नैकां मुष्टिं धान्यजां तच्चखाद ॥ ८ ॥
काले काले यावनाला दुरापा येषां तेषां पायसे मंडकेषु ॥
नानाभक्ष्ये प्रीतिरासीज्जडत्वं तेष्वित्थं ते संगिरंते स्म सर्वे ॥ ९ ॥
येषां गेहे बालकानां जनन्या वीतानां वै दुग्धमासीदुरापम् ॥
तेषां गेहे गोमहिष्यः प्रदुग्धा अप्यत्यर्थं संक्षरंति स्म दुग्धम् ॥ १० ॥
देहस्थास्ते शत्रवो नाभ्यभूवन् का सा वार्ता कृत्रिमाणां रिपूणाम् ॥
व्याघ्राद्या ये गोमुखानां प्रसिद्धं वैरं सर्वे तत्यजुः पार्थिवेऽस्मिन् ॥ ११ ॥

मात्रच् प्रत्ययः । तदपेक्षया संपन्नास्तु द्विमाषं माषद्वयप्रमाणं स्वर्णं मंगलसूत्रं निधाय निबध्य स्वीयं स्वकीयं । गर्हादित्वाच्छः । विवाहं चक्रुः तेषां स्नुषाणां मुक्ताः मुक्ताफलहाराः भारभूताः बभूवुः । अतिसंपन्नत्वादिति भावः ॥ ७ ॥

विद्वदिति । वेत्तीति विद्वान् पण्डितः तस्य या भार्या स्त्री तस्याः यद्गेहं तत्र जातं विद्वद्भार्यागेहजं घरट्टं पेषणयंत्रं सर्वदा सर्वकालं नित्यं अनवकाशेन धान्यं जजक्ष पिपेष । तस्मिन् शाहौ राज्ञि सति श्रीयुतायाः संपन्नायाः तस्याः तत् घरट्टं धान्यजां एकामपि मुष्टिं न चखाद न पिपेष । विद्वद्ब्राह्मणस्त्री दारिद्र्यात्स्वोदरभरणार्थं जनस्य धान्यं मूल्येन सर्वदा पिपेष । तस्मिन् राजनि सति तु तद्भर्तुः राजतो धनलाभे सति स्वधान्यमन्यस्त्रीभिरन्यगेहे अपेषयदित्यर्थः ॥ ८ ॥

काले काले इति । येषां पुरुषाणां काले काले यथाकालं यावनाला अपि दक्षिणदेशे प्रसिद्धं धान्यं दुरापाः दुर्लभाः आसन् तेषां पयसः इदं पायसं यद्वा पयसि भवं पायसं तस्मिन् पायसे मंडकेषु च नानाविधे भक्ष्ये लड्डूकेषु च अप्रीतिः आसीत् । तेषु पायसादिषु जडत्वं अस्तीति ते सर्वे संगिरंते स्म बभाषिरे ॥ ९ ॥

येषामिति । जनन्या मात्रा विगतानां रहितानां मृतमातृकाणां अपि बालकानां येषां गेहे दुग्धं दुरापं दुर्लभं आसीत् तेषां गेहे गावश्च महिषश्च गोमहिष्यः । गोसहिताः महिष्यः गोमहिष्यः इदं युक्तं अन्यथा द्वंद्वश्च प्राणितूर्यसेनांगानामिति द्वंद्वैक्यं स्यात् । प्रदुग्धा अपि प्रनिष्काशितदुग्धा अपि अत्यर्थं अत्यंतं दुग्धं सर्वदा संक्षरंति स्म ॥ १० ॥

देहस्था इति । देहे तिष्ठन्ति ते देहस्थाः शत्रवः कामादयः षट् । कामक्रोधस्तथा लोभो मदो मात्सर्यमेव च । मोहश्चेत्यरिषड्वर्गं इति शिवगीतायां । तं भूपं नाभ्यभूवन् नाक्रामन् । क्रियया निर्वृत्ताः कृत्रिमाः तेषां रिपूणां का वा वार्ता तेषां वार्तापि नासीदित्यर्थः । व्याघ्राद्याः ये प्रसिद्धाः ते सर्वेऽपि अस्मिन्पार्थिवे सति गौर्मुखं मुख्या येषां तेषां प्राणिनां वैरं तत्यजुः सहजमपि वैरं यद्वयादत्यजन् । व्याघ्रादीनां वैरमुक्तं मुहूर्तमार्तंडे । सिंहेभं महिषाश्वमोतुखनकं श्वेणं च कीशावि

राज्ञाज्ञप्तौ द्वौ प्रतापो यशश्च भूमिं सर्वां निर्भयं व्यानशाते ॥
विप्रस्त्रीणां तत्सतीनां बभूव मुक्ताहारः पाणिभूषा प्रतापः ॥ १२ ॥
राज्ञा प्रतापयशसौ आज्ञप्ते भूमिमंडलाक्रमणे ॥
अनयोः पुरुषो बलयं मुक्ताहारः परं गले सत्याः ॥ १३ ॥
तस्मिन्नाथे वृष्टितो राजतो वा चोराद्वन्हे रोगतो वा नराणाम् ॥
भीतिर्नासीद्भानुसूनोर्विनैषां तुर्यः कालः पूर्वकालेन तुल्यः ॥ १४ ॥
यो यो वासो गुह्यगोपं बसानो हीनोऽन्नाद्यैर्भूतवत्संचचार ॥
सोऽसौ राज्ञा दृष्टमात्रः सविद्यश्चातुर्याढ्यो रुक्मवासाः सुभूषः ॥ १५ ॥

गोन्याघ्रं बभ्रुफणीति भीरुवरयोः प्रेष्येशयोश्च त्यजेत् इति ॥ ११ ॥

राज्ञेति । राज्ञा शाहुना आज्ञप्तौ प्रतापो यशश्चेति द्वौ सर्वां भूमिं निर्भयं यथा स्यात्तथा व्यानशाते । ननुपतिव्रतानां स्त्रीणां स्पर्शे दोषस्तथा सति कथं सर्वभूमेराक्रमणं कृतमित्यत आह । प्रतापः सतीनां विप्रस्त्रीणां पाणिभूषा करवलयं सुवर्णमयं कंकणं तत् यशः मुक्ताहारः मौक्तिकमाला बभूव । प्रतापस्य सूर्योष्णसाध्यात् पीतो वर्णः यशस्तु शुभ्रवर्णं प्रतापस्य पुंस्त्वात् परांगनास्पर्शोऽयुक्तस्तस्मात् सतीकरौ सुवर्णमयकंकणरूपेण व्यानशे कंकणं क्लीबं अतो न दोषः यशस्तु नपुंसकं अतः निर्भयमेव मुक्ताहाररूपेण हृदये अवसत् मुक्तानामपि स्त्रीत्वं ॥ १२ ॥

अमुमेवार्थं गीतीवृत्तेन निबबंध । राज्ञेति । गीतिलक्षणं श्रुतबोधे । आर्यापूर्वार्धसमं द्वितीयमपि भवतियत्र हंसगतेः । छंदोविदस्तदानीं गीतिं तामामृतवाणि भाषंते ॥ १३ ॥

तस्मिन्निति । तस्मिन् शाहौ नाथे सति वृष्टेरिति वृष्टितः अतिवृष्टेरनावृष्टेर्वा । यद्वा अवृष्टित इति छेदः । राजतः परचक्रात् वा । चोरात् वा । वन्हेः वा । रोगतः सकाशात् । भानुसूनोः यमाद्विना यद्वा भानुसूनोः भीतिं विना नराणां भीतिर्नासीत् । येषां नराणां तुर्यः चतुर्थः कलियुगरूपः कालः । चतुरश्छयतावाद्यक्षरलोपश्चेति साधुत्वं । पूर्वेण कलियुगात्पूर्वेण अनंतरेण द्वापारेण तुल्यः आसीत् ॥ १४ ॥

योय इति । अन्नपानाद्यैर्विहीनः गुह्यं गोपायति आछादयतीति गुह्यगोपं वासः वस्त्रं वस्तेऽसौ वसानः गुह्याच्छादकमात्रं वस्त्रं दधानः नत्वधिकं निर्धनत्वात् । यो यो नरः भूतेन तुल्यं भूतवत् पिशाचवत् संचचार व्यवजन्हे । विद्यया सहितः सविद्यः । चातुर्येण आढ्यः प्रसंगोपात्तभाषणकर्ता अनेन गुणिष्वेव आदरः न मूढेष्विति सूचितं । सः असौ राज्ञा दृष्टमात्रः सन् रुक्मं सुवर्णं तद्युतं वस्त्रं यस्येति रुक्मवासाः शोभनानि भूषणानि यस्येति सुभूषः सन् संचचार । राजकृपया अतीव संपन्नोऽभूदिति भावः ॥ १५ ॥

---

३. 'बभूव' पा० भे० ।

चत्वारो वा पंच वा भ्रातरश्चेत्तेषामेकः पूर्वमासीत्सभार्यः ॥
तस्मिन्नाथे सर्वे एवात्तदाराः केचिद्वाभ्यां स्त्रीचतुष्केणयुक्ताः ॥ १६ ॥
वाडवाः समयजन्निरंतरं भूरिदक्षिणमखैः सुरोत्तमम् ॥
मंगलानि च गृहे गृहेऽ भवन् राज्ञि तत्र भुवनैकपालके ॥ १७ ॥
सर्वविप्रसमतां प्रदर्शयन्सर्वशाखिसचिवानकल्पयत् ॥
ब्राह्मणा अपि निजात्परादमी राजतश्च धनमापुरुत्तमम् ॥ १८ ॥
एकदा पिंगलोपाख्यं बधिराख्यं नृपोत्तमः ॥
प्रधानमब्रवीत्तूर्णं याह्युत्तरदिशं सखे ॥ १९ ॥
अन्येऽपि सचिवा यांति दिशो जेतुं ससैनिकाः ॥
त्वं श्रेष्ठोऽसि प्रधानानामतःश्रेष्ठां दिशं व्रज ॥ २० ॥
बधिरस्तमुवाचेदं राजन् वृद्धोऽस्मि सांप्रतम् ॥
वीरवर्याकुलोद्दीचीजये शक्तोऽस्मि नाधुना ॥ २१ ॥
राजा तद्वाक्यमाकर्ण्य बल्लालं तत्पदे तदा ॥
निवेश्य सह सैन्येन प्रेषयामास चोत्तराम् ॥ २२ ॥

चत्वार इति । पूर्वं शिवभूपात्पूर्वं चत्वारो वा पंच भ्रातरश्चेत्तेषां मध्ये एकः नतु ज्येष्ठ एव प्रारब्धवशात् कोपीति भावः । भार्यया सहितः सभार्यः आसीत् । द्रव्याभावादन्ये अविवाहिता एव आसन्नित्यर्थः । तस्मिन् शाहौ नाथे सति सर्वे भ्रातरः आत्ताः परिणीताः दारा यैस्ते आत्तदाराः आसन् । दारशब्दस्य नित्यं बहुवचनांतत्वात् एकस्या अपि भार्यायाः बोधः स्यादतः विशेषेण विवृणोति । केचित् द्वाभ्यां भार्याभ्यां केचित् स्त्रीचतुष्केण युक्ताः आसन् । नतु स्त्रीत्रयेण स्त्रीत्रयकरणे दोषश्रवणादितिभावः ॥ १६ ॥

वाडवा इति । भुवनस्य भूलोकस्य एकपालके सार्वभौमे तत्र तस्मिन् शाहौ राज्ञि सति वाडवाः ब्राह्मणाः भूरिदक्षिणमखैः सुरोत्तमं इन्द्रं समयजन् । किंच गृहे मंगलानि विवाहादीनि अभवन् ॥ १७ ॥

सर्वेति । सः शाहुः सर्वेच ते विप्राश्च सर्वविप्राः तेषु समतां साम्यं प्रदर्शयन् सन् शाखाः शाकलाद्याः सन्ति येषां ते शाखिनः । व्रीह्यादित्वादिनिः । सर्वे च ते शाखिनश्च सर्वशाखिनः सर्वशाखिनश्च ते सचिवाश्च सर्वशाखिसचिवाः तान् अकल्पयत् । अमी ब्राह्मणा अपि निजात् स्वशाखीयात् परादपि अन्यशाखवतः राजतश्च उत्तमं उत्कृष्टं धनं आपुः ॥ १८ ॥

अथ स्वकार्यार्थमानीताय बल्लालाय प्रतिज्ञातस्य प्रधानत्वाधिकारस्य दाने कारणमाह अष्टभिः एकदेत्यादिभिः ॥ १९ ॥

---

१. 'ब्राह्मणाः' पा० भे० । ५. '०रादथो' पा० भे० ।

आज्ञामवाप्य भूपस्य जगामोत्तरदिक्पथम् ॥
रजःपूतांश्च राजन्यान् यवनांश्च जिगाय सः ॥ २३ ॥
करतोयानदीवारि पाययित्वा तुरंगमान् ॥
अग्रे गंतुमयुक्तत्वाद्ब्राह्मणः स न्यवर्तत ॥ २४ ॥
मौक्तान् राशीन् रूप्यराशीन्नृपाणाम् स्तुत्वा सर्वान् सद्यशांसीव सद्यः॥
रौक्मान् राशीन् रत्नराशींश्च तस्मै भूपायादात्तत्प्रतापानिवेषः ॥ २५ ॥
राजा तस्य प्रतापेन संनत्या वचनेन च ॥
मुख्यं प्रधानं चक्रे तं तुष्टोऽतीव कृतज्ञराट् ॥ २६ ॥
नारायणं रामसुतं कोंकणस्थं द्विजावरम् ॥
मंत्रिणं विदधे तद्वत्सत्यवाचं जितेंद्रियम् ॥ २७ ॥
बह्वृचं विप्रवर्यं च सचिवं समकल्पयत् ॥
अमात्यमपि ऋग्वेदवादिनं च तथाऽकरोत् ॥ २८ ॥
एवमाद्यैस्सचिवैः प्रजाकार्यमकारयत् ॥
लेखनाधिपतिं चक्रे परमुं नयशालिनम् ॥ २९ ॥
मत्प्रजाहिंसका एते व्याघ्राद्या इत्यसौ नृपः
प्रजाकार्यममात्येषु संस्थाप्य मृगयामगात् ॥
प्रधानसान्महीं कृत्वा मृगयामचरन्नृपः
मृगया राजधर्मोऽयमिति शास्त्रमनुस्मरन् ॥ ३० ॥
व्याघ्राद्या ये क्रूरसत्त्वास्तान्हत्वा नृपसत्तमः ॥
शुनातिचपलेनासौ धन्वी हरिणमन्वगात् ॥ ३१ ॥
मृगोतिभीतः सहसा वृक्षवृंदसमावृतम् ॥
व्याघ्रावासमगाद्वेपोप्यन्वगान्मृगलिप्सया ॥ ३२ ॥
विलोक्य नृपतिं व्याघ्र उत्तस्थौ व्यात्तवक्त्रकः ॥
अग्रपादावष्टभ्य लांगूलं भ्रामयन्निजम् ॥ ३३ ॥
तदा व्यचिंतयद्राजा किमस्य विनिवर्तकम् ॥
प्रारब्धमेवशरणमिति मेने नचापरम् ॥
तदा नृपः खड्गकरस्तस्थौ सिंह इवैककः ॥
सारमेयोऽपि बलवान्तं भूपं निकषा वसत् ॥ ३४ ॥

अथ त्रिभिः श्लोकैः इतरेभ्यः मंत्र्यादिप्रधानाधिकारदानप्रकारमाह ॥ २७ ॥

---

६. '०व्यराजोऽसौ' पा० भे० । ७. 'गुणालयं' पा० भे० । ८. अधिकोऽयं श्लोकः क्वचित् । ९. 'वृक्षसंघस०' पा० भे० । १०. '०गाद्राजाप्य०' पा० भे० । ११. 'स्थितः' पा० भे० । १२. अधिकोऽयं श्लोकः क्वचित् । १३ 'राजा' पा० भे० ।

व्यादाय वक्त्रं नृपतिं मृगेंद्रो यदा ह्यधावत्स तदा श्वराजः ॥
उत्पत्य धृत्वा वृषणौ स्वदद्भिर्न्यपातयत्तं भुवि दिष्टनुन्नः ॥ ३५ ॥
ततः सेनाधिपाः सर्वे समाजग्मुरनेकशः ॥
भूपो गृहं समागत्य भुक्त्वा तूर्णमगात्सभाम् ॥ ३६ ॥
युवराजप्रधानेषु सकलेष्वागतेषु सः ॥
सर्वानपृच्छत्किं देयमस्मै व्याघ्रविघातिने ॥ ३७ ॥
स्वस्वमत्यनुसारेण वदत्सु स नृपोत्तमः ॥
आनीय रम्यां शिबिकामध्यवेशयदीश्वरः ॥ ३८ ॥
यत्संगतो धर्ममुखाः किलार्थाः सिध्यंति मुक्तिः करगा कृती चेत् ॥
यस्तां तनुं मृत्युमुखादरक्षत् तस्मै शुनेऽदाच्छिबिकां न चित्रम् ॥३९॥
कृष्णवेणीं स सप्तारान्नित्यं स्नातुं ययौ नृपः ॥
एकदा ब्राह्मणः कश्चित्स्नानोक्तानपठन्मनून् ॥ ४० ॥
राजा स्नात्वाब्रवीद्ब्रह्मन् का ते वांछा वदाधुना ॥
उवाच भीतभीतोऽसौ राजानं प्रति दीनवाक् ॥ ४१ ॥
वस्त्रहीनोस्म्यहं राजन् वस्त्रमेकं प्रदीयताम् ॥
प्रहस्य राजप्रवरो ग्राममेकमदात्प्रभुः ॥ ४२ ॥
देहीति वचनं येन नृपस्याग्रे निवेदितम् ॥
तद्दृशीयो नरोऽद्यापि नैवान्यं याचते नृपम् ॥ ४३ ॥
एवं ग्रामसहस्राणि ब्राह्मणेभ्यो ददौ नृपः ॥
युवराजप्रभृतिभिर्दापितास्ते ततः परे ॥ ४४ ॥
प्रधानयुवराजैश्च राजदत्तस्वराज्यतः ॥
दत्ता ग्रामास्ततो भिन्ना विप्रसाद्राज्यमस्य तत् ॥ ४५ ॥
का यूयं विजितामराध्वाशैखैरप्रासादमूर्धस्थिता
वक्त्रेंदुं निजमिंदुमंडलमहादर्शे चिरं पश्यथ ॥
हे देव्यः सुरयानगाः शृणुत नो वृत्तं सुराधीश्वर-
श्रीजेता भुवि शाहुराज इति यस्तद्विप्रपत्न्यो वयम् ॥ ४६ ॥

अथ मृगयाप्रकारमाह प्रधानसादित्यादिदशभिः ॥ ३० ॥ अथास्य षड्भिरौदार्यमाह राजेत्यादिभिः ॥ ४१ ॥

अथास्यौदार्यं भग्यंतरेण द्वाभ्यामाह । कायूयमिति । अमराणां अध्वा मार्गः विनितः रुद्धः अमराध्वा यैस्तानि विजितामराध्वानि विजितामराध्वानि शिखराणि

---

१३. 'राजा' पा० भे० । १४. 'ोदाद्विभुः' पा०. भे० । १५. 'ोध्वरुचिरप्रा०' पा० भे० । १६. 'ोद्रुनामनृपतिस्त०' पा० भे० ।

तस्मिन् धनं ददति भूमिसुराः सुराश्च
पुष्टा वणिङ्निचयशिल्पिजनाश्च तुष्टाः ॥
हृष्टा च कोकपटली जलजंतवो ये ॥
रुष्टाः कुलालनिचयाः सकला विनष्टाः ॥ ४७ ॥
दानशूराग्रणीराजा कदाचिद्ग्राम्ययोषितम् ॥
ययाच मार्गे क्षुधितो यावनालीमितीर्यते ॥ ४८ ॥
मृगाननुगतः श्रांतस्तृषार्तः क्षुधितो नृपः ॥
दधिभास्करिकायुक्तां कांचिद्योषां ददर्श सः ॥ ४९ ॥
सद्यो नयंतीं भर्त्रर्थमुवाच स नृपोत्तमः ॥
क्षुधितायाद्य मे देहि भास्करीं दधिसंयुताम् ॥ ५० ॥
तथेति सा पुरस्तस्य स्थापयित्वाऽवसत्सती ॥
भुक्त्वा पीत्वा स पानीयमिति तुष्टोऽब्रवीत्तदा ॥ ५१ ॥
राजाहमस्मि सप्तारं याहि पत्या समन्विता ॥
इत्युक्त्वा तां ययौ राजा सापि याता कृषिं निजाम् ॥ ५२ ॥

येषां ते विजितामराध्वशिखराः विजितामराध्वशिखराश्च ते प्रासादाश्च विजितामराध्वशिखरप्रासादास्तेषां मूर्धानः ऊर्ध्वप्रदेशास्तेषु स्थिताः यूयं निजं वक्त्रेंदुं इंदुमंडलमहादर्शे चिरं पश्यथ काः इति देवांगनानां प्रश्नः । राज्ञाश्रितविप्रस्त्रियः उत्तरमाहुरुत्तरार्धेन । सुरयानैः गच्छंति ताः सुरयानगाः हे देव्यः नः वृत्तं शृणुत । सुराधीश्वरः इंद्रः तस्य या श्रीः संपत् तस्याः जेता भुवि शाहुनामा राजा यः तद्विप्राणां पत्न्यः वयं अस्माकमेतादृशी संपत्तस्य संपद्वर्णनं कः करिष्यतीति भावः । संबाधातिशयोक्त्यलंकारः ॥ ४६ ॥

तस्मिन्निति । तस्मिन् शाहौ धनं ददति सति भूमिसुराः ब्राह्मणाः सुराः देवाश्च पुष्टाः प्रत्यहं सदन्नाशनेन हविर्जक्षणेन चेति भावः । वणिङ्निचयाश्च शिल्पिजनाश्च वणिङ्निचयशिल्पिजनाः तुष्टाः प्रत्यहं धनलाभादितिभावः । कोकानां चक्रवाकानां पटली समूहः हृष्टा । अत्युदारस्यास्य धनक्षये दिवसप्रतिबंधकस्य मेरोः वितरणेन राज्यभावे अस्माकं स्त्रीवियोगो नस्यादिति संतोषादिति भावः । ये जलजंतवः ते रुष्टाः । दानप्रसंगेन जलक्षये अस्माकमनवस्थानं स्यादिति मत्वेति भावः । सकलाः कुलालानां निचयाः विनष्टाः । ताम्रादिधातुमयपात्रव्यवहारे मृत्पात्रानुपयोगादिति भावः ॥ ४७ ॥

इतिहासांतरमाह नवभिः ॥ दानेत्यादिभिः ॥ ४८ ॥

---

१७. 'ॐश्रांतः कदाचित्क्षुधि०' पा० भे० । १८. दृष्ट्वा' पा० भे० । १९. 'तक्र सं०' पा० भे० । २०. 'ॐविप्रति' पा०भे० ।

भर्त्रे सर्वं समाचख्यौ जातं यत्पथि तत्तदा ॥
कृपीबलस्तया सार्धं ययौ सप्तारमाशु सः ॥ ५३ ॥
प्रणम्य राजवर्यं तं स्थितस्तूष्णीं नृपाग्रतः ॥
राजा तस्मै ग्राममेकं ददौ यावद्दिवाकरः ॥ ५४ ॥
कृपीबलोतिसंतुष्टो ययौ निजनिकेतनम् ॥
एवं राजा दातृ[21]वर्यस्तत्समः कः कलाविह ॥ ५५ ॥
अष्टौ सुरा यस्य वसंति देहे प्रदीप्ततद्वह्निमुखेऽतिभक्त्या ॥
हव्यं हुतं येन ददौ स तस्मै ग्रामं किलैकं किमिदं विचित्रम् ॥ ५६ ॥
जयसिंहो बाजिमखं कृत्वा संपूज्य ऋत्विजः ॥
तेषां गृहे धनं भूरि शकटैः समवाहयत् ॥ ५७ ॥
राजाश्रितद्विजेंद्रार्थं लक्षसंख्यं धनं नृपः ॥
दत्त्वा संप्रेषयामास दूतमेकं विशारदम् ॥ ५८ ॥
सभामागत्य दूतोऽसौ राजानमवदत्सुधीः ॥
जयसिंहस्य दूतोऽहं तद्वचः शृणु भूपते ॥ ५९ ॥
चंद्रप्रभं श्यामकर्णमश्वं निर्माय यत्नतः ॥
बाजिमेधः कृतस्तस्य दक्षिणेयं तवार्थिनाम् ॥ ६० ॥
भवद्राज्ये कियान् धर्मस्तद्दूतं कथय प्रभो ॥
एवं दूतवचः श्रुत्वा राजा प्रोवाच तं तदा ॥ ६१ ॥
अस्योत्तरं श्वः करिष्ये दिनमेकं स्थिरो भव ॥
श्रुत्वेत्थं निर्गते दूते राजा प्रोवाच मंत्रिणः ॥ ६२ ॥
अनन्वितं ब्रुवाणेषु सर्वेषु निजमंत्रिषु ॥
प्रहस्य राजा प्रोवाच जयसिंहस्य तं चरम् ॥ ६३ ॥
त्रिप्राधीनं राज्यमेतद्विधाय देवं शर्वं सर्वदा चिंतयामि ॥
तैर्यद्दत्तं वस्त्रमन्नं वसित्वा *संजक्ष्याहं सुस्थिरो भूतलेऽस्मि ॥ ६४ ॥

अष्टाविति । यस्य राज्ञः देहे अष्टौ इंद्रादयः सुराः वसंति । अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृप इति वचनादिति भावः । तस्य राज्ञः प्रदीप्तो यो वह्निः जाठरः तस्य मुखे येन अतिभक्त्या हव्यं हुतं तस्मै होत्रे सः राजा एकं ग्रामं ददौ । किल इदं विचित्रं आश्चर्यं किं नेत्यर्थः ॥ ५६ ॥

इतिहासान्तरं चाह यावच्चमत्कारसमाप्ति जयसिंह इत्यादिभिः ॥ ५७ ॥

---

२१. '०वंदातारावर्यस्त०' पा० भे० । २२. '०तद्दतमु०' पा० भे० । * 'भुक्त्वा चाहं' पा० भे० ।

श्रुत्वा वाक्यं दूतवर्यः समेत्य सिंहस्याग्रे वर्णयामास सर्वम् ॥
अस्मिन् काले मत्समो नास्ति दाता शांतः सर्वस्तस्य सद्योऽभिमानः॥६५॥
इति श्री शिवकाव्ये पुरुषोत्तमकविविरचिते अष्टमश्चमत्कारः ॥ ८ ॥

बल्लालेन विधिज्ञेन प्रधानपतिनाऽखिलम् ॥
वृष्टैश्छन्नं प्रजाच्छन्नमकारि जगतीतलम् ॥ १ ॥
स्वे स्वे धर्मे रताः सर्वे निर्भया हृष्टमानसाः ॥
गृहे गृहे मंगलानि चक्रुस्तेतायुगे यथा ॥ २ ॥
कोंकणस्था द्विजाः सर्वे यष्टिहस्ताः सपादुकाः ॥
शुक्लाच्छादकवासांसि दधानास्तं समाययुः ॥ ३ ॥
नारिकेलानि पूगानि पृथुकान् तत्पुरो द्विजाः ॥
निधाय जगदुः सर्वे शृणु बल्लाल मत्सखे ॥ ४ ॥
एतादृशी ते संपत्तिर्देह्यस्मभ्यं धनं बहु ॥
एवं वदत्सु विप्रेषु ददौ तेभ्यो धनं बहु ॥ ५ ॥
द्वौ पुत्रावस्य जज्ञाते बाजिराजोऽग्रिमोऽभवत् ॥
चिमाजीति कनिष्ठोऽभूत्सूर्यचंद्राविवापरौ ॥ ६ ॥
पुण्याभिधं स्थलं सम्यक् सर्वकालसुखावहम् ॥
इति मत्वात्र वसतिं स्त्रीयां चक्रे प्रधानराट् ॥ ७ ॥
एवं प्रजाः पालयति प्रधानप्रवरे स वै ॥
कालः समागतो येन सद्यः प्राणैर्वियुज्यते ॥ ८ ॥
पुरंदरोपनामानमंबाजीति सुविश्रुतम् ॥
विप्रं संस्थाप्य पुण्याख्ये नगरे स्वर्ययावसौ ॥ ९ ॥
शाहुस्तद्वृत्तमाकर्ण्य मुहूर्तं दुःखितोऽभवत् ॥
बाजिराजं तस्य सुतमानाय्यादात्प्रधानताम् ॥ १० ॥
पितुरप्याधिकं लोकमपालयदलं स च ॥
ब्राह्मणा अति संतुष्टा विद्याः पेठुरहर्निशम् ॥ ११ ॥
कलाजीविजनश्चापि कला अभ्यस्तवान् सदा ॥
राज्ञः प्रीतिः प्रधानेऽस्मिन्बल्लालादधिकाऽभवत् ॥ १२ ॥
राजैकदा सदोमध्ये शृण्वत्सु सकलेषु सः ॥

श्रीशिवकाव्यव्याख्यायां स्वयंकृतायां अष्टमश्चमत्कारः ॥ ८ ॥

---

२३. '०तनाथः स०' पा० भे० । १. '०स्यसूनुमादायादा०' '०तसूनयमा०' इति वा पा० भे० । २. 'सभामध्ये' पा० भे० ।

उवाच हे प्रधानेश गच्छोत्तरदिशं सखे ॥ १३ ॥
वीरान् सर्वान् विजित्याशु धनं पुष्कलमानय ॥
एते वीरास्त्वया सार्धं यास्यंति प्रथिता भुवि ॥ १४ ॥
इत्युक्त्वानर्घ्यभूषाद्यैर्वसनैश्च व्यतोषयत् ॥
गजांश्च विंशतिं प्रादाद्रथांस्तद्द्विगुणांस्तथा ॥ १५ ॥
वाजिसादिभटांस्तेन सार्धं राजाऽयुतं ददौ ॥
पदातीनयुतं तद्वद्वीरान् युद्धविशारदान् ॥ १६ ॥
पंचाशद्भिर्यत्रवैरन्वितो दुंदुभिध्वनिम् ॥
कारयन् धनदस्याशां ययौ शाहोः प्रधानराट् ॥ १७ ॥
सरोग्रामकृतावासो दाभाड इति विश्रुतः ॥
अंतरंगो नृपस्यासीद्व्यंबको वाहिनीपतिः ॥ १८ ॥
अष्टायुतैर्वाजिवाहैर्वीरैर्युद्धविशारदैः ॥
युक्तोऽसौ गौतमीतीरे स्थितवान् राजकार्यकृत् ॥ १९ ॥
बाजिराजं समायांतं श्रुत्वा दूतमुवाच सः ॥
हे दूत त्वरया गत्वा बाजिराजं निवेदय ॥ २० ॥
भवतानेन मार्गेण नागंतव्यं कदाचन ॥
इत्याभाष्य निजं दूतं प्रेषयामास सत्वरम् ॥ २१ ॥
दूतः प्रधानमागत्य सेनापतिवचोऽब्रवीत् ॥
क्षणं विचार्य दूतं तं प्राह बुद्धिमतां वरः ॥ २२ ॥
अन्यमार्गेण यास्याम इति तं शंस हे चर ॥
दूते गते बाजिराजो मनसाचिंतयच्चिरम् ॥ २३ ॥
पूर्वस्यां यावनो देशः पश्चान्मूढो ह्ययं स्थितः ॥
राज्ञोऽतिवल्लभश्चायं सेनाप्यस्य महत्तरा ॥ २४ ॥
अहमत्यल्पसेनोऽस्मि सहायो नास्ति कोऽपि मे ॥
जयः कथं मम भवेत्प्रारब्धाद्यदि मे जयः ॥ २५ ॥
अप्रीतिर्मयि राज्ञः स्यात्तेनायं वा नियोजितः ॥
इति संचिंतयंस्तत्र मासमेकं व्यवस्थितः ॥ २६ ॥
त्रिवारं शाहुराजाय पत्रं प्रेषितवानसौ ॥
राज्ञा तदुत्तरं नैव लिखितं किमपि स्फुटम् ॥ २७ ॥
प्रधानाधिपतिः स्वीयं मंत्रिणं प्राह हे सखे ॥
कार्ये गुरुतरेऽकारि विचारस्त्वं सुधीः शृणु ॥ २८ ॥

३. 'ंशंप्रति' पा० भे० । ४. 'ंनैस्तमतो०' पा० भे० । ५. 'पूर्वतो' पा० भे० ।

प्रजापालं शुचिं दांतं धीरं वीरं जितेंद्रियम् ॥
जयश्रीर्वृणुते भूपं नञाढ्यं न कदाचन ॥ २९ ॥
जयश्रीर्दुर्लभेतस्य श्वो गंतव्यमितो मया ॥
इत्थं निश्चित्य मेधावी प्रातर्भुक्त्वा ययौ पुरः ॥ ३० ॥
सेनापतेस्तु शिबिरे केचिदश्नंति शेरते ॥
वदंति केचित्सानंदं विहरंति च केचन ॥ ३१ ॥
सर्वेष्वनवधानेषु वीराः कुंतायुधास्तु ते ॥
कृपाणपाणयः केचिद्बन्विनो यंत्रिणो ययुः ॥ ३२ ॥
एककालं समागत्य सूर्ये मध्याह्नगे सति ॥
शलभा इव ते सैन्यं प्रपेतुर्जयकांक्षिणः ॥ ३३ ॥
बाजिराजः स सेनान्यं हत्वा वीरानघातयत् ॥
केचित्पलायनं चक्रुः केचिद्वक्त्रे तृणं दधुः ॥ ३४ ॥
वायुर्यथा घनानीकं क्षणान्नाशयति प्रभुः ॥
तथा प्रधानवर्योऽसौ तत्सैन्यमवधीत्क्षणात् ॥ ३५ ॥
प्रधानः सेनया युक्तो गोदां स्तुत्वा प्रणम्य च ॥
स्नात्वा भुक्त्वात्र संतुष्टस्तामुत्तीर्य पुरो ययौ ॥ ३६ ॥
मातर्गौतमि गौतमादिमुनिभिः संप्रार्थिते सर्वदा
देवैर्दारसुतैर्युतैः परमया भक्त्या सुसंपूजिते ॥
वह्निः कक्षचयं हिनस्ति शिखया योगेऽघसंघं तृणं
त्वं दूरात्स्मृतिमात्रतो हरसि यत्कस्त्वत्समस्तं वद ॥ ३७ ॥

नञ् निषेधर्थे तेन नकारेण भाढ्यं युक्तं अप्रजापालं अशुचिमित्यादीत्यर्थः ॥२९॥

स्तुत्वेत्युक्तं तमेव स्तवनप्रकारमष्टभिः पद्यैराह मातरित्यादिभिः । गौतमादिमुनिभिः सर्वदा संप्रार्थिते । दारसुतैः युतैः देवैः भक्त्या सुसंपूजिते । हे मातः गौतमि वह्निः अग्निः कक्षचयं तृणचयं । कक्षौ तु तृणवीरुधावित्यमरः । योगे संयोगे सति त्वं तु दूरादित्यर्थः । शिखया ज्वालया हिनस्ति दहति । त्वं तु दूरात्स्मृतिरेव स्मृतिमात्रं तस्मात् स्मृतिमात्रतः । मात्रं कार्त्स्न्येऽवधारणे इत्यमरः । अघसंघतृणं पापसंघरूपं तृणं । दुःखैनोव्यसनेष्वघमित्यमरः । हरसि यत् गंगा-गंगेति यो ब्रूयाद्योजनानां शतैरपि मुच्यते सर्वपापेभ्यो विष्णुलोकं सगच्छतीतिस्मृतेरिति भावः । तत्तस्मात्कारणात् त्वत्समः त्वत्तुल्यः अन्यः कः अस्ति तं त्वमेव वद । नास्तीतिभावः ॥ ३७ ॥

---

६. 'ोत्रीणस्तथा' पाः भे० ।

सिंहेज्ये हरिपादसंभवतनुर्गंगापि पापैर्नरैः
स्वस्मिन् त्यक्तमघं निहंतुमनघे त्वामेव सा धावति ॥
कः शक्तस्तव वर्णने भुवि नरो दोषोऽयमेको महान्
देवाः पुण्यकृतो नयंति हि दिवं त्वं पापकृत्पूरुषान् ॥ ३८ ॥
गौः स्वर्गस्तमिमं ददासि जननि स्त्रीयाघनाशक्षमे
तस्मात्त्वां प्रवदंति वंदितपदे गोदेति विद्वज्जनाः ॥
एकैवाखिलकामदासि भवती स्वर्गंगयासंगता
किं दातेति मनो विचारयति मे मातर्नमस्ते नमः ॥ ३९ ॥
तावत्सूर्यसुतः करोति गणनां पापस्य गंगे नृणां
यावद्दृष्टिपथं न गच्छसि जगत्पापौघविध्वंसिनि ॥
गोदेति स्मरणादघौघविलयस्त्वद्दर्शनं मुक्तिदं
स्नाने किं भवतीति संशयपयःपूरे मनो मज्जति ॥ ४० ॥

सिंहेज्य इति । हे अनघे । हरति पातकमिति हरिः तस्य पादः चरणः तस्मात्संभवः उत्पत्तिर्यस्याः सा हरिपादसंभवा हरिपादसंभवा तनुर्यस्याः सा हरिपादसंभवतनुरपि सकलपातकहर्तुर्हरेरुत्पन्नापीति भावः । गंगा भागीरथी पापैः पापकर्तृभिः नरैः स्वस्मिन् त्यक्तं अघं निहंतुं दूरीकर्तुं सिंहेज्ये सिंहगुरौ त्वामेवधावति आयाति । अतः तव वर्णने भुवि कः नरः शक्तः न कोपीत्यर्थः । अथ व्याजस्तुत्याह । देवाः पुण्यकृतः पुण्यपुरुषान् दिवं नयन्ति त्वं पापकृत्पुरुषान् पापकर्तॄन् नरान् दिवं नयसि अयमेव महान् एकः ते दोषः अस्ति हि । अत्र निन्दया स्तुतिर्गम्यते अतः व्याजस्तुत्यलंकारः । उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिन्दयोः कः स्वर्धुनिविवेकस्ते पापिनो नयसे दिवमिति लक्षणात् ॥ ३८ ॥

इदानीं गोदेति संज्ञायाः निरुक्तिपूर्वं स्तौति गौरिति । हे स्त्रीयानां स्वकीयानां यत् अघं पापं तस्य नाशस्तस्मिन् क्षमे समर्थे । गौः स्वर्गः । गौः स्वर्गे वृषभे रश्मौ वज्रे चंद्रमसि स्मृतः । अर्जुने नेत्रदिग्बाणभूवाक्वारिषु गौर्मतेति विश्वः । तं इमं स्वर्गं यस्माद्ददासि तस्मात्त्वां विद्वज्जनाः पंडिताः गोदेति प्रवदन्ति । इयं संज्ञा पण्डितकृता नान्यकृतेतिभावः । हे वंदितपदे जननि त्वं एकैव असहायैव अखिल कामदा असि मुक्तिमपि दातुं समर्थासीत्यर्थः । भवती स्वर्गंगया भागीरथ्या संगता सती किं दाता किं दास्यतीति मनः विचारयति मनसि सिद्धांतो न जायते अतस्ते तुभ्यं केवलं नमः । पुनश्च नमः नमस्कारः अस्तु ॥ ३९ ॥

तावदिति । हे जगत्पापौघविध्वंसिनि सूर्यसुतः यमः नृणां पापस्य तावत्गणनांकरोति यावत्त्वं दृष्टिपथं दृग्गोचरत्वं न गच्छसि । तव दर्शने जाते सर्वपापं लयं

७. ' ०निस्वर्गापवर्गप्रदे ' पा० भे० । ८. ' जननी ' पा० भे० ।

ओघाः सप्त कृतास्त्वया जलनिधीन् सप्त प्रवेष्टुं ध्रुवं
यद्वा भूर्मुखलोकसप्तकमधोलोकांस्तथा सप्त वा ॥
आविश्य स्वमुखैः करोमि निखिलान् पुण्यानयं ते वृथा
यत्नो यत्स्मरणाद्व्रजंति हि दिवं दिव्यैर्विमानैर्युताः[1] ॥ ४१ ॥
ग्रामस्था अपि देवताः कलिभयाद्याता दिवं स्वर्णदी
स्वाख्यामर्थवतीं तथा विदधती यातेति मन्ये हरिः ॥
यास्यत्येव निजालयं भगवति त्वं नैवगच्छस्यदो
हेतुस्ते हृदयं जनेषु सदयं नान्यो मया दृश्यते ॥ ४२ ॥

यातीत्यतः अग्रे पापगणना व्यर्थेति मन्ये इतिभावः । गोदेति स्मरणात् अघोघविलयः त्वद्दर्शनं मुक्तिदं अनन्तरं स्नाने सति किं भवतीति मे मनः संशयः एव पयसः पूरः वारिसमूहः तत्र मज्जति । सर्वापेक्षया मुक्तिः अधिका सा तु दर्शनमात्रेण भवति स्नाने सति अग्रे किमपि नावशिष्टमतः स्नानस्य वैयर्थ्यमेव प्रतिभातीति विचारयतीति भावः ॥ ४० ॥

सप्तभिर्मुखैः समुद्रप्रवेशने उत्प्रेक्षते ओघा इति ॥ त्वया सप्त क्षारोदधिमारभ्य शुद्धोदां तान् जलनिधीन् प्रवेष्टुं सप्त ओघाः कृताः ध्रुवं शंके । निजभर्या सागरेण सप्त रूपाणि धृतानि अहं तु तस्य पत्नी अतः एकेन रूपेण तत्प्रवेशे तस्य तोषो न स्यादतः सप्त रूपाणि धृत्वा प्रवेशो युक्त इति सप्त ओघाः कृताः नु इत्यर्थः । यद्वा अथवा भूः भूर्लोकः सः मुखं मुख्यो येषान्ते भूर्मुखाः भूर्मुखाश्च ते लोकाश्च भूर्मुखलोकाः तेषां सप्तकं स्वमुखैः आविश्य पुण्यान् पवित्रान् पुण्यशब्दोत्र द्रव्यवाचकः अतः पुंसि । शस्तं चाथत्रिषु द्रव्ये पापं पुण्यं सुखादि च इत्यमरः । द्रव्यं तु लिंगसंख्यान्वितं द्रव्यं करोमि अतः सप्त ओघाः कृताः ध्रुवं । यद्वा अधोलोकान् अतलादीन् सप्तस्वमुखैः आविश्य निखिलान् तान् पुण्यान् करोमि इति सप्त ओघाः कृताः ध्रुवं । प्रथमपक्षे सप्तधाभवेनं युक्तं । द्वितीयतृतीयपक्षयोः सप्तधाभवनमयुक्तमित्याह । अयं ते यत्नः वृथा यत् यस्मात् हेतोः नराः स्मरणात् गंगा गंगेति नामस्मरणात् दिव्यैः विमानैः दिवं व्रजंति अतः सप्तधा भूत्वा प्रविश्य तत्तल्लोकपवित्रीकरणे श्रमो न युक्तः अनायासेनैव सिद्धेरिति भावः ॥ ४१ ॥

ग्रामस्था इति । ग्रामेषु तिष्ठन्ति ताः ग्रामस्थाः देवताः अपि शब्दात् तीर्थादिस्थाः कलेर्भयात् दिवं याताः गताः स्वः स्वर्गस्य नदी स्वर्णदी भागीरथी । स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः इत्यमरः । पूर्वपदात्संज्ञायामग इति णत्वं । स्वस्य

---

१. '०नैर्नराः' पा० भे० ।

स्वत्तटचां महिषः खरोऽथ वृषभः श्वा वा कपिर्वा तरुः
नीरे वा कतमोऽपि चेज्जलचरो धर्मादिकार्थाऽग्रभुक् ॥
नान्यत्राखिलराजमंडलशिरोमालोल्लुलद्धूलिका-
पूरापूरितपादपद्मयुगलो राजाधिराजोऽपि च ॥ ४३ ॥
स्नातासु स्त्रीषु राज्ञां कचकुचचरणद्वंद्वहस्तादिलिप्ताः
पाटीराद्या विमानैर्विमलतरवपुर्धारयंतो व्रजन्ति ॥
तद्वत्कौशेयकीटा दिवमथ मनुजा विस्मयः कोऽत्र मातर्
माहात्म्यं ते प्रवक्तुं दशशतवदनो नैवशक्तः कुतोऽन्ये ॥ ४४ ॥

आख्या स्वाख्या तां स्वनाम अर्थवतीं ययावी विदधती कृतवती सती याता गतैव इत्यहं मन्ये । अत्यरुपदिनावकाशात् भूतार्थकत्वात्प्रयोगः । तदुक्तं सनत्कुमार-संहितायां कार्तिकमाहात्म्ये । दशवर्षसहस्राणि विष्णुस्तिष्ठति भूतले । तदर्धं जान्हवी गंगा तदर्धं ग्रामदेवता इति । यद्वा याता इदं लुटः प्रथमपुरुषैकवचनं । याता यास्यतीति मन्ये । हरिः विष्णुः निनालयं वैकुंठं यास्यत्येव । हे भगवति त्वं निना-लयं स्वर्गं न गच्छसि अदो हेतुः अमुष्य हेतुः अदः इदं सामान्ये नपुंसकं । ते हृदयं जनेषु सदयं अयमेव हेतुः मया अन्यः हेतुः न दृश्यते । सर्वेषु गतेषु पापिजनान् कस्तारयिष्यतीति सदयतया त्वमेव तिष्ठसीति सर्वापेक्षया त्वमेव दयालुरसीत्यर्थः ॥ ४२ ॥

त्वत्तटचामिति । त्वत्तीरे । तटं त्रिषु इत्यमरः । महिषः अथवा खरः वा वृषभः वा श्वा वा कपिः वा तरुः वा नीरे कतमोऽपि जलचरश्चेत् धर्मादयो ये अर्थाः पुरुषार्थाः तेषां मध्ये अग्रे भवः अग्र्यः श्रेष्ठः मोक्षः । अग्राद्यत् । तं भुनक्तीति धर्मादिकार्था-ग्रभुक् भवतीति शेषः । मुक्तो भवतीत्यर्थः । अन्यत्र त्वत्तीरादन्यत्र अखिलं यद्राजमंडलं तस्य याः शिरोमालाः ताभ्यः उद्गलंत्यो या धूलिकास्तासां पूरेण आपूरितं पादपद्मयुगलं यस्य तथोक्तः राजाधिराजोऽपि सार्वभौमोऽपि धर्मादिकार्याग्रभुक् मुक्तिभागित्यर्थः न भवतीति शेषः । पूर्वार्धोदितानां धर्मादित्रयं सुलभं मोक्षस्तु अयत्नसाध्यः उत्तरार्धोदितस्य राज्ञः धर्मादि त्रयं सुलभं मोक्षो दुर्लभ इति हेतोः पूर्वार्धोदिता एव श्रेष्ठाः सार्वभौमादपीति भावः ॥ ४३ ॥

स्नातास्विति । राज्ञां स्त्रीषु स्नातासु सतीषु कचकुचचरणद्वंद्वहस्तादिलिप्ताः ये पाटीराद्याः चंदनादयः विमलतरवपुः दिव्यं देहं धारयंतः संतः दिवं व्रजंति । राजस्त्रीषु स्नातासु इत्युक्तमतः पाटीरोत्पन्नं तैलं केशेषु लिप्तं तेन पाटीराः कुचेषु कुंकुमं तेन तदुत्पादकाः ओषधयः चरणलिप्ताः लाक्षारसास्तेन तदुत्पादकवृक्षाः हस्तलिप्ताः चंदना इति ज्ञेयम् । तद्वत् तैस्तुल्यं तद्वत् कौशेयानां कीटाः विमल-तरवपुः दिव्यं देहं धारयंतः संतः दिवं व्रजंति । अथ अनंतरं मनुजाः दिवं

पुरुषोत्तमसूरिनिर्मितं निखिलाघौघहरं सुखप्रदम् ॥
मनुजाः प्रपठंति ये सदा दिवमायांति विमानसंस्थिताः ॥ ४५ ॥
उपायनकरा ये ये राजानः समुपागताः ॥
तांस्तान्तदीयस्थानेषु संस्थाप्यागात्पुरःपुरः ॥ ४६ ॥
गत्वा जयपुरं वीरं जयसिंहं रुरोध तम् ॥
बाजिमेधः कलाबस्मिन् येनाकारि महत्तमः ॥ ४७ ॥
पंचाशल्लक्षसंख्यं स्वं धनं देहीत्युवाच तम् ॥
विप्रोऽसि त्वमहं राजा दक्षिणेति नृपोऽब्रवीत् ॥ ४८ ॥
बाजिराजोऽब्रवीद्राजन् ब्राह्मं क्षात्रं द्वयं मयि ॥
यथेच्छा ते तथा देहि पात्रीभूतोस्मि सांप्रतम् ॥ ४९ ॥
तुलसीपत्रसंयुक्ता मुद्रापेशीर्गजेषु सः ॥
आधाय प्रेषयामास प्रधानेशोऽग्रहीत्तदा ॥ ५० ॥
तदाश्रितं बालकृष्णं पंडिताचार्यधूर्वहम् ॥
बव्रे सोऽपि ददौ तस्मै स्नेहभंगभयान्नृपः ॥ ५१ ॥
ततो वीरान्नृपान्सर्वान्विनिर्जित्य धनं ततः
गृहीत्वागात्स सप्तारं नृपस्याग्रे न्यवेदयत् ॥ ५२ ॥
उद्दिश्य बाजिराजं तं श्लोकमेकं जगौ नृपः ॥
युवराजे प्रधानेषु शृण्वत्सु सदसि स्थितः ॥ ५३ ॥
जायंते बहवः सुताः स्वजननीतारुण्यनाडिंधमा-
स्तेषां ये बुधमान्यतामुपगतास्तैः पुत्रवत्ता पितुः ॥
सूते शंखनकान् पयोधिरधिकं रत्नानि शंखांश्च य-
स्तं रत्नाकरमामनंति न पुनः शंखाकरं केचन ॥ ५४ ॥

व्रजंतीत्यत्र को विस्मयः किमाश्चर्यं । वृक्षाः अपि परंपरासंबंधेन उदकस्पर्शमात्रेण दिवं व्रजंति । ये तु संकल्पपूर्वकं स्नांति मनुजास्ते दिवं व्रजंतीति अत्र किमाश्चर्यमितिभावः । अतः हे मातः ते माहात्म्यं प्रवक्तुं दशशतवदनः शेषोऽपि न शक्तः अन्ये कृतः शक्ताः स्युरिति भावः ॥ ४४ ॥

स्तोत्रपाठफलमाह पुरुषोत्तम इति ॥ ४५ ॥ प्रासंगिकं समाप्य प्रकृतमनुसरति । उपायनकरा इत्यादिभिः । उपायनानि करेषु येषां ते उपायनकराः । उपायनमुपाह्यमुपहारस्तयोपदेत्यमरः । पुरःपुरः अग्रे अग्रे ॥ ४६ ॥ अकारि कृतः कर्मणि लुङि चिण् ॥ ४७ ॥ श्लोकद्वयेन राज्ञः कीर्तिं वर्णयति । कीर्तिरिति । हे प्रभो इत्यध्याहारः । संति उत्तमानि प्रजापालनादीनि यानि कर्माणि तदेव

१०. 'धानोप्यग्र०' पा० भे०.

राजारामपौत्रनीतो निजामन्मुलुकाभिधः ॥
यवनाधीश्वरः प्राप्तः पुण्याख्यां नगरीं प्रति ॥ ५५ ॥
बाजिराजस्तन्नगरीमौरंगाबादसंज्ञिताम् ॥
गत्वा रुरोध महतीं महत्या सेनया युतः ॥ ५६ ॥
पुण्याख्यां नगरीं त्यक्त्वा यवनः स्वपुरीं ययौ ॥
रक्षणार्थं यदा युद्धं बभूव तुमुलं तदा ॥ ५७ ॥
कृपां परित्यज्य कृपाणपाणयः परस्परं संयुयुधू रणाजिरे ॥
शरैः शितैर्दीर्णशरीरका भटा जयैषिणस्ते भुवि शेरते स्म ॥ ५८ ॥
प्रातः समारभ्य निशामुखांतं घोरं सुराधीशपुरीप्रदं तत् ॥
भल्लैश्च खड्गैः परिघैश्च कुंतैर्बभूव युद्धं तुमुलं दिनांते ॥ ५९ ॥
शांतं रजो दिक्षु विभिन्नशीर्षैर्भूरास्तृता सा शुशुभे यथाभः ॥
परागपिंगं ससरोजमेवं रक्तप्रवाहैस्तटिनी प्रवृत्ता ॥ ६० ॥
दंतावलव्रातनुरंगदेहमहीधरोत्थालकशैवलाढ्या ॥
दोःसंघमीना नरशीर्षकच्छा गृध्रैश्च काकैः परिसेवितासीत् ॥ ६१ ॥
दंतींद्रसंस्थो यवनाधिपोऽसौ युद्धं समालोक्य सुविस्मितोऽभूत् ॥
वीराः प्रयाता बहुशो विनाशं मत्वा रणेनालमिति ह्यवोचत् ॥ ६२ ॥
प्रधानवर्योऽपि ततो बभाषे स्वान् वीरवर्यानलमित्यभीक्ष्णम् ॥
निवृत्तयुद्धौ यवनद्विजेन्द्रावव्रापतुः प्रीतिमतीव वीरौ ॥ ६३ ॥
आश्लिष्य चान्योन्यमवोचदेनं शिखाविहिनो यवनः प्रधानम् ॥
इतःपरं सख्यमनारतं नो भवेत्तथा वोपि सदास्तु वीर ॥ ६४ ॥
तथेति चाभाष्य स बाजिराजो जगाम सप्तारपतेः समीपम् ॥
शिखाविहीनोऽपि ययौ स्वबासं पराक्रमं विप्रकृतं प्रशंसन् ॥ ६५ ॥
राजातितुष्टो द्विजवर्यमाह प्रधानपं हे नरवीरसिंह ॥
एकोऽशिखो नैव जितस्त्वयाऽयं लोकद्वयं चापि जितं प्रतापात् ॥ ६६ ॥
तद्वाक्यमाकर्ण्य जगाद वीरो नृपं कृतज्ञं किमियं स्तुतिर्मे ॥
भवत्समाराधितशंभुपादपद्मप्रसादोऽयमलं चकास्ति ॥ ६७ ॥
जयोऽजयो वा भवतीह राज्ञां पुण्याच्च पापाद्वयमत्र तूष्णीम् ॥
निमित्तमात्रं मम वाक्यमेतत् सत्यं जयोऽयं भवतः प्रसादात् ॥ ६८ ॥

मूलं यस्याः सा सत्कर्मावलिमूलका । समासांतः कः । लोकानां यत्रयं तत्र विस्तृता । अत एव अतुला अनुपमा इयं तव कीर्तिः पुष्पप्रधाना लता पुष्पलता पुष्पवल्ली

११. 'लघुशंभुनृपानी०' पा० भे०. १२. 'विहाय' पा० भे० १३. 'मत्वेत्यलंयुज्यत-इत्यवोचत्र' पा० भे०. १४. 'तेनिदेशे' पा० भे०. १५. 'प्रपुण्याद्' पा० भे०.

कीर्तिः पुष्पलता तवेयमतुला लोकत्रये विस्तृता
सत्कर्मावलिमूलका निशि सदा नक्षत्रपुष्पव्रजम् ॥
सूते तं परिगृह्य भानुरुषसि स्नात्वा पयोधौ ध्रुवं
नित्यं विष्णुपदे समर्पयति यन्नो दृश्यतेऽसौ दिवा ॥ ६९ ॥
हे नाथाखिलराजराजिविनुत श्लौरेष सायं सदा
कीर्तिं ते विततां सितां रविकरारक्ताभ्रपात्रे क्षिपन् ॥
तेजो वह्निमधो निधाय तदधः श्यामासहायो ध्रुवं
तारासंघमिषेण संवितनुते स्वच्छान् बताशानिमान् ॥ ७० ॥
उक्त्वा तमेवं नृपवर्यधुर्यं प्रधानवर्यः प्रययौ स्वगेहम् ॥
राजापि तुष्टः कथयन् स तस्य गुणानथांतःपुरमाविवेश ॥ ७१ ॥

॥ इति श्रीशिवकाव्ये पुरुषोत्तमकविविरचिते नवमश्चमत्कारः ॥९॥

नक्षत्राण्येव पुष्पव्रजः तं निशि रात्रौ सूते प्रसवति । भानुः कश्यपस्य मुनेः पुत्रः, उषसि प्राप्तः पयोनिधौ स्नात्वा "अद्भ्य एष उदेतीति" श्रुतेः तं पुष्पव्रजं परिगृह्य त्रोटयित्वा विष्णोः हरेः पदे चरणे । तत्त्वं तु विष्णुपदे आकाशे । वियद्विष्णुपदं वा तु पुंस्याकाशविहायसीत्यमरः । नित्यं समर्पयति ध्रुवं नु । यद्यस्माद्धेतोः दिवा दिवसे असौ पुष्पसमूहः न दृश्यते अनैरिति शेषः । रूपकोत्प्रेक्षयोः संसृष्टिः ॥ ६९ ॥

हे नाथेति अखिलानां राज्ञां या राजिः पंक्तिः तया विनुत स्तुत हे नाथ स्वामिन् श्यामा रात्रिः सहायो यस्येति श्यामासहायः सहायत्वं अग्निप्रज्वालनं । श्यामा-रात्रिस्त्रिवृत्श्यामेत्यमरः । एषः श्लौश्चंद्रः । श्लौर्मृगांकः कलानिधिरित्यमरः । ते विततां विस्तृतां कीर्तिं सितां शर्करां रवेः कराः किरणाः तेन आरक्तं यत् अभ्रं मेघः तदेव पात्रं कटाहः तत्र क्षिपन् त्यजन् सन् तस्य पात्रस्य अधः अधो भागे तेजः प्रतापः स एव वह्निः तं निधाय ताराणां नक्षत्राणां संघः स एव मिषं छलं तेन स्वच्छान् बताशान् शर्करा विकारान् लोके प्रसिद्धान् संवितनुते विस्तारयति । ध्रुवं शंके रूपकोत्प्रेक्षयोः संसृष्टिः ॥ ७० ॥

उक्त्वेति । प्रधानवर्यः वाजिराजः नृपवर्याणां राजश्रेष्ठानां धुरं वहतीति धुर्यः श्रेष्ठः तं शाहुं । धुरोयड्ढकाविति यत्प्रत्ययः । एवं पूर्वोक्तप्रकारेण उक्त्वा स्वगेहं पुण्यनगरमित्यर्थः प्रययौ । तुष्टः स राजाऽपि तस्य प्रधानस्य गुणान् इष्टेभ्यः कथयन् सन् अंतःपुरं आविवेश । अतिहर्षेण स्वस्त्रीभ्योऽपि वर्णनायेतिभावः ॥ ७१ ॥
इति श्रीशिवकाव्यव्याख्यायां स्वयं कृतायां नवमश्चमत्कारः ॥ ९ ॥

---

१६. ' ०त्यसंचितु तेहणार्थामिव नुयन्नो० ' पा० भे०.

आज्ञामवाप्य राज्ञः सोऽयं दाता प्रधानवर्यस्ताम् ॥
नगरीं पुण्यां पुण्यः पुण्यजनैश्चापि संयुतां प्रययौ ॥ १ ॥
स्थित्वा तस्यां कंचित्कालं कालोपमो रिपुव्राते ॥
अमरपुरीतुल्येयं कर्तव्येत्थं व्यचिन्तयन्मनसि ॥ २ ॥
प्राच्योदीच्या दक्षिणदिक्संभूतास्तथा प्रतीच्याश्च ॥
आगत्य कीर्तिदूत्या आहूतास्तेऽवसन्नरास्तत्र ॥ ३ ॥
वणिजः शिल्पव्राते गीते वाद्ये तथैव नृत्येऽपि ॥
अधितष्ठुर्ये कुशला लब्धधनास्ते गरीयसीं नगरीम् ॥ ४ ॥
हृद्या अप्यनवद्या विद्या येषां द्विजोत्तमाः सर्वे ॥
आगत्य तेऽपि तत्र स्थितवन्तो लब्धवेतना नित्यम् ॥ ५ ॥

आज्ञेति । दाता अत एव पुण्यः सः अयं प्रधानवर्यः वाजिराजः राज्ञः शाहोः आज्ञां अवाप्य गृहीत्वा पुण्यजनैः पुण्यपुरुषैः तपस्विभिरितियावत् । अपिशब्दादितरैः । संयुतां पुण्यां पुण्याख्यां नगरीं प्रययौ ॥ १ ॥

स्थित्वेति । रिपुव्राते कालोपमः यमसदृशः । कालो दंडधरः श्राद्धदेवेत्यमरः । स बाजिराजः तस्यां नगर्यां कंचित्कालं स्थिता अनंतरं इयं पुण्याख्या नगरी अमरपुरी अमरावती तया तुल्या अमरपुरीतुल्या कर्तव्या इत्थं अनेनप्रकारेण मनसि व्यचिंतयत् चिंतितवान् ॥ २ ॥

प्राच्योदीच्या इति । प्राच्यां पूर्वस्यां भवाः प्राच्याः उदीच्यां उत्तरस्यां भवा उदीच्याः प्राच्याश्च उदीच्याश्च प्राच्योदीच्याः । भवार्थे यत् प्रत्यये यस्येति चेति ईकारलोपः । दक्षिणा चासौ दिक्च दक्षिणदिक् । पुंवत् कर्मधारयेत्यादिना पुंवद्भावः । दक्षिणदिशि संभूताः दक्षिणदिक्संभूताः । प्रतीच्यां पश्चिमायां भवाः प्रतीच्याः । कीर्तिः दूतीव कीर्तिदूती तया कीर्तिदूत्या आहूताः आकारिताः ते नराः आगत्य उपेत्य तत्र तस्यां नगर्यां अवसन् ॥ ३ ॥

वणिज इति । वणिजः प्रसिद्धाः । शिल्पव्राते शिल्पसंघे गीते वाद्ये तथैव नृत्येऽपि ये कुशलाः ते नराः लब्धं धनं यैस्ते लब्धधनाः संतः अतिशयेन गुर्वीति गरीयसी तां महतीं अति विस्तृतामित्यर्थः । गुर्वीशब्दादीयसुनि प्रियस्थिरेत्यादिना गरादेशः । नांतत्वात् ङीषू । नगरीं पुण्याख्यां अधितष्ठुः स्थितवंतः । अधिशीङ्स्थासां कर्मेति कर्मत्वं ॥ ४ ॥

हृद्या इति । एषा न अवद्याः अनवद्याः दोषरहिताः अत एव हृद्याः हृदयप्रियाः विद्याः चतुर्दश । पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश इति याज्ञवल्क्यः । आसन्नितिशेषः । ते सर्वेऽपि द्विजोत्तमाः ब्राह्मणाः आगत्य लब्धं वेतनं उपजीविका यैस्ते लब्धवेतनाः संतः

भूमौ यद्यद्रत्नं निष्पन्नं सर्वतः सदा तस्य ॥
उपभोगो युक्ततरस्तस्यामेवाभवत्प्रणीतस्य ॥ ६ ॥
एवं तस्मिन्निवसति विद्यावन्तस्तथैव येऽविद्याः ॥
नानादेशनिवासा आगत्येदं समूचिरे द्विजपम् ॥ ७ ॥
योऽदाद्धनं विप्रकुलाय दाता वर्षासु मासे नभसि प्रभूतम् ॥
हतस्त्वयासौ द्विजकल्पवृक्षः सरःपुरेशः शतमन्युमान्यः ॥ ८ ॥
तुल्यस्त्वमेतेन ततोऽधिकोऽसि धनेन भक्त्या द्विजदेवतासु ॥
प्रदेहि वित्तं शरणं कमन्यं व्रजेम वीरोत्तमवन्दितांघ्रे ॥ ९ ॥
श्रुत्वा तदुक्तं वचनं प्रधानस्तान्विप्रवर्यान्निजगाद मानी ॥
हे विप्रवर्याः स ददौ कियद्धो धनं सदा तद्ददतां चिराय ॥ १० ॥

तत्र तस्यां नगर्यां स्थितवंतः तस्थुः । अनेनास्य गुणज्ञत्वं दर्शितं ॥ ५ ॥

भूमाविति । भूमौ यद्यत् रत्नं वसनादिषु सर्वपदार्थेषु श्रेष्ठं । रत्नं श्रेष्ठे मणावपीति विश्वः । निष्पन्नं सर्वेभ्यः इति सर्वतः सर्वदेशेभ्यः प्रणीतस्य आनीतस्य तस्य रत्नस्य तस्यामेव नगर्यामेव सदा सर्वकालं अतिशयेन युक्त इति युक्ततरः उपभोगः अभवत् ॥ ६ ॥

अथ श्रावणे दक्षिणादानप्रकारं विवक्षुरादौ तन्निमित्तमाह एवमित्यादिभिः । एवमिति । तस्मिन् वाजिराजे एवं अनेनप्रकारेण निवसति सति नानाविधाः देशाः निवासो वसतिस्थानं येषां ते तथोक्ताः विद्यावंतः तथैव अविद्याः सर्वे आगत्य द्विजपं वाजिराजं इदं वक्ष्यमाणं समूचिरे जगदुः ॥ ७ ॥

य इति । शतं मन्यवो यज्ञाः यस्येति शतमन्युः इन्द्रः । मन्युर्दैन्ये क्रतौ क्रुधीतिविश्वः । तस्यापि मान्यः अतिसंपन्न इत्यर्थः । द्विजानां कल्पवृक्षः दाता यः सरःपुरेशः त्र्यंबकाख्यः वर्षासु पर्जन्यकाले । वर्षा अथ शरत्समा इत्यमरः । नभसि मासे श्रावणे मासे प्रभूतं धनं उत्तमं धनं । प्रभूतं प्रचुरं प्राज्यमित्यमरः । विप्रकुलाय अदात् सः असौ त्वया हतः ॥ ८ ॥

तुल्येति । हे वीरोत्तमवंदिताघ्रे त्वं धनेन वित्तेन हेतुना एतेन त्र्यंबकाख्येन तुल्यः असि द्विजदेवतासु भक्त्या हेतुना ततः तस्मात् अधिकः असि अतः वित्तं प्रदेहि । अन्यं कं शरणं व्रजेम ॥ ९ ॥

श्रुत्वेति । मानी मानवान् अचिराय शीघ्रं । चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यमरः ॥ १० ॥

---

१. 'मासि नभसि विप्रेभ्यो धनं यः प्रददौ बहु । स मारितस्त्वया नाथ दामाडे इति विश्रुतः' पा० भे०. २. 'तत्तुल्यस्त्वं धनं देहि श्रावणेऽस्मिन्नुपागते । विप्राणां पालको नान्यस्त्वत्तोस्ति जगतीतले' । पा० भे०. ३. 'प्रधानवर्यस्तद्वाक्यमाकर्ण्याह द्विजोत्तमान् । किं किं ददौ स मे शत्रुस्त द्ब्रूत सकलं द्विजाः । पा० भे०.

द्विजास्तदोचुर्नभसि प्रजेशो मृल्लिङ्गकृद्विप्रगणाय मुद्राः ॥
पंक्तिद्वयं शिष्टगणाय पञ्च दशाधिकाः पञ्चदशापवादात् ॥ ११॥
प्रहस्य विप्रानवदद्द्विजेशो निजगृहान्यात पुनश्च काले ॥
आयात दारिद्र्यदवानलो वः शान्तो नृपाधीशधनांबुवृष्ट्या ॥ १२॥
द्विजातयो हृष्टतरास्तदा ते स्वीयानि गेहानि ययुर्युवानः ॥
द्विजाधिपस्तत्क्षणमेव शिल्पिव्रजं समानाय्य चकार चैतत् ॥१३॥
प्रधानो ब्राह्मणान्सर्वान्नानादेशसमागतान्
मासे नभसि चायाते त्यक्त्वा तान्स व्यसर्जयत् ॥
पुराद्बहिः पर्वतीति गिरिर्यो विश्रुतः क्षितौ ॥
उपत्यकायां तस्यासौ शालाश्चक्रे सुखावहाः ॥ १४ ॥
महानसानां च ततीः स्वापशालास्तथा पराः ॥
जलाशयं तथा रम्यं कारयामास वीरराट् ॥

द्विजा इति । पंक्त्योर्द्वयं पंक्तिद्वयं । विंशतिसंख्याकाः । पंक्तिर्विंशतीत्यादिनानि पातितः । पंक्तिशब्दो दशवाचकः । मुद्राः रौप्यमयीः मृल्लिङ्गकृद्विप्रगणाय शिष्टगणाय अवशिष्टविप्रसंघाय पंच वा दश वा अधिकाः अथवा पंचदश अदात् दत्तवान् । शेषं सुगमं ॥ ११ ॥

प्रहस्येति । द्विजेशः वाजिराजः प्रहस्य तस्यातीवाल्पं दानमिति मनसि निधायेतिभावः । विप्रान् निजगृहान् स्वगृहाणि । गृहाः पुंसि च भूम्न्येवेत्यमरः । यात पुनः स्वकाले नभसि आयात आगच्छत वः युष्माकं दारिद्र्यमेव दवानलः वनाग्निः । दवदावौ वनारण्यवह्नी जन्महरौ भवौ इत्यमरः । नृपाधीशः शाहुराजः तस्य धनं तदेवांबु तस्य वृष्ट्या शांतो जात इति शेषः । इत्यवदत् । एतेन राज्ञ एव प्रत्यब्दं दक्षिणाप्रदाने आज्ञा स्वस्यानौद्धत्यं च सूचितं ॥ १२ ॥

द्विजातय इति । युवानः तरुणाः अनेन अवश्यं आगमिष्यंतीति सूचितं ॥ १३ ॥

---

४. ' द्विजा ऊचुर्द्विजाधीश शृणु दानं रिपोस्तव । प्रतिपदिनमारभ्य मृत्सालिंगानि तद्गृहे । चक्रुः सहस्र संख्यानि प्रत्यहं श्रावणे द्विजाः । तेभ्यो विंशतिसंख्याका मुद्रा रौप्यमयीर्ददौ । अन्येभ्यश्चाथ विप्रेभ्यो दश वा पंच वा त्रयं । ददौ स वाहिनीनाथस्तत्तद्विद्यानुसारतः ' । पा० भे०. ५. ' वाजिराजः प्रहस्यासौ विप्रानूचे तदा वचः । इतः परं सविद्यानां विप्राणां भवनेषु तु । दारिद्र्य नाम किं ब्रूहीत्येव वार्ता भविष्यति । अविद्यानां द्विजातीनां गृहे लक्ष्मीर्भवेदलम् । ' पा० भे०. ६. क्वचिदधिकोयं श्लोकः ७. 'पुर्या बहिः ' पा० भे०.८. ' ०लाधिप्रेषु० ' पा० भे०. ९. अधिकोयंश्लोकः क्वचित् १०. ' ०दा अन्नपानहितावहाः ' पा० भे०.

प्राकारैरावृताः सम्यग्द्वारैरपि तथोत्तमैः ॥
प्रावृट्कालेऽपि सुखदास्तरुवृन्दसमाकुलाः ॥ १५ ॥
कर्णाटकस्था द्रविडा स्तथांध्रा वङ्गाश्च सारस्वतनागराश्च ॥
ये कान्यकुब्जा अपि मिश्रवर्याः समैथिला मालवका ययुस्ते ॥ १६ ॥
ये कोंकणस्थास्त्रिविधा अनूपसंस्था महाराष्ट्रभवाश्च ये ते ॥
विद्याविहीना अपि विद्ययाढ्याः समाययुः सर्वत एव सर्वे ॥ १७ ॥
विद्वद्वरिष्ठं सकलागमेषु निष्णातमीर्ष्यारहितं सुवर्णे ।
लोष्टे समत्वं दधतं दयालुं दीनावनं निर्मलचित्तवृत्तिम् ॥
सर्वागमज्ञं सदयं विरक्तं तं बालकृष्णं सनयं प्रधानः ॥
विद्वत्सभानायकमेकमेव चकार भूपालसभाभिरामम् ॥ १८ ॥
शतं शतार्धं द्विशतं त्रयं वा चत्वारि वा पञ्च च षट् तथाष्ट ॥
शतानि मुद्राः प्रददौ द्विजेभ्यः परीक्ष्य विद्या निगमागमाख्याः ॥ १९ ॥
अत्युत्तमा ये समुपागतास्तानानीय गेहं शिबिकादियानैः ॥
धनं तदिच्छा परिपूर्तिकारि दत्वा प्रधानोऽगमयद्गृहांस्तान् ॥ २० ॥

ये कोंकणस्था इति । चित्तपावनाः काराष्ट्राः देवर्षय इति त्रिविधाः । अनूपसंस्थाः समुद्रजलमध्यस्थनगरस्थाः । सर्वतः सर्वदेशेभ्यः सर्वे समाययुः ॥ १७ ॥

अथ दक्षिणाप्रदानप्रकारमाह । सर्वागमज्ञमिति । सर्वे ये आगमाः शास्त्राणि तानि जानातीति सर्वागमज्ञः तं । आगमः शास्त्रमाम्नाय इत्यमरः । सदयं दयालुं विरक्तं लोभरहितं सुनयं नीतिमंतं अविवेकरहितमितियावत् । भूपालो जयसिंहः तस्य या सभा तां अभिरमयतीति भूपालसभाभिरामः तं । अनेन राजाश्रितत्वात् सकलचातुर्याढ्यत्वं सूचितं । तं जयसिंहादानीतं बालकृष्णं विद्वत्सभानायकं एकमेव चकार ॥ १८ ॥

अथ स्वप्रासादे दक्षिणाप्रदानं द्वाभ्यामाह शतमिति । प्रधान इतिशेषः । निगमागमाख्याः वेदशास्त्ररूपाः विद्याः परीक्ष्य ज्ञात्वा द्विजेभ्यः शतं शतसंख्याः शतार्धं पंचाशत् द्विशतं त्रयं त्रिशतं वा चत्वारि शतानि वा पंच शतानि वा षट् शतानि वा अष्ट शतानि मुद्राः यथायोग्यं प्रददौ । अत्र कोटिचतुष्टयं । उत्तमाः अत्युत्तमाः मध्यमाः कनिष्ठाश्चेति । तन्मध्ये उत्तमानां पूर्वश्लोकोक्ता दक्षिणा अत्युत्तमानां द्वितीयश्लोकोक्ता मध्यमकनिष्ठानां तु रमणकप्रदेशे ददाविति ज्ञेयं ॥ १९ ॥

अत्युत्तमा इति ॥ २० ॥

---

११. 'विप्र०' पा० भे०. १२. '०काश्चसर्वे' '०वजाययुश्च' इति च वा पा० भे०. १३. अधिकोऽयंश्लोकः क्वचित् १४. 'विलोक्यविप्राधिपतिः प्रधानः' पा० भे०. १५. 'द्विजवर्यमार्यं' पा० भे०. १६. 'द्विजेशः' पा० भे०.

द्वार्भिर्युते पंक्तिमिताभिरीशः परीक्षकैर्दातृवरैर्युताभिः ॥
शिष्टद्विजेभ्यो रमणप्रदेशे ददौ धनं वीक्ष्य गुणान्स तेषाम् ॥२१॥
परीक्षकान्वैदिकशास्त्रिणश्च विधानरूपं प्रददौ द्विजेभ्यः ॥
स्वयं च दाता दमितारिसंघो धनं द्विजाधीपभुवि व्यवाप्सीर्त् ॥
यामाष्टकत्रिकमखण्डमथ द्विजाग्र्य-
भूमावुवाप धनधान्यमसौ स्वधुर्यैः ॥
एतद् व्रतं नरवरः प्रतिहायनं य-
च्चक्रे तदेव तनुजा अपि चक्रिरे ते ॥ २२ ॥
एवं स लक्षप्रमितद्विजेभ्यो धनं ददौ दीनजनप्रपालः ॥
युधिष्ठिरो वाजिमखेषुदात्तास्त्रिष्वेव दातास्य तु पुत्रपौत्राः ॥ २३ ॥
ये सूत्रमात्रधरविप्रजनास्तु तेभ्यः
पञ्च स्ववेदनिरताश्च पुराणविज्ञाः ॥

द्वार्भिरिति । ईशः सः शिष्टाः अवशिष्टा ये द्विजास्तेभ्यः तेषां गुणान् परीक्ष्य पंक्त्या दशभिर्मिताभिः परीक्षकैः पंडितैः दातृवरैश्च युताभिः द्वार्भिर्युते रमणाख्यप्रदेशे धनं वित्तं ददौ ॥ २१ ॥

यामेति । असौ द्विजाग्र्या एव भूमिस्तस्यां । यद्वा द्विजा एव अग्रभूमिः श्रेष्ठभूमिस्तस्यां धनं वित्तं तदेव धान्यं बीजं यामानां प्रहराणां यत् अष्टकं तस्य यत्त्रिकं चतुर्विंशतिप्रहरान् त्रीनहोरात्रानिति यावत् । अखंडं अविच्छिन्नं स्वस्य धुरं वहंति ते धुर्याः मंत्रिणस्तैः करणीभूतैः अन्यत्र धुर्यैर्बलीवर्दैः उवाप वपति स्म । नरवरः सः यत् एतत् व्रतं प्रतिहायनं प्रत्यब्दं । हायनोऽस्त्री शरत्समा इत्यमरः । चक्रे तदेव तनुजाः बल्लालादयः पुत्राः पौत्रा अपि चक्रिरे कृतवंतः ॥ २२ ॥

एवमिति । दीनजनप्रपालः सः एवं लक्षमितद्विजेभ्यः धनं ददौ । इदं दानं युधिष्ठिरापेक्षयातिरिक्तमित्याह । दाता युधिष्ठिरः त्रिष्वेव वाजिमखेषु तत् धन अदात् अस्य तु पुत्रपौत्राः अपि अदुः अतः युधिष्ठिरापेक्षयाप्याधिक्यमस्य दानस्येति भावः ॥ २३ ॥

अथ दानव्यवस्थामाह । ये सूत्रमात्रेति । ये सूत्रमात्रं यज्ञोपवीतमात्रं तस्य धराः

---

१०. 'अथावशिष्टा बहवो द्विजेंद्राः सहस्रशस्तान्रमणाख्यभूमिम् । नीत्वा स तत्रापि च दिक्प्रसंख्यद्वारेषु दातृन्विनियोज्यभिज्ञान् ॥' पा० भे०. १८. अधिकोऽयं श्लोकः क्वचित् ।

११ 'यामाष्टकत्रिकमखंडमयं द्विजेभ्यो द्वारे[illegible]षोडशसुमंत्रिगणैः सुशिष्टैः । मुद्राः परीक्ष्य-चपरीक्षितविप्रसंघेप्रत्यब्दमेवविततारततत्समोन्यः [illegible] । पा० भे०. २०. 'एवं ददौलक्षमितद्विजेभ्यः किंचिद्विहीनेभ्यउदारधीः सः । प्रत्यब्दमेवं व्रतमाचचार स्वर्गे ऽपिकीर्तिं व्यतनोद्विजेन्द्रः'॥ पा० भे०.

आयुर्विदो गणिततत्त्वविदोऽपि ये ये
दिक्पञ्चकं रमणके ददौ प्रधानः ॥ २४ ॥
नार्यो नराः सुवसनाः सकला नगर्या
निर्गत्य रत्नमयभूषणभूषिताश्च ॥
त्वष्टाः प्रपुष्टवरवाहनरूढदेहा
द्रष्टुं ययुः प्रतिदिनं रमणप्रदेशम् ॥ २५ ॥
या पर्वती नगरवासिजनैरुपेता
मण्युत्तमामलविभूषणभूषिताभिः ॥
ताभिः स्तनंधयसुतासुतसेविताभि-
र्नारीभिरेणशिशुदृग्भिरुशत्तमाभिः ॥ २६ ॥
मातङ्गकुम्भविगलन्मदवारिगन्ध-
लुब्धालिगुञ्जितयुतायुतवाजिशब्दैः ॥
पर्यन्तभूभवविशालरसालताल-
शालालिकोकिलकलध्वनिभासुरा या ॥ २७ ॥

ब्राह्मणचिह्नधराः न तु विद्वांस इत्यर्थः तेभ्यः पंचमुद्राः । ये स्ववेदनिरताः शाखा-पाठकाः ये पुराणविज्ञाः पौराणिकाः ये आयुर्विदो वैद्याः ये गणिततत्त्वविदः दैवज्ञाः तेभ्यः रमणके देशे दिशां पंचकं पंचाशन्मुद्राः ददौ ॥ २४ ॥

अथ पर्वतीं वर्णयन् रमणप्रदेशमेकेनवर्णयति । नार्य इति । प्रपुष्टानि अत एव वराणि वाहनानि आश्वादीनि तानि रूढाः देहाः एषां ते तथोक्ताः हृष्टाः सुवसनाः सुवस्त्राः रत्नमयानि यानि भूषणानि तैः भूषिताः सकलाः संपूर्णाः नराः नार्यश्च नगर्याः निर्गत्य प्रतिदिनं रमणप्रदेशं द्रष्टुं ययुः ॥ २५ ॥

अथ नवभिः श्लोकैः पर्वतीं वर्णयति । येति । नगरवासिजनैः उपेता युक्ता । मणिभिः हीरकादिभिः उत्तमानि श्रेष्ठानि अत एव अमलानि यानि भूषणानि तैः भूषिताभिः । स्तनंधयाः स्तनपानाः याः सुताः कन्यकाः सुताः पुत्राश्चैतैः सेविताभिः । आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियांत्वमी । आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समित्यमरः । यद्वा स्तनंधयाः ये सुतासुताः कन्यापुत्राः तैः सेविताभिः । यद्वा स्तनंधयाः सुताः यासां ताः स्तनंधयसुताः कन्यकाः स्नुषाः वा ताभिः सुतैश्च सेविताभिः । यद्वा स्तनंधयसुतानां कन्यकानां स्नुषाणां वा सुतैः पुत्रैः सेविताभिः । नारीभिः प्रौढाभिरित्यर्थः उपेता युक्ता । उशत्तमाभिः कमनीयाभिः एण-शिशुदृग्भिः मुग्धाभिरित्यर्थः उपेता या सा निखिलां हरिविश्वमूर्तिं जिगायेति नवमश्लोकेनान्वयः ॥ २६ ॥

मातंगेति । मातंगानां गजानां कुंभाः गंडस्थलानि तेभ्यः विगलत् यत् मदवारि

या सर्वतः परिसरित्तटिनीजलौघ-
वीचीशतोद्धतसमीरणसेव्यमाना ॥
अभ्रंलिहैरुपरि देवगृहैरुपेता
मूर्ध्नस्फुरत्कनककुम्भरुचा विचित्रैः ॥ २८ ॥
वामीरथद्विरदमानवयानजुष्टा
तुष्टान्तरद्विजसमूहविघोषघुष्टा ॥
योषापदाधिगतनूपुरशब्दरम्या
नम्याखिलैः स्थविरबालकसंघगम्या ॥ २९ ॥
पीनोन्नतातुलकुचस्थलरत्नमुक्ता-
मालावलिप्रचुरभाभिरुदारवाभिः ॥
वाराङ्गनाभिरभितोऽभिविराजमाना
हैमांबराभिरुपयाततडित्प्रभाभिः ॥ ३० ॥

तस्य यो गंधस्तस्मिन् लुब्धाः ये अलयः तेषां यद्गुंजितं तेन युता युताः एकत्र-स्थिताः ये वाजिनः अश्वास्तेषां शब्दैः उपलक्षितेतिशेषः । यद्वा अयुतसंख्यानां वाजिनां शब्दैः उपलक्षितेतिशेषः । पर्यंतभूः प्रांतभूः तस्यां भवाः विशालाः विस्तीर्णाः ये आम्राः ताला: शालाश्च तेषां या आलिः पंक्तिः तत्र ये कोकिलाः तेषां कलध्वनिः तेन भासुरा शोभमाना । यद्वा पर्यंतभूभवविशालरसालतालशालेषु ये अलयः भ्रमराः कोकिलाश्च तेषां कलध्वनिः तेन भासुरा । यद्वा अलीनां भ्रमराणां कोकिल इव ध्वनिः अलिकोकिलध्वनिः तेन भासुरा या ॥ २७ ॥

येति । सर्वतः आसमंतात् परिसरंती या तटिनी नदी तस्याः यज्जलं तस्य य ओघः पूरः तस्य या वीचयस्तरंगाः । भंगस्तरंगऊर्मिर्वा स्त्रियां वीचिरयो र्मिषु इत्यमरः । तेषां शतानि तेभ्यः उद्धतो यः समीरणः वायु तेन सेव्यमाना उपरि ऊर्ध्वप्रदेशे अभ्रंलिहैः मूर्ध्नि स्फुरत्कनककुंभानां सुवर्णकलशानां रुचा कांत्या विचित्रैः देवगृहैः प्रासादैः उपेता या युक्ता ॥ २८ ॥

वामीति । वाम्यः वडवाः । बालः किशोरो वाम्यश्चा वाडवा वाडवं गणे इत्यमरः । रथाः प्रसिद्धाः द्विरदाः गजाः मानवयानानि शिबिकाः तैः जुष्टा सेविता । तुष्टांतराः तुष्टचित्ताः । यथेष्टधनलाभादितिभावः । ये द्विजास्तेषां समूहाः तेषां विशिष्टो यो घोषः वेदघोषः तेन घुष्टा घोषयुक्ता । योषाणां स्त्रीणां यानि पदानि चरणाः तेषु अधिगतानि यानि नूपुराणि तेषां शब्देन रम्या रमणीया । अखिलैः जनैः नम्या देवालययुक्तत्वादितिभावः । स्थविराः वृद्धाः बालकास्तेषां संघेन गम्या एतेन सुप्रवेशत्वं सूचितं ॥ २९ ॥

पीनेति । पीनौ पुष्टौ उन्नतौ उच्चौ अत एव अतुलौ अनुपमौ यौ कुचौ तयोः स्थलं

या मण्डलाधिपतिराजनियुक्तविप्र-
संघैः समाश्रिततमा नटनर्तकैश्च ॥
सूतैश्च मागधजनैरपि बन्दिसंघै-
र्व्यापारनिष्ठवणिजां पटवेश्मभिश्च ॥ ३१ ॥
मालूरपूगचयदाडिमजांबवाद्यै
रंभाफलैः पनसचूतभवैः फलैश्च ॥
वैदूर्यमारकतहीरमुखैश्च रत्नै-
र्मुक्ताफलैरपि च हट्टनिवेशितैर्या ॥ ३२ ॥
देवा उपर्यपि तदा सुरयानसंस्था
यद्विप्रसंघकुतुकं प्रविलोकयन्तः ॥
तस्थुर्बलाहकसमूहतिरोहितास्ते
नेदं महेन्द्रवसताविति भाषमाणाः ॥ ३३ ॥

उरःस्थलं तत्र याः रत्नानां हीरकादीनां मुक्तानां च मालाः माल्यानि तासां आवलिः पंक्तिः तया प्रचुरा भा कांतिर्यासां ताभिः उदारा वाक् यासां ताभिः हैमानि हेममयानि अंबराणि वस्त्राणि यासां ताभिः अत एव उपयाताः प्राप्ताः यास्तडितस्ता इव प्रभाः प्रकृष्टभायुक्ताः ताभिः वारांगनाभिः वेश्याभिः अभितः परितः विराजमाना शोभमाना ॥ ३० ॥

येति । मंडलानां ये अधिपतयो राजानः तैः नियुक्ताः ये विप्राः उभयवेतनास्तेषां संघैः समाश्रिततमा । एतेन सार्वभौमपदावाप्तिः सूचिता । नटैः नर्तकैश्च समाश्रिततमा । सूतैः पौराणिकैः मागधजनैः बंदिसंघैश्च समाश्रिततमा व्यापारनिष्ठवणिजां पटवेश्मभिश्च समाश्रिततमा या ॥ ३१ ॥

मालूरेति । मालूराणि नारिकेलानि बिल्वानि वा । मालूरः श्रीफले बिल्वे इति विश्वः । पूगानि क्रमुकाणि तेषां चयः दाडिमानि प्रसिद्धानि जांबवानि जंबुफलानि आद्यानि येषां तानि तैः फलैः पनसाः चूताश्च तेभ्यः भवैः फलैश्च युक्तेति शेषः । वैदूर्याणि विदूरात्पर्वताद्भवंति तानि वैदूर्याणि । विदुराञ् इति अप्रत्ययः । मारकतानि हीराश्च मुखं मुख्याः येषां तैः रत्नैः हट्टे आपणे निवेशितैः मुक्ताफलैश्च युक्ता या ॥ ३२ ॥

देवा इति । तदा दक्षिणाप्रदानसमये सुरयानेषु विमानेषु संतिष्ठंति ते सुरयानसंस्थाः । बलाहकानां समूहे तिरोहिताः अंतर्हिताः इदं कृत्यं महेंद्रवसतौ अमरावत्यां न इति भाषमाणाः देवा अपि यत् विप्रसंघकुतुकं यस्याः पर्वत्याः विप्रास्तेषां संघस्य कुतुकं कौतुकं विलोकयंतः संतः उपरि ऊर्ध्वप्रदेशे तस्थुः स्थितवंतः ३३ ॥

नागा नगेन्द्रपदभूविवरोपयाताः
पातालतो मधुरगानविलुब्धचित्ताः ॥
यद्रम्यकौतुकविलोकनजातहर्षाः
शीर्षाणि रत्नविमलान्यधुनन्नितान्तम् ॥ ३४ ॥
सा पर्वती द्रुहिणनिर्मितवस्तुजात-
युक्ता जिगाय निखिलां हरिविश्वमूर्तिम् ॥
या कौरवेशभवने निखिलैर्नृपालै-
र्दृष्टार्जुनेन च तथा समराङ्गणे ताम् ॥ ३५ ॥
यन्त्रेषु गर्जत्सु च दीपिकासु सहस्रशो दीप्ततरासु मार्गे ॥
श्रितेषु चान्नेषु नरेषु मार्गं पश्यत्सु विप्रा नगरीं ययुस्ते ॥ ३६ ॥
राजा तु वृत्तमखिलं द्विजबन्धुतस्त-
च्छ्रुत्वातिहर्षभरनिर्वृतमानसोऽभूत् ॥
तस्मिन्नुपागतवति प्रशशंस तं च
प्रत्यब्दमस्य कुरु वृद्धिमिति ह्यवादीत् ॥ ३७ ॥

नागा इति । पातालादिति पातालतः नगेंद्रः पर्वती तस्य पदं चरणः तस्य संबंधिनी भूः । यद्वा नगेंद्रस्य पदं स्थानं तस्य संबंधिनी भूः भूमिः तस्याः विवराणि तेभ्यः उपयाताः आगताः मधुरगाने विलुब्धं चित्तं येषां ते तथोक्ताः यस्याः पर्वत्याः रम्यं यत्कौतुकं तस्य विलोकनेन जातः हर्षो येषां ते तथोक्ताः । रत्नैः मणिभिः विमलानि शीर्षाणि नितांतं अधुवन् अकंपयन् ॥ ३४ ॥

सेति । द्रुहिणः ब्रह्मा । ब्रह्मात्मभूः सुरज्येष्ठ इत्यमरः । तेन निर्मितं यद्वस्तुजं वस्तुजातिः । जातं जात्यौषजन्मसु इत्यमरः । तेन युक्ता सा पर्वती या कौरवेशभवने धृतराष्ट्रगृहे निखिलैः नृपालैः तथा तेन प्रकारेण अर्जुनेन समरांगणे दृष्टां तां हरेः विष्णोः या विश्वमूर्तिः विश्वरूपं तां जिगाय ॥ ३५ ॥

अथ संध्यायां ब्राह्मणानां नगरप्रवेशप्रकारमाह यन्त्रेष्विति । विप्राः ब्राह्मणाः यंत्रेषु तोफासु दारुसंसर्गादितिभावः । गर्जत्सु । दारुलक्षणं । तोफालक्षणं च मूले एव स्फुटीभविष्यति । सहस्रशः दीपिकासु मार्गे नगरप्रवेशमार्गे दीप्ततरासु सतीषु । अन्नेषु श्रितेषु पाचितेषु मार्गभोजनार्थं विप्राणामितिभावः पश्यत्सु सत्सु तां नगरीं ययौ ॥ ३६ ॥

राजेति । राजा शाहुः । तत् वृत्तं दक्षिणाप्रदानरूपं तस्मिन् वाजिराजे उपागतवति सप्तारं प्राप्ते सति शेषं स्पष्टं ॥ ३७ ॥

धनिकस्य गृहे समर्पितं धनमन्यत्र यथा प्रलभ्यते ॥
द्विजपाणितले तथार्पितं धनमन्यत्र नरैरवाप्यते ॥ ३८ ॥

नानाविधानि वसनानि महाधनानि
हैमानि भूषणवराणि च मौक्तिकानि ॥
रत्नानि ताम्रमयपात्रसमूहमेके
याता निजान् जनपदान्मुदिताः प्रगृह्य ॥ ३९ ॥

कोंकणस्था द्विजाः केचित्समागत्येति तं जगुः ॥
त्वयि नाथे ब्राह्मणानां पीडायुक्ता द्विजप्रभो ॥ ४० ॥
अनूपदुर्गं यन्नाम्ना वसयीत्यभिविश्रुतम् ॥
तत्संस्था म्लेच्छसंघाता बाधन्तेऽस्मान्प्रधानप ॥ ४१ ॥
द्विजातीनां वचः श्रुत्वा कनीयांसं सहोदरम् ॥
चिमाजिसंज्ञं प्रोवाच गच्छ म्लेच्छाग्निवारय ॥ ४२ ॥
स बाढमिति तद्वाक्यमाददे शिरसा नमन् ॥
विप्रा अपि निजान्गेहानाययुः स्वस्थमानसाः॥ ४३ ॥
अयुते द्वे पदातीनां गृहीत्वा युद्धदुर्मदः ॥
पञ्चाशच्चापि यन्त्राणि पाश्चात्यजलधिं ययौ ॥ ४४ ॥
स सागरस्य तीरे हि समाश्रितयमास्थितः ॥
म्लेच्छानां नाशने युक्तिं नैवापेयाद् द्विजाधिपः ॥ ४५ ॥
अत्र युद्धं कथं कार्यं ते समुद्रे वयं भुवि ॥
मद्वीर्यस्य परीक्षार्थं ज्यायसेदं नियोजितम् ॥ ४६ ॥

तद्धेतुमाह धनिकस्येति । अन्यत्र ग्रामांतरे अन्यत्र अन्यजन्मनि ॥ ३८ ॥

अथ विप्राणां स्वस्वदेशप्रयाणमाह नानेति । एके मुदिताः हृष्टाः संतः निजान् जनपदान् देशान् याताः गताः ॥ ३९ ॥

अथ वाजिराजस्य भ्रातुः कनीयसः चिमाजीतिप्रसिद्धस्य प्रतापं वर्णयति कोंकणस्था इत्यादिभिः षोडशैः । कोंकणस्था इति । तं वाजिराजं इति जगुः ऊचुः । इति किं त्वयि नाथे पालके सति ब्राह्मणानां पीडा युक्ता किं इति काकुः । अथवा अयुक्तेति च्छेदः ॥ ४० ॥

अनूपेति । अनूपदुर्गं । जलप्रायमनूपंस्यादित्यमरः ॥ ४१ ॥ ४२–४७ ॥

एवं मनसि विचार्य समुद्रं स्तौति त्रिभिः । हे समुद्रेति । हे समुद्र हे भगवन् हे दयानिधे हे विप्रभक्त । यद्वा विप्रभक्तो यो हरिः विष्णुः तस्य कामिनी पत्नी लक्ष्मीः तस्याः पिता जनकः । हे नदीपते । ब्राह्मणानां योर्थः प्रयोजनं । अर्थोभिदेय

---

२१ 'ोत्येदमूचिरे' पा० भे०. २२. 'ोवापरयतकाचन' पा० भे०.

कृतकार्यो भवेयं चेत्प्रवेक्ष्यामि निजां पुरीम् ॥
नो चेत्प्राणान्प्रधक्ष्यामि समराग्नौ निजानहम् ॥ ४७ ॥
हे समुद्र भगवन्द्यानिधे विप्रभक्तहरिकामिनीपतेः ॥
ब्राह्मणार्थकरणोद्यताय मे देहि मार्गमधुना नदीपते ॥ ४८ ॥
कामिनीजनकवत्समं निजं स्वान्तमद्य कुरु मा पयोनिधे ॥
शीतपर्वतसुतप्रगूहनात्त्वां शरण्यमिति मन्महे वयम् ॥ ४९ ॥
शीतपर्वतसुतप्रगोपनं शालकत्वमनुसृत्य तत्कृतम् ॥
रक्षितासि यदि मामकीर्तितस्त्वं शरण्य इति तर्हि वक्ष्यसे ॥ ५० ॥
एवमस्य वचनं निशम्य तद्वारिधिः शरणयातकामदः ॥
स्वप्र एत्य निजगाद हे द्विज श्वस्त्वयाभिसतिः प्रगृह्यताम् ॥ ५१ ॥
ततः समागत्य चिमाजिनामा सैन्येन सार्धं प्रणनाम वार्धिम् ॥
मार्गं ददौ तस्य विकृष्य वारि प्रमादिषु म्लेच्छगणेषु तूर्णम् ॥ ५२ ॥
युद्धं महत्तत्र बभूव साद्धं यामद्वयं तस्य च तैः प्रवीरैः ॥
हत्वा स तान्म्लेच्छगणान्समस्तान्पुरं विवेशाप्तभयो द्विजेन्द्रः ॥ ५३ ॥
संस्थाप्य तत्र द्विजवर्यमेकं सुरक्षकं वीरवरैः समेतम् ॥
नौकाभिरुत्तीर्य स विप्रवर्यः पुण्याभिधां स्वां नगरीं जगाम ॥ ५४ ॥

रैवस्तुप्रयोजननिवृत्तिषु इत्यमरः । तस्य करणं आचरणं तत्र उद्यताय मे मह्यं अनेनात्यंतावश्यं मत्कार्यं कर्तव्यमिति सूचितं । अधुना मार्गं देहि ॥ ४८ ॥

कामिनीति । हे पयोनिधे कामिनीनां पत्नीनां नदीनां ये जनकाः पर्वतास्तैरतुल्यं तद्वत् पाषाणतुल्यं कठोरमित्यर्थः । स्वांतं हृदयं मा कुरु न कर्तव्यमित्यर्थः । यद्यपि माङि लुङिति सर्वलकारापवादेन लुङ्ना भाव्यं तथापि निषेधार्थो माशब्दोप्यस्तीति न दोषः । शीतेति । वयं शीतपर्वतो हिमालयः तस्य सुतः मैनाकस्तस्य प्रगूहनात् गोपनात् त्वां शरणे साधुः शरण्यः तं शरण्यं मन्महे जानीमः ॥ ४९ ॥

शरण्यत्वं प्रतिपादितं तत्तावन्न संभवतीत्याह शीतेति । शीतपर्वतो हिमालयः तस्य सुतस्य प्रगोपनं रक्षणं शालकत्वं श्वशुरत्वं अनुसृत्य कृतं यदि मां अकीर्तितः सकाशात् रक्षितासि तर्हि मयेति शेषः । शरण्य इति वक्ष्यसे । वचपरिभाषणे इत्यस्मात् कर्मणिलृट् ॥ ५० ॥

एवमिति स्पष्टार्थमेतत् ॥ ५१–५४ ॥

कुप्यमिति । कुप्यं क्षौमादि अकुप्यं हेमरूप्यादि । स्यात् कोशश्च हिरण्यं च

---

२३. '०णाःपरित्यक्ष्याहतिनिश्चित्यतस्थिवान्' पा० मे०.

कुप्यं तथाकुप्यमपि प्रभूतं धनं ततस्त्यं यदवापि तेन ॥
सर्वं स राज्ञे गजबाजिना च निवेदयामास गुणालयाय ॥ ५५ ॥
बाजिराजस्य पुत्रौ द्वौ बभूवतुरिंदमौ ॥
ज्येष्ठो बल्लालनामाभूत् कनीयान्राघवाभिधः ॥ ५६ ॥
कनीयसस्तुतनयैः सदाशिव इति स्मृतः ॥
स तु वीरः कलावस्मिन् जामदग्न्य इवाभवत् ॥ ५७ ॥
एवं प्रजाः पालयति बाजिराजे समाययौ ॥
कलिना प्रेरिता काचिद्यवनी वारकामिनी ॥ ५८ ॥
मस्तानीति समाख्याता तरुणी कोकिलस्वरा ॥
बाजिराजं समभ्येत्य ननर्त च तथा जगौ ॥ ५९ ॥
तस्या गीतेन नृत्येन रूपेण च विमोहितः ॥
कंचित्कालं तथा सार्कं रेमे वीश्वराग्रणीः ॥
तस्याः पुत्रः समजनि प्रतापनयशीलभाक् ॥
नाम्ना समशरः ख्यातस्तस्मादल्ली तथाभवत् ॥ ६० ॥
यवनीसंगमात्तस्य तपः सुस्राव संचितम् ॥
कलिस्त्वतीव हृष्टः सन्ननर्त च तथा जगौ[२७] ॥
राज्ञाज्ञप्तो बाजिराजः कौबेरीं हरितं ययौ ॥
मल्लारिणारिणा युक्तः सेनाधीशेन दुर्हृदार्भे ॥ ६१ ॥

हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यमित्यमरः । ततः आगतं ततस्त्यं । अव्ययात् त्यप् । अवापि प्राप्तं । कर्मणि लुङि चिणः परस्य लुक् ॥ ५५ ॥

अथ तयोः संततिवर्णनपूर्वकं इतिहासांतरमाह । बाजिराजस्येति ॥ ५६ ॥

अथ वेश्यायां जातं वंशमाहत्रिभिः । एवमित्यादिभिः ॥ ५८ ॥

राज्ञेति । राज्ञा शाहुना आज्ञप्तः बाजिराजः दुर्हृदां दुर्जनानां अरिणा मल्लारिणा मल्लारिनाम्ना सेनाधीशेनयुक्तः सन् कुबेरस्य इयं कौबेरी तां कौबेरीं उत्तरां । तस्य देमित्यणिङीप् । हरितं दिशं । दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चताइत्यमरः । ययौ जगाम ॥ ६१ ॥

---

२४. 'बाजिनौभिः संप्रेषयामास' पा० भे०. २५. 'चिमाजि सज्ञस्यसुतः' पा० भे०. २६. 'अधिकोयं श्लोकः क्वचित्' २७. 'अधिकोयं श्लोकः क्वचित्' २८. 'समाययौ बाजिराजः प्रस्थितोऽथोत्यत्तरांदिशम्' । मल्लारिरीतिविख्यातं सेनान्यं सेनयान्वितम् ॥' पा० भे०.

अग्रतः प्रेषितस्तेन शूरो होलकराभिधः ॥
उदग्दिग्राजराजानां राजीरजयदाशु सैः ६२ ॥
प्राप्य तीरं चलन्नीरं रेवाया द्विजराडसौ ॥
ज्वरातुरः सन् शत्रूणां कालः कालवशं ययौ[30] ॥ ६३ ॥
पाणिषड्रसनिशाकरोन्मिते शालिवाहनशके प्रधानपः
नर्मदामधिवसन्तनुं जहौ दीनविप्रजनपालनक्षमः ॥ *
राणुः स्थाणुपदाब्जपूजनपरः कश्चित्कुशाग्राग्रधी-
र्बालः पंकजभूपदोद्भवजनुर्धर्मं निजं चिन्तयन् ॥
आगत्य द्विजराजबाजिसचिवं भक्त्या सिषेवे सदा
राजाधीश्वरशाहुबाहुजकृपापात्रं सुगोत्रं प्रभुम्[31] ॥ ६४ ॥
प्रधानाधिपती रात्रावेकदागान्नृपगृहान् ॥
उपानहौ प्रगृह्यास्य बहिस्तस्थौ स बालकः ॥ ६५ ॥

अग्रतइति तेन वाजिराजेन अग्रतः अग्रे प्रेषितः शूरः होलकराभिधः होलकरोपनामा सः मल्हारिः उदीचा चासौदिक् च उदग्दिक् । पुंवत्कर्मधारयेत्यादिना पुंवद्भावः । उदग्दिशि राजराजाः राजाधीशाः । राजाहः सखिभ्यष्टच् । तेषां राजीः पंक्तीः आशु शीघ्रं अजयत् ॥ ६२ ॥

प्राप्येति । शत्रोः कालः सः स्वयं चलत् चंचलं नीरं यस्मिन् तच्चलन्नीरं रेवायाः नर्मदायाः तीरं प्राप्य ज्वरेण आतुरः अभिभूतः सन् कंचित् कालं वसन् कालवशं मरणं ययौ प्राप्तः ॥ ६३ ॥

अथ सिंहावलोकनेन तस्यैव सेनाधिपतेश्चरित्रं तद्वंशचरित्रं चाह यावत्समाप्ति । राणुरिति । स्थाणोः शिवस्य । स्थाणू रुद्र उमापतिरित्यमरः । पदाब्जं तस्य पूजनं तत्र परः आसक्तः । कुशस्य अग्रं कुशाग्रं अतिसूक्ष्मेत्यर्थः । कुशाग्राग्रमिवधीर्यस्य सः । पंकजभूर्ब्रह्मा तस्य पदं चरणः तदुद्भवः शूद्रः । पद्भ्यां शूद्रो अजायतेति श्रुतेः । तस्माज्जनुर्जननं यस्य तथोक्तः कश्चिद्राणुर्नाम बालः निजं धर्मं विप्रसेवारूपं चिंतयन् सन् । राज्ञां अधीश्वरः शाहुः तत्संज्ञो यः बाहुजः क्षत्रियः तस्य कृपायाः पात्रं । गां पृथ्वीं त्रायतेऽसौ गोत्रः । शोभनश्चासौ गोत्रश्च सुगोत्रः तं । यद्वा अपत्यं पौत्रप्रभृतिगोत्रमिति पाणिनिसंकेतितं पौत्रप्रभृति अपत्यं शोभनं

---

२९. 'अग्रतः प्रेषयामासस्वंहोलकरसंज्ञितम् । उदीचं सदिशं गत्वातत्रत्यानजयत्परान् ' ॥ पा० भे०. ३०. 'स्वयं रेवातटं प्राप्य ज्वरेणातीवपीडितः । तत्रैवन्यवसत्कंचित्कालं कालवशंगतः ' । पा० भे०. ३१. 'राणोजीतिसुतः कश्चिच्छूद्रजातिसमुद्भवः । विप्रसेवापरो धर्मः शूद्रस्येति द्विजोत्तमान् ॥ श्रुत्वाशिक्षेतत्पादौ वृत्तिं चास्माद्विचिंतयन् । नयेनविनयेनापि शमेनच समन्वितः । पा० भे०. * अधिकोऽयंश्लोकः क्वचित्

उरोधृतसुपादुकं दृढतरं शयानं चिरं
विलोक्य सचिवाधिपः समुपहर्तुमेते यदा ॥
शशाक न तदा शिशुर्बलवता समुत्थापितो
निधाय पुर एव ते स्वयमपि प्रभोस्तस्थिवान्[32] ॥ ६६ ॥
तदाप्रभृति बालेऽस्मिन्नस्य प्रीतिरवर्धत
गुणिन्येव गुणज्ञानां पक्षपातो न पामरे ॥ ६७ ॥
शौर्यौदार्यसमायुक्तं तं दासं विनयान्वितं
उदीचीं प्रेषयामास ससैन्यं राजकार्यकृत्[33] ॥
सिंदेनामधरो ज्योतिःपादद्वन्द्वनिषेवकः[34] ॥
उदीचीं स दिशं जित्वा सर्वं राज्ञे करं ददौ ॥ ६८ ॥
राणुर्वीरो दारिता[35]रातिराशिर्दाता दीनप्राणिरक्षाप्रवीणः ॥
वीणावाद्यारञ्जितस्वान्तवृत्तिर्वृत्तिंवृत्याहीनविप्रेष्वकार्षीत् ॥६९॥

गोत्रं यस्येति सुगोत्रः तं प्रभुं निग्रहानुग्रहसमर्थं । द्विजराजो यः वाजिनामा सचिवः प्रधानः तं आगत्य सिषेवे सेवितवान् ॥ ६४ ॥

प्रधानेति । प्रधानानां अधिपतिः बाजिराजः एकदा एकस्मिन् दिवसे रात्रौ नृपस्य शाहोः गृहान् प्रासादं अगात् । सः बालकः अस्य बाजिराजस्य उपनह्येते ते उपानहौ पादत्राणे । उपपूर्वात् नहबंधने अस्मात्क्विप् दीर्घश्च । प्रगृह्य बहिः तस्थौ ॥ ६५ ॥

उरइति । सचिव[illegible] अधिपः बाजिराजः दृढतरं यथा स्यात् तथा उरसि धृते सुपादुके येन तं उरोधृतसुपादुकं चिरं शयानं बालं विलोक्य ते पादुके समुपहर्तुं यदा न शशाक तदा बलवता बलिष्ठेन अन्येनेत्यर्थः । समुत्थापितः अतिप्रयासेन मन्याधः करं दत्वा उत्थापित इत्यर्थः । सः शिशुः ते पादुके प्रभोः पुर एव नत्वन्यत्र निधाय स्वयमपि पुरः तस्थिवान् अतिष्ठत् ॥ ६६–६७ ॥

दक्षिणस्यां करवीरसमीपे स्थिता कुलदेवता ज्योतिः ॥ ६८ ॥

राणुरिति । दारिताः अरातीनां शत्रूणां राशयोयेन स दारितारातिराशिः दाता दीनाः ये प्राणिनः तेषां रक्षायां रक्षणे प्रवीणश्चतुरः वीणारूपं यद्वाद्यं तेन आसमंताद्रेजिता स्वांतस्य मनसः वृत्तिः येन तथोक्तः एतेन गानकलाभिज्ञ इतिदर्शितं ।

---

३२. उरोधृतपदत्राणः शिश्येन्द्राविमोहितः । प्रधानस्तादृशं दृष्ट्वा हस्तात्ते हर्तुमुद्यतः । नैवाशक्नोद्यदातंतु यत्नेनोत्थापयच्छिशुम् । उत्थितः स प्रधानस्य स्थापयामास ते पुरः ॥" पा० मे०. ३३. अधिकोयं श्लोकः क्वचित् । ३४. शिदे इत्यभिधायुक्तो वीरवर्यः स शूद्रराट्' पा० मे०. ३५. 'मारिता०' पा० मे०.

जित्वा सर्वामुत्तरां तारितस्वः स्वीयाचारैश्चारुदृग्दीर्घदर्शी
कीर्तिं भूमौ राजसिंहस्य तस्य तन्वन्नासीदुत्तरस्यां स तस्याम् ॥ ७० ॥
तस्माज्जज्ञे माधवो वीरवर्यो योऽसौ सर्वं भूतलं निर्जिगाय ॥
म्लेच्छान्भूपान्बर्बरान्दुर्विनीतान्हत्वा राज्यं कण्टकोनं चकार ॥ ७१ ॥
कामादीनामान्तराणां रिपूणां शास्ता हन्ता बाह्यशत्रुव्रजस्य ॥
स्वीयैः स्वच्छैर्यः प्रतापैर्विरेजे भूमावस्यां राजकीर्तिं विसन्वन् ॥ ७२ ॥
तस्मिन्वंशे तादृशो नैव जज्ञे कश्चिन्नैवं जायते वा कदापि
स्नानं पानं जान्हवीवारिणो यो नित्यं चक्रे दूरदेशस्थितोऽपि[३६] ॥
यदीयपाणिस्थितखड्गधारां मन्येऽतुलां कल्पलतां यतः सा ॥
मर्त्यानमर्त्यान्विदधाति शत्रून्कुप्येतरच्चापि धनं प्रसूते ॥ ७३ ॥
नारिभिः परनारीभिः दृष्टं स्पृष्टमुरःस्थलम् ॥
अदर्शि गोपवनिताप्रियभक्तस्य यस्य च ॥ ७४ ॥
यदीयकरगा खड्गधारा भागीरथी ध्रुवम् ॥
पापा अपि परे यस्याः स्पर्शनाद्यान्ति दिव्यताम् ॥ ७५ ॥

राणुर्नाम वीरः वृत्या उपजीविकया हीनेषु विप्रेषु वृत्तिं उपजीविकां अकार्षीत् कृतवान् ॥ ६९ ॥

जित्वेति । स्वीयैः स्वकीयैः आचारैः आचरणैः कर्मभिरिति यावत् । तारिताः स्वे स्वकीयाः येन तथोक्तः चारा एव दृक् यस्य । दीर्घं पश्यतीति दीर्घदर्शी सः राणुर्नाम वीरः तस्य शाहोः तस्यां उत्तरस्यां कीर्तिं तन्वन् विस्तारयन् सन् आसीत् ॥ ७० ॥

अथ तदीयं वंशं तद्वंश्यानां चरितं चासमाह । तस्मादिति । तस्मात् राणुनाम्नः माधवः जज्ञे । कंटकैः शत्रुभिः ऊनं कंटकोनं चकार कृतवान् ॥ ७१ ॥

कामादीनामिति । अंतरे शरीरे भवाः आंतराः तेषां कामादीनां शास्ता । बहिर्भवाः बाह्याः ये शत्रवः तेषां व्रजस्य हंता । शेषं सुगमं ॥ ७२ ॥

अथ माधवमेववर्णयति यदीयेत्यादिभिः षड्भिः । यदीयेति । अहमितिशेषः अतुलां अनुपमां यदीयपाणिस्थितखड्गधारां कल्पलतां मन्ये यतः सा मर्त्यान् शत्रून् अमर्त्यान् देवान् विदधाति । कुप्येतरच्चापिधनं प्रसूते सः माधवः वीरराट् जयतीति षष्ठेनान्वयः ॥ ७३ ॥

नारिभिरिति । अरिभिः गोपवनिताप्रियः श्रीकृष्णः तस्य भक्तस्य यस्य भूपतेः दृष्टं नादर्शि न दृष्टं । परेषां अन्येषां नारीभिः उरस्थलं न स्पृष्टं ॥ ७४ ॥

यदीयेति । यस्या यं यदीयः यदीयश्चासौ करश्च यदीयकरः यदीयकरं गच्छतीति

---

३६. अधिकोयं श्लोकः क्वचित् ।

यस्मिंस्तुरङ्गमधिरोहति देवराजः
प्रस्थापयत्यखिलयानवराणि सद्यः ॥
दिव्याङ्गना अपि विभूषणभूषिताश्च
माल्यानि कल्पतरुजानि महाधनानि ॥ ७६ ॥
यस्मिन्खड्गकरे तुरङ्गमगतेऽसंख्याश्ववाहैर्युते
स्वस्थानं प्रविहाय निर्गतवति प्रद्योतनः कंपते ॥
शत्रूणां निचयः स्वमण्डलयुतः शेषोऽपि पातालके
राजाधीश्वरवन्द्यवन्दितपदद्वंद्वे द्विजस्वस्तरौ ॥ ७७ ॥
युद्धे योऽर्जुनवाद्रिणौ रविजबद्वाने तु गन्धर्ववत्-
वित्ते यक्षकुलेशवज्जनकवद्दाने नये धर्मवत् ॥
पत्न्यां चापि गिरीशवद्वितरणे यः कर्णवत्काव्यवद्
बुद्धौ भूपवरार्चितो विजयते श्रीमाधवो वीरराट् ॥ ७८ ॥

यदीयकरगा खड्गधारा भागिरथी ध्रुवं मन्ये । यतः पापाअपि पापवंतोपि परे शत्रवः यस्याः स्पर्शनात् दिवि भवाः दिव्याः दिव्यानां भावः दिव्यता तां देवत्वं यांति गच्छंति ॥ ७५ ॥

यस्मिन्निति । यस्मिन् माधवे तुरगं अधिरोहति सति देवराजः इंद्रः अखिलानि यानि यानवराणि विमानानि तानि विभूषणैः विभूषिताः दिव्यांगनाः अप्सरसः महाधनानि माल्यानि पुष्पाणि सद्यः तत्कालं प्रस्थापयति । अयं पलायमानं दीनं शरणागतं च न हंति समरे अग्रतः युध्यमानमेव हंति तस्मादिंद्र एतेन हतानां वीराणामानयनार्थं विमानादीनि प्रेषयतीत्यर्थः ॥ ७६ ॥

यस्मिन्निति । राजाधीश्वराणां वंद्याः तैः वंदितं पादपद्मं यस्य तस्मिन् द्विजानां स्वस्तरौ कल्पवृक्षे असंख्याश्ववाहैर्युते खड्गकरे तुरंगमगते यस्मिन् स्वस्थानं स्वाश्रितदेशं प्रविहाय प्रस्थितवति सति प्रद्योतनः सूर्यः । प्रद्योतनो दिनमणिरित्यमरः । कंपते स्वमंडलभयादितिभावः । स्वमंडलयुतः शत्रूणां निचयः कंपते । कोशसैन्यादिराहित्यादितिभावः । पातालमेव पातालकं तस्मिन् पातालके । स्वार्थेकः । शेषोपि कंपते । असंख्यातसैन्यभारादिति भावः ॥ ७७ ॥

युद्धे इति यः युद्धे अर्जुनेन तुल्यं अर्जुनवत् । तेन तुल्यं क्रिया चेद्वतिरिति वति प्रत्ययः । एवमग्रेपि । रिपौ रविजेन तुल्यं रविजवत् यमवत् गानेतु । गंधर्ववत् वित्ते यक्षकुलेशवत् कुबेरवत् दाने जनकवत् नयेधर्मवत् पत्न्यांचापि गिरीशवत् सांबवत् वितरणे दाने कर्णवत् यः बुद्धौ काव्यवत् शुक्रवत् भूपवरैः अर्चितः सः श्रीमाधवः वीरराट् जयति ॥ ७८-७९ ॥

क्षणेषु लुब्धाः सकलाः कलास्तं सिषेविरे दास्यमुपेत्य भूपम्
संपत्तिरेनं युवतीव भेजे रुष्टा विपच्छत्रुगृहं जगाम ॥ ७९ ॥
तत्सूनुहरिनन्दनेन सदृशः शीलेन धर्म्येण यो
धर्मं भूपवरं जिगाय यशसा यः पूरयामास गाम् ॥
यः शत्रुव्रजकक्षमक्षतयशा युद्धेऽदहद्भूपराट्
श्रीमान्दौलतनामभाग्विजयते राजाधिराजः सुधीः ॥ ८० ॥
तन्मंत्री शशिवंशभूषणमणिः श्रीकृष्णपादार्चन-
प्राप्तश्रीः श्रिततापवारणचयप्रध्वंससिंहः सुधीः ॥
विद्वद्धर्यमनोगतार्थरचनासंपूर्तिकल्पद्रुमो
दीनांधादिदयापरो विजयते शिष्टाग्रणीर्धार्मिकः ॥
कीर्त्या येन महीतलं कबलितं भूत्याऽखिलं भूतलं
दानेनाखिलविप्रमंडलमथो शत्रुः प्रतापानलैः ॥
देहः पुण्यचयेन बुद्धिसचिवो ज्ञानेन चालिंगितः
सोयं दौलतराजमंत्रिमहितः शिष्टाग्रणीराजते ॥
वाचं कल्पलतां मन्ये यदीयां यन्मुखोद्गता ॥
स्वर्णराशीन् रूप्यराशीन् रत्नराशीन्फलत्यलम् ॥
सहस्रशो द्विजा यस्य गेहे पायससंयुतान् ॥
लड्डुकान् मण्डकान्नित्यं भुजते तुष्टमानसाः ॥*
सोऽयं यन्त्रवराढ्यनिर्जितरिपुव्रातो वती घोटकि-
व्राजापूरितभूतलोऽखिलमहीदेवालिकल्पद्रुमः ॥
दीनान्धव्रजपालनोऽहितमहाखड्गोऽवनीपालको-
ष्णीषोद्वर्तिसुमाल्यराञ्जितपदो वर्वर्ति सर्वोपरि ॥ ८१ ॥

तदिति । हरेः इंद्रस्य यः नंदनः पुत्रः अर्जुनः तेन सदृशः । यद्वा हरेः सूर्यस्य नंदनेन कर्णेन सदृशः । यद्वा हरेः विष्णोः नंदनेन मदनेन सदृशः । यद्वा हरेः इंद्रस्य नंदनेन जयंतेन सदृशः । यद्वा हरेः वायोः नंदनेन भीमेन हनुमता वा सदृशः । यद्वा हरेः चंद्रस्य नंदनेन बुधेन सदृशः । यद्वा हरेः यमस्य नंदनेन धर्मेण सदृशः । यद्वा हरेः इंद्रस्य नंदनेन वालिना सदृशः । यद्वा हरेः सूर्यस्य नंदनेन सुग्रीवेण सदृशः धर्मादनपेतं धर्म्यं तेन धर्म्येण शीलेन । धर्मपथ्यर्थन्यायादनपेते इति यत्प्रत्ययः । कक्षं तृणं । गां पृथिवीं । गौर्भूमिरचलानंतेत्यमरः । अर्कमर्कटमंडूकविष्णु-वासववायवः । तुरंगसिंहशीतांशुयमाश्च हरयो दश । शेषं स्पष्टं ॥ ८० ॥

सोयमिति । यंत्रवराणि तोफाः घोटकिनो अश्वारोहः । माल्यानि मालाः । वर्वर्ति ।

* चत्वारः *लोकाअधिकाइमेकचित्

कन्या चाप्यखिला बलोत्तमतमा बालाभिधा राजते
विद्वत्कल्पलता सुशीलमहिताऽहल्यां विजिग्ये कृतैः ॥
कार्यैर्या यवनान्निपूत्रिजमतिप्रौढ्याजयत्साधुना
ह्यास्ते गालवदुर्गमत्र निकषा भ्रातापि तत्रैव सः ॥ ८२ ॥
स्वाहाग्नेर्महिषी यथा सुरपतेः पत्नी शची वा गुरो-
स्तारा वा जनकात्मजा रघुपतेः कृष्णस्य वा रुक्मिणी ॥
शंभोः शैलसुताथवाखिलगुरोर्विष्णोः पयोधेः सुता ॥
श्रीमद्दौलतनामराजमहिषी सा बायजाख्या तथा ॥ ८३ ॥
हिन्दुः सिन्धुसुताप्रियांघ्रिकमलद्वन्द्वार्चनाबापित-
श्रीः संपद्भरमानिताखिलमहीदेवो नृपेन्द्राधिपः ॥
उद्दण्डानिपातपातितमुदुर्वृत्तव्रजो वीरपो
भ्रातास्या अपि राजते जनिमतां मान्यो वदान्याग्रणीः ॥ ८४ ॥
कर्णं सवर्णं तरुमप्यनल्पं कल्पं न मन्येऽर्थिजनार्थितं यौ ॥
अयच्छतां यच्छति यद्द्विजेभ्यो यो याचितं याचितमप्यनल्पम् ॥८५॥
नलरामयुधिष्ठिराः पुरा त्रियुगीवाडवकामपूरकाः ॥
इह दानपतेरभावतो द्विजवैन्ये सति यः समुद्यतः ॥ ८६ ॥
अयं कल्पद्रुमः सा हि कल्पवल्ली मता मम ॥
उभावपि सुपुत्राढ्यौ फलतो द्विजहेतवे ॥ ८७ ॥
विश्वं ब्रह्मतया सर्वं पश्यन्तावपि लोकवत् ॥
व्यवहारदशायां यौ क्रीडतां तौ सुतैः सह ॥ ८८ ॥
इति श्रीशिवकाव्ये पुरुषोत्तमविरचिते दशमश्चमत्कारः

वृत्तं तदीयं स निशम्य राजा बल्लालसंज्ञं सुतमस्य वीरम् ॥
आनीय तातादधिकं गुणौघैश्चक्रे प्रधानं महितं हितं तम् ॥ १ ॥

यङ्लुङन्तमिदंलटो रूपं ॥ ८१ ॥

अभितः परितः इत्यादिनानिकषायोगे द्वितीया ॥ ८२-८८ ॥

॥ इति श्रीशिवकाव्यव्याख्यायां स्वयंकृतायां दशमश्चमत्कारः ॥

वृत्तमिति । सः राजा शाहुः तस्य इदं तदीयं बाजिराज-संबंधि वृत्तं परलोकगमनरूपं निशम्य श्रुत्वा अस्य बाजिराजस्य सुतं वीरं गुणौघैः तातात् अधिकं अतएव महितं पूजितं हितं हितकर्तारं तं बल्लालसंज्ञं आनीय प्रधानं चक्रे । मुख्यप्रधानाधिकारं दत्तवानित्यर्थः ॥ १ ॥

बल्लालनामा ललितैर्वचोभिर्दमेन शांत्या विनयेन भूपम् ॥
अतोषयद्दीनजनप्रपालं भूपालसंघार्चितपादपीठम् ॥ २ ॥
पितृव्यपुत्रेण सदाशिवेन वीराग्रगण्येन समन्वितः सन् ॥
चकार सर्वं नृपकार्यजातं राजापि चिंतारहितो बभूव ॥ ३ ॥
राजाधिराजोऽपि गुणान् समीक्ष्य प्रधानवर्यस्य सतां मतस्य ॥
मेने मनस्येवमयं मदीयं राज्यं स्वतातादधिकं हि रक्षेत् ॥ ४ ॥
प्रधानपोऽसौ निखिलाः प्रजाः स्वा अपालयद्राजनिदेशकारी ॥
वैरी न चासीदिह कश्चनास्य क्षोणीतले राजविवर्धितस्य ॥ ५ ॥
द्विजातयस्तस्य गुणज्ञतां तामाकर्ण्य विद्याभ्यसने प्रवृत्ताः ॥
भटा अपि प्रोद्भटशस्त्रशिक्षाः कलाधराश्चापि कलाः प्रपेठुः ॥ ६ ॥
राजा प्रजारंजनकृत्प्रधाने मुख्ये समाधाय स राज्यभारम् ॥
तस्मिन् गताधिर्हरपादपद्मसमर्चने सादरतां दधार ॥ ७ ॥
सप्तारतः पुण्यपुरीमुपेत्य प्रासादवर्ये विहिते स्वपित्रा ॥
महेंद्रधिष्ण्ये मघवानिव स्वाः प्रजा अवन् विप्रपतिः स रेमे ॥ ८ ॥
तस्मिन् प्रधाने सति भारतेऽस्मिन् प्रजा अमन्यंत भुवं दिवं ताः ॥
प्रधाननाथं तु बिडौजसं तं भूपं रमावल्लभभागभाजम् ॥ ९ ॥
पुण्याभिधेया नगरी विधेया ऽमरावतीवेति जगाद यत्तत् ॥
कृत्वा गते स्वः पितरि ह्ययं तु ततोधिकां तां विदधे पुरीं स्वाम् ॥ १० ॥

बल्लालेति । दमेन बाह्येंद्रियनिग्रहेण शांत्या अंतरिंद्रियनिग्रहेण ललितैः मनोहरैः वचोभिः भूपं अतोषयत् ॥ २ ॥

पितृव्येति । पितृव्यस्य चिमाजीनाम्नः पुत्रेण ॥ ३ ॥ राजेति ॥ ४।५।६ ॥

राजेति । गतः आधिर्मानसी व्यथा यस्मात् स गताधिः । पुं[illegible]धिर्मानसी व्यथेत्यमरः ॥ ७ ॥

सप्तारतइति मघवानिव इंद्रइव रेमे अवन् रक्षन् सन् ॥ ८ ॥

तस्मिन्निति । ताः प्रजाः तद्देशीयाः लोकाः अस्मिन् भारते खंडे तस्मिन् बल्लाले प्रधाने सति भुवं दिवं अमन्यंत । प्रधाननाथं तु बिडौजसं इंद्रं अमन्यंत । तं शाहुं रमावल्लभभागभाजं विष्ण्वंशभाजं अमन्यंत ॥ ९ ॥

पुण्याभिधेति । इयं पुण्याभिधा नगरी अमरावती विधेया कर्तव्या इति यत् जगाद तत् कृत्वा पितरि बाजिराजे स्वः स्वर्गं । स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालया इत्यमरः । गते सति अयं बल्लालः तां स्वां पुरीं ततः अमरावत्याः अधिकां विदधे चकार ॥ १० ॥

---

१. '०जानदन०' पा० भे० ।

त्दृष्टाः पुष्टा रत्नहाराभिमृष्टा दृष्टा लोकैः कौतुकाल्लोकशिष्टाः ॥
यांत्यायांति प्रत्यहं राजगेहाद्यस्यां कार्ये सन्नियुक्ता नृयानैः ॥ ११ ॥
दरिद्रशब्दार्थभवानुभूतिं यस्यां वसन् कोऽपि जनो न लेभे ॥
हेमादिरूपं प्रतिपद्य लक्ष्मीर्गृहे गृहे क्रीडति यन्नितांतम् ॥ १२ ॥
रसालैस्तमालैस्तथा नारिकेलैः सुरंभाकुलैः पूगपोतैश्च युक्ताः ॥
अपश्यन् यदुद्यानमाला विशाला नरा दृष्टिमंतस्त एवेति मन्ये ॥ १३ ॥
निश्येव चंद्रः कुमुदौघमेव विकासयत्येष मुखाब्जजातम् ॥
यदीयनारीवदनेंदवस्तु नक्तं दिवं[२] पश्य विकासयंति ॥ १४ ॥
द्विगुणं त्रिगुणं चतुर्गुणं वा लभते यत्र धनं वणिक् च मूल्यात् ॥
कृतविद्यमहीसुरः सुवर्णं प्रतिवर्षं लभते यथेष्टमेव ॥ १५ ॥

अथ ततोधिकां तां विदधे पुरीं स्वामित्युक्तं तदेव आधिक्यं सप्तदशभिः श्लोकैराह हृष्टा इत्यादिभिः । हृष्टाः नित्यं धनलाभादिति भावः । अतएव पुष्टाः । रत्नानां हारैः अभिमृष्टाः युक्ताः । अतएव लोकैः कौतुकाद्दृष्टाः स्वस्य तथाभूतत्वाभावादितिभावः । लोकेषु जनेषु शिष्टाः उत्तमाः राजाश्रितत्वादितिभावः । कार्ये राजकार्ये सन्नियुक्ताः नराः यस्यां नगर्यां राजगेहान् नृयानैः शिबिकाभिः प्रत्यहं दिने दिने यांति गच्छंति आयांति आगच्छंति ॥ ११ ॥

दरिद्रेति । दरिद्रशब्दस्य योर्थः तस्मात् भवा या अनुभूतिः तां दारिद्र्यमित्यर्थः । शेषं स्पष्टं ॥ १२ ॥

रसालैरिति । ये नराः रसालैः आम्रैः तथा तमालैः नारिकेलैः शोभनैः रंभाणां कदलीनां कुलैः पूगानां क्रमुकाणां पोतैः बालैश्च युक्ताः विशालाः विस्तीर्णाः यस्याः उद्यानानि यदुद्यानानि यदुद्यानानां मालाः पंक्तीः अपश्यन् त एव दृष्टिमंतः इत्यहं मन्ये । [illegible]मेव दृष्टेः साफल्यमित्यर्थः ॥ १३ ॥

निश्येवेति । एषः चंद्रः निश्येव न तु दिवेति भावः कुमुदानां कैरवाणां ओघं संघमेव न त्वन्यसरोजसंघमितिभावः । विकासयति । यस्याः इमाः यदीयाः । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । एवमग्रेपि । यदीयाश्च ता नार्यश्च यदीयनार्यः यदीयनारीणां वदनानि त एव इदं वस्तु नक्तं दिवं रात्रंदिवं । अचतुरेत्यादिना निपातनात् साधुत्वं । मुखाब्जानां जातं जातिस्तां । जातं जात्योघजन्मसु इत्यमरः । विकासयंति पश्य ॥ १४ ॥

द्विगुणमिति । किंच यत्र यस्यां नगर्यां वणिक् मूल्यात् धनात् द्वौ गुणौ आवृत्ती यस्येति द्विगुणं वा अथवा त्रिगुणं वा चतुर्गुणं प्रारब्धानुरूपमित्यर्थः । धनं लभते न तु कदाचिदपि मूल्यान्न्यूनमिति भावः । कृतविद्यः महीसुरः ब्राह्मणः वर्षे वर्षे इति

२. 'दिवानिशं' 'रात्रं दिवं' इति वा पाठः ।

रमणी रमणीव या सुवासा रमणानंदविधायिनींदुवक्त्रा ॥
अतिरम्यपयोधरा धरायामुदितेवामरभूभुवं विजेतुम् ॥ १६ ॥
वजित्रस्ताः शैलसंघा विशंकं वासस्थानं निर्भयं नाध्यगच्छन् ॥
वासोराशिव्याजतो यां समेत्य हट्टे हट्टे संवसंतीति मन्ये ॥ १७ ॥
विनिमयं वितनोति यदापणे रजतकांचनकैः सततं जनः ॥
व्यवहृतिस्तु न कुप्यमयी तथा कदशनं वसनं मलिनं न च ॥ १८ ॥
गृहैः कलत्रैः शिशुभिः पुरस्ताज्जलैः सदन्नैर्वसनैश्च पश्चात् ॥
आकर्षितं पांथमनस्तु यत्र चक्रे निजं लक्षणमेव सत्यम् ॥ १९ ॥

प्रतिवर्षं सुवर्णं इष्टं अनतिक्रम्य इति यथेष्टमेव लभते ॥ १५ ॥

रमणीति । रमयति सा रमणी । शोभनो वासो यस्यां सा सुवासा । अन्यत्र शोभनो वासो वसतिः यस्याः सा । यद्वा सांतमिदं शोभनानि वासांसि वस्त्राणि यस्यां सा सुवासा । अन्यत्र शोभनं वासो वस्त्रं यस्याः सा सुवासाः । रमंते ते[1] विलासिनः तेषां आनंदं विदधातीति रमणानंदविधायिनी । अन्यत्र रमणस्य भर्तुः आनंदं अन्यत् समानं । ताच्छील्येणिनिः नांतत्वात्ङीप् । इंदुरिव वक्त्रं पुरद्वारं यस्याः सा अन्यत्र चंद्रुरिव वक्त्रं मुखं यस्याः सा इंदुवक्त्रा । धरतीति धरा । पचाद्यच् । अति रम्यं पयोदकं तस्य धरा धर्त्री । अतिरम्यौ पयोधरौ यस्याः सा अतिरम्यपयोधरा या नगरी रमणीव सुंदरीव, अमराणां भूः स्वर्लोकः तस्याः भवतीति अमरभूभूः अमरावती तां अन्यत्र अमरभूभुवं अप्सरसं विजेतुमिव उदिता । उत्प्रेक्षोपमाश्लेषाणांसंसृष्टिः ॥ १६ ॥

वजीति । वजी इंद्रः तस्मात् त्रस्ताः भीताः । कुत्सा गोत्रभिद्वज्रीत्यमरः । शैलानां पर्वतानां संघाः निर्भयं निःशंकं वासस्य स्थानं नाध्यगच्छन् न प्रापुः । अतः यां नगरीं समेत्य वाससां राशयस्तेषां व्याजः मिषं तस्मात् इति वासोराशिव्याजतः हट्टे हट्टे आपणे आपणे संवसंतीति मन्ये । यस्यां वाससां राशयः पर्वतसमानाः हट्टे हट्टे संतीत्यर्थः । उत्प्रेक्षालंकारः ॥ १७ ॥

विनिमयमिति । जनः यस्याः आपणे रजतकांचनकैः विनिमयं क्रयविक्रयं सततं करोति । कुप्यमयी ताम्रादिमयी व्यवहृतिः नास्ति । तथा कुत्सितं अशनं कदशनं मलिनं वसनं च न नास्ति ॥ १८ ॥

गृहैरिति । यत्र यस्यां नगर्यां स्वकीयैः गृहैः कलत्रैः । कलत्रं गेहिनी गृहमिति धनंजयः । शिशुभिः बालैश्च पुरस्तात् अग्रे आकर्षितं । यत्र यस्यां नगर्यां जलैः सदन्नैः वसनैश्च पश्चात् आकर्षितं पांथमनस्तु निजमेव लक्षणं ' संकल्पविकल्पात्मकं

---

१. ' ०वामरराट्पुरीव० ' पा० मे०.

विलोक्य बुद्ध्या विकलीकृतं तत् क्लीबैरपि क्लीबतरं तु यत्र ॥
वर्षास्विहैवावसतिर्विधेया सिद्धांतमेवं निजमेव नीतम् ॥ २० ॥
ऋणत्रयं भूमितले प्रसिद्धं तथा चतुर्थं व्यवहारजन्यम् ॥
ऋणत्रयान्नैव नरोऽविमुक्तस्तुरीयकं यत्र तु नैव दृष्टम् ॥ २१ ॥
भक्तं सुगंधि युवतीं सुगुणां तनूजं
वश्यं सुसूक्ष्मवसनं दधि माहिषं च ॥
हैयंगवीनमपि शंभुरता लभंते
लोको निदर्शनमदोविषये यदीयः ॥ २२ ॥
प्रासादशैलशिखरोपगृहाधिरूढा ।
बालाः शरत्सकलचंद्रजिदाननाब्जाः ॥

अन' इति लक्षणं सत्यं चक्रे । गृहगमनस्यात्यावश्यकत्वात् एतन्नगरीवासस्याप्यत्यावश्यकत्वान्निश्चयं नाधिजगामेत्यर्थः ॥ १९ ॥

विलोक्येति । यत्र यस्यां नगर्यां बुद्ध्याक्लीबैरपि गृहादिभिः । यद्यपि शिशुशब्दस्य न क्लीबपुंसकत्वं तथापि छत्रिन्यायेन तत्राप्यारोपितं । विकलीकृतं अतिशयेन क्लीबमिति क्लीबतरं पांथमनः विलोक्य वर्षासु इहैव अस्यामेव नगर्यां आवसतिः विधेया इति निजं सिद्धांतमेव नीतं । निश्चयात्मका बुद्धिरिति लक्षणमस्या ज्ञेयं । एतेन स्वगृहाद्यपेक्षया अत्रत्यजलादीनामाधिक्यं दर्शितं ॥ २० ॥

ऋणत्रयमिति । ऋणानां त्रयं ऋणत्रयं देवऋणं ऋषिऋणं पितृऋणमितित्रिविधं ऋणं भूमितले प्रसिद्धं तथा व्यवहारजन्यं चतुर्थं प्रसिद्धं यत्र ऋणत्रयात् अविमुक्तः नरः न दृष्टः । सर्वोपि ऋणत्रययुक्त एवासीदिति भावः । तुरीयकं चतुर्थं व्यवहारजन्यं । चतुरश्चयतावाद्याक्षरलोपश्चेति छप्रत्ययांताच्चतुःशब्दात् स्वार्थेकः । यत्रैव दृष्टं । यत्र सर्वेपि यज्ञकर्तारः वेदपाठकाः पुत्रवंतः धनवंतश्चासन्निति भावः ॥ २१ ॥

भक्तमिति । शंभौरताः शंभुरताः शिवभक्ताः शोभनः गंधो यस्येति सुगंधि । गंधस्येदुत्पूतिसुसुरभिभ्य इति इत्वं । भक्तं ओदनं । भिस्सास्त्रीभक्तमंधोन्नमोदनोस्त्रीसदीदिरित्यमरः । सुगुणां युवतीं तनूजं वशंगतः वश्यः तं वश्यं स्वाधीनं वशंगत इति यत् । सुसूक्ष्मं च तद्वसनं च सुसूक्ष्मवसनं महिष्याः इदं माहिषं । तस्येदमित्यण् । दधिह्यस्तनगोदोहोद्भवं हैयंगवीनं घृतं नवं । हैयंगवीनं संज्ञायामिति निपातनात् साधुत्वं । लभंते अमीषां विषये अदो विषये यस्याः अयं यदीयः । बृद्धाच्छ इति छप्रत्ययः । लोकः निदर्शनं दृष्टान्तः । शाल्यन्नमनवं नवं घृतं मुद्गसूपमथ माहिषं दधि । सूक्ष्मवस्त्रमबला च कोमला को लभेत शिवपूजनं विनेति श्लोकोक्तफलभाजः सर्वेपि यत्र शिवभक्ताः संतीतिभावः ॥ २२ ॥

प्रासादेति । शरदि यः सकलः पूर्णः चंद्रः शरत्सकलचंद्रः शरत्सकलचंद्रं

दिव्यांगना इव विभांति सदैव यत्र ।
पीनोन्नतातुलकुचास्तडिदंबराढ्याः ॥ २३ ॥
अधिकं सुखदा पुरी सुराणामिति यज्ञान् मनुजा विधाय जग्मुः ॥
नहि तत्र सुखं तयेति मत्वा भनिपातस्य मिषेण यां व्रजन्ति ॥ २४ ॥
जलाशयानां मिषतः पयोधिः शुद्धो हि यस्यां प्रतिरथ्यमास्ते ॥
क्रमेण मां वाडवतामवह्निर्जग्रेदितीवापभयो विलीनः ॥ २५ ॥
दुग्धादीनां सिंधवो यत्र लीना भीता नूनं वाडवाद्वोषु सर्वे ॥
सायं प्रातः प्रत्यहं दुग्धदोहा यद्यप्येताः सर्वदा यत्क्षरन्ति ॥ २६ ॥
तस्यां त्रसन्नभसि मास्यखिलद्विजेभ्यो ।
दत्त्वा पितुः समधिकं स तु दक्षिणां ताम् ॥
सम्भारके नृपतिसन्निहितः प्रजानां ।
कार्याणि शास्त्रमनुसृत्य चकार धीरः ॥ २७ ॥

जयतीति शरत्सकलचंद्रजित् शरत्सकलचंद्रजित् आननाब्जं । यासां ताः शरत्सकलचंद्रजिदाननाब्जाः । पीनौउन्नतौ अतुलौ कुचौ यासां ताः तथोक्ताः तडिदिव अंबरं वस्त्रं तेन आढ्याः युक्ताः । प्रासादा एव शैलाः पर्वताः तेषां शिखराणि ऊर्ध्वप्रदेशाः तेषु यानि उपगृहाणि सौधानि तानि अधिरूढाः बालाः दिविभवाः दिव्याः दिव्याश्च ता अंगनाश्च दिव्यांगनाः ता इव सर्वकालं यत्र यस्यां नगर्यां विभांति शोभंते । सर्वांगनापेक्षया सौंदर्यात् सौवर्णवसनत्वात् उच्चगृहाधिरूढत्वाच्च देवांगना इव विभांतीत्यर्थः ॥ २३ ॥

अधिकमिति । मनुजाः सुराणां पुरी अमरावती अधिकं पुण्यनगर्यपेक्षया अधिकं सुखदा इति हेतोः यज्ञान् विधाय तामितिशेषः । जग्मुः अनंतरं तत्र अमरावत्यां तया पुण्यपुरीसदृशं सुखं न इति मत्वा भानां ताराणां मिषेण पातः पतनं तस्य मिषेण यां नगरीं व्रजंति गच्छंति ॥ २४ ॥

जलाशयानामिति । वाडवह्निः वडवानलः क्रमेण प्रथमं क्षाराब्धिग्रासे प्रवृत्तः अनंतरमिक्षुरसोदं ग्रसेदिति क्रमेणांतिमं मांग्रसेत् इतीव यस्यां विलीनः शुद्धः पयोधिः शुद्धोदकसमुद्रः अपभयः सन् जलाशयानां मिषतः व्याजात् रथ्यायां रथ्यायामिति प्रतिरथ्यं आस्ते । यथार्थेऽव्ययीभावः ॥ २५ ॥

दुग्धादीनामिति । दुग्धादीनां क्षीरादीनां सिंधवः समुद्राः वाडवाद्वह्नेर्भीताः संतः यत्र यस्यां वर्तमानासु गोषु लीनाः अंतर्हिताः नूनं । यत् यस्माद्धेतोः एताः गवः सायं संध्याकाले प्रातः प्रातःकाले अहनि अहनीति प्रत्यहं दुग्धः निष्काशितः दोहः क्षीरं यासां ताः दुग्धदोहाः यद्यपि तथापि सर्वदा सर्वकालं क्षरंति स्तनद्वारा स्रवंति ॥ २६ ॥

---

१. '०भाः' पा० भे० ।

दाता नृपालगणमूर्धजमौलिमाला-
संघोद्गलत्प्रचुरगंधरजः समृद्ध्या ॥
संरंजितामलपदो जयति प्रकामं ।
श्रीशाहुनाम नृपतिर्भुवि कल्पवृक्षः ॥ २८ ॥
यस्मिन् शासति भारतं द्विजवरा यज्ञक्रियातत्परा ।
राजानो जितवैरिणो निजमहीलोकान् मुदा बिभ्रति ॥
वाणिज्याप्तसमस्तभोगनिचया वैश्यास्तदन्ये सुखं ।
क्रीडन्ति स्वपुरेषु नित्यमुदिता देवैः सदा वर्षति ॥ २९ ॥
दानप्रदातृजनसंस्तवनप्रसंगे विद्वत्सदस्युपमितिः स बभूव कर्णः ॥
तावन्न यावदुदियाय नरेंद्रवंद्यपादारविंदयुगलो भुवि शाहुराजः ॥३०॥

तस्यामिति । तस्यां नगर्यां वसन् वीरः बल्लालः नभसि मासे श्रावणे मासे अखिलद्विजेभ्यः पितुः बाजिराजात् समधिकं यथास्यातथा तां प्रसिद्धां दक्षिणां दत्ता अनंतरं सप्तारके नृपतिसन्निहितः शाहुसमीपस्थः सन् शास्त्रं नीतिशास्त्रं अनुसृत्य प्रजानां लोकानां कार्यं चकार । दातेति । नॄन् पालयंति ते नृपालाः राजानः तेषां गणाः संघास्तेषां मूर्धजाः मूर्धस्थिताः ये मौलाः मुकुटाः तेषु याः माला: माल्यानि तेषां संघः समूहः तस्मात् उद्गलत् यत्प्रचुरगंधं रजः परागः तस्य समृद्धिः वृद्धिः तया संरंजिते अमले निर्दोषे पदे चरणौ यस्य तथोक्तः भुवि कल्पवृक्षः श्रीयुक्तः शाहुनामनृपतिः प्रकामं अत्यंतं जयति सर्वोत्कर्षेण वर्तते ॥ २८॥

यस्मिन्निति । यस्मिन् भारतं भरतखंडं शासति सति । द्विजवराः ब्राह्मणाः यज्ञक्रियायां तत्पराः आसन्नितिशेषः । जितवैरिणः राजानः क्षत्रियाः निजा या मही पृथ्वी तत्संबंधिनो लोकान् मुदा हर्षेण बिभ्रति पुष्णंति वैश्याः वाणिज्याप्त-समस्तभोगनिचयाः आसन् । तदन्ये शूद्रादयः नित्यमुदिताः संतः स्वपुरेषु आसन् स्वस्ववृत्या सर्वेपि हृष्टा आसन्नित्यर्थः । देवः पर्जन्यः सदा सर्वकालं वर्षति ववर्ष । वर्तमानसामीप्ये वर्तमानवद्वेतिवर्तमाने लट् ॥ २९ ॥

दानेति । सः कर्णः विदुषां सदः विद्वत्सदः तस्मिन् विद्वत्सदासि । स्त्रीनपुंसकयोः सद इत्यमरः । दानप्रदातारः ये जनास्तेषां संस्तवनं तस्य प्रसंगः तस्मिन् उपमितिः उपमानं तावद्बभूव यावत् नरेंद्रवंद्यपादारविंदयुगलः शाहुराजः भुवि न उदियाय नोदितः ॥ ३० ॥

---

५. श्रीशंभुभूपतनयः शिवनामभूपः' 'द्विजकल्पवृक्षः' इति च पा० भे० । ६. 'ोभूतलं' पा० भे० । ७. 'कालेहरिर्वर्षति' पा० भे० । ८. 'ोशिवनामभूपः' पा० भे० ।

दधाति पादं न गदोऽपि यस्य राज्ये रिपुभ्योऽभिभवः कुतो नु ॥
वर्षति मेघा नितरां स्वकाले चोराभिभूतेस्तु कुतोऽत्र वार्ता ॥ ३१ ॥
स शाहुराजो जयति प्रकामं सुदक्षिणो दक्षिणदिक्पतिर्यम् ॥
संप्राप्य विप्रा निजमर्थितार्थं सद्यो लभन्तेऽल्पितकल्पवृक्षम् ॥ ३२ ॥
वार्ध्यब्जनाकबलिसद्मसु कामिनीनां ।
बिंबाधरेऽमृतमयं स्वरुचिप्रपञ्चः ॥
मन्ये तृणेषु तदमुष्य यतो द्विषंतो ।
धृत्वा मुखे मृतिभयं समरे त्यजन्ति ॥ ३३ ॥
तस्मिन्नृपे पालयति प्रजास्ताः कालोऽतियातः सुमहाननेन ॥
तुल्यं कलौ नाऽन केऽपि चक्रू राज्यं कलौ दारितवैरिणेह ॥ ३४ ॥
तप्रभावं प्रसमीक्ष्य तस्य कलिः स्वकृत्ये न बभूव शक्तः ॥
अपत्यवीतत्वमलं विधाय नृपे प्रहृष्टः स बभूव नीचः ॥ ३५ ॥
सिंहासनारोहणवर्षतो यः सैकं नृपो विंशतिवर्षयुग्मम् ॥
चकार राज्यं जितशत्रुवर्गः सुराधिपाराधनलब्धकीर्तिः ॥ ३६ ॥

दधातीति स्पष्टार्थमेतत् ॥ ३१ ॥

स इति । सुतरां दक्षिणः कुशलः सुदक्षिणः ॥ ३२ ॥

वार्ध्यब्जेति । वार्धिः समुद्रः अब्जश्चंद्रः । नाकः स्वर्गः । बलिसद्म पातालं कामिनीनां युवतीनां बिंबमिव अधरः तस्मिन् अमृतं अयं स्वरुचेः प्रपंचः विस्तारः । तत् अमृतं तृणेषु अस्तीत्यहं मन्ये । यत् यस्माद्धेतोः अस्य द्विषंतः मुखे धृत्वा समरे संग्रामे मृतिभयं मरणभयं त्यजंति ॥ ३३ ॥

तस्मिन्निति । तस्मिन् नृपे ताः प्रजाः पालयति सति महान् कालः अतियातः अतिक्रांतः । अस्मिन् कलौ अनेन तुल्यं केपि राजानः राज्यं न चक्रुः अग्रे केपि न करिष्यंति । किं भूतेन दारिताः वैरिणो येन तथोक्तेन । ॥ ३४ ॥

तप इति । कलिः तस्य राज्ञः तपसः प्रभावं सामर्थ्यं प्रसमीक्ष्य स्वस्य कृत्ये शक्तः समर्थः न बभूव । नीचः सः कलिः नृपे अपत्येन वीतः रहितः तस्य भावः तत्त्वं विधाय अलं अत्यंत प्रहृष्टः बभूव । यद्वा अपत्यवीतत्वमेव मलः तं विधाय ॥ ३५ ॥

सिंहासनेति । एकेन साहितं सैकं विंशतिवर्षाणां युग्मं विंशतिवर्षयुग्मं एकचत्वारिंशद्वर्षाणीत्यर्थः । शेषं स्पष्टं ॥ ३६ ॥

---

९. '०कृतःस्यात्' पा० भे० । १०. '०कृतोहि०' पा० भे० । ११. '०हृते रिपुभयं०' पा० भे० ।

कलौ नृपाणां परमायुरत्र त्रिंशत्समास्तत्र तु राज्यभोगः ॥
पुण्यस्य राज्ञो द्विदशप्रसंख्यसमाप्रमाणोऽयमनल्पभोगः ॥ ३७ ॥
स सप्तषष्टिप्रमितायुरासीद्धर्ता रिपूणां स्वजनस्य भर्ता ॥
कर्ता क्रतूनां द्विजवर्यधुर्यैर्यासमाराधनलब्धसंपत् ॥ ३८ ॥
वार्ध्यं गतं देहमवेक्ष्य राजा सर्वान् समाहूय स मंत्रिमुख्यान् ॥
अपृच्छदेकैकमिदं वदाद्य तुरंगसादिप्रवराः कियन्तः ॥ ३९ ॥
सहस्रयुग्मं त्रिसहस्रमेकश्चत्वारि पंचाष्टसहस्रसंख्याः ॥
तुरंगवाहा इति ते यदोचुर्बल्लालनामानमिदं जगाद ॥ ४० ॥
त्वद्वाजिवाहाः कति चात्र संति पुण्याभिधे चापि पुरे कियन्तः ॥
सत्यं वदेत्थं नृपतेर्वचस्तच्छ्रुत्वाऽब्रवीत्सन्नतिपूर्वमेषः ॥ ४१ ॥
संत्यत्र चत्वार्ययुतानि वाजिचरप्रवीरा हि तथैव तत्र ॥
पुण्याभिधे निर्जितवैरिवर्गा मत्तातताताप्तगमा महान्तः ॥ ४२ ॥
संग्रामवार्ताश्रवणप्रहर्षा य आहवे देहमिमं तृणाल्पम् ॥
मन्यंत एते धनमानभूषावस्त्रार्चिताः कुंतमुखायुधाढ्याः ॥ ४३ ॥

कलाविति । अत्र अस्मिन् कलौ नृपाणां परं उत्कृष्टं आयुः । यद्वा परमं च तत् आयुश्च परमायुः त्रिंशत् समाः वर्षाणि तत्र वर्षेषु मध्ये पुण्यस्य राज्ञः द्व्यधिकाः दश द्विदश द्विदशप्रसंख्या यासां ताः द्विदशप्रसंख्याः द्विदशप्रसंख्याश्च ताः समाश्च द्विदशप्रसंख्यसमाः द्विदशप्रसंख्यसमाः प्रमाणं यस्य स द्विदशप्रसंख्यसमाप्रमाणः राज्यभोगः । अयं तु अनल्पः भोगो राज्यभोगः यस्य स अनल्पराज्यभोगः आसीत् ॥ ३७ ॥

स इति । द्विजवर्येषु धुर्याः श्रेष्ठाः तैः तद्द्वारेत्यर्थः क्रतूनां यज्ञानां कर्ता । कृतकर्मणोः कृतीति षष्ठी ॥ ३८ ॥

वार्ध्यमिति । सः राजा देहं वार्ध्यं वृद्धत्वं गतं अवेक्ष्य सर्वान् मन्त्रिमुख्यान् समाहूय तुरंगसादिप्रवराः अश्वारोहश्रेष्ठाः कियंतः संतीदं वद इति एकैकं अपृच्छत् ॥ ३९ ॥

सहस्रेति स्पष्टं ॥ ४० ॥ त्वदिति ॥ ४१ ॥

श्रुत्वाब्रवीत्सनतिपूर्वमेष इत्युक्तं तदेवाह संत्यत्रेति द्वाभ्यां । चत्वारि अयुतानि चत्वारिंशत्सहस्राणि । मत्तातताताः पिता इत्यनेन परंपरागताः नत्वाधुनिका इति दर्शितं ॥ ४२ ॥

संग्रामेति । आहवे युद्धे । अभ्याघातसमाघातसंग्रामाभ्यागमाहवा इत्यमरः ॥ ४३ ॥

निशम्य वाक्यं नरपोऽतितुष्टस्तदैव राज्यं निजमस्य हस्ते ॥
प्रत्यर्पयामास स वाजिदंतिकोशादिभिः संयुतमत्युदारः ॥ ४४ ॥
पितामहेन प्रपितामहेन स्वयं च तातेन सदार्जितं यत् ॥
प्रधानसात्तत्सलकं चकार सुपात्रनिक्षेपनिराकुलात्मा ॥ ४५ ॥
सर्वान् समभ्यर्च्य धनेन वस्त्रैरंतःपुरस्थान्नगरस्थितांश्च ॥
आबालवृद्धं स जगाद राजा प्रधानवर्यो ह्यवितास्मि वो वः ॥ ४६ ॥
ततो नृपः क्रोशयुगे स्थितां तां कृष्णां समभ्येत्य नदीमदीनः ॥
पत्नीसहायः प्रतिपूज्य चक्रे स्तुतिं सुराधीश्वरदेहजायाः ॥ ४७ ॥

कृष्णे कृष्णतनूद्भवे भगवति ब्राह्मी लिपिः पापिनो ।
नायं यास्यति नाकमित्यवितथा भालस्थिता याभवत् ॥
तां मिथ्या न करोषि वारिणि निजे स्नातं दिवं यन्नय-
स्येनं तत्तव वर्णने भुवि नरो नैवास्ति कश्चिद्विभुः ॥ ४८ ॥

निशम्येति । निशम्य श्रुत्वा अत्युदारः स शाहुः ॥ ४४ ॥ पितामहेनेति । प्रधानाधीनं प्रधानसात् ॥ ४५ ॥

सर्वानिति । वः युष्मान् अविता रक्षिष्यति । यद्वा वः युष्माकं अविता रक्षकः अस्तीतिशेषः ॥ ४६ ॥

तत इति । पत्नी सहायो यस्य सः पत्नीसहायः । अनेन पत्न्या सहगमनं कृतमिति सूचितं । सुराधीश्वरो विष्णुः तस्य देहः तस्माज्जाता तस्याः । कृष्णा कृष्णतनुः साक्षादिति कार्तिकमाहात्म्यं ॥ ४७ ॥

स्तुतिं चक्रे इत्युक्तं तामेवाह कृष्णे इत्याद्यष्टाभिः पद्यैः । कृष्णे इति । कृष्णो विष्णुः । विष्णुर्नारायणः कृष्ण इत्यमरः । तस्य तनुः शरीरं तस्मादुद्भवा तत्संबुद्धौ हे कृष्णतनूद्भवे । अत्र पाद्मे कार्तिकमाहात्म्ये कृष्णादिनद्युत्पत्तिप्रकारोलिखितः सोत्रानुसंधेयः । हे भगवति कृष्णे । अयं पापी नाकं न यास्यति स्वर्गं न गमिष्यति । नाकः स्वर्गोंतरिक्षयोरिति विश्वः । इति या पापमस्यास्तीति पापी तस्य पापिनः । अत इति ठनाविति इनिः । भालस्थिता ब्राह्मी ब्रह्मण इयं ब्राह्मी । तस्येदमित्यण् । न वितथा अवितथा सत्या लिपिः अभवत् आसीत् । तां मिथ्या न करोषि निजे वारिणि स्नातं एनं पापिनं । अन्वादेशे एनादेशः । दिवं स्वर्गं नयसि तत्तस्मात् कारणात् तव वर्णने भुवि कश्चित् नरः विभुः समर्थः नास्ति । ब्रह्मलिपेः संरक्षणं स्वर्गं प्रति नयनं च विरोधस्तस्माद्विरोधाभासालंकारः । परिहारस्तु ना अयमितिच्छेदः । नृशब्दस्य प्रथमा अयं ना नरः नाकं स्वर्गं यास्यति इति ॥ ४८ ॥

---

१२. 'ोप्रभुः' पा० भे० ।

मातः पापचया मया हि[13] विहिता निःशंकमंकस्थितम् ।
बालं कालमुखान्न मोचयसि चेत्क्लेशापहाख्यां त्यज ॥
भानुर्भाति न वा क्षमा न सहते चंद्रो न चंदत्यथो ।
वायुर्वाति न वेति कुत्रचिदियं वाणी श्रुता किं वद ॥ ४९ ॥
आधारात्तव देवि पातकततिस्त्रैलोक्यमातः कृता ।
कीनाशप्रभवं भयं न गणितं लोकापवादादपि ॥
देवेंद्रैरभिवंदिते भगवति त्वन्नाथमंबाधुना ।
कालश्चेद्ग्रसिता व्रजेत्तव लयं कीर्तिः पुरा संचिता ॥ ५० ॥
दैत्यद्विद्पदसंभवांगुलिनखाग्रोद्भूतभागीरथी-
पाथस्तुंगतरंगसंगतमरुत्स्पर्शक्षणे निर्मलाः ॥
जायंते मनुजा व्रजंति च दिवं त्वं यत्स्वयं श्रीहरिः
साक्षान्मृत्युभयाद्विमोचयसि चेन्नाश्चर्यमेतत्तव ॥ ५१ ॥

मातरिति । हे मातः मया तु पापचयाः पापसंघाः निःशंकं विहिताः त्वदाश्रयादिति भावः अंके उत्संगे स्थितं बालं मां कालस्य यमस्य मुखात् न मोचयसि चेत्क्लेशान् अपहंतीति क्लेशापहा क्लेशापहा चासौ आख्या क्लेशापहाख्या तां त्यज मुंच । अपेच क्लेशतमसोरिति डः । न तु तव रक्षणे मम शक्तिर्नास्ति क्लेशापहाख्यां त्यक्ष्यामीति चेदाह । भातीति भानुः नभाति न प्रकाशते । क्षमते सा क्षमा पृथ्वी न सहते न क्षमते । चंदतीति चंद्रः न चंदति नाह्लादयति वातीति वायुः न वाति न वहति । इति वाणी कुत्रचित् श्रुता किं वद । इदं यया कदापि न भवति तथा क्लेशापहाख्यात्यागोपि न तस्मान्मद्रक्षणमेव तव युक्तमित्यर्थः ॥ ४९ ॥

आधारादिति । त्रयो लोकास्त्रैलोक्यं । चतुर्वर्णादित्वात्स्वार्थेष्यञ् । त्रैलोक्यस्य माता त्रैलोक्यमाता तत्संबुद्धौ हे त्रैलोक्यमातः हे देवि मया तव आधारात् पातकानां ततिः कृता कीनाशो यमः । कृतांते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु इत्यमरः । तस्मात्प्रभवं भयं न गणितं लोकापवादादपि भयं न गणितं देवेंद्रैः अभिवंदिते हे भगवति हे अंब त्वं नाथो यस्य तं मां कालः ग्रसिता चेत्पुरा संचिता ते कीर्तिः लयं व्रजेत् गच्छेत् ॥ ५० ॥

दैत्येति । दितेः कश्यपपत्न्याः अपत्यानि दैत्याः । दित्यदित्यादित्येत्यादिना ण्यः तान् द्वेष्टीति दैत्यद्विट् वामनः तस्य पदं वामचरणः तस्मात्संभवा या अंगुलिः अंगुष्ठः तस्य नखं तस्य अग्रं तस्मात् उद्भूता या भागीरथी तस्याः यत्पायः उदकं तस्य तुंगाः उच्चाः ये तरंगास्तैः संगतो यो मरुत् वायुस्तस्य यःस्पर्शक्षणः

१३. 'ंतु' पा० भे० । १४. 'ंपापा०' पा० भे० । १५. 'ंयत्' पा० भे० ।

देवीयं सुरनिम्नगा किमु वरा कृष्णाथ वेत्थं पुरा
विज्ञातुं सुरलोकभूतल इमे पात्रे तुलाया विधौ ॥
कृत्वा संतुलयत्यहो हि गुरुतायोगाद्भुवं नात्यजत्
कृष्णा स्वर्गनदी स्वनाम निखिलं याथार्थ्यमेवानयत् ॥ ५२ ॥
कृष्णे कृष्णजले त्वदीयसलिले मज्जंति ये मानवा
दिव्यैर्यानवरैः प्रयांति हि यदा वैकुंठलोकं तदा ॥
निंदंति स्वतपांसि यज्ञनिकरान् स्वर्गंगता मानवाः
कृष्णास्नानफलं प्रपश्यत सुराः श्रीकृष्णरूपा इमे ॥ ५३ ॥
गोदां याति वियन्नदीति निखिला जल्पंति लोकाः स्फुटं
व्यासश्चापि लिलेख मंदमतिभिर्नो दृश्यते तत्र सा ॥

तस्मिन् मनुजाः निर्मलाः निर्दोषाः जायंते च परं दिव्यं स्वर्गं व्रजंति त्वं यत्स्वयं साक्षात् श्रीहरिः श्रीविष्णुरेव असीति शेषः । अतःमृत्योः भयात् विमोचयसि चेत् तव आश्चर्यं न । हरेरवतारो वामनः दितिपुत्रद्वेष्टा ब्राह्मणद्वेष्टेति गूढाशयः तस्य वामपदादिपरंपरया उत्पन्नायाः भागीरथ्याः एतत्सामर्थ्यं त्वं तु ब्रह्मपत्नीशापेन नदीत्वं प्राप्तः श्रीविष्णुरेव । कृष्णा कृष्णतनुः साक्षाद्वेण्या देवो महेश्वर इत्यादि वचनप्रामाण्यात् असि । अतः मृत्युभयवारणं तव नाघटितमित्यर्थः ॥ ५१ ॥

देवीति । विधौ ब्रह्मणि इयं देवी सुरनिम्नगा भागीरथी वरा श्रेष्ठा किमु अथवा कृष्णा वरा इत्यं विज्ञातुं सुरलोकश्च भूतलं च सुरलोकभूतले इमे पात्रे कृत्वा संतुलयति सति अहो इत्याश्चर्ये कृष्णा गुरोर्भावः गुरुता जाड्यं तस्य योगात् संबंधात् । वोतोगुणवचनादिति विकल्पात् ङीब्भावः । भुवं नात्यजत् स्वर्गनदी भागीरथी निखिलं स्वनाम याथार्थ्यमेव अनयत् । स्वर्गनद्याः भूनदीत्वं न युक्तमिति-उपरिगतेतिभावः ॥ ५२ ॥

कृष्णे इति । कृष्णं जलं यस्याः सा कृष्णजला तत्संबुद्धौ हे कृष्णजले हे कृष्णे तव इदं त्वदीयं त्वदीयं च तत् सलिलं च त्वदीयसलिलं तस्मिन् ये मानवाः मज्जंति स्नांति ते यदा दिव्यैः यानवरैर्विमानैः वैकुंठलोकं व्रजंति तदा स्वर्गं गताः मानवाः स्वतपांसि श्रमसाध्यानि केचिद्यज्ञनिकरान् ज्योतिष्टोमादीन् श्रमसाध्यान् निंदंति । निंदनेकारणमाह । हे सुराः हे देवाः इमे मानवाः श्रीकृष्णरूपाः सरूपतामुक्तिभाज इत्यर्थः इदं कृष्णास्नानफलं प्रपश्यत । अल्पायासेन महत्फलं प्राप्तमेतैरस्माभिस्तु बह्वायासैरल्पफलं क्षयिष्णु च लब्धं धिगस्मान् धिगस्मत्तपांसीत्यर्थः ॥ ५३ ॥

गोदामिति । वियन्नदी भागीरथी सुरपूजिते कन्यायां सति गोदां याति इति

---

१६. 'परं' पा०भे० ।

कन्यायां सुरपूजिते स्फुटतरं त्वां सा तु संयाति यत्
तन्मन्ये जनपापसंघहरणोपायव्रतं शिक्षति ॥ ५४ ॥
वैकुंठः परिमाणवान् भगवती पाथोधिजैका तथा
यस्तु त्वत्सलिले निमज्जति नरो विष्णुत्वमागच्छति ॥
एवं विष्णुशतैर्निरंतरमितैर्लोके प्रपूर्णे पुरः
स्थास्यंति क्वनु विष्णवो जलधिजाहेतोर्विवादे कथम् ॥ ५५ ॥
इदमष्टकमष्टसिद्धिदं पठतां पापचयापहं परम् ॥
पुरुषोत्तमतुष्टिकारकं पठनीयं मनुजैरुषस्यदः ॥ ५६ ॥
एवं स्तुत्वा राजराजो नदीं तां तस्यास्तीरे दक्षिणे संस्थितः सन् ॥
विप्राग्र्येभ्यः सर्वदानानि दत्त्वा नत्वा सर्वान् मीलिताक्षो बभूव ॥५७॥
शर्वं सांबं संस्मरन् प्राणवायुमूर्ध्वं नीत्वा मूर्धमध्यं विभिद्य ॥
हित्वा देहं पंचभूतैरुपेतं नाकं यातो दिव्यदेहं दधानः ॥ ५८ ॥

निखिलाः जनाः जल्पंति वदंति । व्यासश्चापि लिलेख पुराणेषु इत्यर्थः । सा भागीरथी तत्र गोदायां मंदमतिभिः अज्ञैः न दृश्यते चर्मचक्षुरगोचरेत्यर्थः । सा तु भागीरथी तु स्फुटतरं स्पष्टं महाबलेश्वरपर्वते प्रवाहरूपेणोत्तरत आगत्य त्वां संयाति यत् तत्तस्माद्धेतोः जनानां पापसंघहरणे यः उपायः तस्य व्रतं शिक्षते अभ्यस्यति इति अहं मन्ये । तव तदपेक्षया ज्येष्ठत्वात् ज्ञानाधिक्याच्च पापहरणोपायाभ्यसनार्थमेवायातीत्यर्थः ॥ ५४ ॥

वैकुंठ इति । वैकुंठः परिमाणवान् इयत्तावान् भगवती पाथोधिजा लक्ष्मीः एका यस्तु त्वत्सलिले नरः निमज्जति सः विष्णुत्वं आगच्छति एवं निरंतरं इतैः गतैः विष्णूनां शतैः लोके वैकुंठलोके प्रपूर्णे सति पुरः अग्रे विष्णवः क्वस्थास्यंतिजलधिजाहेतोः विवादे कथं स्यात् ॥ ५५ ॥

स्तोत्रपाठफलमाह इदमिति । अष्टसिद्धयस्तु । अणिमा महिमा चैव गरिमा लघिमा तथा । ईशत्वं चवशित्वं च प्राप्तिः प्राकाम्यमेवचेत्यमरः ॥ ५६ ॥ अथास्य देहत्यागप्रकारो द्वाभ्यामाह एवमिति । मीलिते अक्षिणी येन सः मीलिताक्षः शर्वमिति ॥५७॥ दिवमिति । अवनतानां जनानां आनंदस्य करणे साधनीभूते । यद्वा अवनतजनानां शरणागतानां आनंदकः रणो यस्य तस्मिन् दिवं स्वर्गं याते गते सति नगरस्य ये नराः नार्यश्च तेषां नयनानि तेभ्यः विनिर्यिताः वारां उदकानां चपलतरधाराः तटवतीं कृष्णाख्यां नदीं अखिलैर्नागरजनैः अनुलंघ्यां विदधुः चक्रुः । अतिशयोक्तिरलंकारः ॥ ५८ ॥

---

५७. ' ०सः ' पा० भे० ।

दिवं याते तस्मिन्नवनतजनानन्दकरणे
रणे शूरे वीरे नगरनरनारीनयनतः ॥
विनिर्यांता वारां चपलतरधारा तदवती-
मतीवानुल्लंघ्यां विदधुरखिलैर्नागरजनैः ॥*

नाम्नैव कृष्णा तटिनी पुरा या तां वर्णतश्चापि तदैव चक्रुः ॥
नार्यः सरोजायतलोचनांतर्वर्त्यंजना निंदितचंद्रवक्त्राः ॥ ५९ ॥

बल्लालनामा स तु वीरवर्यस्तद्देहकृत्यं विहितं तदीयैः ॥
चक्रे धनं चापि ददौ द्विजेभ्यो दंतिव्रजग्रामतुरंगमादीन् ॥ ६० ॥

चिताभुवि स्थापितमत्र लिंगं दृषन्मयं प्रावृषि तज्जलौघैः ॥
मुहुर्मुहुश्चालितमप्यनेजन्नृपस्य पुण्येन तथाधुनापि ॥ ६१ ॥

चंद्रसप्तरसभूमिसंमिते (१६७१) शालिवाहनशके नृपोत्तमः ॥
कीर्तिमत्र विनिधाय सुस्थिरां दिव्ययानवसतिर्दिवं ययौ ॥ ६२ ॥

शाहोः सुतो राम इति प्रसिद्धो रम्यैरगण्यैः सहितो गुणौघैः ॥
तस्मादभूच्छाहुनृपः प्रतापप्रतापितारातिजवो जनेशः ॥ ६३ ॥

नाम्नैवेति । निंदितः चंद्रः यैस्तानि निंदितचंद्राणि निंदितचंद्राणि वक्त्राणि यासां ताः सरोजानि कमलानीव यानि आयतानि विस्तृतानि लोचनानि तेषां अंतर्वर्ति अंजनं कज्जलं यासां ताः तथोक्ताः नार्यः या नदी पुरा पूर्वं नाम्नैव कृष्णा आसीदितिशेषः । तां वर्णतः कृष्णेन वर्णेन तदैव कृष्णां नीलां चक्रुः । पूर्वं या कृष्णेति संज्ञा तां तस्मिन् राज्ञः वियोगक्षणे एव यथार्थां कृतवत्यः न तु सर्वदा ॥५९॥ बल्लालेति । बल्लालनामा प्रधानराट् तदीयैः राजबांधवैः विहितं तत्कालोचितं उत्तरकृत्यं चक्रे । दंतिनां व्रजाः समूहाः यद्वा दंतिनो गजाः व्रजा गावां गोष्ठाः तान् ददौ ॥ ६० ॥ चिताभुवीति । अत्र कृष्णायां चितायाः भूः चिताभूः तस्यां चिताभुवि स्थापितं दृषन्मयं पाषाणप्रचुरं तत् लिंगं शिवलिंगं प्रावृषि वर्षाकाले जलानां ओघैः मुहुर्मुहुश्चालितमपि एजतीति एजत् न एजत् अनेजत् अकंपमानं अस्ति नृपस्य शाहोः पुण्येन अधुनापि अस्मिन्नपि काले तथा अनेजत् अकंपमानं अस्ति प्रवाहेपि तिष्ठतीत्यर्थः ॥ ६१ ॥ चंद्रेति । दिविभवं दिव्यं दिव्यं च तत् यानं च दिव्ययानं विमानं तत्र वसतिर्यस्य सः नृपोत्तमः अत्र अस्मिन् लोके ॥ ६२ ॥ अथास्य दत्तपुत्रान्वयमाह यावत्समाप्ति । शाहोरिति । राम इति प्रसिद्धः शाहोः सुतः दत्त आसीदितिशेषः । तस्मात् रामात् पुनः शाहुः अभूत् ॥ ६३ ॥

---

१८. 'धीरे' पा० । * अधिकोऽयं श्लोकः क्वचित्

तदात्मजोयं रिपुदंतिसिंहः प्रतापसिंहो जगतीं सपत्नैः ॥
हृतां पुनः स्वामपहृत्य सर्वामास्तेऽधुना तां परिपालयन् सन् ॥६४॥
यदीयं प्रतापं समाकर्ण्य सर्वे द्विषंतः प्रभीताः प्रजग्मुर्दिगन्तान् ॥
द्विजानां व्रजा आययुर्यत्समीपं प्रतापादिसिंहो जयत्येष राजा ॥ ६५ ॥
भानौ प्रतापो ह्रदिमा न तत्र चंद्रे मृदुत्वं नहि तत्र तापः ॥
प्रतापसिंहे द्वयमप्यदर्शि व्यवस्थया शत्रुजने नते च ॥ ६६ ॥
भूपालाधीश राजन् तव रिपुनिचयो भीतभीतोऽपयातो
देशात्स्वीयाद्दिगंतात्तदनु झटिति ते कीर्तिदूती प्रणुन्ना ॥
धर्तुं याता तमेनं चपलतरमतेस्तस्य दृप्तापकीर्ति-
र्योद्धुं याता प्रयागेऽसितसिततटिनीव्याजतो युध्यतस्ते ॥ ६७ ॥
क्षमां त्वदीयां धरणी गृहीत्वा जनापराधान् सहते नितांतम् ॥
उदारतां कल्पतरुस्त्वदीयामभ्यस्य नूनं वितरत्यनंतम् ॥ ६८ ॥
इति श्रीशिवकाव्ये पुरुषोत्तमविरचिते एकादशश्चमत्कारः ॥ ११ ॥

॥ पूर्वार्धं समाप्तमेतत् ॥

अथ अस्मिन् काले वर्तमानं प्रतापसिंहं वर्णयति यावत्समाप्ति । तदेति । रिपव एव दंतिनो गजाः तेषां सिंहः ॥ ६४ ॥ यदीयमिति । प्रतापः प्रतापशब्दः आदिर्यस्येति प्रतापादिसिंहः प्रतापसिंह इत्यर्थः । तदाख्यः राजा जयति सर्वोत्कर्षेण वर्तते ॥ ६५ ॥ भानाविति । भानौ सूर्ये प्रकृष्टस्तापः प्रतापः तत्र भानौ मृदोर्भावः ह्रदिम्ना मृदुत्वं । पृथ्वादीनां इमानिज्वक्तव्यईति इमानिच् । चंद्रे मृदुतं वर्तते इतिशेषः । तत्र चंद्रे तापः न । प्रतापसिंहे राज्ञि शत्रुजने नते शरणागते च विषये व्यवस्थायां द्वयमपि अदर्शि दृष्टं ॥ ६६ ॥ अथ प्रतापसिंहं प्रतिसभायां यदुक्तं तदेव श्लोकद्वयेनाह हे भूपालेति । भूपालानां अधीश सार्वभौमराजन् तव रिपूणां निचयः भीतभीतः सन् व्याख्यातमेतत्पूर्वं स्वीयाद्देशात् दिगंतं दूरदेशं अपयातः गतः । तदनु तदनंतरं ते तव कीर्तिः दूतीव कीर्तिदूती प्रणुन्ना प्रेरिता सती तं रिपुनिचयं धर्तुं याता गता चपलतरा मतिर्यस्य तस्य रिपुनिचयस्य दृप्ता गर्विता अपकीर्तिः योद्धुं याता प्रवृत्ता ते अकीर्तिकीर्त्यौ प्रयागे असिताच सिताच असितसिते असितासिते च ते तटिन्यौ च असिततसिततटिन्यौ असिततसिततटिन्योः यमुनाभागीरथ्योः व्याजात् इति व्याजतः-मिषात् युध्यतः युद्धं कुरुतः ॥ ६७ ॥ क्षमामिति । स्पष्टार्थमेतत् ॥ ६८ ॥

इति श्रीशिवकाव्यव्याख्यायां काव्यप्रकाशिकाख्यायां स्वयंकृतायामेकादशश्चमत्कारः । पूर्वार्धसमाप्तिमगात् । भगवान् गोपालकृष्णः प्रीयतामेतेन व्याख्यानेन ॥

---

१२. 'स शाहुर्नृपो राजते राजवर्यः' पा० भे० । २०. 'ोयस्मिन्नृपे तद्वय०' 'शाहौनृपे' इति च पा० भे० । २१. 'ोत्यभीक्ष्णम्' पा० भे० ।

शुद्धिपत्रम्।

पृष्ठं	पंक्तिः	अशुद्धं	शुद्धम्.
१०	२	पवनवेगजि- ज्जिवाद	पवनवेग- जिज्जवा
१०	२४	दुःप्रापं	दुष्प्रापं
१३	१३	पूर्वोक्तप्रकरेण	पूर्वोक्तप्रकारेण
१३	२४	पितृणां	पितॄणां
१६	१४	सन्नद्धान	सन्नद्धान्
१७	१९	व्याख्याथां	व्याख्यायां
२०	१३	निश्चियेन	निश्चयेन
२०	२५	प्रतिक्रया	प्रतिक्रिया
२१	५	इत्युत्वा	इत्युक्त्वा
२१	२६	बलेनः	बलेन
२१	२७	गण्यते	गण्यते
२२	७	द्विजवर्य- बाहून	द्विजवर्य- बाहून्
२२	८	शिवप्रदेशं	शिवप्रदेशं
२३	१०	भविता चिरता	भविताऽ चिरता
२३	२७	तकाकी	एकाकी
२७	१०	तन्तू	तस्य
२९	२०	५५	५७
२९	२४	५६	५५
२९	३०	५७	५६
३०	४	शक्त्या	शरुया
३०	१६	पातिव्रत्यक्ष्यन	पातिव्रत्यस्य
३०	१८	प्रतिधाय	प्रविधाय
३०	२८	श्रवणक्षेण	श्रवणक्षणे
३०	२९	यषाम्	येषाम्
३०	३०	शरुया	शक्त्या
३६	९	सपटिशः	सपट्टिशः
४३	३	वरवरिनाथ	वरवीरनाथ
४३	६	शिवाया	शिवायाः
४४	२९	स्वयकृतायां	स्वयंकृतायां
४७	१७	जनानंदकारिन	जनानंदकारिन्
५०	१९	मौंजीयुक्त	मौंजीयुक्तः
५३	१०	पुनश्चाति	पुनश्चेति
५९	२५	समहैः	समूहैः

पृष्ठं	पंक्तिः	अशुद्धं	शुद्धम्.
६०	७	आमत्रय	आमत्रयद्
६३	१५	निश्चयेनः	निश्चयेन
८३	९	मौंजीबंधन	मौंजीबंधनं
८७	१५	विधास्ये	विधास्ये
८७	२१	वशः	वश्यः
८८	६	सितेवतत्	सितेव तत्
८८	१३	प्रणयश्च	मणयश्च
९६	१४	कृत्येत्यर्थः	कृवेत्यर्थः
९७	७	कन्या ब्र°	कन्याब्र°
९७	८	किल क्ष°	खिल क्ष°
१०९	२	निवसत्	न्यवसत्
११३	१	विद्वद्वार्या गे°	विद्वद्भार्यागे°
११३	४	भक्ष्येग्नी°	भक्ष्येऽग्नी°
११७	२	न्यपातयतं	न्यपातयत्तं
११७	४	समां	सभां
१२२	१	दुर्लभेतस्य	दुर्लभैतस्य
१२४	१५	शुद्धोदांतान्	शुद्धोदान्तान्
,,	,,	निजभर्यां	निजभर्त्रां
१२४	२१	सप्तधाभवेनं	सप्तधाभवनं
१२५	११	वैकुठं	वैकुण्ठं
१२५	२५	अपरमसाध्य:	अपरमसाध्यः
१२७	१९	°विहिनो	°विहीनो
१२९	२८	स्थासाम्	स्थासाम्
१३०	७	धनन	धनेन
१३३	२३	धन	धनं
१३९	४	सन्शाचूणां	सच्छचूर्णां
१४३	४	दुविनीतां	दुर्विनीतां
१४४	१३	भागिरथी	भागीरथी
१४५	१	तत्सूनुहरि°	तत्सूनुर्हरि°
१४५	१८	भुजते	भुंजते
१४८	२६	इदवस्तु	इदवस्तु
१४८	२९	मूत्यात	मूल्यात्
१५०	९	°रुढः	°रूढः
१५२	१४	चकार	चकार ॥२७॥
,,	१६	समुहः	समूहः
,,	२६	संस्तवयनं	संस्तवनं
१५५	४	सलकं	सकलं

समाप्तम्।

0046079A



Digitized with financial assistance from the
Government of Maharashtra
on 09 March, 2016